श्रीमदप्पयदीक्षितेन्द्रग्रन्थावलिः - ग्रन्थाङ्कः - ७

श्रीमदप्पयदीक्षितेन्द्रकृतिः

शिवाद्वैतनिर्णयः

सव्याख्ये

शिखरिणीमाला - आदित्यस्तोत्ररत्ने च

CSUGCKL 1
R65
2.
24806
Acc.No: 24806

CAT NO. 2511
HOLD ID. 4225
Book NO. 1.
Location. 17-B-5

CAT. No: 2511
HOLD ID: 4225
BOOK No: 1
LOCATION: 17-B-5

Forwarded Free Of Cost
With The Compliments Of
RASHTRIYA SANSKRIT SANSTHAN
NEW DELHI

[illegible]

Sri Gurubhyo Namaha

Srimad Appayya Deekshitendra Granthavali Series - 7

SIVADVAITA NIRNAYAHA

&

SIKHARINIMALA
ADITYASTOTRA RATNA

(with commentaries)

of

SRIMAD APPAYYA DEEKSHITENDRA

Editor:

Mahamahopadhyaya
Dr. Pullela Sri Ramachandrudu
M.A.,Ph.D.,

R65

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF INDIA)
ACCESSION NO. 24806
DATE 16/6/08

Srimad Appayya Deekshitendra Granthavali Prakasana Samiti
HYDERABAD

First Edition: 2005

Copies : 500

All Rights Reserved by
The S.A.D.G.P. Samiti (Regd.)

Copies can be had from :
Dr.S.Raghavan,
H.No.9-32/1,
Ravindra Nagar Colony,
Hyderabad - 500007
Ph : 27173445

Printed at :
Annapurna Offset
337/B/3,
Beside Provogue Showroom,
Parklane, Secunderabad - 500 003
Ph : 27811495

Price: Rs.220/-

श्रीमदप्पयदीक्षितेन्द्रग्रन्थावलिः - ग्रन्थाङ्कः - ७

श्रीमदप्पयदीक्षितेन्द्रकृतिः

शिवाद्वैतनिर्णयः

सव्याख्ये

शिखरिणीमाला - आदित्यस्तोत्ररत्ने च

सम्पादकः

महामहोपाध्यायः

डा. पुल्लेल श्रीरामचन्द्रः,

M.A., Ph.D.

Rashtriya Sanskrit Sansthan Deemed University • Under Ministry of H.R.D., Govt. Of India •
GURUVAYOOR CAMPUS
PURANATTUKARA
KERALA 680 551
LIBRARY

श्रीमदप्पयदीक्षितेन्द्र ग्रन्थावलिप्रकाशन समितिः

हैदराबाद

विषयसूची

1.	श्रीमुखम्	v - vi
2.	**Foreword**	vii
3.	शिवाद्वैतनिर्णयः (Sivadvaitanirnayaha)	1-76
4.	शिखरिणीमाला (Shikarinimala)	77 - 266
5.	आदित्यस्तोत्ररत्नं (Adityastotraratna)	267 - 305

Phone : (04112) 222115 Email : skmkanchi@md3.vsnl.net.in
Fax : (04112) 224305

Sri Chandramouleeswaraya Namaha:
Sri Sankara Bhaghavadpadacharya Paramparagatha Moolamnaya Sarvagnapeeta
His Holiness Sri Kanchi Kamakoti Peetadhipati

JAGADGURU SRI SANKARACHARYA SWAMIGAL

Srimatam Samsthanam

No.1, Salai Street. Kanchipuram - 631 502.

मुद्रा

स्वस्ति श्रीमदखिलभूमण्डलालंकारत्रयस्त्रिंशत्कोटिदेवतासेवित श्रीकामाक्षीदेवीसनाथ-श्रीमदेकाम्रनाथश्रीमहादेवीसनाथश्रीहस्तिगिरिनाथ साक्षात्कारपरमाधिष्ठान सत्यव्रतनामांकित-काञ्चीदिव्यक्षेत्रेशारदामठसुस्थितानां, अतुलितसुधारसमाधुर्यकमलासनकामिनी धम्मिलसंफुल्ल-मल्लिकामालिकानिष्यन्दमकरन्दझरीसौवस्तिकवाङ्निगुम्फविजृंभणानन्दतुन्दिलितमनीषिमण्डलानां, अनवरताद्वैतविद्याविनोदरसिकानां, निरंतरालंकृतीकृतशान्तिदान्तिभूम्नां, सकलभुवनचक्रप्रतिष्ठापक-श्रीचक्रप्रतिष्ठाविख्यातयशोलंकृतानां, निखिलपाषण्डषण्डकण्टकोत्पाटनेन विशदीकृतवेदवेदान्तमार्ग-षण्मतप्रतिष्ठापकाचार्याणां, श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीजगद्गुरुश्रीमच्छंकरभगवत्पादाचार्याणां-अधिष्ठानेसिंहासनाभिषिक्तश्रीमच्चन्द्रशेखरेन्द्रसरस्वतीश्रीपादानाम्अन्तेवासिवर्य श्रीमज्जयेन्द्रसरस्वतीश्रीपादैः क्रियते नारायणस्मृतिः ।

सर्वतन्त्रस्वतन्त्रैः पदवाक्यप्रमाणपारावारपारीणैः मीमांसकमूर्धन्यैः समाहृतवाजपेयादि-महाध्वरविशेषसमुल्लसितदीक्षाविशेषैः, परिमल-न्यायरक्षामणि-सिद्धान्तलेशसङ्ग्रह-नयमणिमाला-नयमयूखमालिका-न्यायमुक्तावली-विधिरसायन-शिवार्कमणिदीपिका-चित्रमीमांसादि-चतुरधिकशत-ग्रन्थंनिर्माण-चातुरीविशिष्टैः, साक्षात्कृताद्वैतपरतत्वैः., श्रीमदप्पय्यदीक्षितेन्द्रमहोदयैः, विरिचितानां ग्रन्थानामनेकेषाममुद्रितत्वम्, केषां चन प्राचीनकाले मुद्रितत्वेऽपि अद्यत्वे दुलर्भत्वं च पर्यालोच्य, सर्वेषामपि श्रीदिक्षितेन्द्रग्रन्थानां मुद्रापणे आस्तिकलोकस्य महोपकारं मन्वानैः अनेकैः आस्तिकैः श्रीमदप्पय्यदीक्षितेन्द्रग्रन्थप्रकाशनसमितिनाम्ना एकां समितिम् अस्मद्गुरुचरणानां पूज्यश्री महास्वामिनाम् आदेशेन परमानुग्रहेण च संस्थाप्य, एतत्समितिद्वारा श्रीदीक्षितेन्द्रनिखिलग्रन्थमुद्रापणे प्रवृत्तैः आदिमत्वेन ब्रह्मसूत्रप्रथमाध्यायव्याख्याभूतं, अतिसूक्ष्मविचारप्रचुरं न्यायरक्षामणिं मुद्राप्य अनन्तरं द्वितीयसंपुटे शास्त्रसिद्धान्तलेशसङ्ग्रहः, तृतीयसंपुटे दुर्गाचन्द्रकलास्तुतिः, रत्नत्रयपरीक्षा, ब्रह्मतर्कस्तवः, पञ्चरत्नस्तुतिः, आत्मार्पणस्तुतिः, श्रीवरदराजस्तवः, तुरीयसंपुटे आनन्दलहरी,

शिवमहिम्नकलिकास्तुतिः, शिवकर्णामृतम्,, श्रीरामायणतात्पर्यसंग्रहः, भारतसारसङ्ग्रहस्तोत्रम्, पञ्चमसंपुटे कुवलयानन्दः, चित्रमीमांसा, वृत्तिवार्तिकम्, षष्ठसंपुटे न्यायमुक्तावली, नयमयूखमालिका, नयमणिमाला, नयमञ्जरी (चतुर्मतसारसंग्रहः) इत्यादिग्रन्थान् च मुद्राप्य इदानीं सप्तमसंपुटे शिवाद्वैतनिर्णयम्, शिखरिणीमालां, आदित्यस्तोत्ररत्नं च (व्याख्यासहितं) मुद्रापयितुं प्रवर्त्यंते इति विज्ञाय आनन्दभरितान्तरङ्गाः भवामः ।

आस्तिकाः अस्मिन् श्रीदीक्षितेन्द्रग्रन्थमुद्रापणसत्कार्ये सहयोगमातन्वन्तः मारमणोमारमणात्मकरपरमात्मकृपाभाजनीभूताश्च सकलान्यपि मङ्गलान्यवाप्नुयूरित्याशास्महे ।।

यात्रास्थानम् - काञ्चीपुरम्
तारण आषाढ पूर्णिमा
२-७-२००४
नारायणस्मृतिः ।

FOREWORD

This book which contains the following five original works of Sri Appayya Deekshitar is being brought out with the benign blessings of His Holiness Sri Jayendra Saraswathi Swamigal and His Holiness Sri Sankara Vijayendra Saraswathi Swamigal of Sri Kanchi Kamakoti Peetham.

1. **SIVADVAITA NIRNAYA** is a work in prose in which the doctrine of Sivadvaita has been explained.

Srikantacharya in his Brahmasutra Bhashya has established Lord Siva as the supreme being.Whether he accepts Sivavisishtadvaita or Sivadvaita is discussed by Sri Appayya Deekshita in this work and it is maitained that the main purpose of this work is to establish Sivadvaita.

2. **SIKHARINIMALA** is a work containing 60 verses in Sikharini vritta which seeks to propagate the greatness of Siva bhakti and the supreme power of Lord Siva.

3. **SIVA TATTVA VIVEKA** is a commentary on Sikharinimala in which Sri Deekshita quotes extensively from Upanishads, Puranas and Agamas and establishes the supremacy of Paramasiva.

4,5. **ADITYA STOTRA RATNA** and the commentary RATNAPRAKASIKA thereof describe in great detail about Aditya,the Sun God, his chariot, orbit, his horses and also the laws of the Suryopasakas, the greatness of Lord Siva who remains hidden as the inner principle of the Suryamandala and the good that will accrue as a result of Suryopasana.

The Samithi is thankful to Mahamahopadhyaya Dr.Pullela Sriramachandrudu for his painstaking efforts in editing the book.

The Samith is also thankful to Sri R.Venkatrama Ghanapati, Principal, Sri Sankara Gurukula Veda Patasala, Hyderabad, for the help he has been rendering to the Samithi's activities in various ways.

We earnestly hope that the book will be welcomed by Sanskrit scholars in general and students of Vedanta in particular.

S.Raghavan
Hony.Secretary
S.A.D.G.P Samithi
Hyderabad

नीलकण्ठदीक्षितेन अभिवन्द्यमानाः

अप्पय्यदीक्षितेन्द्राः

अप्पय्यदीक्षितेन्द्रानशेषविद्यागुरून्नमस्यामः ।
यत्कृतिबोधाबोधौ विद्वदविद्वद्विभाजनोपाधी ॥
- भट्टोजीदीक्षिताः

श्रीरस्तु

।। शिवाद्वैतनिर्णयः ।।

अप्पय्यदीक्षितकृतः

।। ॐ ।।

श्रीकण्ठशिवाचार्याः
सिद्धान्तं निजगदुः शिवाद्वैतम् ।
तत्किं विशिष्टमभिहित
मविशिष्टं वेति चिन्तयामोऽत्र ।।

आरम्भणाधिकरणादिभाष्यगतैः विशिष्टाद्वैतव्यवहारैराद्यपक्षोऽभिमत इति, अनियमाधिकरणादिभाष्यगतैः निरन्वयोपासकानामिहैव मुक्तिरित्यादिव्यवहारैः द्वितीयपक्षोऽभिमतः इति च प्रतीयते । न च द्वावपि पक्षौ परमसिद्धान्तभावमर्हत इति अनयोरेकः परमसिद्धान्तो निर्णेतव्यः । तदर्थमिह विचारः क्रियते ।

इदमिह तावत् प्रतिभाति । आचार्यैः ब्रह्ममीमांसाभाष्ये यत्र यत्र शिवाद्वैतं निरूपितमनूदितं वा तत्र सर्वत्र विशिष्टाद्वैतमित्येव व्यवहारो दृश्यते । यथा तावदारम्भणाधिकरणे "ब्रह्मप्रपञ्चयोर्न वयमत्यन्तभेदवादिनो घटपटयोरिव; तदनन्यत्वपरश्रुतिविरोधात् । न चात्यन्ताभेदवादिनः । न वा शुक्तिरजतयोरिवैकतरमिथ्यात्ववादिनः, तत्स्वाभाविकगुणभेदपरश्रुतिविरोधात् । न च भेदाभेदवादिनः, वस्तुविरोधात् । किं तु शरीरशरीरिणोरिव गुणगुणिनोरिव च विशिष्टाद्वैतवादिनः" इति । तथा च भोक्त्रापत्त्यधिकरणे "यदुक्तम् पूर्वत्र चिदचित्प्रपञ्चविशिष्टः शिव एवाद्वितीयः कार्यं कारणं च भवति इति विशिष्टशिवाद्वैतम् " इति ।

शुद्धाद्वैतं तु ईक्षत्यधिकरणे शङ्कोत्तराभ्यां निराकृतम् । "ननु 'सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयम्' इत्यादिना सद्रूपं वस्तु निर्विशेषमेवावधारणादवगम्यते । कारणावस्थमेतत्कथं सूक्ष्मप्रपञ्चविशिष्टमित्युच्यते" इति शङ्काग्रन्थः । "सदेवेत्यवधारणेन न विशेषनिषेधः, किं तु असत्कारणत्वनिषेधः, 'असद्वा इदमग्र

आसीत् । ततो वै सदजायत' इति श्रवणादसत्कारणत्वस्य भ्रान्तिप्रसक्तिसत्वात् । किञ्च 'सदेव सोम्येदमग्र आसीत्' इत्यत्र कथं निर्विशेषत्वं ब्रह्मणः ? 'आसीत्' इति हि क्रियाविशेषः, 'अग्र' इति कालविशेषः, 'एकमेव' इत्यवधारणमधिष्टात्रन्तरनिषेधपरम्', 'अद्वितीयम्' इति जगदुपादानत्वमुच्यते । अत एव सर्वज्ञमनन्तशक्तिविशिष्टं च; कथं सर्वज्ञत्वसर्वशक्तित्वविशेषमन्तरेण जगदुभयकारणत्वं ब्रह्मणो भवति ?" इति परिहारग्रन्थः ।

सद्ब्रह्मपदशक्तिपर्यालोचनयापि विशिष्टाद्वैतं तत्रैवाधिकरणे समर्थितम् । "प्रकृतिप्रत्ययात्मकस्य सत्पदस्य नैकवस्तुपरत्वं युक्तम्, प्रकृत्या प्रत्ययेन च तस्य वस्तुद्वयप्रतिपादनपरत्वात् । तथा अभियुक्तसूक्तिः -

शक्तिः शिवश्च सच्छब्दप्रकृतिप्रत्ययोदितौ ।
तौ ब्रह्मसामरस्येन समस्तजगदात्मकौ ।।

इति । स्थूलसूक्ष्मचिदचित्प्रपञ्चरूपशक्तिविशिष्टः परमेश्वर एव कार्यकारणरूपः सत्पदविषय इति ।" अत्र ब्रह्मेत्येकवचनम् - शक्तिशिवयोः प्रत्येकं न शक्यता, किं तु शक्तिविशिष्टशिव एव - इति ज्ञापनार्थम् । यथा "व्यक्त्याकृतिजातयः पदार्थः" इति न्यायसूत्रे व्यक्त्याकृतिजातीनां न प्रत्येकम्, जात्याकृतिविशिष्टव्यक्तिरूपेण - इति ज्ञापनार्थमेकवचनम् । समस्तजगदात्मकाविति विशेषणं तु सद्ब्रह्मशब्दयोः शक्तिविशिष्टशिववाचकत्वमात्रेण न विशिष्टाद्वैतसिद्धिः ; तटस्थस्य वियदादिप्रपञ्चस्य सद्भावादिति शङ्कानिराकरणाय तस्य शक्त्यंशतया शक्तिशिवाभ्यामपृथक्सिद्धि-प्रदर्शनार्थम् । तदेतत्स्थूलसूक्ष्मेत्याद्यग्रिमभाष्येण स्पष्टीकृतम् । तत्र सत्पदस्य दर्शितोऽर्थः समान एव ब्रह्मपदस्यापि; प्रस्तुतत्वात्सत्पदार्थनिर्णयस्य तन्मात्रग्रहणम् ।

अत एव भूमाधिकरणे सह भूमशब्देन ब्रह्मशब्दस्यार्थे सर्वप्रपञ्चस्यान्तर्भावो दर्शितः । तत्र हि "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा" इति भूमलक्षणवाक्येन कथं भूम्न्यनुभूयमानेऽन्यस्य दर्शनाद्यभाव उच्यते, प्रपञ्चस्य सतो दर्शनादीनां परिहर्तुमशक्यादितीमामाशङ्काम् "प्रपञ्चे सत्येव कथं मुक्तात्मनाम-पुरुषार्थस्य तस्य दर्शनं परिह्रियते" इति वाक्येनोद्भाव्य प्रपञ्चस्य सत्यत्वेऽपि तस्य

भूमशब्दार्थान्तर्भूततयैव दर्शनगोचरता भवति न तदन्यतयेति समर्थनेन च तत्परिहारो दर्शितः - "न हि मुक्तानां प्राकृतप्रपञ्चो दर्शनविषयः; किं तु निरतिशयानन्दस्वरूपं ब्रह्मैव प्रपञ्चाकारेण दर्शनगोचरो भवति" इति । तदनन्तरं भूमशब्दसमानार्थ-ब्रह्मशब्दार्थान्तर्भावेनैव प्रपञ्चस्य मुक्तं प्रति दर्शनविषयता भवतीति प्रतिपादयन्ती श्रुतिस्तत्र संमतित्वेनोदाहृता । "तथा हि श्रुतिः 'एतत्ततो भवति आकाशशरीरं ब्रह्म' " इति; एतत् परिदृश्यमानं प्रपञ्चजालं मुक्तं प्रति ततो मुक्त्यनन्तरं परमाकाशरूप-शक्तिविशिष्टं ब्रह्म भवति ; तथाभूतब्रह्मात्मनैव दर्शनगोचरो भवति । अयमर्थः पूर्वप्रकृतोपन्यासपूर्वकमुत्तरभाष्येण दर्शितः," 'आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम्' इत्यादिना मुक्तात्मना (त्मा) प्रस्तुतः । तस्य 'वाक्पतिः' इत्यादिना स्वाधीनाप्राकृतविशुद्धवागिन्द्रियादिसंबन्ध उक्तः । तस्य पुनस्तादृशावस्थाप्राप्त्यनन्तरं एतत् दृश्यमानं प्राकृतप्रपञ्चजालं आकाशशरीरं ब्रह्मैव भवतीति तात्पर्यरहस्यार्थः " इति ।

चतुर्थाध्यायेऽपि "भावे जाग्रद्वत्" इति सूत्रभाष्ये "ननु मुक्तस्य यदि प्राकृतवस्तुदर्शित्वरूपभोक्तृत्वं तदा तस्यापुरुषार्थप्रपञ्चदर्शिनो न संसार-दुःखानुषङ्गाभावसिद्धिरिति चेन्न, मुक्तस्यापुरुषार्थरूपेण प्रपञ्चदर्शनाभावात् । मुक्तेन ब्रह्माकारं हि दृश्यते विश्वमेतत्" इति शङ्कोत्तराभ्याम्, तदनन्तरम् 'तथा हि श्रूयते ---' इत्यारभ्य "एतत् ततो भवति" इत्यादिश्रुत्युदाहरणेन तद्व्याख्यानेन चायमर्थः प्रपञ्चितः । सदादिशब्दानां शक्तिविशिष्टशिववाचकत्वमात्रेण कथं विशिष्टाद्वैतसिद्धिः, तटस्थस्य प्रपञ्चस्य सद्भावात् - इति शङ्कायां परिहारः "समस्तजगदात्मकौ" इति श्लोकेन सूचितः समस्तस्य जगतः शक्तिपरिणामत्वसमर्थनेन प्रकृत्यधिकरणादिषु कृतेन स्पष्टीकृतः । एवं विशिष्टाद्वैत एव सर्वत्र प्रतिपाद्यमाने कः प्रसङ्गः शुद्धाद्वैताङ्गीकारशङ्कायाः ?

किञ्च निर्दोषकल्याणविशिष्टं सप्रपञ्चं ब्रह्मणः स्वरूपम्, न तु निर्विशेषं इति व्यवस्थापनार्थयैव "न स्थानतोऽपि" (ब्र.३.२.११) इत्याद्यधिकरणद्वयं प्रवर्तितम् । तत्रैवमाद्यमधिकरणम् । ब्रह्म निर्विशेषं सविशेषं वेति प्रथमः संशयः । तदर्थम् "यः पृथिव्यां तिष्ठन्" इत्यादिश्रुतिप्रतिपन्नं ब्रह्मणः पृथिव्याद्यवस्थानतच्छरीरत्वतन्नियन्तृ-त्वादिकमतात्त्विकं तात्त्विकं वेति संशयः । तदर्थं तस्य तात्त्विकत्वे ब्रह्मण.

तत्प्रयुक्तदोषाः प्रसज्येरन् न वा इति संशयः । एवं सति पूर्वः पक्षः । ब्रह्मणः वस्तुतः पृथिव्याद्यवस्थानतच्छरीरत्वादिसद्भावे यथा जीवस्य जागरस्वपनसुषुप्तिमूर्च्छा-मरणावस्थासु सूक्ष्मस्थूलशरीरावस्थितिनिबन्धना दोषाः तथा ब्रह्मणोऽपि स्युः, शरीरावस्थितेरविशेषात्,; "देहयोगाद्वा सोऽपि" (ब्र.३.२.५) इति सूत्रे संसारदोषाणां शरीरसंबन्धनिबन्धनत्वस्योक्तत्वात् मलमूत्रमांसपूयशोणितादिकर्दमितेषु शरीरेषु रौरवादिष्विव अवस्थानस्य अतिहेयतायाः सर्वैरङ्गीकार्यत्वाच्च ।

न च यथा राज्ञो विषये वसतां राजाज्ञया सुखदुःखभाक्त्वमस्तीति तस्मिन् सतोऽपि राज्ञो न तद्भवति, एवमिहापि स्यात् इति वाच्यम् । न हि राजविषय-वासमात्रं राजाज्ञानुवृत्तिप्रयुक्तदुःखभाक्त्वे निमित्तम्, किं तु राजाज्ञाविषयत्वविशेषितम्। राजा हि न राजाज्ञाविषयः । अतो युक्तं राज्ञः स्वविषयवासित्वेऽपि स्वाज्ञानुवृत्तियुक्त-दुःखास्पृष्टत्वम् । शरीरप्रयुक्तदुःखभाक्त्वे तु शरीरे वासमात्रं निमित्तम् । अतो यथा पूतिगन्धादियुक्तकारागृहप्रयुक्तदुःखभाक्त्वे कारागृहावस्थितिमात्रं निमित्तमिति तत्कारा-गृहे निक्षिप्तस्येव स्वेच्छया तन्नियन्तृत्वेन तत्रावस्थितस्यापि भवति, एवं देहप्रयुक्तदुःखम् इह बद्धस्येव तत्र तन्नियन्तृतया स्थितस्यापि भवेदेव ।

न च दुःखस्य कर्माधीनत्वात् सत्यपि ब्रह्मणः शरीरे निवासे कर्मरहितस्य तस्य शरीरवासप्रयुक्तं दुःखं न भवेदिति वाच्यम् । कर्माण्यपि हि दुःखविशेषानुगुण-देवमनुष्यपशुपक्षिशरीरमापाद्य तदनुप्रविष्टं जीवं दुःखं भोजयन्ति । ईश्वरस्य यदि विनापि तत्तत्कर्मभिः तेन तेन शरीरेण शरीरित्वं स्यात् तदा कर्माभावोपन्यासेन किं समाहितं भवेत् ? न खलु राजापराधेन कारागृहे निबद्धस्य भवत् तद्गतदुर्गन्धादिप्रयुक्तं दुःखम् नियन्तृतया कारागृहमनुप्रविष्टस्य अधिकारिपुरुषस्य राजापराधाभावमात्रेण न भवतीति वक्तुं शक्यम् ।

किञ्च ब्रह्मणः सर्वशरीरकत्वे विधिनिषेधवाक्यगतब्राह्मणादिशब्द-विषयत्वस्यापि अवर्जनीयतया तस्य विधिनिषेधोल्लङ्घनप्रयुक्तपापावश्यंभावेन कर्मवश्यतयापि दुःखभाक्त्वं स्यादेव । अपहतपाप्मत्वादिश्रुतेः ब्रह्मणः कर्मवश्यता न प्रसज्यत इति चेत्, किं सा श्रुतिः ब्रह्मणः सर्वशरीरकत्वस्य तात्त्विकत्वाभ्युपगमे ततः समापतत् तस्य विधिनिषेधवाक्यगतब्राह्मणादिशब्दविषयत्वं कर्मवश्यतापादकं

निरोद्धुमीष्टे ? अतः तात्पर्यवद्विधिनिषेधवाक्यविरोधात् सा श्रुतिः प्रशंसार्थं अर्थवादमात्रं स्यादिति तत्प्रामाण्यमिच्छता तन्निर्वाहार्थमपि पृथिव्याद्यवस्थान-तच्छरीरत्वादिकं अतात्त्विकम् अन्तर्यामिब्राह्मणवाक्यादिभिः प्रशंसार्थं कल्पितमित्येव समर्थनीयम् । एवं सति "अस्थूलमनणु अह्रस्वमदीर्घम्" इत्यादिब्राह्मणवाक्यानाम् "ततो यदुत्तरतरं तदरूपमनामयम्" इति शरीरराहित्येनैव निर्दोषत्वं प्रतिपादयतः श्वेताश्वतरमन्त्रस्य च सामञ्जस्यं संभवति । तस्मात् ब्रह्मणः पृथिव्याद्यवस्थान-तच्छररीरकत्वतन्नियन्तृत्वतन्नियमनोपयोगिसर्वज्ञत्वसर्वशक्तिकत्वादिकं सर्वं कल्पित-मिति ब्रह्म निर्विशेषं; "सत्यं ज्ञानम्" इति श्रुतेश्चिन्मात्ररूपमेवाभ्युपगन्तव्यमिति।

अत्र सिद्धान्तः --- स्वतो निर्दोषस्य ब्रह्मणः पृथिव्याद्यवस्थानतोऽपि दोषाः न प्रसज्यन्ते । सर्वत्र हि श्रुतिषु स्मृतिषु च "एष आत्मा अपहतपाप्मा विजरो विमृत्युः विशोको विजिघत्सो विपिपासः सत्यकामः सत्यसङ्कल्पः ,"

अनादिमलसंश्लेषप्रागभावात्स्वभावतः ।
अत्यन्तपरिशुद्धात्मा शिव इत्यभिधीयते ।।

अस्ति कश्चिदपर्यन्तरमणीयगुणाश्रयः ।
सर्वलोकस्य निर्माता पशुपाशविलक्षणः ।।

इत्येवमाद्यासु निरस्तसमस्तदोषकलङ्कं निरतिशयमङ्गलगुणास्पदं चेत्येवमुभयलिङ्गं ब्रह्म प्रसिद्धम् । अतः शरीरसंबन्धेन प्रसज्जतां पाप्मजरामरणशोकादिदोषाणामभावस्य तत्तद्दोषपरिपन्थिसत्यसङ्कल्पत्वादिगुणजातस्य च श्रवणात् न दोषापादनमिह प्रभवति।

तथापि जीववत् स्वतोऽपहतपाप्मत्वादियुक्तस्यापि ब्रह्मणः शरीरसंबन्धदशायां तत्प्रयुक्ता दोषाः स्युः इति चेन्न ; तत्परिहारार्थमेव अन्तर्यामिब्राह्मणे "यः पृथिव्यां तिष्ठन्" इत्यादिपर्यायेषु प्रतिपर्यायम् "एष त आत्मा अन्तर्याम्यमृतः" इति अमृतशब्देन दोषाभावप्रतिपादनात्, अथर्वशिरसि च "सोऽन्तरादन्तरं प्राविशत्' इति शिवस्यान्तर्यामिभावेन सर्वानुप्रवेशवर्णनानन्तरं तत्पर्युक्तसार्वात्म्यावलम्बनेषु देवकृत-शिवस्तुतिमन्त्रेषु "यो वै रुद्रः स भगवान् यश्च ब्रह्मा तस्मै वै नमो नमः" "यश्च

विष्णुः यश्च महेश्वरः" इत्यादिषु प्रतिपर्यायं तत्तच्छरीरसम्बन्धप्रयुक्तदोषपरिहारार्थमेव तद्विरोधिनः समग्रैश्वर्यादिगुणजातस्य भगवच्छब्देन प्रतिपादनाच्च, "द्वा सुपर्णा सयुजा सखाया" इति मन्त्रे जीवब्रह्मणोरेकशरीरसम्बन्धे सत्यपि तत्प्रयुक्तफलभोक्तृत्वविशेषस्य प्रतिपादनाच्च ।

तथाप्यरूपत्वादिवाक्यैरापतन्निर्विशेषत्वं कथं वारणीयमिति चेत् इत्थम् ; श्रुत्योर्विरोधे सति नैकस्याः श्रुतेरतात्त्विकविषयत्वकल्पनेनार्थापलापो न्याय्यः । किन्तु "तुल्यं च साम्प्रदायिकम्" इति न्यायात् उभयोरपि तात्त्विकविषयसमर्पणेनानुग्रहो न्याय्यः ; तथा च ब्रह्मणः शरीरसम्बन्धप्रतिपादकैरेव श्रुतिवाक्यैः तस्य तत्प्रयुक्तदोषासम्बन्धप्रतिपादनात् ; "आकाशो ह वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा" इति श्रुतौ परमाकाशस्य नामरूपपरिणामितया तादात्म्येन तन्निर्वोढृत्वप्रतिपादंनानन्तरं ब्रह्मणः प्रकृते नामरूपे प्रत्यात्मत्वमुक्त्वापि "ते यदन्तरा" इति तदस्पर्शप्रतिपादनस्य आकाशवद् ब्रह्मणः ताभ्यां तादात्म्यं नास्ति किन्तु शरीरशरीरिभावमात्रमिति प्रतिपादनद्वारा, "तादात्म्ये हि तदीयदोषाणां प्रसक्तिः शङ्क्येतापि; न त्वेतदस्ति; शरीरशेषाणां तु नात्मनि प्रसक्तिरस्ति" इत्यस्यार्थस्य विभावनाच्च । तदनुसारेण अरूपत्वश्रुतीनाम् "अरूपतुल्यं ब्रह्म । यथा खल्वशरीरमाकाशादिकं शरीरावस्थितिप्रयुक्तदोषैः न स्पृश्यते एवं ब्रह्मापि " इत्येवंपरतया योजनं युक्तम् ।

न च कारागृहप्रविष्टनियन्तृपुरुषदृष्टान्तेन ब्रह्मणो नियन्तृतयापि शरीरेष्ववस्थाने तत्प्रयुक्तदुःखादिकमवश्यं भवेदिति न्यायानुगृहीतानां अरूपश्रुतीनां प्राबल्यात् तद्विरोधेन रूपवत्त्वश्रुतय एव यथाकथंचिन्नेतव्या इति शङ्कनीयम् । यतः कर्माधीनमेव अर्थानां दुःखजनकत्वं न वस्तुस्वभावप्रयुक्तम् । पुत्रदारादीनां शीतोष्णादीनां च समयभेदेन, मलमूत्रादीनां जातिभेदेन च सुखःदुःखकरत्वदर्शनात् ।

"तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते ।
तदेव कोपाय यतः प्रसादाय त जायते ।

तस्माद्दुःखात्मकं नास्ति न च किंचित्सुखात्मकम् ।" इति स्मरणाच्च ।

यत्तु परमेश्वरस्य सर्वशरीरकत्वे विधिनिषेधवाक्यगतब्राह्मणादिशब्दानां तत्पर्यन्तत्वेन तस्यापि विधिनिषेधोल्लङ्घनप्रयुक्तपापस्यावश्यंभावितया तत्कृतदुःखभाक्त्वं स्यादिति, तत्तुच्छम् । लोकवेदसाधारणप्रसिद्धिबाहुल्यात् ब्राह्णादिशब्दैः प्रथमोपस्थितानां तत्तच्छरीराभिमानिजीवानामेवान्वयेन झटिति वाक्यार्थबोधनिष्पत्तौ सत्यां तावतैव वाक्यप्रामाण्यस्य चरितार्थतया ईश्वरस्य सर्वान्तर्यामित्वम्, अन्तर्यामिणं प्रति नियम्यानां शरीरत्वम्, शरीरवाचिशब्दानां शरीरिपर्यन्तत्वं च, श्रुतिन्यायाभ्यामवगन्तव्यमपेक्ष्य विलम्बितोपस्थितिकस्य तस्य ईश्वरस्यान्वयेन पुनर्वाक्यार्थबोधान्तरानुदयात् । अत एव "त्रिः प्रथमामन्वाह । त्रिरुत्तमाम्" इत्यत्र प्रथमोत्तमशब्दाभ्यां शीघ्रोपस्थितिकयोः प्रथमचरमस्थानयोरेव वाक्यार्थान्वयः, न तु प्रथमचरमस्थानानुवचनीययोः "प्रवो वाजा," "आजुहोता" दिऋचोर्विलम्बितोपस्थितिकयोरितीष्यते ।

सत्यज्ञानादिवाक्येनापि ब्रह्मणो न ज्ञानमात्ररूपत्वसिद्धिः । तद्वाक्यावैयर्थ्यहेतोर्ज्ञानरूपत्वस्येव "यः सर्वज्ञः सर्ववित्," "सर्वेश्वरश्शंभुराकाशमध्ये" इत्यादिवाक्यावैयर्थ्यहेतोः सर्वज्ञत्वादिविशेषस्याप्यङ्गीकार्यत्वात्, द्विविधयोरपि वाक्ययोः श्रुतित्वाविशेषात्, ज्ञानरूपत्वविशेषान्तरवत्त्वयोर्विरोधाभावेनात्र व्यवस्थापकन्यायानपेक्षणाच्च। यदि सत्यज्ञानादिवाक्यम् -- ज्ञानमात्ररूपं ब्रह्म-- इति ब्रूयात्, तदा खलु विरोधः स्यात् । नत्वेवमाह; किन्तु ज्ञानरूपं ब्रह्मेत्येतावन्मात्रमाह । तत्तु श्रुत्यन्तरप्राप्त- विशेषवत्त्वेन न विरुध्यते; न हि स्वर्णमयं किरीटमिति वाक्यप्राप्तं स्वर्णरूपत्वं प्रत्यक्षादिप्राप्तेनोपरि प्रत्युप्तरत्नवत्त्वेन विरुध्यते । किञ्च अत्यल्पमिदमुक्तम् -- कानि चिद्वेदान्तवाक्यानि ब्रह्मणः सार्वज्ञ्यादिविशेषान् बोधयन्ति -- इति; कृत्स्नोऽपि ब्रह्मपरो वेदान्तराशिस्तस्य विशेषवत्तां दर्शयति, न हि तादृशः कश्चित् वेदान्तेषु ब्रह्मणि प्रवृत्तः शब्दोऽस्ति, यः प्रवृत्तिनिमित्ततया कस्यचिद्दोषस्याभावं कञ्चन कल्याणगुणं वा न समर्पयेत् । वेदान्तोपबृंहणप्रवृत्तैः मुनिभिरप्युभयलिङ्गं ब्रह्म समर्थ्यते इति प्रसिद्धमेव ।

न केवलमुभयलिङ्गत्वश्रुतिस्मृतिबलाद्ब्रह्मणः पृथिव्यादिस्थितावपि तत्प्रयुक्तदोषाप्रसङ्गः, किन्तु श्रुत्युदाहृतदृष्टान्तसामर्थ्येनापि । एवं हि दृष्टान्तमुदाहरति श्रुतिः---

"आकाशमेकं हि यथा घटादिषु पृथक् भवेत् ।
तथात्मैको ह्यनेकस्थो जलाधारेष्विवांशुमान् ।।" इति ।

अत्राद्यदृष्टान्तेन "यः पृथिव्यां तिष्ठन्" इत्यादिश्रुतिसिद्धा सर्वत्र स्थितिरुपपादिता । तेन कथमेकस्यामूर्तस्य बहुषु स्थितिः कृत्स्नैकदेशवृत्तिविकल्पपराहतत्वादिति शङ्का निवारिता । द्वितीयदृष्टान्तेन तेषु स्थितस्यापि तेष्ववस्थितस्याकाशस्येव तत्प्रयुक्तदोषास्पर्श उपपादितः । तेन तच्छरीरकं कथं तत्प्रयुक्तदोषभाक् न भवेदिति शङ्का निवारिता । कर्मवश्यत्वतदभावाभ्यां विशेष इति श्रुतेरभिप्रायः । न चेदमाशङ्कनीयम्-- अम्बुनि सूर्यस्तत्रानवस्थित एव तत्र स्थित इव गृह्यते । तथा परमात्मनो वस्तुतः पृथिव्यादावनवस्थितस्य स्थितत्वेनाग्रहणात्, वस्तुतः पृथिव्यादौ स्थित इत्येवाभ्युपगमात्, न ब्रह्मणः सूर्यस्येवोपाधिप्रयुक्तदोषास्पृष्टत्वमुपपद्यते-- इति । यथा जलसूर्यस्य जलोपाधिप्रयुक्तवृद्धिह्रासादिभाक्त्वं वस्तुतो न भवति, एवं ब्रह्मणः पृथिव्याद्यन्तरवस्थितिप्रयुक्तं गुणदोषभाक्त्वं न भवतीति तत्प्रयुक्तगुणदोषभाक्त्वा-भावमात्रे दृष्टान्तोऽयम् "जलाधारेष्विवांशुमान्" इति । दृष्टान्तद्वयग्रहणसामञ्जस्यात् एवमवगम्यते । सूर्यस्याम्बुनीव ब्रह्मणः पृथिव्यादिष्वनवस्थितिपर्यन्तविषयविवक्षायां हि प्रथमश्रुतदृष्टान्तोपमर्दः स्यात् । न च सर्वात्मना दृष्टान्तदार्ष्टान्तिकयोः साम्येन भाव्यमित्यस्ति नियमः, लोकवेदयोः विवक्षितांशसाम्यमात्रेण दृष्टान्तीकरणदर्शनादिति।

इत्थम् "न स्थानत" इत्यादिभिः दशभिः सूत्रैः ब्रह्म सविशेषनिर्दोषकल्याण-गुणास्पदमिति समर्थनार्थं एकमधिकरणं कृतम् । तदनन्तरं तदेवाक्षेपसमाधानाभ्यां दृढीकृतम् । "प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः।" (ब्र.३.२.२१) इत्यादिभिर्नवभिः सूत्रैरधिकरणान्तरं कृतम् । तत्र पूर्वाधिकरणसमर्थितं ब्रह्मण उभयलिङ्गत्वं उपपद्यते न वेति संशयः । तदर्थं बृहदारण्यके "द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तं च" (बृ.२.३.१) इत्यादिना ब्रह्मणः पृथिव्यप्तेजोवाय्वाकाशरूपमूर्तामूर्त-प्रपञ्चात्मकं रूपमुक्त्वा "अथात आदेशो नेति नेति" (बृ.२.३.६) इति क्रियमाणो निषेधः प्रकृतमूर्तामूर्तब्रह्मरूपविषयः यद्ब्रह्मणो मूर्तामूर्तप्रपञ्चात्मकमुक्तं रूपं तद्वस्तुतो नास्तीति, अथवा ब्रह्मणः प्रकृतमूर्तामूर्तप्रपञ्चात्मकरूपवत्त्वमेव न भवति, अधिकमपि गुणजातमस्तीत्येव प्रकृतैयत्ताविषयः इति संशयः ।

तत्र पूर्वः पक्षः-- "नेति नेति" इत्यत्र इतिशब्देन परामृष्टस्य नञा निषेधः इति तावन्निर्विवादम् । इतिशब्दः प्रकारवाची पूर्वप्रकृतं प्रकारं परामृशेत् । पूर्वं च मूर्तामूर्तप्रपञ्चात्मकं ब्रह्मणः प्रकारद्वयं प्रकृतम् । अतस्तन्निषिध्यत इति युक्तम् । नेति नेतीति वीप्सायां द्विरुक्तिः पूर्वप्रकृतस्य रूपद्वयस्य साकल्येन निषेधप्रत्यायनार्था । अथवा एकेन मूर्तस्य अन्येनामूर्तस्य च प्रपञ्चस्य निषेध इति द्विरुक्तिसाफल्यम् । प्रकृतेयत्ता निषिध्यत इति तु न युक्तम्, रूपद्वयवत्तस्याः प्रकृतत्वाभावात् । रूपद्वयनिषेध इव तन्निषेधे द्विरुक्तिसाफल्याभावाच्च इति ।

सिद्धान्तस्तु --- प्रमाणान्तराप्रतिपन्नतया पूर्ववाक्ये श्रुत्यैव विहितं ब्रह्मणो मूर्तामूर्तवैशिष्ट्यं तदनन्तरवाक्येन निषेद्धुं न शक्यते, पूर्वापरविरोधापत्तेः । षोडशिग्रहणाग्रहणवत् वस्तुनि विकल्पायोगात् । अतः पूर्वं मूर्तामूर्तरूपवैशिष्ट्येक्त्या बुद्धिस्थः प्रकृतरूपैतावत्त्वात्मकः प्रकारो निषिध्यते-- इति युक्तम् ।

ततः तदनन्तरमेव, "न ह्येतस्मादिति नेत्यन्यत् परमस्ति। अथ नामधेयं सत्यस्य सत्यम्" इति "प्राणा वै सत्यं तेषामेष सत्यम्" (बृ.२.३.६) इति वाक्यशेषो भूयो गुणजातं ब्रवीति। अत्र प्रथमवाक्येन इति नेति प्रकृतेयत्ताविशेष-गोचरत्वेनोक्तादेतस्मात् ब्रह्मणः परमुत्कृष्टमन्यन्नास्तीति स्वाधिकराहित्यगुण उच्यते । "अथ नामधेयम्" इत्यादिवाक्येन ब्रह्मण उत्कृष्टाभावेऽपि मूर्तामूर्तप्रपञ्चशरीरकत्वेन तदुभयनियन्तुस्तस्य समाः सन्त्येव। अस्ति हि भूतवशिनां योगसिद्धानां मुक्तानां च ब्रह्मवदेव तदुभयशरीरकत्वेन तन्नियन्तृत्वमिति शङ्कानिरासार्थं ब्रह्मणः "सत्यस्य सत्यम्" इति नामविधानपूर्वकं तन्निर्वचनं क्रियते । तत्र प्राणशब्देन प्राणाधिष्ठातारो जीवा लक्ष्यन्ते । ते तावत् सत्यभूताः अविकाराः, वियदादिवत् स्वरूपान्यथाभावरूपोत्पत्त्यभावात् । तेषामप्युत्कृष्टं सत्यं ब्रह्म जीववत् ज्ञानसङ्कोचविकासात्मिकाया अप्युत्पत्तेरभावात् । अतो योगिनां मुक्तानां च ज्ञानविकासानन्तरं तात्कालिकप्रपञ्चनियन्तृत्वसद्भावेऽपि प्राक् ज्ञानसंकोचकाले तन्नास्ति । अतः सार्वदिकसर्वप्रपञ्चनियन्तृ ब्रह्मैवेति न तत्समः कोऽपि जीवोऽस्तीत्यभिप्रायः । यद्वा कृत्स्नेनापि वाक्यशेषेण समराहित्यमेव बोध्यते ; अधिकराहित्यं तु कैमुतिकन्यायेन सिध्यति । अस्मिन् पक्षे प्रथमवाक्यस्यैवं योजना -- इति नेति निषेध्येयत्ताप्रतियोगिभूतात् मूर्तामूर्तप्रपञ्चात् परं उत्कृष्टं ब्रह्मैव, ततोऽन्यत्

नियन्तृतयास्मात् प्रपञ्चादुत्कृष्टं नास्तीति । यद्वा इति नेति प्रकृतेयत्तानिषेधगोचरात् एतस्मात् ब्रह्मणोऽन्यत् परं नियन्तृत्वेन प्रपञ्चादुत्कृष्टं नास्तीति योजना । अस्मिन् योजनाद्वये नान्यपदवैयर्थ्यशङ्केति विशेषः ।।

नन्वयं वाक्यशेषः प्रकृतरूपद्वयनिषेधपक्षेऽपि सङ्गच्छते । कथम् ? इति नेति निषिद्धरूपद्वयात् एतस्मात् ब्रह्मणोऽन्यत् अन्यतया प्रतिभासमानं परं नास्ति वस्तुतो व्यतिरिक्तं नास्तीत्याद्यवाक्यस्यार्थः । तद्दृढीकरणार्थं द्वितीयवाक्यम् । तत्र प्राणशब्देनेन्द्रियवाचिना तद्विषया लक्ष्यन्ते । तेन "सन् मृत्पिण्डः सन् घटः सत् कपालं, सत् चूर्णम्" इत्यादिप्रत्ययविषयात् मृत्पिण्डघटकपालादयो व्यावर्तमानसत्याः, ब्रह्म तु सर्वेष्वप्येतेषु प्रत्ययेषु सदिति प्रत्ययवेद्यमनुगतं सत्यम् । व्यावर्तमानाश्चानुवर्तमाने कल्पिता दृष्टाः । यथा रज्वा इदमंशे (रज्जाविदमंशे ?) स्रक्सर्पभूदलनादयः । अतो व्यावर्तमाना घटादयः केवलं प्रतिभासतः सत्या इति तेषामुत्कृष्टं सत्यं पारमार्थिकं ब्रह्मेति तस्यार्थः । एवमितिशब्दस्य प्रकृतरूपद्वयपरामर्शित्वस्वारस्यानुसारेण वाक्यशेषस्यार्थो वर्णयितुं शक्यत इति नान्यथार्थवर्णनं युक्तमिति चेत्, स्यादेवम्, यादि रज्जोरिदमाकारेणेव ब्रह्मणः सद्रूपेण प्रत्यक्षविषयत्वमुपपद्येत ; न तु तदुपपद्यते । "न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्" इत्यादिश्रुतिर्हि ब्रह्माव्यक्तं प्रत्यक्षाद्यगोचरमाह । ब्रह्मस्वरूपं तु संराधने सम्यक् दृढभक्तिपूर्वकं ध्यानयज्ञेनाराधने सति प्रसन्नं सत् स्वात्मानं संराधकाय प्रकाशयति । तदिदम्--

"नायमात्मा प्रवचनेन लभ्यो
न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्य-
स्तस्यैष आत्मा विवृणुते तनूं स्वाम् ।।"

" अयं तु परया भक्त्या दृश्यते नान्यथा क्वचित् ।
हरिश्चाहं च रुद्रश्च तथान्ये च सुरासुराः ।।
तपोभिरुग्रैरद्यापि तस्य दर्शनकाङ्क्षिणः ।"

इत्यादिश्रुतिस्मृतिभ्यामवगम्यते । एवं संराधनं ब्रह्मसाक्षात्कारस्य कारणमुक्तम् ।

तत्कार्यं तु ज्ञानानन्दादिवत् जगदैश्वर्यस्याप्यवैशेष्यम् । यथा तेषां ज्ञानानन्दादेः ब्रह्मज्ञानानन्दतो विशेषाभावः तथा तेषां जगदैश्वर्यस्यापि ब्रह्मणो जगदैश्वर्याद्विशेषाभावो भवति । अत एव भगवतः कृष्णस्योपासनाकर्मण्यभ्यासात् चिरनिरन्तरैगाग्र्यात् ब्रह्मसाक्षात्कारेण तद्वत् जगदैश्वर्यप्राप्त्या अर्जुनाय तत्प्रकाशनं गीतासु दृश्यते । अगस्त्यविश्वामित्रादीनां च जलनिधिपानस्वर्गान्तरकरणादिसामर्थ्यप्रकाशनं पुराणेषु दृश्यते । न चैतदसंभावितम् ; लोकेऽपि हि गरुडमन्त्रोपासकानां गरुडभावनया तदसाधारणस्य दर्शनमात्रेण विषसंहरणसामर्थ्यस्य कियतो धर्मस्य प्राप्तिर्दृश्यते, तथा ब्रह्मभावनयापि ब्रह्मासाधरणकियद्धर्मप्राप्तिः युक्तैव । एवं ब्रह्मज्ञानस्य संराधनं कारणम्, तदैश्वर्यादिप्राप्तिः कार्यमिति स्थिते "सन् घटः" इत्यादिप्रत्यक्षे क्लृप्ततत्कार्यकारणयोरदर्शनादिहेतोः "नेति नेति" इत्यत्र प्रकृतेयत्तानिषेधः न तु प्रकृतरूपद्वयनिषेधः इत्यप्यवगम्यते । कथम् ? ब्रह्मसाक्षात्कारवतां यदैश्वर्यमाविर्भवति तद्ब्रह्मसाम्यरूपमिति वक्तव्यम्, "निरञ्जनः परमं साम्यमुपैति" इति श्रुतेः । अतः यथा तेषामाविर्भवज्ज्ञानानन्दरूपत्वं ब्रह्मणः स्वीक्रियते, एवं जगदैश्वर्यमपि तस्याङ्गीकर्तव्यम् ; अन्यथा परमसाम्यासिद्धेः । सर्वैरपि गुणैः किञ्चित्किञ्चित्साम्यं हि परमसाम्यम्, न तु येनकेनचिद्गुणेन किञ्चित् साम्यमात्रम् । तस्मात् ब्रह्मोपासीनानामपि तदसाधारणज्ञानानन्दैश्वर्याद्यनन्तकल्याणगुणाविर्भाववदर्शनात् अनन्तेन कल्याणगुणेन ब्रह्मणो योगे न विवादावकाशः । तस्मादुभयलिङ्गमेव ब्रह्म ।

ननु "द्वे वाव ब्रह्मणो रूपे" इत्यादिनोक्तं प्रपञ्चस्य ब्रह्मस्वरूपत्वं ब्रह्मप्रपञ्चयोराध्यासिकसंबन्धेन निर्वाह्यम्, विधान्तरेण तन्निर्वाहासंभवात् । ततश्च "नेति नेति" इत्यध्यस्तप्रपञ्चनिषेध इत्येव युक्तमिति चेन्न, आध्यासिकसम्बन्धं विना प्रकारान्तरेण प्रपञ्चस्य ब्रह्मरूपत्वनिर्वाहसंभवात् । तथाहि-- रूपशब्दोऽत्र स्वरूपपरो न धर्मपरः । ततश्च "एक एव रुद्रः" "सर्वो वै रुद्रः" इत्येकत्वबहुत्वव्यपदेशात् । अहेरेकस्य कुण्डलभावर्जुभाववक्रभावाद्यनेकसंस्थानविशेषवत् ब्रह्मण एव "द्वे वाव ब्रह्मणो रूपे" इत्यादिनोक्तः पृथिव्यादिरूपोऽनेकः संस्थानविशेष इत्युपपद्यते ।

अथवा ब्रह्मप्रपञ्चयोर्भेद एवास्तु, तथापि "ब्रह्मणो रूपे" इति ब्रह्मस्वरूपतोक्तिरुपपद्यते । "सर्वं स्वल्विदं ब्रह्म" (छा.३.४) इति श्रुतेः सर्वस्यापि ब्रह्मत्वरूपैकजातियोगात् । दृश्यते हि प्रभाप्रभावतोर्भेदेऽपि तेजस्त्वरूपैकजातियोगात्-- सर्वमिदं तेजःस्वरूपम्-- इति व्यवहारः ।

अथवा मा भूदिदं पक्षद्वयम् ; आद्यपक्षे हि ब्रह्मणः परिणामित्वं जडत्वं चेति दोषद्वयं स्यात्; द्वितीयपक्षेऽपि तत्स्यात्, ब्रह्मत्वजात्याश्रयत्वेन प्रपञ्चोऽपि ब्रह्मेत्यभ्युपगमात् । तथा च पक्षद्वयेऽपि ब्रह्मणो निर्दोषत्वप्रतिपादकसकलश्रुतिविराधो भवेत् । अतः पूर्ववदेवात्राप्युपपादनीयम् । पूर्वत्र हि "अंशो नानाव्यपदेशात्" (ब्र.२.३.४२) इत्यधिकरणे प्रभाजातिगुणशरीरवदपृथक्सिद्धविशेषणतैकस्वभावतया विशिष्टैकदेशत्वेन ब्रह्मांशत्वमुक्तं चेतनवर्गस्य । एवमचेतनवर्गस्याप्यस्तु ; तदेव ब्रह्मणो रूपमित्यनेनोच्यत इति न कश्चिद्दोषः । एवं च "यस्य पृथिवी शरीरम्" (बृ.३.७.३) इत्यादिश्रुत्या

"विद्याविद्यात्मकं सर्वं विश्वं विश्वगुरोर्विभोः ।
रूपमेव न सन्देहो विश्वं तस्य वशे यतः ।।"

इत्यादिपुराणवचनैश्चिदचिद्वस्तुनोर्ब्रह्मशरीरत्वोक्तिरपि एतदेकार्था भवति ।

"नास्य जरयैतज्जीर्यति।" "अस्थूलमनण्वह्रस्वम्" इत्यादिश्रुतिषु ब्रह्मणो जरादिप्रतिषेधादपि प्रपञ्चशरीरकत्वमनुमतमवसीयते । तस्मिन् सत्येव हि ब्रह्मणः तत्प्रयुक्तदोषप्रसक्तौ तत्प्रतिषेधश्रवणमुपपद्यते । तस्मान्निर्दोषं सगुणं सप्रपंच्चं ब्रह्मेति । एवमधिकरणद्वयेन ब्रह्मणः सगुणत्वसप्रपञ्चत्वव्यवस्थापनानन्तरं एवंभूतात् ब्रह्मणः परमुत्कृष्टं तत्त्वान्तरं नास्तीति "परमतस्सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः" (ब्र.३.२.३०) इत्यधिकरणेन पूर्वोत्तरपक्षाभ्यां समर्थितम् ।

अपि च शिवस्य गुणविग्रहादिकं सत्यं नित्यं च, न तु कल्पितमनित्यं चेति निर्णयार्थं तृतीयाध्याय एव "आदरादलोपः" (ब्र.३.¯.३९) इत्यधिकरणं कृतम् । तदित्थम् शिवस्य नीलकण्ठत्वादिविशिष्टो विग्रहः सत्यसङ्कल्पत्वादिगुणगणश्च

कदाचिल्लुप्यते न वेति कल्पिताकल्पितत्वाभ्यां संशये पूर्वः पक्षः आनन्दरूपः शिवस्य विग्रह इति "आकाशशरीरं ब्रह्म", "आनन्दरूपममृतं यद्विभाति" इत्यादिश्रुत्यनुसारादिष्यते । न चानन्दस्य वक्षःकण्ठहस्ताङ्गुल्यादिरूपेण स्थौल्यकार्श्ये संभवतः । तत्संभवाङ्गीकारे तैत्तिरीयोपनिषदि आनन्दमयस्य ब्रह्मणः "तस्य प्रियमेव शिरः, मोदो दक्षिणः पक्षः, प्रमोद उत्तरः पक्षः, आनन्द आत्मा, ब्रह्म पुच्छं प्रतिष्ठा" इत्याम्नातं प्रियशिरस्कत्वादिकमपि तात्त्विकं स्यात् । तथा सति "प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे" (ब्र.३.३.१२) इति प्राक् सूत्रितं विरुध्यते । अतो विग्रहस्तावत् कल्पितः तत्सहपाठान्निर्गुणश्रुतिविरोधाच्च गुण-गणश्चापि कल्पित इति ।

सिद्धान्तस्तु - नीलकण्ठत्वोमापतित्वसत्यसङ्कल्पादीनां अभ्यासेनादराव-गमात् विग्रहगुणगणयोस्तात्त्विकत्वमवसीयते । श्रुतिशरणैः खलु यथाश्रुत्येवाभ्युप-गन्तव्यम्, श्रुतिप्रामाण्यात् । आनन्दात्मनैव परमाकाशस्य उपचयापचयवान् परिणामो युज्यते । प्रियशिरस्त्वादिकं तु न तथा, तात्पर्यग्राहकप्रामाणाभावात्, अन्नमयादिषु कल्पितैः पक्षपुच्छादिभिः सहपाठाच्च कल्पितमित्यवगम्यते । तथा क इह तात्पर्यग्राहकोऽभ्यास इति चेदुच्यते । सवितृमण्डलविद्यायाम् "नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये" इति उमापतित्वस्य शब्दभेदेनाभ्यासः; श्रीरुद्रोपनिषदि "नमो नीलग्रीवाय च शितिकण्ठाय च" इति नीलकण्ठत्वस्य तथाभ्यासः ; दहरविद्यायां कैवल्योपनिषदि--

"उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ।"

इति समाम्नातयोरुमासहायत्वत्रिलोचनत्वयोः ; तस्यामेव दहरविद्यायां तैत्तिरीयो-पनिषदि "पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षम्" इति कृष्णपिङ्गल-विरूपाक्षशब्दाभ्यासः । एवं दहरविद्यादिष्वाम्नातानां सत्यसङ्कल्पत्वादीनां शाण्डिल्यविद्यादिषु पुनराम्नानमभ्यासः ।

ननु शाखाभेदेन पुनराम्नानं कथमभ्यासः ? शाखाभेदेन हि तत्तदध्येतृ-प्रतिपत्त्यर्थं पुनराम्नानम् ; विद्याभेदे पुनर्वचनं तत्तद्गुणप्राप्त्यर्थम्, विद्यान्तरगुणानां

विद्यान्तरेऽनुपसंहारतः प्राप्त्यभावात् । शाखैक्ये विद्यैक्येऽपि केषाञ्चिद्गुणानां पुनर्वचनं परस्परामनातगुणोपसंहारोपयुक्तविद्यैक्यसिद्धिहेतुप्रत्यभिज्ञानार्थम् । एवं प्रयोजनान्तरार्थानि पुनराम्नानि न तात्पर्यग्रहणाभ्याससरूपतां भजन्त इति चेदुच्यते "आनन्दादयः प्रधानस्य" (ब्र.३.३.११) इत्यधिकरणे तावदयमर्थः स्थितः । सत्यज्ञानानन्दादयो गुणाः नीलकण्ठत्वोमासहायत्वादिविशिष्टः परमानन्दात्मको विग्रहविशेष इत्येते सर्वे परब्रह्मणः शिवस्य स्वरूपलक्षणान्तर्गतत्वात् सर्वासु परविद्यासु उपसंहार्याः । तेषां ब्रह्मविष्ण्वादिसकलेतरविलक्षणत्वेनानुभवारूढतया तत्प्रतिपत्तावपेक्षितत्वादिति । तदनन्तरप्रवृत्ते प्रियशिरस्त्वाद्यधिकरणे च ये सत्यसङ्कल्पत्वादयो मुक्तप्राप्या गुणाः तेऽपि सर्वासु परविद्यासु यथोपासनं फलमिति न्यायेनापेक्षितत्वादुपसंहार्या इति निरूपितम् । तत्रोभयत्रापि अपेक्षितत्वमेव विद्याभेदेऽपि उपसंहारे मूलभूतो न्याय इति । अनेनैव न्यायेन यज्ञादीनां शमादीनाम् उद्धूळनत्रिपुण्ड्रयोर्विद्यानामावृत्तेः, आप्रायणं तदनुष्ठानस्य पूर्वोत्तरपापविनाशाश्लेषयोः अर्चिरादिपर्वविशेषाणां चेत्येवमादीनां कासु चिदेव विद्यासु श्रुतानामपि सर्वासु परविद्यासु आपतन्ती प्राप्तिः तत्र तत्र संभावितशङ्काविशेषनिराकरणपूर्वकं सर्वापेक्षाधिकरणादिषु समर्थिता । एवं च सत्यसङ्कल्पत्वादिगुणगणानामेकत्राम्नानेऽपि सर्वासु परविद्यासु संभवत्प्राप्तिकानां विद्यान्तरेषु पुनराम्नानं अनन्यप्रयोजनत्वात् तात्पर्यग्राहकाभ्याससरूपतयैवावतिष्ठते । तस्मादभ्यासेनादरावगमादलोपो विग्रहगुणगणयोः । निर्गुणश्रुत्यादिकं तु सगुणश्रुत्यादिविषयपरिहारेण हेयगुणादिराहित्यविषयतयावतिष्ठते, पदाहवनीयन्यायेन श्रुतिद्वयप्रामाण्यलाभाय विषयव्यवस्थाकल्पनौचित्यात् इति ।

एवं नित्यनिर्मलगुणविग्रहविशिष्टं शिवरूपमेव ब्रह्म मुक्तप्राप्यम्, न तदुत्तीर्णं निर्विशेषं मुक्तप्राप्यं ब्रह्मास्तीति निर्णयार्थम् "उपस्थितेऽतस्तद्वचनात्" (ब्र.३.३.४०) इति तदनन्तराधिकरणं कृतम् । तदित्थम्-- मुक्तप्राप्यं ब्रह्म शिवादन्यत्, उत शिव एवेति संशयः । तदर्थं मुक्तिः निर्विशेषब्रह्मसादृश्यापत्तिः इति संशयः ।

तत्र पूर्वः पक्षः ---- नीरूपं निर्विशेषं च परं ब्रह्मेति परःशताः श्रुतयः प्रतिपादयन्ति । तद्भावापत्तिर्मुक्तिरिति च "ब्रह्मैव सन् ब्रह्माप्येति" "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति" इति सावधारणा श्रुतिः प्रतिपादयति । अतो रूपवान्

सगुणः शिवो न परं ब्रह्म, नापि तत्सादृश्यापत्तिः परमुक्तिरिति ।

सिद्धान्तस्तु--- उक्तरूपः शिव एव परं ब्रह्म ; तत्सादृश्यापत्तिरेव च परममुक्तिः । दहरपुण्डरीकादिषु तदुपासनेन तस्मिन्नुपस्थिते = उपासकेन प्राप्ते सति, अतः = तत्प्राप्त्यनन्तरभाविस्वरूपाभिनिष्पत्तेरेव हेतोः, तस्य = जक्षणादिविहारस्य, "एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते । स उत्तमः पुरुषः" (छा.८.१२.३) "स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा" इत्यादिश्रुतावुक्तत्वात्, "निरञ्जनः परमं साम्यमुपैति" इति श्रुतौ निरञ्जनस्य ब्रह्मसाम्यापत्तिप्रतिपादनाच्च । न हि परमुमुक्तेरन्यत्र स्वरूपाभिनिष्पत्तिः, अञ्जनाख्यमलापगमो वास्ति । रूपगुणनिषेधश्रुतयः शिवे परब्रह्मणि रूपगुणवत्येव हेयरूपगुणनिषेधपरा । "ब्रह्मैव सन् ब्रह्माप्येति" "ब्रह्मविद्ब्रह्मैव भवति" इति च श्रुत्योरेवकारः साम्यश्रुत्यनुसारात् इवार्थः । अन्धा भवत्यपि रोदितीव "विनाशमेवापीतो भवति" इति सुषुप्तविषयश्रुतावेवकारस्येवार्थत्वदर्शनात् । अथवा-- ज्ञानविकासेन ब्रह्मत्वं प्राप्नुवन्नेव ब्रह्म प्राप्नोति, यः परं ब्रह्म वेद सः स्वयमपि ज्ञानविकासेन बृहत्त्वशाल्येव भवति, इति तयोः श्रुत्योरर्थ इति । एवं सगुणं सविग्रहं सप्रपञ्चं सविशेषमेव ब्रह्म, न तु निर्विशेषमिति स्वयं बहुषु प्रदेशेषु व्यवस्थापनेन तदर्थं सूत्रारूढतया अनेकाधिकरणप्रवर्तनेन च विशिष्टाद्वैतमेव प्रयत्नेन परमसिद्धान्तं व्यवस्थापितवतां श्रीकण्ठाचार्याणां मते कः शुद्धाद्वैतं परमसिद्धान्त इति कल्पनस्यावकाशः ?

यत्तु अनियमाधिकरणादिषु निरन्वयोपासकानां अत्रैव मुक्तिरिति निर्गुणनिष्ठानामर्चिरादिगत्यनपेक्षमुक्त्यभिधानम्, तत् "केचिदाहुः" इत्युपक्रमात् मतान्तरोपन्यासपरमिति तत्र तत्र स्पष्टमेव ।

यच्च "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" (ब्र.१.१.३१) इत्यादि-सूत्रेषूपासकस्य शिवाभेदभावना मुक्तिहेतुरिति प्रतिष्ठापनम्, तदारोपिताभेदभावनापरम्। अत एव "प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्" (ब्र.३.२.२४) इति प्रकृतैतावत्त्वाधिकरणसूत्रभाष्ये--"दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्।" (भ.गी.११.८) इत्यादिषु कृष्णादीनां तदैक्यभावनया तदैश्वर्यप्रकाशनं दृश्यते ।

ब्रह्मभावाभ्यासेन विश्वामित्र-अगस्त्यादीनां स्वर्गान्तरकरणजलधिकबलनादिसामर्थ्यम्, लोके च मन्त्रिणां गरुडासाधारणधर्मप्राप्तिः इति आरोपितविषयगरुडैक्यभावना-दृष्टान्तेन शिवैक्यभावनाया आरोपितविषयत्वमाविष्कृतम् । सुदर्शनाचार्यैरपि तात्पर्यसंग्रहे गरुडैक्यभावनादृष्टान्त एवेपात्तः ---

" ब्रह्मोच्यते परमसौ परमं च तत्त्वं
ज्योतिः परं च परमेश्वर पद्मनाभः ।
त्वद्भावनैकरसिकस्त्वदनन्यभावा-
न्मन्त्री यथा गरुडभावनया गरुत्मान्" इति ।

(श्रुतिसूक्तिमाला,४२)

तदनुवर्तिनां श्रीकण्ठाचार्याणामपि तथैव मतमिति युक्तम् ।

ननु यदि भाष्यकाराणां विशिष्टाद्वैते दृष्टिः जीवब्रह्मभेदे च, तदा "सन् घटः सन् पटः" इति सर्ववस्तुष्वनुस्यूततया सद्रूपस्य ब्रह्मणः सर्वोपादानत्वं न सिध्यति। "मृदुपरक्तं हि घटादिकं मृदुपादानमिष्यते" इति जन्माद्यधिकरणे, "मृदयं घट इत्यत्र यथा मृद्व्याप्तिर्घटे दृश्यते, तथा ब्रह्मेदं जगदिति ब्रह्मव्याप्तिः न दृश्यत इति चेत्, 'सन् घटः' 'सन् पटः' इति सर्वत्र दृश्यत एव सद्रूपस्य ब्रह्मणो व्याप्तिः" इत्यादिना आरम्भणाधिकरणे च, "सन् घटः" इत्यादिप्रत्यक्षस्य सद्रूपब्रह्मविषयत्वं यदुक्तं तन्न घटते । इदं हि वचनमनुवर्तमाने सद्रूपे ब्रह्मणि व्यावर्तमानं घटपटादिकं कल्पितं रज्ज्विदमंश इव सर्पादिकमिति प्रपञ्चमिथ्यात्वयुक्तेरवकाशप्रदानार्थम् । न च ब्रह्मण उपादानत्वोपपादनार्थमिदं वचनम्, कण्ठतस्तथैवोक्तत्वादिति शङ्क्यम् ; ब्रह्मणः कार्याभिन्नपरिणाम्युपादनत्वमभिमतं चेत् खलु तदुपपादनार्थम्-- मृद्घटः, मृन्मणिकम् -- इत्यादिवत् कार्योपादानाभेदावगाहि प्रत्यक्षमुदाहरणीयम् ; न च तथाभूतं ब्रह्मणः प्रपञ्चोपादानत्वमाचार्याणामभिमतम्, तस्य प्रकृत्यधिकरणे निराकृतत्वात् । अतो रज्जौ-- अयं सर्पः, इदं भूदलनम्-- इत्यादिधीवत् कल्पिततादात्म्यावगाहिप्रत्यक्षस्येदं व्याजान्तरेणोदाहरणमित्येव युक्तम् ।

तथात्त्रधिकरणे "यदा तमो" मन्त्रपूर्वार्धव्याख्यानावसरे "ननु नित्यप्रकाशे शिवे परब्रह्मणि ,सत्यपि कथं तमोमयं जगदिति चेन्न । स्वयंप्रकाशस्य शिवस्य

सर्वसाक्षिणः का हानिः ? नामरूपशून्यतया ग्रहणायोग्येषु विषयेषु विहतकरणशरीरशक्तीनां जीवानां प्रपञ्चग्रहणं नास्ति, मलतिरोहितस्वज्ञानतया शिवस्य स्वप्रकाशरूपस्यापि पूर्वमिव दर्शनं नास्ति । तस्मात् निरस्तसमस्तकार्यविशेषतया परमसुषुप्तिमयी महावस्था तम इत्युच्यते" इति शङ्कोत्तराभ्यां तमःशब्दं प्रळयकालवर्तिजीवगताज्ञानपरं व्याख्याय प्रकृत्यधिकरणे तन्मन्त्रोत्तरार्धख्यानावसरे तत्कालतमोऽपनोदिनी महास्फुरत्तारूपा परमा प्रज्ञा ज्ञानशक्तिः प्रसृता" इति शिवचिच्छक्तेः जीवगताज्ञानरूपपूर्वार्धोक्ततमोऽपनोदकत्वम्, तदुपपादनार्थं महास्फुरत्तारूपेति सर्वजीवगतघटपटादिविषयस्फुरणरूपत्वं च यदुक्तम्, यच्चारम्भणाधिकरणे "सच्चिद्रूपेण शिवेन यदि न व्याप्तं जगत्, तदा सत्तास्फर्तिभ्यां विनाकृतं कथम् -- अस्ति, स्फुरति-- इति च दृश्येत ? अवस्त्वेव भवेत्" इति--- घटो मम स्फुरति -- इत्यादिजीवधीष्वनुभूयमानस्य स्फुरणस्य ब्रह्मचिद्रूपत्वमाविष्कृतम्, यच्च "एष ह्येवानन्दयाति' इति जीवान् प्रत्यानन्दहेतुरानन्दमयः श्रूयते, स्वयं प्रचुरानन्दो हि परानानन्दयति" इत्यानन्दमयाधिकरणे, " को ह्येवान्यात्कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात्, एष ह्येवानन्दयाति, 'रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति' इति सर्वानुभवविषयत्वमस्याः श्रूयते । तथा च 'स एको मानुष आनन्दः ' इत्यारभ्य 'स एको ब्रह्मण आनन्दः' इति ब्रह्मपर्यन्तमुपाधितिरोधानादानन्दाविर्भावस्तारतभ्येन श्रूयते" इति, "अभावं बादरिः" इत्यधिकरणे च-- अहं सुखी -- इति जीवैरनुभूयमानस्य सुखस्य ब्रह्मानन्दरूपपरशक्त्यंशरूपत्वमुक्तम् इदमपि सर्वं न घटते। इदं हि जीवानां ब्रह्माभेदोपपादनार्थम्, भेदपक्षे तदनुपपत्तेः । अन्यज्ञानेनान्येषां स्फुरणवत्त्वस्यान्यानन्देनान्येषां सुखित्वस्य चायोगात् इति चेत् उच्यते -- "सन् घटः" इत्यादि प्रत्यक्षं विशेष्यांशरूपब्रह्मविषयमिति नाचार्याणां मतम् । "अथात आदेशो नेति नेति" इति वाक्यश्रुतप्रतिषेधप्रतियोगिविचारार्थं प्रवृत्ते प्रकृतैतावत्त्वाधिकरणे "ननु 'सन् घटः' 'सन् पटः' इत्यादिष्वनुवृत्तं सद्रूपं ब्रह्म सत्यम्, अन्यव्द्यावर्तमानं घटादिकं नेति नेतीति प्रतिषेधति श्रुतिः" इत्याशङ्कोत्तरत्वेन "तदव्यक्तमाह हि" (ब्र.३.२.२२) इति सूत्रमवतार्य "ब्रह्मस्वरूपं प्रत्यक्षादिना प्रमाणान्तरेण नाभिव्यज्यते, 'न सन्दृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम्' इत्यादिना यतः श्रुतिराह अतः प्रत्यक्षादिना सिद्धा सत्ता न ब्रह्म" इति तैरेव तत्सूत्रतात्पर्यस्य विवृतत्वात् । अतः प्रागुदाहृतं जन्माद्यधिकरणारम्भणादिकरणश्रुतं वाक्यद्वयं विशेषणांशरूपब्रह्मविषयं योज्यम्, तस्य समस्तप्रपञ्चाकारेण परिणामित्वस्याङ्गीकृतत्वेनाभेदप्रत्यक्षोदाहरणेन तदुपपादन-

स्योचितत्वात् । न च तस्येक्षत्यधिकरणभाष्ये ब्रह्मसत्तारूपत्वेनोक्ततया स्वयं सद्रूपत्वेन तस्यानुभवोक्तिरयुक्तेति वाच्यम्, ब्रह्म प्रति ज्ञानानन्दादिरूपस्य तस्य स्वयमपि ज्ञातृत्वानन्दित्वादिवत् ब्रह्मप्रतिसत्तारूपस्य तस्य स्वयं सद्रूपत्वस्याप्युपपत्तेः । यत्तु स्फुरणवैषयिकानन्दयोर्जीवगतयोर्ब्रह्मज्ञानानन्दांशत्वमुक्तम्, तत् जीवब्रह्मभेदेऽप्युपपद्यते, तत्तत्कर्णपुटावच्छिन्नस्य नभसः दिग्रूपस्य देशस्य वा तत्तज्जीवासाधारणश्रोत्रत्ववत्तत्तदन्तःकरणवृत्त्यभिव्यक्तस्य ब्रह्मज्ञानानन्दांशस्य तत्तज्जीवासाधारणस्फुरणसुखरूपत्वस्याङ्गीकारसम्भवात् ।

ननु "अभावं बादरिः" इत्यधिकरणे तत्तदन्तःकरणवृत्त्यवच्छेदमनपेक्ष्यानवच्छिन्नस्यैव परिपूर्णस्य ब्रह्मानन्दस्य मुक्तानुभाव्यपरमपुरुषार्थरूपत्वमुक्तम् । तत्र हि "परप्रकृतिरूपा परमसत्ताप्रकाशानन्दसमरसा परा शक्तिर्हि ब्रह्मणः स्वरूपतया परमाकाश उच्यते, या मुक्तानां परमेश्वरस्य च साक्षादर्थक्रियाहेतुः परम्परया त्वन्येषाम्" इति प्रस्तुत्य, "तथा हि 'को ह्येवान्यात्कः प्राण्यात्'" इत्यादिना "आनन्दाविर्भावस्तारतम्येन श्रूयते" इत्यन्तेन-? परम्परया त्वन्येषाम्-- इति संक्षिप्तमर्थं विविच्य, "निरुपाधिकतया ब्रह्मणि मुक्ते च परिपूर्णो वर्तते स आनन्दः, 'श्रोत्रियस्य चाकामहतस्य' इति श्रवणात्" इति सन्दर्भेण-- या मुक्तानां परमेश्वरस्य च साक्षादर्थक्रियाहेतुः-- इति भागस्यार्थो विवेचितः । तदनन्तरं च "यद्यकामहतः श्रोत्रियो मुक्तस्तदा कथं मानुषानन्दप्रभृतीनां प्राजापत्यानन्दान्तानां उपाधिविशेषवशात्तारतम्येनाभिव्यज्यमानब्रह्मानन्दांशरूपाणां अकामहतश्रोत्रियानुभाव्यत्वमभिहितम्" इत्याशङ्कापरिहाराय ह्युक्तम्-- "ब्रह्मार्पणबुध्या निष्कामानुष्ठिताग्निहोत्रादिकर्मा विद्वानकामहतः श्रोत्रियः, तस्य मुक्तस्य ब्रह्मणश्च तुल्य एवानन्दः ; तस्य योगातिशयेन तत्तद्भूमिमधिरूढस्य पूर्वत्र पूर्वत्र भूमावभ्यासः स्वल्प इति तदनुसारेण तत्तद्भूमौ तदीयानन्दाविर्भावस्य मानुषाद्यानन्दसाम्यकृतिरिति न विरोधः" इति। तदेतत्कथं जीवब्रह्मभेदपक्षे सङ्गच्छते ? अन्यानन्दस्य हि स्वकीयकिञ्चिद्वृत्त्यवच्छेदेन स्वासाधारणतामानीतस्यानुभाव्यपरमपुरुषार्थरूपत्वं न युज्यते-- इति चेत्तदपि सङ्गच्छत एव । परब्रह्मणः शिवस्य परमानन्दरूपा परा शक्तिर्हि सकलचिदचित्प्रपञ्चाकारा भाष्यकारैरिष्यते । तथा च तस्याः सर्वानपि जीवान् प्रति तत्तत्स्वरूपाभेदात् स्वरूपानन्दत्वं तत्तच्चिच्छक्तिरूपधर्माभेदात् धर्मानन्दत्वमप्यस्ति । तथापि मलावृतान् संसारिणः प्रति तत्तदात्माभेदेन तत्तद्धर्माभेदेन स्वरूपमात्रेण वा सा

न भासत इति तत्तदन्तःकरणवृत्तिविशेषावच्छेदकृततारतम्यवता लेशरूपेण सा पुरुषार्थः । मुक्तान् प्रति तु त्रिविधेनापि प्रकारेण भासत इत्यखण्डेन परिपूर्णरूपेणेति विशेषः । एवं ब्रह्मण इव मुक्तानामपि सा धर्मभूतानन्दरूपतया पुरुषार्थो भवतीत्येतत् भाष्येऽपि स्फुटीकृतम् । निष्कलङ्कनिरुपाधिकतया ब्रह्मणि मुक्तेषु च परिपूर्णो वर्तते स आनन्द इति । तस्माज्जीवब्रह्मभेदेऽपि ब्रह्मानन्दस्य जीवान् प्रति पुरुषार्थत्वमुपपद्यत इति न तदनुसारेण भाष्यकारैः कण्ठतः प्रसाधितस्य जीवब्रह्मभेदस्य भङ्गः शङ्कनीयः ।

प्रसाधितः खलु साक्षादंशाधिकरणे; तत्र हि "ब्रह्मैव सत्योपाधिवशात् मिथ्योपाधिवशाद्वा जीवभावमापद्यते" इति पूर्वपक्षं कृत्वा तन्निरासपूर्वकं विशिष्टरूपब्रह्मैकदेशविशेषणत्वात्मकं ब्रह्मांशत्वं जीवस्य स्थापितम् । अज्ञानोपाधिना सत्योपाधिना वा ब्रह्मैव जीवभावमापद्यत इति पूर्वपक्षनिरासार्थत्वेन "आभास एव च", "अदृष्टानियमात्", "अभिसन्ध्यादिष्वपि चैवम्", "प्रदेशादिति चेन्नान्तर्भावात्" (ब्र२.३.४९-५२) इति तदधिकरणान्तर्गतं सूत्रचतुष्टयं योजितम् । तस्मात् चिदचित्प्रपञ्चाकारशक्तिविशिष्टं ब्रह्मेति विशिष्टाद्वैतपक्ष एव आचार्याणां परमसिद्धान्तः ; न तु निर्गुणं नीरूपं निष्प्रपञ्चं ब्रह्मेति शुद्धाद्वैतपक्ष इति ।

एवमापाततः प्रतिभानेऽपि सूक्ष्मदृष्ट्या भाष्यच्छायापरामर्शे शुद्धाद्वैतमेव तेषां परमसिद्धान्तः ।

तथा हि-- "अनियमस्सर्वेषामविरोधः शब्दानुमानाभ्याम्" (ब्र.३.३.३२) इति सूत्रम् "येषु ब्रह्मोपासनेषूपकोसलविद्यादिष्वर्चिरादिगतिः श्रुता, सा तेष्वेव नियता; नोपासनान्तरेषु भवति, अश्रुतत्वात्" इति पूर्वपक्षनिरासार्थत्वेन प्रथमं भाष्ये योजितम्-- "येषु श्रुतार्चिरादिगतिः सा तेष्वेवेति न नियमः ; अपि तु सर्वेषां ब्रह्मोपासनानां भवत्येव; तथा सत्येव 'तद्य इत्थं विदुर्ये चेमे अरण्ये श्रद्धां सत्यमुपासते,' 'अग्निर्ज्योतिरहः शुक्लः' इत्यादिश्रुतिस्मृतिभ्यामविरोधो भवति" इति । तदनन्तरमिदं भाष्यम्-- "केचिदाहुः अनियमः, सर्वेषामुपासकानामर्चिरादिगतौ नियमाभावः, तथासति श्रुतिस्मृतिभ्यामविरोधः" इति । इदं यद्यपि मतान्तरोपन्यासत्वेन प्रतिभाति, तथापि तदनन्तरम् "तत्रापि न दोषः, निरन्वयोपासकानां तदपेक्षाभावा"न्'

इति तस्यापि सौत्रयोजनान्तरस्य निर्गुणोपासकानामर्चिरादिगत्यपेक्षाभावेन स्वाभिमत-हेतुनैवादुष्टत्वोपपादनात् । आद्यसूत्रयोजना सकलसगुणोपासनासाधारण्यार्था, द्वितीया-निर्गुणोपासनायामपि तत्प्राप्तौ ततो व्यावर्तनार्था, इति योजनाद्वयमपि वर्णकद्वयरूपेण स्वपक्षतयाङ्गीकृतमित्युन्नीयते ।

तथा "तदापीतेः" (ब्र.४.२.८) इत्यधिकरणावसानेप्येतन्मतान्तरमुपन्यस्तम्। तदधिकरणमेवम् - "समाना चासृत्युपक्रमादमृतत्वं च" (ब्र.४.२.७) इति पूर्वाधिकरणोपपादितोत्क्रान्तिस्तत्पूर्विका गतिश्च विदुष उपपद्यते नवेति संशये सति, नोपपद्यते,

"यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ।।"

इति विदुषोऽत्रैव ब्रह्मप्राप्तिरिति श्रवणात् । "तस्य हैतस्य हृदयस्याग्रं प्रद्योतते । तेन प्रद्योतेनैष आत्मा निष्क्रामति" इत्यादिना "इति नु कामयमानः" इत्यन्तेनोत्क्रान्ति-प्रकारं देहान्तरपरिग्रहं यावत्कर्मावसानं तेन देहान्तरेण कर्मफलभोगं पुनः कर्मार्जनायैतल्लोकप्राप्तिं उक्तस्योत्क्रान्त्यादिप्रकारादेः अविद्वद्विषयत्वं चोक्त्वा "अथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" इति विदुष उत्क्रान्तिप्रतिषेधात् । न च विदुष एव "तद्य इत्थं विदुः" इत्यादिश्रुतिषु अर्चिरादिगतिः, "तयोर्ध्वमायन्नमृतत्वमेति" इत्यादिश्रुतिषूत्क्रान्तिश्च श्रूयत इति शङ्क्यम् । "अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते । मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्" इति श्रुतौ विदुषो देहपातसमय एव वागादिमनःप्राणभूतसूक्ष्माणां परस्यां देवतायां परब्रह्मणि लीनत्वस्योक्तत्वेन तस्येन्द्रियमनःप्राणभूतसूक्ष्मापेक्षागतिर्नोपपद्यत इति उपपत्तिराहित्येन च अत्रैव ब्रह्मप्राप्तिश्रुतेरुत्क्रान्तिप्रतिषेधश्रुतेश्च प्रबलतया तदनुसारेण गत्युत्क्रान्तिश्रुत्योः क्रममुक्त्यर्थब्रह्मविद्विषयत्वस्य वक्तव्यत्वात् । न च "अस्य सोम्य पुरुषस्य" इत्यादिश्रुतौ वागादीनां परस्यां देवतायां वृत्तिलयो विवक्षितो न स्वरूपलयः, विद्वदविद्वत्साधारणस्य प्रायणस्य निरूप्यमाणत्वेनाविदुषो वागादीनां ब्रह्मण्यपि स्वरूपलयस्य वागादीनां मनः प्रभृतिषु स्वरूपलयस्येवासम्भाविततया तद्विषये संपद्यत

इति शब्दस्य वृत्तिलयार्थत्वेन तस्य पुनरर्थान्तरग्रहणायोगाच्चेति वाच्यम् । उदाहृतश्रुतेः सद्विद्यारूपविद्याप्रकरणाम्नातत्वेन तस्यां निरूप्यमाणस्य प्रायणस्य विद्वदेकविषयत्वात् संपद्यत इत्यस्य मनःप्रभृतिष्वन्वीयमानस्य वृत्तिलयार्थत्वेऽपि "स्याच्चैकस्य ब्रह्मशब्दवत्" (ब्र.२.३.४) इति न्यायेन परस्यां देवतायामन्वीयमानस्यौचित्यात् स्वरूपलयार्थत्वोपपत्तेश्चेति पूर्वः पक्षः ।

सिद्धान्तस्तु-- सर्वत्र परब्रह्मणः सत्त्वेऽपि देशविशेषस्थितस्य तस्य प्राप्तौ सत्यामेव देहबन्धविगमः । तत्प्राप्तिपर्यन्तं देहबन्धोऽनुवर्तते, विरजानदीमतिक्रम्य परब्रह्मलोकप्राप्तौ सत्यामेव कर्मबन्धक्षयोक्त्या तावत्पर्यन्तं तन्मूलसूक्ष्मदेहानुवृत्त्यवगमात् । अतस्तत्र तत्रार्चिरादिगतिश्रवणं मुक्तिफलप्राप्त्यर्थमेव, मुक्तिफलकविद्याप्रकरणाम्नानात्, तदपेक्षितत्वाच्च । यदुक्तं वागादीनां परस्यां देवतायां स्वरूपतो विलीनत्वात् विदुषो गतिर्नोपपद्यत इति तन्न । यतः शरीरपातानन्तरमपि विदुषः सूक्ष्मदेहोऽनुवर्तते ; चन्द्रसंवादादिवाक्यरूपप्रमाणात् तथोपलब्धेः । श्रूयते हि पर्यङ्कविद्यायां देवयाने पथि विदुषश्चन्द्रमसा संवादः--- "ये वै के चास्माल्लोकात् प्रयन्ति, चन्द्रमसमेव ते सर्वे गच्छन्ति" इत्युपक्रम्य "एतद्वै स्वर्गस्य लोकस्य द्वारं यश्चन्द्रमाः । तं यः प्रत्याह तमतिसृजते, अथ य एनं न प्रत्याह तमिह वृष्टिर्भूत्वा वर्षति । स इह कीटो वा पतङ्गो वा शकुनिर्वा शार्दूलो वा मत्स्यो वा अनड्वान्वा पुरुषो वान्यो वैतेषु स्थानेषु प्रत्याजायते यथाकर्म यथाविद्यं तमागतं पृच्छति कोऽसीति। तं प्रति ब्रूयात्" इत्यादि। अतस्तदनुरोधात् "अथ मर्त्योऽमृतो भवति" इत्यमृतत्ववचनममृतत्वप्राप्तेरासन्नत्वमात्रं ब्रवीतीति योजनीयम् । न तु देहसम्बन्धोपमर्दन तदानीमेवामृतत्वं ब्रवीतीति । अस्य सूक्ष्मशरीरस्य क्वचिद्विद्यमानत्वोपपत्तेश्च तदुपमर्दनामृतत्वं ब्रवीतीति न योजनीयम् । "उपलभ्यते ह्युत्क्रामतो विदुषोऽपि क्वचित्सूक्ष्मदेहगुण ऊष्मा, न स स्थूलदेहगुणः अन्यत्रानुपलम्भात्" । यदुक्तम् "न तस्य प्राणा उत्क्रामन्ति" इति विदुषः प्राणानामुत्क्रान्तिः प्रतिषिध्यते न तु शरीरात्, तस्येत्यस्याकामयमान इति प्रकृतजीवपरत्वात् ।

ननु तस्येति षष्ठ्या प्राणानां सम्बन्धित्वेन जीवो निर्दिष्टः, न तूत्क्रान्त्यपादानत्वेन । तदपादानं तु शरीरमेव, जीवात् प्राणानामुत्क्रान्तेरप्रसक्त्या

तत्प्रतिषेधायोगादिति चेन्न । अपादानापेक्षायां अश्रुताच्छरीरात् सम्बन्धितया श्रुतस्य जीवस्यैवापादानत्वेनापि ग्राह्यत्वात् प्राणानां जीवसम्बन्धितयैव प्रज्ञातानां तत्सम्बन्धकथने प्रयोजनाभावेन सम्बन्धमात्रवाचिन्याः षष्ठ्याः-- नटस्य श्रृणोति-- इत्यादाविवापादानत्वरूपविशेषपरतौचित्यात् । स्पष्टश्चैकेषां माध्यन्दिनानां शाखायां जीवस्यैवापादानभावः। "न तस्मात्प्राणा उत्क्रामन्ति" इत्यादिवचनेष्वत्रैव ब्रह्मसम्पत्ति-वचनेन प्राणानामपि तस्मिन्नेव काले विदुषो जीवात् विश्लेषप्रसक्तिसत्त्वात्। स्मर्यते च विदुषोऽपि मूर्धन्यनाड्योत्क्रान्तिः ---

"ऊर्ध्वमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् ।
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम्" ।।

इति । एवमिदमधिकरणम् "तदापीतेः संसारव्यपदेशात्", "सूक्ष्मं प्रमाणतश्च तथोपलब्धेः", "नोपमर्दनातः", "अस्यैव चोपपत्तेरूष्मा", "प्रतिषेधादिति चेन्न, शरीरात् स्पष्टो ह्येकेषाम्". "स्मर्यते च"(ब्र.४.२.८-१३) इति षड्भिः सूत्रैः वर्णितम् ।

एवं ब्रह्मविदुषो गत्युत्युत्क्रान्तिव्यवस्थापनेन निर्गुणब्रह्मविदोऽत्रैवब्रह्म सम्पत्तिर्व्यावर्तिता स्यादिति शङ्कापरिहारायानियमाधिकरणावसाने लिखितं मतान्तरमेतदधिकरणावसानेऽपि लिखितम्-- "केचिन्निरन्वयोपासकानामिह शरीरपात एव मुक्तिरिति अर्चिरादिगतिमनियतामाहुः" इति ।

एतन्मतं परिगृहीतवतामाचार्याणामयमाशयः -- "इति नु कामयमानः" इति अविद्वद्विषयं परिसमाप्य, "अथाकामयमानः" इति विद्वद्विषये विशेषाभिधानं प्रतिज्ञाय "न तस्य प्राणा उत्क्रामन्ति" इति यदुच्यते तदविदुषः प्राणानां यदपादानमुत्क्रमणं प्रागुक्तं तदपादानस्यैवोत्क्रमणस्य प्रतिषेधपरमिति विद्वद्विषयविशेषाभिधानप्रतिज्ञान-तात्पर्यस्वारस्येन प्रतीयते । अविदुषश्च प्राणानां शरीरापादानकमेवोत्क्रमणं प्रागुक्तम् "तमुत्क्रामन्तं प्राणोऽनूत्क्रामति, प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति" इति । अत्र जीवस्य यत उत्क्रमणमुक्तं तत एवोत्क्रमणं मुख्यप्रणस्येन्द्रियाणां च विवक्षितमिति जीवानूत्क्रमणोक्त्यावसीयते । जीवस्य तु शरीरादेवोत्क्रमणमुक्तमिति निर्विवादम् । एवं "न तस्य प्राणाः" इति वाक्यस्य शरीरापादानकोत्क्रमणप्रतिषेधपरत्वे स्वरसतः

प्रतीयमाने केन हेतुना तस्य तत्त्यक्तव्यम् ? न तावत् प्राणसम्बन्धितया श्रुतस्य जीवस्यैव तदुत्क्रमणापादानतयापि ग्रहणे संभवति मनस्यविपरिवर्तमानस्यापादानान्तरस्य कल्पनं न युक्तम् -- इति न्यायानुसारेण ; पूर्वसन्दर्भमारभ्य शरीरस्य तदापादानत्वेन विपरिवर्तमानत्वात् ।

"प्रजापतिर्वरुणायाश्वमनयत् स स्वां देवतामार्च्छत्स पर्यदीर्यत स एतं वारुणं चतुष्कपालमपश्यत् तन्निरवपत्ततो वै स वरुणपाशादमुच्यत ।।" इत्युपक्रमच्छायया अश्वदातुः वारुणचतुष्कपालेष्टिर्विधास्यत इत्यस्मिन्नर्थे मनसि विपरिवर्तमाने "वरुणो वा एतं गृह्णाति योऽश्वं प्रतिगृह्णाति यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेत्' इति तदनन्तरावगते विधिवाक्ये साक्षादधिकारिसमर्पकतया श्रुते "योऽश्वं प्रतिगृह्णाति" इति शब्दे सत्यपि प्रतिग्रहीतुरधिकारित्वं नेष्यते; इह जीवस्यापादानत्वप्रतिपादकशब्दरहितस्य केवलन्यायमात्रेणापादानत्वकल्पनं नेष्टव्यमिति किमु वक्तव्यम् ! नापि तदनन्तरसन्दर्भानुसारेण । तदनन्तरं हि "ब्रह्मैव सन् ब्रह्माप्येति" इति, 'तदेष श्लोको भवति--

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते ।। इति

तद्यथा अहिर्निल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते । अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव" इत्येतावान् वाक्यसन्दर्भः श्रूयते ।

तत्र प्रथमवाक्यं तावत् नित्यसिद्धब्रह्मभावाभिव्यक्तिं विदुषः प्रतिपादयत्तस्य स्थानविशेषप्राप्त्यर्थं गत्यपेक्षाभावात् तद्गत्युपयोगि प्राणानामुत्क्रमणं नापेक्षितमिति शरीरापादानकतदुत्क्रमणप्रतिषेधार्थग्रहण एवानुकूलम्, न तु जीवप्राणाविश्लेषरूपार्थग्रहणे । न च "ब्रह्माप्येति" इति वचनं ब्रह्मणो विदुषश्च प्राप्यप्राप्तृभावेन भेदं प्रतिपादयतीति तस्य तद्ब्रह्मभावाभिव्यक्तिपरं न भवति; अतो "ब्रह्मैव सन्" इत्यत्रैवकार इवार्थ इति ज्ञानविकासेन ब्रह्मसदृशोभवन्नेव ब्रह्म प्राप्नोतीति तदर्थो ग्राह्य इति वाच्यम् । अप्येतिशब्दो हि न प्राप्त्यर्थः, किन्तु लयार्थः । लयश्च तस्य प्राणेन्द्रियमनोविशिष्टं स्थूलरूपं विहाय शुद्धेन सूक्ष्मरूपेण तादात्म्याभिव्यक्तिरेव । यदि चायं प्राप्त्यर्थः स्यात्, तदाप्यत्र तादात्म्याभिव्यक्तिरेव तदर्थः पर्यवस्यति ।

बृहदारण्यक एव "असतो मा सत् गमय तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमय" इति मन्त्रात् पठित्वा "स यदाहासतो मा सद्गमयेति मृत्युर्वा असत्सदमृतं मृत्योर्मामृतं गमयामृतं मा कुर्वित्येवैतदाह, तमसो मा ज्योतिर्गमयेति, मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्मामृतं गमय अमृतं मा कुर्वित्येवैतदाह, मृत्योर्मामृतं गमयेति नात्र तिरोहितमिवास्ति" इति तन्मन्त्रत्रयव्याख्यानरूपब्राह्मणे गमयेति प्रापणार्थशब्दानां ऐक्यसम्पादनार्थत्वेन व्याख्याततयान्यत्रापि तत्समानार्थवाक्येषु प्राप्त्यर्थशब्दानामैक्याभिव्यक्तिपरत्वावसायात् ।

तथा श्लोकरूपं द्वितीयवाक्यमपि शरीरापादानकोत्क्रमणप्रतिषेधरूपार्थग्रहण एवानुकूलमिति स्पष्टमेव । न च तत्र "अत्र ब्रह्म समश्नुते" इति वर्तमानसामीप्ये वर्तमानप्रत्यय इति "अत्र" ब्रह्मप्राप्तिशैघ्य्रप्रतिपत्त्यर्थोऽर्थवाद इति योजनीयम्, मुख्यार्थग्रहणस्यैवोचितत्वात् । तृतीयवाक्यमपि विदुषा त्यक्तस्य शरीरस्य वल्मीकादनपसृतेन सर्पेण त्यक्तमहिकञ्चुकं वल्मीकगतं दृष्टान्तं प्रतिपादयत्तदर्थग्रहण एवानुकूलम् । चतुर्थवाक्यमपि त्यक्तशरीरस्य मुक्तस्य विदुषः सर्वप्राणनहेतु-परब्रह्मभावं, तदुपपत्त्यर्थं "तेज एव" इति विशुद्धज्ञानरूपत्वं च प्रतिपादयत्तत्रैवानुकूलम् । अतो न वाक्यशेषानुसारेणापि "न तस्य प्राणा उत्क्रामन्ति" इत्यस्य स्वारसिकार्थत्यागो युक्तः।

ननु माध्यन्दिनशाखायाम्, उदाहृतवाक्यस्थाने "न तस्मात्प्राणा उत्क्रामन्ति" इति पाठो दृश्यते । अतस्तदनुसारेण काण्वशाखायामपि तस्येति षष्ठ्याः सम्बन्धसामान्य- वाचिन्याः अपादानत्वरूपसम्बन्धविशेषपर्यवसानकल्पनं युक्तम् । एवं च यद्यपि "न तस्य प्राणा उत्क्रामन्ति" इति प्रथमवाक्ये विदुषः शरीरपाते अविद्वदपेक्षया विशेषाभिधानं न लभ्यते, तथाप्यग्रे ब्रह्मप्राप्त्युक्त्या विशेषाभिधानं लभ्यत इति तन्मात्रविषया विशेषाभिधानप्रतिज्ञेति कथञ्चिद्योजनीयमिति चेन्मैवम् । "न तस्मा- त्प्राणा उत्क्रामन्ति" इत्येतदनन्तरम् "अत्रैव समवनीयन्ते" इति प्राणानाम् "अत्र ब्रह्म समश्नुते' इति श्लोकार्थानुगुण्येनात्रैव लयश्रवणात्, तदनुसारेण तस्मादिति पदस्य शरीरशरीरिणोरभेदोपचारेण शरीरपरतया नेतव्यत्वात्. अत एवार्तभागप्रश्ने "यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो न इति" प्रश्ने, उत्तरे "नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयत्याध्मायत्याध्मातो मृतः शेते" इति

प्राणोत्क्रान्त्यपादानस्याध्मानेन वायुपूरणेन दृतिवदुच्छ्वयनस्य शरीरधर्मस्य कीर्तनं दृश्यते ।

नन्वार्तभागप्रश्नोत्तरे न विद्वद्विषये, उत्तरसन्दर्भविरोधात्; उत्तरसन्दर्भे हि "यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मा ओषधीः लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयते, क्वायं तदा पुरुषो भवति" इति पुनरार्तभागप्रश्ने याज्ञवल्क्येनार्तभागेन च रहसि संमन्त्रणेन पुण्यपापरूपं कर्म तदाश्रयंत्वेन निश्चितमित्याम्नायते, तदनन्तरसन्दर्भे श्रुत्यैव तथा प्रतिपादनात् । तत्र हि श्रूयते-- "तौ होत्क्रम्य मन्त्रयाञ्चक्राते, तौ ह यदूचतुः कर्म हैव तदूचतुः, अथ यत् प्रशशंसतुः कर्म हैव तत् प्रशशंसतुः, पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन" इति । न च "अपपुनर्मृत्युं जयति" इति पूर्ववाक्ये संसारतरणरूपफलमुच्यते; तेन प्रकृतविद्वद्विषयत्वमुत्क्रान्तिप्रतिषेधस्यावसीयत इति वाच्यम् । "अग्निर्वै मृत्युः सोऽपामन्नम्" इत्यपामग्न्यन्नत्वोपासनमुक्त्वा तस्य फलम् "अपपुनर्मृत्युं जयति" इत्युच्यते । तस्मादग्निजय एवात्र मृत्युजयो न संसारतरणम् । अतोऽस्य वाक्यस्यापि अविद्वद्विषयत्वादविदुषश्च शरीरात्प्राणानामुत्क्रान्तेरवश्यंभावात् जीवात् तेषामुत्क्रान्तिप्रतिषेध एव तदर्थो ग्रह्यः । इतश्चैतदेवम् "यत्रायं पुरषो म्रियते" इति पूर्ववाक्ये पुरुषशब्देन प्रकृतो जीव एव "उदस्मात्प्राणाः क्रामन्ति" इत्यत्र सर्वनाम्ना परामर्शनीयः । न च तत्र पुरुषशब्दस्य शरीरपरत्वं शङ्कनीयम् "यत्रास्य पुरुषस्याग्निं वागप्येति" इत्युत्तरसन्दर्भे "पृथिवीं शरीरम्" इति प्रकृतपुरुषसम्बन्धित्वेन शरीरस्य पृथक् कीर्तनात् । न च "आकाशमात्मा" इत्यात्मापि पृथक् कीर्तित इति वाच्यम्, तत्रात्मशब्दस्य "आनन्द आत्मा" इत्यत्रेव मध्यावयववाचित्वेन हृदयावकाशपरत्वात् ।

एवं च "स उच्छ्वयति" इति वाक्ये तच्छब्दः शरीरशरीरिणोरभेदोपचारेण शरीरपरतया नेतव्य इति चेन्मैवम्, अविद्वद्विषये जीवप्राणविश्लेषस्याप्रसक्तत्वेन तत्प्रतिषेधस्यायुक्ततया प्रश्नोत्तरयोर्विद्वद्विषयत्वस्यावश्यवक्तव्यत्वात् । ननु पूर्वोत्तरप्रश्नोत्तराणामविद्वद्विषयत्वेन अनयोरपि प्रश्नोत्तरयोरविद्वद्विषयत्वस्यावश्यवक्तव्यत्वात् जीवप्राणविश्लेषप्रसक्तिर्यथाकथंचित्संपादनीयेति चेन्न ; अविद्वद्विषयप्रश्नोत्तरसन्निधिमात्रेण विद्वद्विषयत्वलिङ्गबाधायोगात् । आर्तभागप्रश्नपरम्परायां "कति ग्रहाः

कत्यतिग्रहाः" इत्याद्यः प्रश्नः, "यदिदं सर्वं मृत्योरन्नं का स्वित्सा देवता यस्या मृत्युरन्नम्" इति द्वितीयः, "यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो न" इति तृतीयः, "यत्रायं पुरुषो म्रियते, किमेनं न जहाति" इति चतुर्थः, यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति" इत्यादिः पञ्चमः-- इति प्रश्नानामेकविषयत्वाभावेनैकरूप-प्रायपाठासिद्धेश्च । तथापि तृतीयादिप्रश्नानां म्रियमाणपुरुषवृत्तान्तगोचरत्वेनैक-विषयत्वात् चतुर्थपञ्चमयोरिव तृतीयस्यापि प्रश्नस्याविद्वद्विषयत्वं वक्तुं युक्तम्, तत्सन्निधिबलादिति चेदुच्यते । अश्वलप्रभृतिभिः याज्ञवल्क्येन सह मत्सरतो विजिगीषुकथायां प्रवृत्तैस्तमप्रतिभायां पातयितुं प्रायेण निगूढा प्रश्नाः कृताः । यथा आर्तभागेनैव तावत् "कति ग्रहाः कत्यतिग्रहाः" इति यज्ञवृत्तान्तविषय इव प्रश्नः कृतः । अध्यात्मप्रसङ्गान्तर्गतत्वान्नायं यज्ञवृत्तान्तविषय इति प्रष्टुः कौटिल्यमवगम्य "प्राणवाग्जिह्वाचक्षुःश्रोत्रमनोहस्तत्वचो ग्राहाः । अपाननामरसरूपशब्दकामकर्मस्पर्शाः अतिग्रहाः" इत्युत्तरमुक्तम् । तथा लाह्यायनिना "क्व पारिक्षिता अभवन्" इत्यप्रसिद्धार्थेन पारिक्षितशब्देन प्रश्नः कृतः । "यत्राश्वमेधयाजिनो अभवन्" इति तदर्थं विवृण्वतैव याज्ञवल्क्येनोत्तरमुक्तम् । तथा गार्ग्या "अहं वै त्वा याज्ञवल्क्य यथा काश्यो वा वैदेहो वा उग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेत्, एवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यां उपोदस्थां तौ मे ब्रूहि" इति प्रश्नवाक्यच्छाययैव मत्सरविवरणं कृतम् । एवं चात्र तृतीयप्रश्नस्याविद्वद्विषय-चतुर्थपञ्चमप्रश्नसन्निधिरपि त्रयाणामेकविषयत्वव्यामोहजननार्थत्वेनान्यथासिद्धो नार्थ-व्यवस्थापनक्षमः ; न तरां ग्रहातिग्रहमृत्युभक्षकदेवतारूपपरस्परभिन्नविषयाद्द्वितीय-प्रश्नप्रतिपक्षितः ; न तमां तृतीयप्रश्नगतविद्वद्विषयत्वलिङ्गबाधित इत्येषा दिक् । तस्मात्सगुणब्रह्मविद्यामात्रव्यवस्थितोत्क्रान्तिपूर्विकार्चिरादिगतिः, न विशुद्धब्रह्मविद्या-साधारणीति । अस्मिन्मते सूत्रयोजनाप्रकारस्तु शाङ्करभाष्यदर्शित एवाचार्याणामभिमत इति द्रष्टव्यम् ।

तथा "अर्चिरादिना तत्प्रथितेः"(ब्र.४.३.१) इत्यधिकरणावसानेऽप्येतन्मतान्तर मुपन्यस्तम् । तदधिकरणमेवम्-- मूर्धन्यनाड्या निष्क्रान्तस्य विदुषः परब्रह्मप्राप्तिरर्चिरादिनैकेन मार्गेण उत मार्गान्तरेणापीति संशये पूर्वः पक्षः : मार्गान्तरेणापि ब्रह्मप्राप्तिरस्ति । न खलु "अन्तरेण तालुके, य एष स्तन इवावलम्बते, सेन्द्रयोनिः यत्रासौ केशान्तो विवर्तते, व्यपोह्य शीर्षकपाले" इति व्याहृतिविद्यायां

श्रुतानि तालुकान्तरावलम्बमानावयवकेशान्तशीर्षकपालरूपाणि मार्गपर्वाण्यर्चिरादिमार्गे श्रूयन्ते । शैव्यप्रश्ने "स सामभिरुन्नीयते ब्रह्मलोकम्" इति सामवेदपठितानां साम्नामेव ब्रह्मलोकपर्यन्तं प्रापकत्वं श्रूयते । दहरविद्यायां "यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वं आक्रमते" इति सूर्यरश्मीनामेवेतरव्यवच्छेदेन प्रापकत्वं श्रूयते। तथान्यत्र "स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति" इति त्वरावचनादादित्यप्राप्तेरर्चिरादि-पूर्वपर्वानपेक्षत्वं प्रतीयते । एवं च यथाम्नानं प्रकरणभेदेन च व्यवस्थितेन तेन तेन मार्गेण ब्रह्मप्राप्तिः, न त्वर्चिरादिनैकेनैवेति ।

सिद्धान्तस्तु-- प्रसिद्धस्तावदर्चिरादिमार्गः सर्वविद्यासाधारण इति । छान्दोग्ये पञ्चाग्निविद्यायाम् "तद्य इत्थं विदुर्ये चेमे अरण्ये श्रद्धां तप इत्युपासते" इति, तथा बृहदारण्यकेऽपि "ये चामी अरण्ये श्रद्धां सत्यमुपासते" इति श्रवणात् ।

ननु यासु विद्यासु न कश्चिदपि मार्गः श्रूयते, तद्विषयमिदम्-- उपासते-- इति विद्वदनुकीर्तनं भविष्यति । भवेदेतदेवं यदि मार्गैक्यमशक्योपपादनं स्यात्, शक्यते हि तदुपपादयितुम् । तथाहि - व्याहृतिविद्यायां स्तनाकृतिनेन्द्रस्य जीवस्य परमेश्वरस्य वा स्थानभूतावयवेन निर्गत्य केशान्तस्थानस्य शिरःकपालस्यातिलङ्घनं यदुक्तं तन्मूर्धन्यनाड्या निष्क्रमणमेव । तदनन्तरम् "भूरित्यग्नौ प्रतितिष्ठति भुव इति वायौ, सुवरित्यादित्ये" इति यदग्न्यादीनामनुकीर्तनं तदर्चिरादिमार्गपर्वभूतानामेव । तत्र यदग्न्यादिषु प्रतितिष्ठतत्वश्रवणं तत्तेषु कियत्कालं विश्रान्तिरस्तीत्यभिप्रायेण । व्याहृतिविद्यायाम् - महः - इति चतुर्थव्याहृतिरूपस्य ब्रह्मण इव व्याहृतित्रयरूपाणा-मग्न्यादीनामप्युपास्यत्वमस्तीति तद्बलात्तेषां लोकेषु विश्रान्तिवचनं युक्तम् । "स सामभिरुन्नीयते ब्रह्मलोकम्" इत्यत्र "यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत" इत्येकमात्रद्विमात्रप्रणवसाधनकोपासनानुकीर्तनानन्तरं त्रिमात्रप्रणव-साधनकोपासनाविधानात्तत्र प्रणवमात्राणां ऋग्यजुस्सामरूपतया प्रतिपादितत्वाच्च विद्यासाधनप्रणवत्रितये त्रिमात्रस्य तृतीयमात्रारूपाण्येव सामानि विद्यासाधनतया ब्रह्मप्रापकत्वेनानुकीर्तनानि, न तु मार्गतया । "अथैतैरेव रश्मिभिः" इत्यत्रावधारणं रश्मिविधानार्थप्राप्ततदयोगव्यवच्छेदानुवादकम्, न त्वर्चिरादीनां व्यवच्छेदकम्, एकस्य वाक्यस्य रश्मिप्रापणे तदितरव्यवच्छेदे च तात्पर्यासंभवात् । त्वरावचनं पितृयाणापेक्षयोपपन्नम्, न पूर्वपर्वाणि व्यवच्छिनत्ति । नापि विदुषामेव मार्गान्तर-

मवधित्वेनापेक्ष्यते । एवं मार्गैक्योपपादने संभवति लाघवन्यायानुगृहीतसामान्यमुख-प्रवृत्तपञ्चाग्निविद्यावाक्यातिलङ्घनं न युक्तमिति ।

एवमर्चिरादिगतेः सकलब्रह्मविद्यासाधारण्यव्यवस्थापनात् निर्गुणब्रह्मविदोऽत्रैव ब्रह्मसंपत्तिर्व्यावर्तिता स्यादिति शङ्कापरिहारार्थमेतदधिकरणावसानेऽपि तन्मतान्तर-मुपन्यस्तम्-- "निरन्वयोपासकानां नार्चिरादिरिति केचित् " इति। तस्मिन् मते "अर्चिरादिना तत्प्रथितेः" (ब्र.४.३.१) इतीदं सूत्रं प्रथितग्रहणात् प्रायोऽभिप्रायं नेतव्यम्। अवश्यं च प्रायोऽभिप्रायमिदमिति सर्वैरपि वक्तव्यम्, हिरण्यगर्भपर्यन्तानां देवानां स्वस्वलोकेषु स्थित्वैव मुच्यमानानामर्चिरादिमार्गासंभवात् । न च भुवि विद्यामनुष्ठाय मुच्यमानानां मनुष्याणामयमेक एव मार्ग इति नियमो विवक्षित इति वाच्यम् । मधुविद्योपासकानां वसुरुद्रादित्यमरुत्साध्यगणपदप्राप्तिपूर्विकायां मुक्तौ वस्वादिपदपूर्वकमार्गान्तरावश्यंभावादित्याचार्याणामभिप्रायः । एवं यत्र यत्राधिकरणे ब्रह्मविदो गतेरुत्क्रान्तेर्वा व्यवस्थापनं क्रियते, तत्र सर्वत्रापि तस्य तस्याधिकरणस्य सकलब्रह्मवित्साधारण्याशङ्कापरिहारार्थमस्य मतस्योग्न्यासात् अनियमाधिकरणे स्वयमप्यस्योपपादनाच्चात्राचार्याणां तात्पर्यतिशयोऽवगम्यते । न च सर्वत्रापि "केचित्" इत्युपन्यासादनभिमतत्वं शङ्कनीयम्, स्वयमिदानीं सगुणविद्यानिष्ठ एव न तु निर्गुणविद्यानिष्ठ इति द्योतनार्थत्वेनैतस्यान्यथासिद्धतया ततः स्वयमुपपादनाभ्यस्लो-पन्यासाभ्यामवगतस्य तस्मिन् मते तात्पर्यातिशयस्यापह्नोतुमशक्यत्वात् । आनन्दमयाधिकरणे आनन्दमयः परं ब्रह्म तत्प्रतिष्ठारूपं पुच्छब्रह्म तु तद्वाचकं प्रणवाख्यं शब्दब्रह्मेत्यस्मिन्नर्थेऽधिकरणशरीरं योजयित्वा तदनन्तरं "केचिदाहुः" इति मतान्तरत्वेनोपन्यस्तस्य "आनन्दमयश्चिच्छक्ति तत्प्रतिष्ठारूपं पुच्छब्रह्म तु परं ब्रह्म" इति पक्षस्य, जन्मादिसूत्रे (ब्र.१.१.२) "यः खलु अन्योऽन्तरात्मानन्दमयः" इति प्रस्तुत्य 'सैषानन्दस्य मीनांसा भवति' इत्यारभ्याभ्यासात् निरतियशिरस्कत्वेन 'स एको ब्रह्मण आनन्दः' इति निरूपितः परब्रह्मधर्मत्वेन, स एव 'आनन्दो ब्रह्म' इति प्रचुरत्वात् ब्रह्मत्वेनोपचर्यते । तादृशानन्दभोगरसिकं ब्रह्म नित्यतृप्तमित्युच्यते" इति स्वमततयोपन्यासदर्शनेनाभिमतपक्ष एव केचिदित्युपन्यास इत्याचार्यशैलीदर्शनाच्च ।

एवं निर्विशेषब्रह्मविद्याभ्युपगमानुगुण्येन विद्यायां जीवब्रह्माभेद-विषयत्वाभ्युपगमोऽपि "प्राणस्तथानुगमात्" (ब्र.१.१.२९) इत्यधिकरणे दृश्यते । तत्र

हि "प्राणोऽस्मि प्रज्ञात्मा, तं मामायुरमृतमित्युपास्व" इति मुक्त्यर्थमुपास्यतया इन्द्रेणोपदिष्टः प्राणः परमात्मा, न त्विन्द्र इति निर्णीय, कथं तर्हि "प्राणोऽस्मि" इति "मामुपास्व" इति चोपदेश इत्याशङ्कापरिहारार्थस्य "शास्त्रदृष्ट्या तूपदेशो वामदेववत्" इति सूत्रस्य "य आत्मनि तिष्ठन्" इत्यादिशास्त्रेण स्वान्तर्यामिणं परमात्मानमवगम्य, "तन्नामरूपाभ्यां व्याक्रियते" इत्यादि शास्त्रेणाहमादिशब्दानां स्वान्तर्यामिपरमात्मपर्यन्तत्वं चावगम्य तद्दृष्ट्यायमिन्द्रेण कृतः-प्राणोऽस्मि इत्युपदेश इत्येकमर्थमुक्त्वा स्वात्मपरमात्माभेदविषयया "तत्त्वमसि" इत्यादिशास्त्रजन्यदृष्ट्या वा तथोपदेश इत्यर्थान्तरमुक्तम् -- "अथवा वेदान्तविज्ञानोपलब्धया ब्रह्मात्मसामरस्य-भावनया ब्रह्मभावमुपगतस्य विगलितमनुष्यादिदेहविषयकल्पिताहंभावसंकोचस्य संपन्नविश्वाकारपराहंभावस्य वामदेवस्य सर्वगतत्वावगमान्मनुसूर्यादिप्रपञ्चभावोक्तिः। एवमिन्द्रस्यापीति निश्चीयते" इति ।

इत्थं निर्गुणविद्यायामभेदभावनासंभवे सगुणविद्यायां सा न संभवति; सगुणस्य परमेश्वरस्य जीवस्य च सर्वज्ञत्वकिञ्चिज्ज्ञत्वादिविरुद्धधर्मयोगकृतभेद-सत्वादित्याशङ्क्य व्यावहारिकभेदसत्वेऽपि तात्त्विकाभेददृष्ट्या तदभेदभावना कार्येति एतदर्थत्वेन "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" (ब्र.४.१.३) इत्यधिकरणं प्रवर्तितम्। तदित्थम्-- ब्रह्मोपासनमुपासकेन स्वात्मभिन्नतया कार्यम्, उत्त स्वात्माभिन्नतयेति संशये पूर्वः पक्षः-- "विश्वाधिको रुद्रो महर्षिः" "अधिकं तु भेदनिर्देशात्" इत्यादिश्रुतिसूत्रेषु प्रत्यगात्मनः पशोर्जीवात्पत्युः परब्रह्मणोऽर्थान्तरत्वेन निरूपितत्वात् सर्वज्ञत्वादिना जीवस्य ब्रह्मभावाघटनाच्च ब्रह्मोपासनं स्वभिन्नत्वेनैव कार्यम् -- इति । सिद्धान्तस्तु -- यद्यपि जीवादधिकमेव शिवाख्यं परं ब्रह्म, तथाप्युपासिता "अहं ब्रह्मास्मि" इति तदुपासीत, यतः पूर्वेऽप्युपासितारः "त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि" इत्यात्मेत्येवावगच्छन्त । न च तत्र शरीरशरीरिभावनिबन्धनं सामानाधिकरण्यम् । तदा हि "अहं वै त्वमसि" इति निर्देश एवोपपद्यते, त्वं शब्दनिर्दिष्टे परमेश्वरे स्वशरीरकत्वपर्यन्तस्याहंशब्दस्य वृत्तिसंभवात् । "त्वं वा अहमस्मि' इति निर्देशस्तु नोपपद्यते, अहंशब्दनिर्दिष्टे परमेश्वरशरीररूपे स्वस्मिन् परमेश्वरवाचिनः त्वंशब्दस्य वृत्त्यनुपपत्तेः । शरीरवाचिनां हि शरीरिपर्यन्तत्वं व्युत्पत्तिसिद्धम्, न तु शरीरिवाचिनां शरीरपर्यन्तत्वम् । न च वाक्यद्वयेऽपि त्वंशब्दौ प्रस्तुतगुणविशिष्टपरमेश्वरविषयौ, अहंशब्दौ स्वशरीरकत्वविशिष्टतद्विषयाविति वाक्यद्वयमप्येकरूपार्थपरमिति वाच्यम्,

तदानीं "त्वं वा अहमस्म्यहं वै त्वमसि" इति व्यवस्थितयुष्मदस्मच्छब्दपौर्वापर्या-स्म्यसिशब्दप्रयोगकृतवाक्यद्वयवैलक्षण्यवैयर्थ्यापत्तेः, एकेनैव वाक्येन स्वान्तर्यामिणः परमेश्वरस्य चाभेदसिद्ध्या वाक्यान्तरवैयर्थ्यापत्तेश्च । न चाभेदधीदार्ढ्यार्थं वाक्यद्वयम्, जीवपरमेश्वरयोरिवान्तर्यामिपरमेश्वरयोः भेदभ्रान्त्यभावेन तद्दार्ढ्योपपादन-स्यानपेक्षितत्वात् । अतः कर्मव्यतीहारेण स्वस्मिन् परमेश्वराभेदः परमेश्वरे स्वाभेदश्च भेदाभेदशङ्कानिरासेन भेददार्ढ्यार्थं विधित्सितोऽत्रेत्यवसीयते । एवं "तद्योऽहं सोऽसौ, योऽसौ सोऽहम्" इति ऐतरेयवाक्येऽपि ।

एवमवगच्छतश्चोपासकानर्थान्तरत्वेऽपि परं ब्रह्मस्वरूपतयाऽनुगृह्णाति । "ते च पुनः स्वात्मतया ग्राहयन्ति परानपि शिष्यान् 'तत्त्वमसि' इत्यादिना" । तत्त्वमसीति वाक्येऽपि सामानाधिकरण्यं शरीरशरीरिभावनिबन्धनं न भवति । यतस्तत्र त्वंशब्दनिर्दिष्टे तच्छब्दनिर्दिष्टप्राग्वर्णितजगत्कारणत्वाद्युपलक्षितपरमेश्वराभेदो बोध्यत इत्यसिशब्दयोगादवगतेः त्वंशब्दः संबोध्यजीवमात्रपर; न तु तदन्तर्यामिपर्यन्तः, संबोध्यं प्रति स्वात्मन इव स्वान्तर्यामिणः स्वानुभवेन वा प्राचीनोपदेशेन वा प्रसिद्धत्वाभावेन तस्य तं प्रत्युद्देश्यतानर्हत्वात्;प्रकृतस्य सद्रूपस्य परमेश्वरस्य कथञ्चित्स्वान्तर्यामितया प्रागुपदिष्टत्वसमर्थने तत्र तद्भेदशङ्कानुदयेन पौनःपुन्येन तद्बोधनानपेक्षणादिति ।

न च प्रकृतैतावत्त्वं हीत्यधिकरणभाष्ये (ब्र.३.२.२१) ब्रह्माभेदभावनायां गरुडाभेदभावनायाः दृष्टान्तीकरणात् तद्वदारोपितविषयत्वमेव ब्रह्माभेदभावनाया भाष्याभिमतम्, न तु तात्त्विकाभेदविषयत्वमिति शङ्कनीयम्, शास्त्रदृष्टिसूत्रे (ब्र.१.१.३१) ब्रह्मात्मसामरस्यभावनया, ब्रह्मभावमुपगतस्येत्युक्त्या, आत्मेति तूपगच्छन्तीत्यधिकरणे (ब्र४.१.३) "उपासितुरर्थान्तरत्वेऽपि तानुपासितॄननुगृह्णाति स्वस्वरूपतया परं ब्रह्म" इत्युक्त्या चाभेदस्य तात्त्विकत्वावगमात् । न ह्यभेदस्य तात्त्विकत्वाभावे वस्तुतस्तद्भावप्राप्त्युक्तिरुपपद्यते । उपासितुरर्थान्तरत्वेपीत्यनुवादस्तु व्यावहारिकभेदसद्भावेपीत्येतदर्थः पूर्वपक्षबीजशङ्कानिराकरणार्थ इति न विरोधः । अत एव निखिलभ्रान्त्यादिहेतुपुण्यपापक्षयपूर्वकं परमशिवालोके तत्सायुज्यं प्राप्तस्यपि शिवाहंभावानुवृत्तिः विकारावर्तिसूत्रभाष्ये (ब्र.४.४.१९) प्रतिपादिता "सदाशिवादीनामधिकारिणां ब्रह्मान्तानां मण्डलेषु स्वेच्छया सञ्चरमाणः कामान्नी कामरूपी विगलितमनुष्यादिदेहाभिमानोऽसङ्कुचितशक्तित्रयव्यापारः परमानन्दप्रकाश-

विभूतिमयशिवशक्तिसामरस्यपरब्रह्मरूपैकरसप्रपञ्चावगाहिनं परिपूर्णमहंभावं प्रकटमनुभवति । तथाहि-- अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽहमन्नादोऽहमन्नाद' इति भोग्यभोक्त्रादिसकलप्रपञ्चात्मभावपरिपूर्णाहम्भावनास्यावगम्यते' इति । यद्यपि शिवसायुज्यप्राप्तस्य चिच्छक्तिविकासो न जगद्व्यापकतावस्थापन्नस्य प्रपञ्चनियमनशक्त्युन्मीलनात्, सर्वशरीरकस्य सतः सकलभोग्यभोक्तृशरीरकत्वप्रयुक्तः पराहम्भावः शिवाभेदभावनामनपेक्ष्य स्वतोऽपि संभवति, "असन्ततेश्चाव्यतिरेकः" (ब्र.२.३.४८) इत्यादिसूत्रभाष्येषु तस्य तथाभूतस्यापि पराहम्भावस्य सतो दर्शितत्वात्, तथापि सूत्रभाष्ये न विवक्षितः सः, किन्तु ब्रह्मण एव परोऽहम्भावः ; "परब्रह्मस्वरूपैकरसप्रपञ्चावगाहिनम्" इत्यहंभावविशेषणस्वारस्यात् । तत्र हि प्रपञ्चस्य ब्रह्मस्वरूपान्तर्गतिरेवोक्ता, न तु स्वशरीरत्वम् । आदेहपातं शिवाहम्भावभावनादार्ढ्यवतश्च मुक्तस्य यथेष्टगानसमयेष्वपि तदनुवृत्तिरेव वक्तुमुचिता ।

एवमभेदभावनाप्रदर्शकभाष्यैः स्वाभिमतत्वेनाविष्कृतो जीवब्रह्माभेदः "वदतीति चेन्न प्राज्ञो हि प्रकरणात्" (ब्र.१.४.५) इत्यानुमानिकाधिकरणसूत्रभाष्येऽपि कयाचिदुक्तिभङ्ग्याविष्कृतः । तत्राधिकरणे "महतः परमव्यक्तमव्यक्तात्पुरुषः परः" इति कठवल्लीमन्त्रश्रुतमव्यक्तं साङ्ख्याभिमतं प्रधानमित्युदाहृतश्रुतिमूलः साङ्ख्य- सिद्धान्त इति पूर्वपक्षनिराकरणार्थं प्रवृत्तेन "ज्ञेयत्वावचनाच्च" (ब्र.१.४.४) इति गुणसूत्रेण सिद्धान्ते हेत्वन्तरमुक्तम् । यदीदमेव वाक्यं साङ्ख्यमतस्य मूलमभविष्यत्तदा प्रकृतिपुरुषविवेकज्ञानात् कैवल्यमिति वदतः साङ्ख्यस्याभिमतं प्रधानस्य मुमुक्षुज्ञेयत्वमप्यत्रावक्ष्यत । तदत्र नोच्यते । अतो नैतन्मूलकं साङ्ख्यमतमिति श्रद्धेयम्; न हि यन्मूलमेव यच्छास्त्रं तत्र तच्छास्त्रवर्णितं नोक्तमिति युज्यत इति ।

नन्वसिद्धं ज्ञेयत्वावचनम्, "अशब्दमस्पर्शमरूपम्" इति मन्त्रेण कठवल्लीश्रुतिर्हि शब्दादिहीनस्य महत्तत्त्वात् परस्याव्यक्तस्य ज्ञेयत्वं वदतीति पुनः साङ्ख्यशङ्कामनूद्य तन्निराकरणार्थं "वदतीति चेत्" (ब्र.१.४.५) इति सूत्रम् । तेन मन्त्रेण परमेश्वर उच्यते न प्रधानम्, परमेश्वरस्यैव प्रकरणादिति तन्निराकरणप्रकारप्रदर्शनार्थं प्राकरणिके परमेश्वरविषये मन्त्रे उदाहरणीये -

"यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेत् ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छान्त आत्मनि ।।"

इति मन्त्र उदाहृतो भाष्ये । एवं हि तस्य सूत्रस्य भाष्यम् --

"अशब्दमस्पर्शमरूपमव्ययं
तथारसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं
निचाय्य तन्मृत्युमुखात्प्रमुच्यते ।।"

इत्यग्रेतनमन्त्रोऽस्यापि ज्ञेयतां वदतीति चेन्न, 'यच्छेद्वाङ्मनसी प्राज्ञः' इति प्राज्ञस्यैव पूर्वं प्रकृतत्वात्" इति । अत्र सूत्रे प्राज्ञशब्दोपादानादस्मिन् मन्त्रे यः प्राज्ञशब्दोदितः तस्येदं प्रकरणमिति भाष्यवाक्यस्य स्वरसतोऽर्थः प्रतीयते । अस्मिन् मन्त्रे प्राज्ञशब्देन मुमुक्षुर्जीव उक्तः, तं प्रत्येव वाङ्मनसादिनियमनविधानस्यार्थवत्त्वात् । परमात्मनश्चात्र प्रकरणमिष्टम्,

"महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गतिः ।।"

इति तस्यात्र प्राधान्येन प्रतिपिपादयिषितत्वात् । एवं चात्र यदि भाष्यकाराणां जीवपरमात्मनोरभेदो हृदयस्थो न भवेत्, तदा परमात्मपरेण शब्देन प्रकरणिन्युदाहरणीये जीवपरेण शब्देन तदुदाहरणमसमञ्जसमेव स्यात् ।

नन्वेवमपि कथं नासमञ्जसम्, जीवपरमात्मनोर्वास्तवाभेदाभ्युपगन्तृभिरपि व्यावहारिकेण तयोर्विभागेन वेदान्तेष्विदं जीवप्रकरणमिदं परमात्मप्रकरणमिति व्यवस्थितेरभ्युपगतत्वादिति चेदुच्यते । कठवल्लीषु

"येयं प्रेते विचिकित्सा मनुष्ये अस्तीत्येके नायमस्तीति चैके ।
एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः ।।"

इति मृतजीवविषयप्रश्ने नचिकेतसा कृते

"तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशौकौ जहाति ।।"

इति वैवस्वतेन परमात्मविषयं तदुत्तरमुक्तम् । तथा हि-- प्रश्नस्य तावन्मृतजीवविषयत्वं सुदृढम्; प्रेतशब्दस्य तत्र रूढत्वात्;

"इमा रामाः सरथाः सतूर्या न हीदृशा लम्भनीया मनुष्यैः ।
आभिर्मत्प्रत्ताभिः परिचारयस्व नचिकेतो मरणं मानुप्राक्षीः ।।"

इति वैवस्वतेन तदीयप्रश्नस्य मृतजीवविषयत्वस्फुटीकरणात्, "यस्मिन्निदं विचिकित्सन्ति मृत्यो यत्साम्पराये महति ब्रूहि नस्तत्" इति पुनः नचिकेतसा मरणविषयत्वेनामङ्गलतया वैवस्वतेन निन्दितस्यैव स्वप्रश्नस्य निर्णयत्वेन पृष्टत्वात्, तदनन्तरं वैवस्वतेन -

"न साम्परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम् ।
अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे ।।"

इति "नायमस्तीति चैके" इति पक्षदूषणपूर्वकमेवोत्तरस्य चोपक्रान्तत्वात्, अग्रे च

"हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् ।
यथा च मरणं प्राप्य आत्मा भवति गोतम ।।

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः ।
स्थाणुमन्येऽनुसंयन्ति यथाकर्म यथाश्रुतम् ।।"

इति साक्षान्मृतजीववृत्तान्तविषयोत्तरदर्शनाच्च । तथा तं दुर्दर्शमित्याद्युत्तरं परमात्मविषयमित्यपि सुदृढम् । प्रश्नानन्तरं वैवस्वतेन----

"देवैरत्रापि विचिकित्सितं पुरा न हि सुविज्ञेयमणुरेष धर्मः ।
अन्यं वरं नचिकेतो वृणीष्व मा मोपरोत्सीरति मा सृजैनम् ।। "

इति प्रश्नस्योत्तरमतिगहनार्थविषयं वक्तुं दुःशकमित्युक्तत्वात् । ततो नचिकेतसा

"देवैरत्रापि विचिकित्सितं किल त्वं च मृत्यो यत्र सुविज्ञेयमात्थ ।
वक्ता चास्य त्वादृगन्यो न लभ्यो नान्यो वरस्तुल्य एतस्य कश्चित् ।।"

इति पृष्टमेवोपदेष्टव्यमिति प्रार्थिते वैवस्वतेन पुनस्तस्याधिकारदार्ढ्यपरीचिक्षिषया

"शतायुषः पुत्रपौत्रान् वृणीष्व बहून् पशून् हस्तिहिरण्यमश्वान् ।
भूमेर्महदायतनं वृणीष्व स्वयं च जीव शरदो यावदिच्छसि ।।"

इत्यारभ्य "नतिकेतो मरणं मानुप्राक्षीः" इत्यन्तेन पृच्छ्यमानार्थापेक्षया पुत्रादिसंपत्तेर्महापुरुषार्थतयोक्तत्वेऽपि नचिकेतसा -

"श्वेभावा मर्त्यस्य यदन्तकैतत्सर्वेन्द्रियाणां जरयन्ति तेजः ।
अपि सर्वं जीवितमल्पमेव"

इत्यादिना "अभिध्यायन्वर्णरतिप्रमोदानतिदीर्घे जीविते को रमेत" इत्यन्तेन विषयान् श्वस्स्थायित्वेऽपि सन्दिग्धत्वेन सर्वेन्द्रियतेजःक्षपयितृत्वेन निन्दित्वा, चिरजीविकामपि ब्रह्मादिकीटान्तसकलप्राणिवर्तिनः सर्वस्यापि जीवितस्याल्पकालत्वेन निन्दित्वा, प्राक्पृष्टमेवोपदेष्टव्यमिति दृढं प्रार्थिते तस्याधिकारस्थैर्यमुपलभ्य निश्रेयमसभ्युदयं च पुरुषार्थानुबन्धि फलद्वयं श्रेयःप्रेयशशब्दाभ्यां प्रविभज्य तदुभयं विविञ्चन्-- धीरः श्रेयो वृणीते, मन्दस्तु प्रेयः--- इत्याद्युक्त्वा नचिकेतसो वरं प्रशस्य, "विद्यामीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवो लोलुपन्त" इति विद्याभीप्सित्वेन-तदुपयोगिदृढवैराग्यवत्त्वेन च नचिकेतसं प्रशस्य, "न साम्परायः" इत्यादिना देहात्मवादनिराकरणपर्वकम् -

"श्रवणायापि बहुभिर्यो न लभ्यः
श्रुण्वन्तोऽपि बहवो यं न विद्युः ।
आश्चर्यो वक्ता कुशलोऽस्य लब्धा
आश्चर्यो ज्ञाता कुशलानुशिष्टः ।।"

इत्युपदेष्टव्यस्यात्मनो दुरधिगमत्वमुक्त्वा वैवस्वतेन "तं दुर्दर्शम्" इत्यादेरनुक्रान्तत्वाच्च । एवं जीवविषयप्रश्नस्य परमात्मविषयोत्तरदर्शनात् जीव-ब्रह्मणोरभेदः श्रुत्यभिप्रेत इति उन्नीयते । अन्यथा प्रश्नोत्तरयोः वैयधिकरण्यापत्तेः ।

ननूत्तरं परमात्मविषयमस्तु, प्रश्नो मृतजीवास्तित्वनास्तित्वविषय इत्येतदनुपपन्नम्, नचिकेतसः प्रागेव तदस्तित्वविश्वासवत्वात् । अन्यथा पितुः क्रतुवैकल्यदोषपरिहारार्थं "तत कस्मै मां दास्यसि" इति वचनस्य "मृत्यवे त्वा ददामि" इत्युक्तवतः पितुरनृतदोषपरिहारार्थं स्वयं मृत्युलोकगमनस्य "सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः" इति तदीयस्य वचनस्य स्वर्गफलकाग्निविद्यावरणस्य चानुपपत्तेः । वस्तुतो जीवपरमात्माभेदसत्त्वेऽपि मृतजीवास्तित्वनास्तित्वविषयप्रश्ने तन्मात्रस्यैव निर्धारणीयतया परमात्मतत्प्राप्त्युपायाद्युपदेशानुपपत्तेश्च जीवपरमात्माभेद-वादिमतेऽप्यार्तभागप्रश्नपञ्चाग्निविद्यादिश्रुतिषु जीववृत्तान्तविषयप्रश्नेषु तन्मात्र-विषयाणामेवोत्तराणां संप्रतिपन्नत्वात् । तस्मात् प्रश्नोत्तरसामानाधिकरण्यान्यथानुपपत्त्या जीवब्रह्माभेदसिद्धिरिति दुराशां विसृज्य प्रश्नोऽत्र मुक्तजीवास्तित्वनास्तित्वविषयो वर्णनीयः, "न प्रेत्य संज्ञास्ति" इति वाक्ये मुक्तौ प्रेत्यशब्दप्रयोगदर्शनात्; प्रकर्षेणेतः पुनरावृत्तिरहितां गतिं प्राप्त इति प्रेतशब्दस्य मुक्ते वृत्त्युपपत्तेश्च । एवं च मुक्तेः परमपदाख्यपरमात्मलोकप्राप्तिरूपत्वात्तदर्थमुत्तरे परमात्मनिरूपणम् "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" इति तदीयपरमपदप्राप्तिनिरूपणं तदुपायनिरूपणं चेति सर्वं सङ्गच्छत इति चेत् मैवम्, प्रश्नस्य मुक्तवृत्तान्तविषयत्वकल्पनेऽपि स्वर्गसाधनाग्निविद्यावरणानुपपत्तेस्तुल्यत्वात् । तत्र हि स्वर्गशब्देनार्चिरादिमार्गेण सकलपुण्यपापक्षयपूर्वकं प्राप्यः शङ्कितमुक्तप्राप्यपरमपदत्वाभिमत एव लोक उच्यते।

"स्वर्गे लोके न भयं किञ्चनास्ति न तत्र त्वं न जरया बिभेति ।
उभे तीर्त्वा अशनायापिपासे शोकातिगो मोदते स्वर्गलोके ।।"

इति स्वर्गलोकमहिमवर्णनपूर्वकम्--

"स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त एतद्द्वितीयेन वृणे वरेण ।।"

इति तत्साधनाग्निविद्योपदेशस्य वृतत्वा , वैवस्वतेन च तदुपदेशानन्त तत्फलवर्णनप्रस्तावे "स मृत्युपाशान्पुरतः प्रणोद्य शोकादिगो मोदते स्वर्गलोके" इ तत्फलस्वर्गप्राप्तेः सकलसंसारपाशनिवृत्तिपूर्वकत्वेन विशेषितत्वाच्च । यः हितैषिवचनादिलब्धस्य मुक्तास्तित्वविश्वासस्य दृढीकरणाय विशेषान्तरज्ञानाय तद्विषयप्रश्न उपपद्यत इति समर्थ्येत, तदेवमेव मृतास्तित्वविषयप्रश्नोऽपि समर्थयि शक्यत इति प्रेतशब्दरूढ्या "मरणं मानुप्राक्षीः" इत्याद्युत्तरसन्दर्भस्वारस्येन च प्रा मृतजीवास्तित्वनास्तिस्वविषयत्वं त्यक्तुं न युक्तम् । इदानीमपि हितैषिवचनविश्वासे पारलोकिककर्मानुष्ठाननिष्ठा एव-- किमवलम्बनो देहात्मवादः ? कथं च तन्निरसन -- इति जिज्ञासमाना दृश्यन्ते । वेदाध्ययनानन्तरं वैदिककर्मानुष्ठानवद्भिः पठितव्ये शास्त्रेषु देहात्मवादः तन्निराकरणनिबन्धनं च दृश्यते । तथापि प्रश्नस मृतजीवास्तित्वनास्तित्वविषयत्वे तदस्तित्वमात्रमुत्तरे वक्तव्यमिति परमात्मस्वरू तत्प्राप्त्युपायादिनिरूपणं न सङ्गच्छत इति चेन्न, तस्य मुक्तजीवास्तित्व नास्तित्वविषयत्वे तदस्तित्वमात्रमेव वक्तव्यमिति तन्निरूपणासाङ्गत्यस्य परपक्षेऽ तुल्यत्वात् । नहि मृतवृत्तान्तविषये पितृयाणमार्गादिनिरूपणे तत्प्राप्यचन्द्रनिरूप तत्प्राप्त्युपायनिरूपणं वा दृश्यते । यद्युत्तरे परमात्मतत्प्राप्त्युपायनिरूपण दर्शनात्तावत्पर्यन्तं मुक्तास्तित्वनास्तित्वविषयप्रश्नस्य तात्पर्यं कल्प्यते, तदो जीवपरमात्माभेदनिरूपणदर्शनात् प्रेतशब्दस्वारस्याद्यनुरोधेन मृतास्तित्वनास्तित्व विषयस्यैव सतः प्रश्नस्य तदभेतपर्यन्तमपि तात्पर्यं कल्प्यताम् । अस्ति तदभेदनिरूपणमपि---

"यदेवेह तदमुत्र यदमुत्र तदन्विह ।
मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति ।।"

इत्यादिप्रदेशेषु । न च वाच्यं इह देहे विद्यमानस्यामुत्रादित्यमण्डलादिस्थाने विद्यमानस च परमेश्वरस्यैव नानात्वं निषिध्यते, न तु देहे विद्यमानस्य जीवस्यादित्यमण्डला सतः परमेश्वरस्य च भेदो निषिध्यत इति, स्थानभेदेन परमेश्वरे भेदप्रसक्त्यभावात्

तथा "अङ्गुष्ठमात्रः पुरुषः" इति मन्त्रेण जीवब्रह्मैक्यप्रतिपादनानन्तरं विरुद्धधर्मवतोस्तयोः कथमैक्यमिति शङ्कायाम् ।

"यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति ।
एवं धर्मान् पृथक् पश्यंस्तान्नेवानुविधावति ।।"

इति मन्त्रेण जीवे ब्रह्मणि च पृथग्व्यवस्थिता धर्मा अभेदविरोधिनः सन्तीति पश्यतस्तथैव पृथग्धर्मवत्तया संसारोऽनुवर्तेतेति दोष उक्तः । इत्थमनेन प्रकारेण जीवपराभेदप्रकरणमिदम्, न केवलस्य जीवस्य परस्य वा प्रकरणमिति सूचयितुमेव परमात्मपरेण शब्देन प्रकरणिन्युदाहरणीयेऽपि, यदभिन्नतया प्रकरणी प्रतिपिपादयिषितः तत्परेण शब्देन तस्योदाहरणं सूत्रकृता कृतमित्यभिप्रेत्य प्रकरणिविषय-मन्त्रान्तरोदाहरणसंभवेऽपि "प्राज्ञो हि प्रकरणात्" (ब्र.१.४.५) इति सूत्राक्षरानुगुण्येन प्राज्ञशब्दवन्मन्त्रो भाष्यकारैरुदाहृतः । इत्थमनयोक्तिभङ्ग्या श्रुतिसूत्राभिमतिद्योतन-पर्यन्तजीवपराभेदाभिमतिराविष्कृता ।

तथा प्रथमाधिकरणेऽपि "'अयमात्मा ब्रह्म' इति श्रुतिः अयमिति प्रत्ययेन प्रत्यक्षसिद्धमेवात्मानं ब्रह्मेत्युपदिशति । अतः कुतोऽत्र सन्देहः" इति शास्त्रविषयत्वाभिमते ब्रह्मणि सन्देहाभावोपपादनेन कृतस्य शास्त्रानारम्भपूर्वपक्षस्य सिद्धान्ते जीवब्रह्मभेदाभिनिविष्टभाष्यकारान्तरवत् तयोर्भेदमव्यवस्थाप्य "यत् 'अयमात्मा ब्रह्म' इत्यादिश्रुतिरमुमेवाहङ्कारबद्धं संसारिणं ब्रह्मेत्यभिधत्ते ; तत एव सन्देहः; निरस्तसमस्तोपप्लवकलङ्कनिरतिशयज्ञानानन्दशक्तिमहिमातिशयवत्त्वं हि ब्रह्मत्वम् ; अनाद्यज्ञानवासनावष्टम्भविजृम्भितविचित्रकर्मफलभोगानुगुणबहुशरीरप्रवेश-निर्गमव्यापारपरवशनिस्सीमतापसहिष्णुत्वं तु जीवत्वम् ; कथमेतयोः परस्परविलक्षण-योरेकभावमाहुः श्रुतय इति संशयः किं न स्यात्" इति भेदाभेदश्रुतितात्पर्य-सन्देहापादितविषयसन्देहोपपादनेन जीवब्रह्माभेदाप्रत्याख्यानदृष्टिराविष्कृता। किं बहुना, भाष्ये ब्रह्मचिच्छक्तेः सकलप्रपञ्चाकारत्वेन तदभिन्नत्वं प्रायः सर्वत्राप्युद्घोषितम् । तथैव चिच्छक्तेः ब्रह्माभिन्नत्वमपि सर्वत्रोद्घोषितम् । तत एव जीवब्रह्माभेदः परमसिद्धान्तः सिध्यन् कथं निवारयितुं शक्यते ।

स्यादेतत् । चिच्छक्तेः सकलप्रपञ्चाकारत्वं यदुक्तं तद्विशिष्टाद्वैतस्यैवानुकूलम्, तेन चेतनप्रपञ्चस्येव वियदाद्यचेतनप्रपञ्चस्यापि तदभेदेन सत्यत्वप्राप्तेः । यदि चेतनवर्गस्य चिच्छक्त्यभिन्नत्वेनाचेतनवर्गस्य तद्विवर्तत्वेन च तस्याः सकलप्रपञ्चाकारत्वमुच्येत, तदा खलु शुद्धाद्वैतसिद्धिः स्यात् ; न त्वेवमुक्तम् । प्रपञ्चपरिणामितयैव तस्याः सर्वप्रपञ्चाकारत्वं प्रकृत्यधिकरणादिषु व्यवस्थापितम् । चिच्छक्तेः ब्रह्माभिन्नत्वं तु नोक्तम् । यत्र क्वचिदुक्तमपि औपचारिकम् । अत एव जन्माद्यधिकरणे भृगुवल्याम् "आनन्दो ब्रह्म" इति सामानाधिकरण्यमौपचारिकमित्युक्तम् । "यः खलु 'अन्योऽन्तर आत्मानन्दमयः' इति प्रस्तुत्य 'सैषानन्दस्य मीमांसा भवति' इत्यारभ्याभ्यासात् निरतिशयानन्दशिरस्कत्वेन 'स एको ब्रह्मण आनन्दः' इति निरूपितः परब्रह्मधर्मत्वेन, स एव 'आनन्दो ब्रह्म' इति प्रचुरत्वात् ब्रह्मत्वेनोपचर्यते" इति । ब्रह्मचिच्छक्त्योर्भेदस्तु बहुषु स्थलेष्वाविष्कृतः । यथा क्षराधिकरणे तावत्-- " अम्बरान्तधृतेः" (ब्र.१.३.९) इति सौत्रहेतुव्याख्यानसमये "एतस्मिन् खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्च " इति गार्गिब्राह्मणश्रुताक्षराकाशशब्दोदितयोः ब्रह्मचिच्छक्त्योराधारधेयभावेन आविष्कृतः । दहराधिकरणे (ब्र.१.३.१३) "दहरोऽस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यम्" इति दहराकाशतदन्तर्वर्तितयोक्तयोः चिच्छक्तिपरब्रह्मणोरासनासनिभावनिर्देशेन भेद आविष्कृतः । "आकाशो ह वै नाम नामरूपयोर्निर्वहिता, ते यदन्तरा तद्ब्रह्म,, तदमृतं स आत्मा' इति छान्दोग्यवाक्यश्रुतस्याकाशशब्दस्य "आकाशोऽर्थान्तरत्वादिव्यपदेशात्" (ब्र.१.३.४२) इत्यधिकरणे चिच्छक्तिपरत्वेनास्फुटीकृतस्यापि जन्माद्यधिकरणे "आकाशशरीरं ब्रह्म" इति श्रुतिव्याख्यानावसरे परप्रकृतित्वं चिदाकाशस्य " सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते" "आकाशो ह वै नाम नामरूपयोर्निर्वहिता" इत्यादिश्रुतिसिद्धमिति वाक्ये तत्परत्वं स्फुटीकृतमिति। तत्राकाशब्रह्मशब्दोक्तयोश्चिच्छक्तिपरब्रह्मणोर्नामरूपनिर्वोढृत्वतदस्पृष्टत्वनिर्देशेन भेद आविष्कृतः । प्रकृत्यधिकरणे (ब्र.१.४.२३) च "अज्ञानविकारास्पदहेयप्रपञ्चरूपेण प्रकृतिभावेन कथं वर्तते ? निरस्तसमस्तदोषलवकलङ्को निस्सीममङ्गलगुणरत्नाकरो निरङ्कुशनित्यसिद्धवैभवः प्रपञ्चातीतः परमशिवः" इत्याशङ्कोत्तरत्वेनावतारितस्य "परिणामात्" (ब्र.१.४.२७) इति सूत्रस्य व्याख्यानावसरे "नित्यशुद्धानन्दस्य निरतिशयमङ्गलस्वभावस्यापि निमित्तस्य परमशिवस्य प्रकृतित्वेन जगदाकारत्वं युक्तमेव, चिदचिदाकारेण परिणामात्" इति सौत्रहेतुवचनस्य शब्दार्थं

प्रदर्श्य "हन्त ! कारणविकाररूपो हि परिणामः, पूर्वरूपपरित्यागेन रूपान्तरापत्तिः परिणामः इति कथं परमेश्वरोऽनर्थधर्मात् परिभूयते इति चेत्" इति तत्र शङ्कामुद्भाव्य, 'यथा निमित्तस्य प्रकृतित्वेऽपि न विकारादिस्पर्शः, तथा परिणामः संभवति" इति गूढाभिसन्धितयोत्तरमुक्त्वा, "कोऽयमपूर्वः परिणामः ? कुतूहलिनो वयं तच्छ्रवणे, विविच्यताम्" इति पुनराकाङ्क्षामुद्भाव्य, "श्रृणु विवेचयामः' इति तदुत्तरोक्तिं प्रतिज्ञाय, यदातमोमन्त्रार्थविवरणपूर्वकं "शिवस्य परब्रह्मणः प्रज्ञारूपचिच्छक्तिद्वारकः परिणामस्तु न स्वरूपतो निर्विकारत्वस्य विरोधी" इति प्रतिपादनात्तल्लब्धया परिणामित्वापरिणामित्वव्यवस्थया तयोर्भेद आविष्कृतः । तयोरभेदाङ्गीकारे च चिच्छक्तेरङ्गीकृतं विकारित्वं ब्रह्मण एवाङ्गीकृतं स्यादिति तस्य निर्विकारित्वसिद्धान्तविरोधोऽपरिहार्यः । तस्मात्सार्वत्रिकेण चिच्छक्तेः प्रपञ्चाकारत्वव्यवहारेण न जीवब्रह्माभेदसिद्धिः । क्वाचित्केनानियमाद्यधिकरणा-द्युदाहृतलिङ्गेन तत्सिद्धिरिति दुराशामात्रम् ; सूत्रारूढतया बहुषु स्थलेषु दूषितस्यार्थस्य क्वाचित्कलिङ्गदर्शनमात्रेण निर्वोढुमशक्यत्वादिति चेत् उच्यते-- परिणामित्वादिनिरूपणस्यानियमाधिकरणादिप्रतिपन्ननिर्विशेषब्रह्मवादाभ्युपगमेन विरोधे हि सति कथञ्चन मतान्तरानुवादत्वादिकल्पनेन स उपेक्षणीयो भवेत् । न तु तस्य तेन विरोधोऽस्ति। तथाहि-- परिणामित्वनिरूपणं विवर्तवादस्यानुकूलमेव । प्रपञ्चं ब्रह्मणि तत्परिणामि(म ?)त्वप्रदर्शनेन प्रसज्य तत्प्रतिषेधे हि तस्य ब्रह्मविवर्तत्वं सिध्यति । अत एव "तदैक्षत बहु स्यां प्रजायेय" इति श्रुतौ प्रथमं प्रपञ्चस्य ब्रह्मणि परिणामि(म?)त्वप्रदर्शनम्। शाङ्करभाष्येऽपि श्रुत्यनुसारेण प्रथमं भोक्त्रापत्त्यधिकरणे (शा.भा.२.१.१३) प्रपञ्चस्य ब्रह्मपरिणामत्वं प्रदर्श्य तदनन्तरमारम्भणाधिकरणे (शा.भा.२.१.१४) तत्प्रतिषेधेन तस्य ब्रह्मविवर्तत्वमुपपादितम् । पुनश्चोप-संहाराधिकरणे कृत्स्नप्रसक्त्यधिकरणे च (शा.भा.२.१.१६) प्रपञ्चस्य ब्रह्मपरिणामत्व-वाद एव संभावितदोषप्रतिक्षेपेण बुद्धिसंवादमानीतः । सङ्क्षेपशारीरकेऽपि भाष्यानु-सारेण परिणामि(म ?) त्वप्रदर्शनस्य विवर्तवादानुकूलत्वं प्रपञ्चेन व्यवस्थापितम्---

"आरम्भसंहतिविकारविवर्तवादा-
नाश्रित्य वादिजनता खलु वावदीति ।
आरम्भसंहतिमते परिहृत्य वादौ
द्वावत्र संग्रहपदं नयते मुनीन्द्रः ।।

तत्रापि पूर्वमुपगम्य विकारवादं
भोक्त्रादिसूत्रमवतार्य विरोधनुत्यै ।
प्रावर्तत व्यवहृतेः परिरक्षणाय
धर्मादिगोचरविधावुपयोगहेतोः ।।

साक्षादिहाभिमतमेव विवर्तवाद-
माहृत्य सूत्रयति पूर्वमपेक्षमाणः ।
आरम्भणादिवचनेन विवर्तृवादं
शक्नोति वक्तुमुदिते परिणामवादे ।।

आरुह्य भूमिमधरामितराधिरोढुं
शक्येति शास्त्रमपि कारणकार्यभावम् ।
उक्त्वा पुरा परिणतिप्रतिपादनेन
संप्रत्यपोहति विकारमृषात्वसिद्ध्यै ।।

विवर्तवादस्य हि पूर्वभूमिः
वेदान्तवादे परिणामवादः ।
व्यवस्थितेऽस्मिन् परिणामवादे
स्वयं समायाति विवर्तवादः ।।

उपायमातिष्ठति पूर्वमुच्चै-
रुपेयमाप्तुं जनता यथैव ।

श्रुतिर्मुनीन्द्रश्च विवर्तसिद्ध्यै
विकारवादं वदतस्तथैव ।।

* * *

"अहं प्रजायेय बहु स्वयं स्या-
मित्यादिनादौ परिणाममुक्त्वा ।
विकारमिथ्यात्वमथ ब्रुवाणा
विवर्तवादं श्रुतिराननिनाय ।।"

इत्यादिभिः श्लोकैः । आचार्यैरपि भाष्ये परिणामवादप्रपञ्चनं विवर्तवादाभ्युपगमानुकूलतयेत्यस्य ज्ञापकत्वेन "सन् घटः" इत्यादिप्रत्यक्षस्य प्रपञ्चसत्यत्वविषयताव्यवच्छेदाय उपादानतादात्म्यरूपं विषयान्तरं प्रदर्शितम् । तस्माद्विवर्तवादाभ्युपगमानुकूलतयैव परिणामित्वव्यवस्थापनं कृतमिति युक्तमेव ।

यत्तु चिच्छक्तेः ब्रह्माभिन्नत्वं नोक्तमित्युक्तं तदसिद्धम्, बहुषु स्थलेषु तदुक्तिदर्शनात् । तथाहि-- "आकाशस्तल्लिङ्गात्" इत्यधिकरणे (ब्र.१.१.१३) "अस्य लोकस्य का गतिरित्याकाश इति होवाचेति" वाकयप्रतिपाद्य आकाशो भूताकाशो न भवति, किन्तु परमेश्वर इति सिद्धान्तव्यवस्थापनानन्तरम्, "ननु भूताकाशस्याकाश इति स्ववाक्ये भूतपदग्रहणं किमर्थम्" इति शङ्कामुद्भाव्य, "परमाकाशस्य परप्रकृतिरूपस्य सर्वभूतकारणत्वसद्भावात् सप्रयोजनम्" इति तस्य फलमुक्त्वा, "तर्हि परमाकाशस्यापि सर्वभूतकारणत्वसंभवे अयमाकाशः परमेश्वर इति कथं निर्णयः" इति पुनः शङ्कांमुद्भाव्य, "तदभेदात्"इत्युत्तरमुक्तम् । दहराधिकरणे (ब्र.१.३.१३) "दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम्" इति छन्दोगैराम्नातो दहराकाशः परमेश्वर इति सिद्धान्तव्यवस्थापनानन्तरम्, "य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः" इत्यादिश्रुत्यन्तरानुसाराद्दहराकाशस्यान्तरुपासनीयः परमेश्वरो भवितुमर्हति, कथं दहराकाशः परमेश्वर इत्युक्तम्, इति शङ्कामुद्भाव्य, "अत्रापि दहराकाशमध्यर्ती परमेश्वर उपास्यः । किन्तु दहराकाशे परमेश्वरधर्माणां अपहतपाप्मत्वादीनां सम्बन्धप्रतीतेः दहराकाशत्वमप्यस्य चिदम्बररूपतया" इति परिहारः कृतः । "सर्वत्र प्रसिद्धोपदेशात्" इत्यधिकरणे (ब्र.१.२.१) ब्रह्मणः सर्वशब्दवाच्यत्वव्युत्पादनावसरे "श्रुतिस्मृतीतिहासपुराणाभियुक्तसूक्तिप्रामाण्यात् सकलचिदचित्प्रपञ्चमहाविभूतिरूपा महासंविदानन्दसत्ता देशकालादिपरिच्छेदशून्या स्वाभाविकी परमशक्तिः परब्रह्मणः

शिवस्य स्वरूपं च गुणश्च भवति । तद्व्यतिरेकेण ब्रह्मणः सर्वज्ञत्वसर्वशक्तित्व-सर्वकारणत्वसर्वनियन्तृत्वसर्वोपास्यत्वसर्वानुग्राहकत्वसर्वपुरुषार्थहेतुत्वादिकं सर्वगतत्वं च न संभवति । किञ्च, महेश्वरशिवमहादेवरुद्रादिपरमाख्यानामभिधेयत्वं च न संभवति" इति चिच्छक्तेः परब्रह्मस्वरूपत्वं तस्यास्तदीयसकलगुणरूपतया तद्धर्मत्वं चोक्तम् । तथा आध्यानाधिकरणेऽपि (ब्र.३.३.१४) चिच्छक्तेः ब्रह्मस्वरूपाभिन्नत्वं समर्थितम् । तथाहि-- "आनन्दादयः प्रधानस्य" इत्यधिकरणे (ब्र.३.३.११) यन्निरतिशयज्ञानानन्दादिगुणजातं नीलकण्ठत्वादिविशिष्टविग्रहवैशिष्ट्यं च ब्रह्मणः स्वरूपलक्षणं तत्सर्वास्वपि विद्यासु प्रकरणभेदेऽप्युपसंहार्यम्, तेन हि ब्रह्मविष्ण्वादि-सकलेतरविलक्षणं ब्रह्म शृङ्गग्राहिकयानुभवारूढं भवति, यथा प्रकृष्टप्रकाशेन सकलग्रहनक्षत्रतारकादिविलक्षणं चन्द्रमण्डलम्, अतश्चन्द्रदर्शनेषु सर्वेषु प्रकृष्टप्रकाशानुवृत्तिवत्सर्वासु ब्रह्मविद्यासु ज्ञानान्दादिगुणविग्रहविशेषानुवृत्तिरुचिता-- इति प्रसाधितम् । तदनन्तरम् "प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे" इत्यधिकरणे (ब्र.३.३.१२) "सह ब्रह्मणा विपश्चिता", "यस्सर्वज्ञः सर्ववित्" इत्यादिश्रुतिप्रसिद्धब्रह्मधर्मनिरतिशयज्ञानोपसंहारे तदवान्तरविशेषसत्यसङ्कल्पत्वा-द्युपसंहारवत् "अन्योऽन्तर आत्मानन्दमयः । तस्य प्रियमेव शिरः" इत्यादिश्रुति-प्रसिद्धब्रह्म धर्मनिरतिशयानन्दोपसंहारे तदवान्तरविशेषप्रियशिरस्त्वाद्युपसंहारः कार्य इत्याशङ्क्य,-- प्रियादीनामानन्दविशेषत्वेऽपि तेषां शिरस्त्वादिकं विद्याविशेषे ब्रह्मानन्दस्य निरतिशयत्वप्रतिपत्तिसौकर्यार्थं कल्पितम्, न तु तात्त्विकम् ; ब्रह्मानन्दस्य तत्त्वतः शिरःप्रभृतिमत्वे हि क्वचित्स्थौल्यं क्वचित् कार्श्यमित्यानन्दाकार एव तस्योपचयापचयौ प्रसज्येयाताम् ; पुच्छपुच्छवद्भावादीनां तात्त्विकत्वे भेदश्च प्रसज्यते, अतः सर्वज्ञत्वसत्यसङ्कल्पत्वाप्तकामत्वादयो ये ज्ञानानन्दविशेषा अनपायित्वेन ब्रह्मधर्मसदृशाः ब्रह्मसादृश्यरूपतया मुक्तप्राप्यफलरूपाश्च तेषामेव सर्वासु विद्यासूपसंहारो न प्रियशिरस्त्वादीनाम्-- इति प्रसाधितम् ।

तदनन्तरम् "आध्यानाय प्रयोजनाभावात्" इत्यधिकरणे (ब्र.३.३.१४) यद्यप्यानन्दमयशब्दोक्तस्य ब्रह्मधर्मस्य निरतिशयानन्दस्य सर्वासु परविद्यासूपसंहारे तदीयं प्रियशिरस्त्वादिकं तस्य निरतिशयत्वप्रतिपत्त्यर्थं कल्पितत्वान्नोपसंहार्यम्, तथाप्यन्नमयादिकोशचतुष्टगन्तरत्वमुपसंहार्यमेव, अकल्पितत्वादिति पूर्वपक्षमुद्भाव्य सिद्धान्तितम् - अन्नमयादिकं विद्यासु नानुसन्धेयम्, प्रयोजनाभावात् । न मुक्तिः

प्रयोजनम्, तस्याः सर्वेतरपरित्यागपूर्वकशिवध्यानसाध्यत्वात् । किमर्थं तर्हि अन्नमयादिकीर्तनम् ? आध्यानार्थम्, आभिमुख्येनादरणेन ध्यानमाध्यानम्, आदरश्च सर्वोत्कृष्टत्वप्रतिपत्तौ भवतीति तत्प्रतिपत्तिसौकर्यार्थमन्नमयादिकीर्तनम् । अतो भक्त्यतिशयसिद्धिप्रयोजनसर्वोत्कृष्टत्वप्रतिपत्त्यर्थं दृढभक्त्यतिशयपूर्वकर्तव्याद्विद्यानुष्ठानात् प्रागेवोत्कर्षावधित्वेनान्नमयादिकमनुसन्धेयम् ।

नन्वन्नमयादिकं न केवलमुत्कर्षावधित्वेनानुसन्धेयम्, किन्तु ध्यानकालानुसन्धेयान्तरत्व गुणावधित्वेनापि, गुहात्वेन निरूपितत्वात् ; अतो दहरविद्यायां ब्रह्मपुरमध्यवर्तिदहरपुण्डरीकाभ्यन्तरत्वेन ब्रह्मानुसन्धार्थं ब्रह्मपुरदहरपुण्डरीकानुसन्धानमिवान्नमयाद्यनुसन्धानं ध्यानकाले नियतम् -- इति चेन्न, तेषु प्रतिपर्यायमन्योऽन्तर आत्मेत्यात्मशब्दश्रवणात् । यद्यन्नमयादयः शरीरप्राणमनोबुद्धिरूपा अचेतनास्स्युः, तदा तेषां ध्यानकाले ब्रह्मपुरादिवदनुसन्धेयता स्यात् । नत्वेवम् ; ते ह्यन्नाद्यधिष्ठातारो ब्रह्मविष्णुरुद्रेश्वररूपाः चेतनविषयाः, ये अथर्वशिखायाम् "ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते" इति शिवसृष्टत्वेनोक्ताः ये च तदनन्तरम्, "कारणं तु ध्येयः सर्वैश्वर्यसंपन्नः सर्वेश्वरः शंभुराकाशमध्ये" इति शिवध्यानं विधाय "शिव एको ध्येयः शिवङ्करः सर्वमन्यत्परित्यज्य' इति मुमुक्षुकर्तव्यनिरन्तरशिवविषयचिन्तासन्ततिरूपध्यानकाले परित्याज्यत्वेन ध्यानाद्बहिर्भावनीयत्वेनोक्ताः । कुतः ? इह प्रतिपर्यायम् "अन्योऽन्तर आत्मा" इत्यात्मशब्दात्, "एतमन्नमयमात्मानमुपसंक्रामति" इत्यादिवाक्येषु ब्रह्मप्राप्तेः पूर्वं क्रमप्राप्यदेवताविशेषप्रतिपादनाच्च । एवं च यद्यपि "यो वेद निहितं गुहायाम्" इति श्रुत्युक्तगुहासन्निहितत्वानुसन्धानसिध्यर्थं गुहातद्वद्भाववर्णनार्थसिद्धोत्कर्षप्रतिपत्त्यर्थं च तेषामनुसन्धानमावश्यकम्, -- अत एव "ब्रह्मविदाप्नोति परम्" इति श्रुत्युक्तं फलं प्राप्नुवतस्तदनुसन्धानफलतया क्रमेण तेषां प्राप्तिः "एतमन्नमयम्' इत्यादिवाक्येषु श्रूयते -- तथापि गुहातद्वद्भावकृतोत्कर्षः त्रिपुरसंहरणादिकथादिकृतोत्कर्षवत् उपासनारम्भात् प्रागेवावगन्तव्यः । गुहासन्निहितत्वानुसन्धानोपयोगिनस्तेषामनुसन्धानस्य प्रतिदिवसं कार्यत्वेऽपि शिवध्यानारम्भात् प्रागेन क्रमेण तेषां प्राप्तिन्यायेन पूर्वपूर्वपरित्यागपूर्वकं तदनुसन्धानं कार्यम्, "सर्वमन्यत्परित्यज्य" इति परित्यागस्य विहितत्वात्, तस्य चोत्तरोत्तरस्मिन् पूर्वपूर्वोपसंहरणेन क्रमकर्तव्यतया शिवागमेषु प्रसिद्धत्वात्। योगयाज्ञवल्क्ये ध्यानाध्याये ब्रह्मादीनां क्रमेण अनुसन्धानं विधाय तदनन्तरम्--

"एतदुक्तं भवत्यत्र गार्गि ब्रह्मविदां वरे ।
ब्रह्मादिकार्यरूपाणि स्वे स्वे संहृत्य कारणे ।
युक्तचित्तस्तदात्मानं योजयेत्परमेश्वरे ।।"

इति तथैव प्रतिपादितत्वाच्च । एवं च शिवध्यानारम्भसमये गुहारूपत्वेन वर्णितानन्नमयप्राणमयमनोमयविज्ञानमयशब्दोक्तान् ब्रह्मविष्णुरुद्रेश्वरान्, विज्ञानमयशब्दस्याथर्वशिखायां ब्रह्मविष्णुरुद्रेन्द्रा इति, इन्द्रशब्दस्य च शिवागमयोगयाज्ञवल्क्याद्यनुसारात् ईश्वरसदाशिवोभयपरतया ब्रह्मविष्णुरुद्रेश्वरसदाशिवान् वा क्रमेणानुसन्दधान एव पूर्वपूर्वमुत्तरोतस्मिन् सदाशिवं शिवासनरूपे परमव्योम्नि च प्रलीनं भावयित्वा परमव्योमवर्ति शिवैकविषयचित्तसन्ततिरूपध्यानं कार्यम् ; न तु शिवध्यानकाले तस्यान्नमयाद्यान्तरत्वमपि ध्यातव्यम् ।

नन्वेवं सति उमासहायत्वमपि तस्य ध्यातव्यं न स्यात् , सर्वेतरपरित्यागविधिविरोधात्, "सर्वमन्यत्परित्यज्य" इत्यन्यशब्देनैव प्रकृतब्रह्मविष्णुरुद्रेन्द्रग्रहणसंभवे अधिकस्य सर्वशब्दस्य शिवेतरसर्वदेवतापरित्यागसिद्ध्यर्थत्वात् । न चानन्दमयशब्दोक्तचिच्छक्त्यात्मिकाया उमायाः शिवाभिन्नत्वपरित्यागावधेर्न तद्विषयत्वप्रसक्तिरिति वाच्यम्, अन्नमयादिषु श्रुतस्यात्मशब्दस्यानन्दमयेऽप्यविशेषेण तद्वदानन्दमयात्मनोऽपि जीवत्वौचित्यादिति चेत् --- मैवम् ; यत आनन्दमये आत्मग्रहणं परमात्मविषयं न त्वन्नमयादिष्विव जीवात्मविषयम्, उत्तरत्रान्नमयादिकमुपसंक्रान्तस्येवानन्दमयमुपसंक्रान्तस्योपसंक्रमितव्यान्तरोक्त्यभावेनतत्प्राप्तेर्मुक्तित्वावगमात् । तथा च --" आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि ।" इति जीवपरसाधारणत्वेनानुशिष्टस्यात्मशब्दस्य यथार्हमर्थग्रहणं युक्तम् । न चानन्दवल्यामात्मशब्दस्य जीवविषयत्वं नियतं दृष्टमिति प्रायपाठः शङ्कनीयः, "आत्मन आकाशस्संभूतः" इत्यत्र जगत्कारणविषयस्य जीवविषयत्वायोगेन परमात्मविषयत्वस्यावश्यवक्तव्यतया तद्वदानन्दमयेऽपि तस्य परमात्मविषयत्वोपपत्तेः ; प्रायपाठबाधकस्य लिङ्गस्योभयत्राप्यविशिष्टत्वात् । तस्मादुमायाः शिवाभिन्नत्वात् तद्ध्यानकाले तदनुसंधानं न विरुध्यते ।

नन्वेवमानन्दमयशब्दोक्तायाः सकलचेतनाचेतनप्रपञ्चाकारत्वेनाभ्युपगतायाः शक्तेः शिवाभेदे तदभिन्नानां सर्वेषामपि चेतनानां शिवाभेदस्यानिवारणीयत्वात्

अन्नमयादिशब्दोक्तानां ब्रह्मादीनां पूर्वापरवाक्ययोः परमात्मपरतया क्लृप्तेनात्मशब्देनान्वयादपि शिवाभेदप्रतीतेः तेषामप्युमावदेव शिवध्यानकालेऽनुसन्धानमविरुद्धमिति चेत्-- न, "शिव एको ध्येयश्शिवङ्करः सर्वमन्यत्परित्यज्य" इति शिवस्यैव ध्येयत्वावधारणात् ; तस्यावधारणस्य प्रकृतब्रह्माद्यविषयत्वे हि कस्तस्य विषयः स्यात्? नाचेतनवर्गः प्रकृतब्रह्मादिव्यितरिक्तचेतनवर्गो वा, अन्यशब्दस्य सर्वनाम्नः शब्दशक्तितस्वाभाव्यात् । इषौ कानिचिद्वैशेषिकाङ्गानि विधाय तदनन्तरमाम्नाते "समानमितरच्छ्येनेन" इति वाक्ये श्रुतस्येतरशब्दस्य प्रतिय़ोगिभूतेषु वैशेषिकाङ्गसादृश्येन वैशेषिकाङ्गपरत्ववत् प्रतियोगिभूतशिवसदृशचेतनान्तरपरत्वस्य, तत्रापि बुद्धिस्थब्रह्मादिचेतनपरत्वस्यावश्यंभावात्, सर्वशब्दसमभिव्याहारानुसारेण चेतनान्तरसाधारण्येऽपि बुद्धिस्थब्रह्मादिपरत्वस्यावर्जनीयत्वात्, चेतनान्तराणामपि ब्रह्मादिवच्छिवाभिन्नत्वेन तद्विषयत्वेऽप्यनुपपत्तितौल्याच्च । तस्माद्वस्तुतः शिवाद्भिन्नस्य चेतनस्य परित्यागोऽत्र न विधेयः ; किन्तु शिवात् भेदेन प्रतीयमानस्य । अत एव ब्रह्मविद्यासु शिवोऽहमस्मीति शिवाभेदेनानुसन्धेयस्य स्वात्मनो न परित्याग इति प्रतिपर्यायम् "अन्योऽन्तर आत्मा" इति श्रवणादन्नमयादीनां शिवात् परस्परस्माच्च भेदप्रतीतेरनिवार्यस्तेषां परित्यागः । उमायास्तु यद्यपि "परमे व्योमन्" इति आसनासनिभावेन "स एको ब्रह्मण आनन्दः" इति धर्मधर्मिभावेन भेदः प्रतीयते, तथाप्यासनरूपेण निरतिशयानन्दरूपेण च सा भेदप्रतीतिः ; नत्वम्बिकात्मकचेतनरूपेण ; तेन तु रूपेणाभेदः एव प्रतीयते । "पुरुषं कृष्णपिङ्गलम्" इत्यस्य सर्वविद्यासूपसंहृतेरानन्दाधिकरणे (ब्र.३.३.११) समर्थित्वेन तत्र कृष्णपिङ्गलमित्यनेन शिवस्यैवाम्बिकामूर्त्या कृष्णवर्णत्वं पुरुषमूर्त्या रुक्मवर्णत्वमिति शिवशक्त्यभेदगर्भीकरणात् । तस्मादुमाया इव शिवध्यानकाले नान्नमयादीनामनुसन्धानं कार्यमिति । एवमेतदधिकरणम् "आध्यानाय प्रयोजनाभावात्", "आत्मगृहीतिरितरवदुत्तरात्", 'अन्वयादिति चेत् स्यादवधारणात्,' इति चतुर्भिः सूत्रैः (ब्र.३.३.१४-१७) प्रवर्तितम् ।

अत्रानन्दमयरूपा चिच्छक्तिः परमात्मा शिवः एव, न ततो भिद्यत इत्ययमर्थः तृतीयसूत्रार्थत्वेनाचार्यैर्भाष्ये वर्णितः । न च तद्भाष्यमानन्दमयः परमात्मा शिव इति आनन्दमयाधिकरणप्रथमपक्षमाश्रित्यानन्दमयस्य परमात्मत्वसाधनपरम्, नत्वानन्दमयश्चिच्छक्तिरिति तदधिकरणद्वितीयपक्षमाश्रित्य चिच्छक्तेः परमात्माभेदसाधनपरमिति

वाच्यम्, प्रथमपक्षाश्रयणे आनन्दमयः परमात्मेत्यस्यानन्दमयाधिकरण (ब्र.१.१.१३) एव सिद्धत्वेनात्र तत्साधनस्यानपेक्षितत्वात् ; आनन्दमयाधिकरणे द्वितीयः पक्ष एव भाष्यकाराभिमत इति जन्मादिसूत्रेण (ब्र.१.१.२) स्पष्टमवगतत्वाच्च । तस्मादाध्यानाधिकरणे (ब्र.३.३.१४-१८) भाष्यकारैः शक्तेः शिवाभेदः प्रसाधित इत्येतत्समञ्जसमेव ।

तथा "ईक्षतिकर्मव्यपदेशात् सः" (ब्र.१.३.१२) इत्यधिकरणेऽपि तस्याः शिवाभेदो वर्णितः । तत्र हि "एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः" इत्यादौ सत्यकामप्रश्नोत्तरसन्दर्भेण एकमात्रप्रणवोपासनस्य तत्प्रथममात्रात्मकऋक्प्रापणीय-मनुष्यलोकप्राप्तिफलं द्विमात्रप्रणवोपासनस्य द्वितीयमात्रात्मकयजुःप्रापणीया-न्तरिक्षलोकप्राप्तिफलं चाभिधाय यदाम्नायते "यः पुन रेतं त्रिमात्रेण ओङ्कारेण परं पुरुषमभिध्यायीत * * यथा पादोदरस्त्वचा विनिर्मुच्यते एवं ह वै स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते" इति, तत्र ब्रह्मलोकः परब्रह्मणः शिवस्य लोकः तस्मिन्नीक्षणीयः पुरुषः शिव इति सिद्धान्तोऽभिमतः । तदर्थमिह-- ब्रह्मलोकोविष्णुलोकः , "ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत् कवयो वेदयन्ते" इत्युक्तार्थसंग्राहके तदनन्तरमन्त्रे "तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इति मन्त्रेण विष्णुलोके प्रतिपन्नस्य विद्वदनुभवविषयत्वस्य तस्मिन् ब्रह्मलोके प्रत्यभिज्ञायमानत्वात् ; अतस्तस्मिन्निरीक्षणीयः पुरुषो विष्णुरेव-- इति पूर्वपक्षमुपन्यस्य सिद्धान्ते तदनुवादपूर्वकं तन्निरास इत्थं कृतः-- "यदुक्तं तद्विष्णोः परमं पदमिति तत्र प्रपञ्चाकारत्वमन्तरेण यन्निरतिशयानन्दस्वभावं विष्णोः परमं पदं रूपं तदेव शिवाभिधेयं परं ब्रह्मेत्यविरोधः ; यतो विष्णुशिवयोरुपादाननिमित्तयोरवस्थाभेदमन्तरेण स्वरूपभोदो नास्ति" इति ।

अत्र शिवलोके तद्विष्णोरिति मन्त्रार्थप्रत्यभिज्ञानसङ्घटनार्थं तस्य मन्त्रस्य शिवलोकविषयत्वमेव वक्तुं युक्तम् ; न तु शिवविषयत्वम् । अत एव-- "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्" इति कठवल्लीमन्त्रस्य शिवलोकविषयत्वम् "कार्यं बादरिरस्य गत्युपपत्तेः" इत्यधिकरण (ब्र.४.३.६)भाष्ये वर्णितम् । तद्विष्णोरिति मन्त्रस्यैतद्भाष्यदर्शितार्थावलम्बनेन शिवविषयत्वमुपपादयितुमप्यशक्यम् । न हि

प्रपञ्चाकारेणावस्थितस्य विष्णोः शिवः साक्षात्स्वरूपमिति भाष्यकारसिद्धान्तः । किन्तु शिवशक्तिरूपः परमानन्दः तस्य साक्षात्स्वरूपमिति तस्य शिवशक्त्यवस्थारूपत्वमेव हि प्रकृत्यधिकरण (ब्र.१.४.२३) भाष्यादिषु प्रतिपादितम् ।

तस्मादित्थमस्य भाष्यस्यार्थो वर्णनीयः-- "प्रपञ्चाकारत्वमन्तरेण यन्निरतिशयानन्दस्वभावं विष्णोः परमं पदं रूपम्" इत्यनेन जगदाकारपरिणत-विष्णववस्थाप्रकृतीभूता चिच्छक्तिरुच्यते । सैव परमशिवलोकतयापि वर्तत इति तेन तद्विष्णोरिति मन्त्रस्य शिवलोकविषयत्वं दर्शितं भवति । "तदेव शिवाभिधेयं परं ब्रह्म" इति तस्याः शिवस्वरूपाभिन्नत्वमुच्यते। ननु प्रतयभिज्ञान विरोधसङ्घटनार्थं तद्विष्णोरिति मन्त्रस्य शिवलोकाकारतापन्नचिच्छक्तिविषयत्वमात्रं वक्तव्यम्, चिच्छक्तेः शिवस्वरूपाभिन्नत्ववचनं तत्र नोपयुज्यते-- इत्याशङ्क्य शङ्काविशेषनिरासेन तदुपयोगं सूचयितुम् "यतो विष्णुशिवयोः" इत्यादि वाक्यम् । इयमत्र शङ्कोत्तिष्ठति-- विष्णोः परमं रूपं शिवशक्तिरित्ययुक्तम् , पुराणेतिहासादिषु विष्णोः शिवाभिन्नत्वस्यैव बहुधा प्रतिपादितत्वादिति । न चायं परिहारोऽनेन वाक्येन सूचितः-- यतो विष्णोः शिवात् स्वरूपभेदो नास्ति तत एव विष्णववस्थाप्रकृतिभूतायाः शक्तेरपि शिवात् स्वरूपभेदो नेष्यते, कूर्मपुराणादिषु शिवस्य शक्तेर्विष्णोश्चैक्यप्रतिपादनदर्शनाच्चेति ।

यद्वा "तदेव शिवाभिधेयं परं ब्रह्म" इति भाष्यवाक्यस्यायमभिप्रायः-- पुराणेतिहासादिषु सकलवेदान्तप्रतिपाद्यं सर्वकारणं मुक्तप्राप्यं परं ब्रह्म विष्णोरेव रूपमिति विष्णोः परमं पदमिति विष्ण्वाख्यं परमं पदमिति च तत्र तत्र प्रतिपाद्यते । यथा महाभारते मोक्षधर्मे नारदोपाख्यानं श्रूयते-- नारदो हिमवत्पार्श्वे काञ्चन कन्यां तस्या जृम्भणसमये तन्मुखान्निर्गतान् रत्नबिन्दुचिताङ्गान् आदित्यसदृशाकारं शिरसा मणिं धारयतः पुरुषान् तां प्रदक्षिणीकृत्य पुनरपि तामेव प्रविष्टांश्च दृष्ट्वा प्रणस्य सविनयं "का त्वम् के ते त्रयः पुरुषाः, तेषां गात्रेषु बिन्दवः के, मूर्धसु ज्योतिः किम्" इति पृष्टा "सावित्र्यहम्, ते पुरुषाः त्रयो वेदाः, तद्गात्रेषु बिन्दवो यज्ञतत्फलरूपाः वेदार्थाः, मूर्धसु ज्योतिः वेदान्तप्रतिपाद्यं दिव्यं किमपि महज्ज्योतिः, तत्तु मयापि दुर्विज्ञानम्" इत्युक्तः तज्ज्योतिः किमति निर्णयार्थं वर्षशतं भगवन्तं विष्णुमाराध्य ततः प्रसन्नं पुरस्तादाविर्भूतं भगवन्तमालोक्य सहर्षं प्रणम्य

" विवक्षितं जगन्नाथ मम ज्ञातं त्वयाच्युत ।
तत्प्रसीद हृषीकेश श्रोतुमिच्छामि तद्धरे ।। "

इति पृष्ट्वा

"यद्दृष्टं मम रूपं तद्वेदानां शिरसि त्वया ।
निर्द्वन्द्वा निरहङ्कारा यतयश्शुद्धलोचनाः ।
ते मां पश्यन्ति सततं तान् पृच्छ यदिहेच्छसि ।।"

इत्येवं भगवतोपदिष्ट इति । तत्र मम रूपमित्यभेददृष्ट्या शिवस्वरूपमेवोच्यते । अत एव मम रूपमित्युक्त्वापि तत्र प्रष्टव्यरहस्यांशसद्भावमभिप्रेत्य "तान् पृच्छ" इत्युक्तम् । अत एव "पश्य मे योगमैश्वरम्" इति "परमं रूपमैश्वरम्" इति च गीतासु भगवता स्वकीयत्वेन प्रदर्श्यमाने रूपे स्वयमेवैश्वरत्वविशेषणं दत्तम् । एवं "विष्णोः परमं पदम्" इति, "विण्वाख्यं परमं पदम्" इति च भारतादिषु तस्य प्रतिपादनमपि विष्णुशिवयोरभेददृष्ट्या प्रवृत्तं शिवपर्यवसायि द्रष्टव्यमिति । अस्मिन्नपि पक्षे तेन ईक्षत्यधिकरणवाक्येन चिच्छक्तेः शिवाभेदो वर्णितो भवत्येव, चिच्छक्त्यवस्थाविशेषरूपस्य विष्णोः शिवाभेदे चिच्छक्तेस्ततो भेदायोगात् ।

एवं परमेश्वरस्य चिच्छक्तिसद्भावः तस्याः परमेश्वराभिन्नत्वं तथात्वेऽपि तस्यास्तद्धर्मत्वमित्येतत्सर्वमद्वैतप्रधानेऽपि शास्त्रे निरूपितम् । तथाहि संक्षेपशरीरके -

"चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते
सत्यैवास्य जडा परा भगवतः शक्तिस्त्वविद्योच्यते ।

संसर्गाच्च मिथस्तयोर्भगवतः शक्त्योर्जगज्जायतेऽ-
सच्छक्त्या सविकारया भगवतः चिच्छक्तिरुद्रिच्यते ।।

इत्येवं कथयन्ति केचिदपरे श्रद्धालवस्तत्पुनः
कस्यांचिद्भुवि संमतं च विदुषां नेष्टं च भूम्यन्तरे ।

कर्मोपास्तिविधानभूमिषु तथा तत्संमतं निर्गुणे
तत्त्वे तत्परवेदवाक्यविषये त्वालोचिते नेष्यते ।।"

एवं पञ्चपादिकायामपि - "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः अपृथक्त्वेऽपि चैतन्यात् पृथगिवावभासन्ते" इत्युक्त्वा अयमेवार्थस्सूचितः ।

एवं स्वरूपाभिन्नाया एव चिच्छक्तेः व्यवहारदशायां धर्मत्वमप्यस्तीति गार्गिब्राह्मणदहरविद्यादिषु धर्मधर्मिभावादिभेदनिर्देशोऽपि युज्यत एव । यत्तु जन्मादि सूत्रे (ब्र.१.१.२) "स एवानन्दो ब्रह्मेति प्रचुरत्वात् ब्रह्मत्वेनोपचर्यते" इत्युक्तम्, तत्प्रायः आनन्दवल्याम् "स एको ब्रह्मण आनन्दः" इति, "आनन्दं ब्रह्मणो विद्वान्" इति च ब्रह्मधर्मत्वेनोक्तत्वात् व्यावहारिकधर्मत्वोक्तिप्रकरणे सामानाधिकरण्यमौपचारिकं नेतव्यमित्यभिप्रायेण, न तु सर्वथैव भेदाभिप्रायेण । एवम् "तद्गुणसारत्वात्तु तव्यपदेशः प्राज्ञवत्" इति सूत्रे (ब्र.२.३.२९) धर्मज्ञानवाचकशब्दानां धर्मिण्यौपचारिकत्वोक्तिरपि नेतव्या ।

एवं च ब्रह्मचिच्छक्तेः सकलचेतनाचेतनप्रपञ्चाकारत्वं तस्या एव ब्रह्मस्वरूपत्वं तदीयसकलगुणगणरूपत्वं ब्रह्मणो निर्विकारत्वमिति अर्थचतुष्टय-माचार्यैरभ्युपगतं निर्गुणं निष्प्रपञ्चं जीवाभिन्नं शुद्धाद्वैतरूपं ब्रह्मेति तेषां परमसिद्धान्त इति अमुमर्थं दृढमवगमयत्येव । तथा हि-- चिच्छक्तेर्ब्रह्माभेदे तस्या एव तदीयसकलगुणात्मत्वे च ब्रह्मणः स्वभिन्ना गुणा न सन्ति ; किन्तु स्वयमेव कल्पितभेदेन गुणवदप्यवभासते ; वस्तुतो निर्गुणमेव ब्रह्म--- इत्येतत्तावत् सिध्यति । न ह्यभेदे मुख्यो गुणगुणिभाव उपपद्यते । न चाभेत इव मुख्यगुणगुणिभावोपपादको भेदोऽप्याचार्यैरङ्गीकृत इति वक्तुं शक्यते ; आरम्भणाधिकरण (ब्र.२.१.१५) भाष्यादिषु विरोधेन भेदाभेदपक्षस्य प्रतिक्षिप्तत्वात् ।

न च मध्वमत इवाचार्याणां मते गुणगुणिनोः भेदाभावेऽपि भेदप्रतिनिधिर्विशेषोऽभ्युपगतोऽस्ति । न वा तेनापि मुख्यगुणगुणिभावनिर्वाहः, तस्य माध्वैरपि भेदकार्यव्यवहारमात्रनिर्वाहकतयाभ्युपगतत्वेन ततो भेदावभासतदभिलाप-मात्रसिद्धेः । विशेषस्य भेदनिर्वाह्यसकलकार्यनिर्वाहकत्वे विशेष इति पर्यायेण

भेदस्यैवाङ्गीकारापत्तेः । अत एवानुव्याख्यानाख्ये मध्वग्रन्थे-- "भेदो नाशे भवेत्तथा" इति, सत्सु तन्तुषु विनश्यतां पटादीनां तन्तुभ्यो भेदेऽभ्युपगते, तद्व्याख्याने न्यायसुधायाम् "यथा भेदसाधकानां व्यपदेशभेदादीनां विशेषाश्रयणेनैवान्यथासिद्धिरुक्ता, तथा सत्यपि तस्मिन्नसत्त्वस्यापि विशेषेणैव निर्वाहः क्रियताम् ; किं भेदाभेदाभ्युपगमेन?" इति शङ्कां कृत्वा, "विशेषस्य भेदकार्यव्यवहारमात्र-निर्वाहकत्वेनासत्त्वं प्रत्यनिर्वाहकत्वात् सकलभेदकार्यकारित्वे विशेषो भेद एव स्यात्, न तत्प्रतिनिधिः स्यात्" इति परिहारः कृतः । तस्माद्गुणविषये तावत् "अपृथक्त्वेऽपि चैतन्यात्पृथगिवावभासन्ते" इति पञ्चपादिकोक्तपक्ष एवाभिमत इत्येतत् सुदृढमेव ।

तथा सकलप्रपञ्चाकारायाः चिच्छक्तेः ब्रह्माभेदाभ्युपगमेन वियदादिप्रपञ्चः तद्विवर्त इति सिद्ध्यति । अन्यथा वियदादेरनित्यस्य तत्परिणामत्वाभ्युपगमे तदभिन्नस्य ब्रह्मणो निर्विकारत्वाभ्युपगमविरोधापत्तेः ।

ननु ब्रह्मचिच्छक्त्योः तात्त्विकाभेदेऽपि गार्गिब्राह्मणदहरविद्यानन्द-वल्यादिसिद्धस्य धर्मधर्मिभावासनासनिभावादेः निर्वाहार्थं व्यावहारिको भेदोऽप्यवश्यमभ्युपगन्तव्य इति, तत एव चिच्छक्तेः परिणामित्वाभ्युपगमेऽपि ब्रह्मचिच्छक्त्योः निर्विकारत्वसविकारत्वव्यवस्था घटते ; जीवब्रह्मणोरभेदेऽपि कर्तृत्वभोक्तृत्वादितदभावव्यवस्थावदिति चेत्, तथापि परममुक्तिदशायां व्यावहारिक-भेदनिवृत्त्या जीवगतकर्तृत्वभोक्तृत्वादिवत् वियदादिप्रपञ्चस्यापि निवृत्तेरवश्यं वक्तव्यत्वात् तस्य ब्रह्मविवर्तत्वसिद्धिरनिवार्या । तस्मात् संक्षेपशरीरकोक्तरीत्या भाष्ये परिणामवादालम्बनं व्यवहारदृष्टौ कर्मोपासनादिनिर्वाहार्थं तत्त्वदृष्टौ तत्प्रतिषेधापेक्षित-तत्प्रसक्त्यर्थं चेति ब्रह्मणो निष्प्रपञ्चत्वपक्ष एवाभिमत इत्यपि सुदृढम् ।

चिच्छक्तेः सकलाचेतनप्रपञ्चाकारत्ववत् सकलचेतनप्रपञ्चाकारत्व-स्याप्युक्तत्वेऽपि चेतनप्रपञ्चस्य वियदादिवत्तद्विवर्तत्वं न सिध्यति ; तथा सति तस्य तत्त्वज्ञानान्निवृत्त्या मुक्तिफलभाक्त्वाभावप्रसङ्गात्, नित्यस्य तस्य ब्रह्माभेदे (?) ब्रह्मभेदे ब्रह्मनिर्विकारत्वविरोधप्रसङ्गाच्च ।

ननु प्रकृत्यधिकरणे "परिणामात्" इति सूत्रे (ब्र.१.४.२७) चिदचिदाकारेण परिणामादिति व्याख्यातम् । परिणामत्वोक्तौ च विवर्तवादः स्वयमेवापततीत्युक्तम् ।

सत्यम् । तथापि चिदंशे परिणामत्वोक्तिश्चिद्वर्गस्य ब्रह्मचिच्छक्तिनित्यावस्थात्वमात्रपरा, चिद्वर्गस्यापि स्वचिच्छक्तिद्वारा ज्ञानसुखसंकोचविकासादिपरिणामोऽस्तीति तदभिप्राया वा, यतः स्वरूपतश्चिद्वर्गस्य नित्यत्वं व्यवस्थापितम् "नात्मा श्रुतेर्नित्यत्वाच्च ताभ्यः" (ब्र.२.३.१८) इत्यधिकरणे । तस्मान्निर्गुणं निष्प्रपञ्चं जीवाभिन्नं शुद्धाद्वैतरूपं ब्रह्मेति आचार्याणामभिमतमित्येतत्सुदृढमेव ।

नन्वेवं व्यवहारदशायां मुक्तिदशायां चाचार्याणां मतस्याद्वैतवादिमताविशेषे किमर्थं पृथग्भाष्यारम्भ इति चेदुच्यते । निर्विशेषब्रह्मसाक्षात्कारात् खलु ब्रह्मभावावाप्तिः । तत्साक्षात्कारस्तन्निदिध्यासनलभ्यः । तस्मिन्नतिसूक्ष्मे निदिध्यासन-योग्यं बुद्धिस्थैर्यं ये न लभन्ते, तेषां तत्र बुद्धिस्थैर्यं दृढभक्तिपूर्वकचिर-निरन्तरोपासनाराधितस्यानन्तकल्याणगुणदिव्यविग्रहविशिष्टस्य तस्यैव प्रसादाल्लभ्यम् "स नो बुध्या शुभया संयुनक्तु" इति श्रुतेः । "ईश्वरात् ज्ञानमन्विच्छेत्" इति स्मृतेश्च। अत एवाहुः खण्डनकाराः--

"ईश्वरानुग्राहादेषा पुंसामद्वैतवासना ।
महाभयकृतत्राणा द्वित्राणां यदि जायते ।।" इति ।

ईश्वरप्रसादश्च तदुपासनालभ्यः,
"यथान्तरोपचारेण नरः स्त्रीषु प्रसीदति ।
तथान्तरेण ध्यानेन प्रसीदति महेश्वरः ।।"

इति पुराणवचनात् । अतश्चिरकालं तदेकनिष्ठतोपयोगिभक्त्यतिशयसिद्धये तदेव परं ब्रह्म नातः परमस्य तात्त्विकं रूपमस्तीति प्रतिपादयद्भिराचार्यैस्तदानुगुण्येन वेदान्तवाक्यानां ब्रह्मसूत्राणां च योजनाप्रदर्शनार्थमिदं भाष्यं प्रवर्तितम् ।

ननु तस्मिन् भक्त्यतिशयसिद्ध्यर्थं श्रुतिस्मृतिपुराणप्रतिपन्नतदीयमहिम-विशेषप्रख्यापनमेव युक्तम् ; न तु ततः परस्य वस्तुसतो न्यायानुगृहीतवेदान्तार्थत्वेन स्वाभिमतस्य महापुरुषार्थप्राप्त्यर्थमवश्योपादेयस्य तदीयरूपान्तरस्य दूषणमिति चेदुच्यते । पूर्वेषामपि ऋषीणामियं शैली दृष्टा ; यत् पूर्वं कस्यचिदनुष्ठानेन

यत्राधिकारः प्राप्यः तत्रैव पूर्वानुष्ठानेन दृढाधिकारसिध्यर्थं तत्रानभिमतमपि श्रुतिन्यायविरोधेन दूषणं प्रदर्श्य तत्र पुरुषस्य प्रथमप्रवृत्तिं निरुध्य पूर्वानुष्ठेये व्यवस्थापनम् । यथा कल्पसूत्रे श्रुतिस्मृतिविरोधप्रदर्शनेन संन्यासं दूषयित्वा तत्र प्रथमं प्रवृत्तिं निरुध्य तदधिकारिविशेषणदृढवैराग्योपयोग्यन्तःकरणशुद्ध्यर्थं यज्ञादि-कर्मानुष्ठानवतो गार्हस्थ्यस्य शसनेन तत्र पुरुषव्यवस्थापनम् । तथा हि आपस्तम्बाचार्यैः --- "अथ पुराणे श्लोकावुदाहरन्ति---

अष्टाशीतिसहस्राणि ये प्रजामोषिर ऋषयः ।
दक्षिणेनार्यम्णः पन्थानं ते श्मशानानि भेजिरे ।।
अष्टाशीतिसहस्राणि ये प्रजां नेषिर ऋषयः ।
उत्तरेणार्यम्णः पन्थानं ते अमृतत्वं हि कल्पते ।।

इत्यूर्ध्वरेतसां प्रशंसा । अथापि सङ्कल्पसिद्धयो भवन्ति । यथा वर्षं प्रजादानं दूरेदर्शनं मनोजवतां यच्चान्यदेवं युक्तम् । तस्माच्छ्रुतितः प्रत्यक्षफलत्वाच्च विशिष्टानाश्रमानेतानेके ब्रुवते । त्रैविद्यवृद्धानां तु वेदाः प्रमाणमिति निष्ठा । तत्र यानि श्रूयन्ते व्रीहियवपश्वाज्यपयःकपालपत्नीसम्बन्धान्युच्चैर्नीचैः कार्यमिति तैर्विरुद्ध आचारोऽप्रमाणमिति मन्यन्ते । यत्तु श्मशानमुच्यते नानाकर्मणामेषोऽन्ते पुरुषसंस्कारो विधीयते । अतः परमनन्त्यं फलं स्वर्ग्यशब्दं श्रूयते । अथाप्यस्य प्रजातिममृतमाम्नाय आह-- प्रजामनु प्र जायसे, तदु ते मर्त्यामृतमिति । अथापि स एवायं विरूढः पृथक्, प्रत्यक्षेणोपलभ्यते । दृश्यते चापि सारूप्यं देहत्वमेवान्यत् । ते शिष्टेषु कर्मसु वर्तमानाः पूर्वेषां साम्परायेण कीर्तिं स्वर्गं च वर्धयन्ति । एवमवरोऽवरः परेषाम् । आभूतसंप्लवात्ते स्वर्गजितः । 'पुनः सर्गे बीजार्था भवन्ति' इति भविष्यत्पुराणे । अथापि प्रजापतेर्वचनम्--

त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपोयज्ञमनुप्रदानम् ।
य एतानि कुर्वते तैरित्सह स्मो रजो भूत्वा ध्वंसतेऽन्यत्प्रशंसन् । इति ।

तत्र ये पापकृतः त एव ध्वंसन्ति ; यथा पर्णं वनस्पतेः । न परान् हिंसन्ति । नास्यास्मिन् लोके कर्मभिस्सम्बन्धो विद्यते, तथा परस्मिन् कर्मफलैः ; तदेतेन वेदितव्यम् । प्रजापतेरृषीणामिति सर्गोऽयम् । तत्र ये पुण्यकृतः तेषां प्रकृतयः

पराज्वलन्त्यः उपलभ्यन्ते । स्यात्तु कर्मावयवेन तपसा वा कश्चित् सशरीरोऽन्तवन्तं लोकं जयति सङ्कल्पसद्धिश्च स्यात्, न तु तज्ज्यैष्ठ्यमाश्रमाणाम्" इति महता यत्नेन पूर्वोत्रपक्षाभ्यां संन्यासस्य यज्ञादिकर्मविधयाकसकलवेदविरुद्धत्वेनाप्रामाणिकत्वं प्रदर्श्य, गृहस्थस्य श्मशानभाक्त्वदूषणममृतत्वाभावकृतं तन्न्यूनत्वं च श्रुतिन्यायाभ्यां परिहृत्य, प्रजापतिवचनोदाहरणेनाश्रमान्तरं सर्वात्मना निन्दित्वा, पुत्रपौत्रादिकृत- सत्कर्मभिः पित्रादीनां स्वर्गोऽस्ति चेतत्कृतदुष्कर्मभिस्तेषां नरकोऽपि स्यादिति शङ्कां युक्त्या परिहृत्य, सङ्कल्पसिद्धित्वादिकं कर्मतपस्साध्यं गृहस्थेनान्येन वा येन केनापि संपादयितुं शक्यत इत्याश्रमान्तरस्य तत्कृतमुत्कर्षमप्यपास्य, यज्ञादिकर्मानुष्ठानवतो गार्हस्थ्यस्य प्रशंसनेनादृढवैराग्याणां मन्दाधिकारिणामन्तःकरणशुद्ध्या क्रमेण दृढवैराग्यसिद्ध्यर्थं गार्हस्थ्ये तद्व्यवस्थापनं कृतम् । तेषु सूत्रेषु अथापीत्यस्य अपि चेत्यर्थः । अमृतत्वं हि कल्पत इति अमृतत्वाय कल्पन्त इत्यर्थः । अनन्त्यं स्वर्ग्यमिति यकारोपजनः छान्दसः । देहत्वमेवान्यदिति देह एवान्य इत्यर्थः । ते स्वर्गजितः पुनः सर्गे बीजार्था भवन्तीति पुत्रपौत्रादिकृतैः पारलौकिकैः सत्कर्मभिः आप्रलयं स्वर्गं लब्धवन्तः ते पुनः सर्गादौ जगत्सृष्ट्यर्थाः प्रजापतयो भवन्तीत्यर्थः । तैरित्सह स्मः, तैरेव सह वसामः, त्रयीविद्यादिधनवतामेव अस्मल्लोकप्राप्तिरित्यर्थः । नास्यास्मिंल्लोक इति, अस्य इत्येकवचनं बह्वर्थे । एषां पित्रादीनां इहलोके पुत्रादिकृतैः दुष्कर्मभिः परलोके तत्फलैश्च सम्बन्धो नास्तीत्यर्थः ।

अत्र तैर्विरुद्ध आचारो अप्रमाणमिति संन्यासाश्रमस्य मूलप्रमाणराहित्यवचनम्, तस्य प्रत्यक्षजाबालादिश्रुतिसिद्धत्वादयुक्तम्; स्वयं च प्रागापस्तम्बाचार्यैः "चत्वारो आश्रमाः गार्हस्थ्यं आचार्यकुलं मौनं वानप्रस्थमिति । तेषु यथोपदेशमव्यग्रो वर्तमानः क्षेमं गच्छति" इत्याश्रमान्तराणामपि सद्भावोऽङ्गीकृतः । यथोपदेशमित्युक्त्या सर्वेष्वपि मूलमप्यङ्गीकृतम् । गार्हस्थ्याद्यनुक्रमणेनैव चतुष्ट्वसिद्धेः चत्वार इत्युक्तिः ऐकाश्रम्यपक्षनिराकरणार्था । एवं स्ववचनविरुद्धं चेदं तैर्विरुद्ध आचारो अप्रमाणमिति वचनम् । "ततः परमनन्त्यं फलं स्वर्ग्यशब्दं श्रूयते" इति यदुक्तम्, तदपि काशकुशावलम्बनम्; तथाभूतश्रुतिवाक्यसद्भावे तस्य "अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवति" इत्यादिवदर्थवादमात्रत्वात् । एतेन "प्रजामनु प्र जायसे" इत्यादिश्रुतिवाक्यान्तरोदाहरणमपि व्याख्यातम् । पितापुत्रयोरैक्ये युक्त्युदाहरणं त्वतिभन्दम् । न हि देहयोः- सादृश्यमात्माभेदनियतम् । तथा पुत्रादिदुष्टकर्मभिः

पित्रादीनां नरकप्राप्त्यभाववचनमपि "पितृभिस्सह मज्जति" इत्यादिवचनविरोधाच्चिन्त्यम् । प्रजापतेर्ऋषीणामित्यादियुक्तिस्तु "तेषां तेजोविशेषेण प्रत्यवायो न विद्यते" इति स्वयमेवापस्तम्बाचार्यैः प्राक् फल्गूकृता । इदं सर्वमापस्तम्बाचार्यैरज्ञानेनाग्रहेण वा नोक्तम् । किन्तु संन्यासफलश्रवणमात्रसन्तुष्टा मन्दाः तदुचितदृढवैराग्याभावेऽपि हठात् प्रवृत्ताः पुनः निर्वोढुं अशक्नुवन्तः पतेयुः, ते तथा मा पप्तन्निति तदनुग्रहार्थितया "किन्नु मलं किमजिनं किमु श्मश्रूणि किन्तपः पुत्रं ब्राह्मण(णा ?) इच्छध्वं स वै लोकोऽवदावदः" इत्यादिश्रुतिशैलीं दृष्ट्वा तत्प्रपञ्चनं कृतम् ।

तथा महाभारतेऽपि शान्तिपर्वणि संन्यासोद्युक्तम्,

"अथैककालिको वाहमेकैकस्मिन् दिनक्षये ।
चरन् भैक्षन् मुनिर्मुण्डः क्षपयिष्ये कलेबरम् ।।"

इति संन्यासानुज्ञां प्रार्थयमानं युधिष्ठिरं प्रति श्रीकृष्णेन संन्यासार्थं भ्रात्राद्यनुज्ञाप्रार्थनया वैराग्यस्यादार्ढ्यमवबुध्य तद्दार्ढ्यार्थमन्तःकरणशुद्धये तं यज्ञादिषु प्रवर्तयितुकामेन स्वयमृष्यादिद्वारा च संन्यासस्य बहुधा दूषणं कृतम् । तत्र जनकोपाख्यानगते,

"पन्थानं पावनं हित्वा जनको मौण्ड्यमास्थितम् ।
तं ददर्श प्रिया भार्या भैक्षवृत्तिमकिञ्चिनम् ।।"

इति श्लोके पावनमिति विशेषणेन दृढान्तःकरणशुध्युपयोगिनं कर्ममार्गं विसृज्य हठान्मोक्षाश्रमग्रहणमयुक्तमिति विभावितम् ।

तथा मनुस्मृतौ च-

"ऋणानि त्रीण्यपाकृत्या मनो मोक्षे निवेशयेत् ।
अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यघः ।।"

इति अदृढवैराग्यपुरुषापेक्षयैव "यदहरेव विरजेत्तदहरेव प्रव्रजेत्, गृहाद्वा वनाद्वा", इति, "ब्रह्मचर्यादेव प्रव्रजेत्" इति च प्रत्यक्षश्रुतिमनादृत्य तदर्थोल्लङ्घनमपि कृतम् ।

इत्थमेवाचार्यैरपि शुद्धब्रह्मावाप्तिरूपमहाफलश्रवणमात्रसन्तुष्टस्तत्प्राप्त्यर्थं तन्निदिध्यासनसाक्षात्कारजननसमर्थचित्तैकाग्र्यरहितो मन्दः तदुपयोगिनं सगुणोपासनामार्गमपहाय शुद्धब्रह्मविषयेषु श्रवणमनननिदिध्यासनेषु हठात्प्रवृत्तः तदुचितं चित्तैकाग्र्यमनधिगच्छन् उभयभ्रष्टो मा भूदिति तदनुजिघृक्षया तं निर्गुणविषयप्रवृत्तेः प्रच्याव्य सगुणोपासनास्वेव स्थिरया भक्त्या प्रवर्तयितुं वेदान्तानां सगुणे समन्वयः प्रदर्शितः । न चेदं तत्र समन्वयप्रदर्शनम्, कल्पसूत्रे "प्रजामनु प्रजायसे" इत्यादिवाक्यस्य पुत्रसन्तानो गृहस्थस्यामृतत्वमित्यर्थप्रदर्शनमिवात्यन्ततात्पर्याविषये तात्पर्यप्रदर्शनम्, निर्गुणप्रकरणाम्नातानामपि "एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रामसौ विधृतौ तिष्ठतः", "सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः" इत्यादिवाक्यानां निर्गुणप्रतिपत्त्युपायतया प्रतिपाद्यमाने सगुणेप्यवान्तरतात्पर्यसत्त्वात् । "ततः परं विशुद्धं तत्त्वान्तरं नास्ति" इति तु तथाभूतमन्दाधिकारश्रद्धार्थं तद्बुद्धिसंवादकैर्न्यायैस्तथोपपाद्य कल्पसूत्रे सन्यसनमिव तन्निगूहितमिति सर्वमुपपद्यते।

ननु मन्दाधिकारिणः प्रति प्रस्थानान्तरं कर्तव्यं चेत् स्वतन्त्रमेव कर्तुमुचितम्, न तु ब्रह्मसूत्रारूढम्, ब्रह्मसूत्राणां विशुद्धब्रह्मविचारार्थत्वात् ; विशुद्धं ब्रह्म आचार्यैरभ्युपगतमित्यङ्गीकारे शङ्करभगवत्पाददर्शितस्य तेषां तद्विचारार्थत्वस्यापि अङ्गीकर्तव्यत्वादिति चेत्सत्यम् । शङ्करभगवत्पादैरेव तेषां सूत्राणां विश्वतोमुखत्व सूत्रलक्षणप्राप्तं भूषणमिति सगुणब्रह्मविचारार्थत्वमप्याविष्कृतम् । तथा हि-- प्रथमसूत्रभाष्य एव तावत् "अस्ति तावद्ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं च । ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यशुद्धत्वादयोऽर्थाः प्रतीयन्ते" इति विशुद्धे सगुणे च ब्रह्मणि ब्रह्मशब्दस्य व्युत्पत्तिप्रदर्शनेन तत्र विचार्यपरस्य ब्रह्मशब्दस्य तदुभयपरत्वं सूचितम् । तेन विशुद्धब्रह्मवत् सगुणमपि ब्रह्मात्र स्वरूपप्रमाणसाधनफलैः सह विचार्यमित्याशय आविष्कृतः । तदनुकूलतया जन्मादिसूत्रे (शा.भा.१.१.२) जगदभिन्ननिमित्तोपादानत्वरूपं जगत्कारणत्वं विशेषणतया सगुणस्य, उपलक्षणतया शुद्धस्य च लक्षणमित्यभिप्रेत्य द्वयोरपि लक्षणमुखेन स्वरूपनिर्णयः कृतः । शास्त्रयोनिसूत्रस्य (शा.भा.१.१.३) सगुणस्य जगत्कारणत्वाक्षिप्तसर्वज्ञत्वद्रढीकरणार्थतयैकां योजनां प्रदर्श्य सगुणनिर्गुणसाधारण्येन लक्षितस्य ब्रह्मणः शास्त्रप्रमाणकत्वसमर्थनार्थतया योजनान्तरं च दर्शितम् । समन्वयसूत्रे (शा.भा.१.१.४) पूर्वसूत्रोक्तं ब्रह्मणि शास्त्रस्य प्रामाण्यमुपपादयितुं

वेदान्तरूपस्य तस्य सगुणनिर्गुणसाधारण्येनैव तस्मिन् तात्पर्येणान्वयो वर्णितः । स च-

"सगुणवाक्यमपीह समन्वितं
भवति निर्गुणवस्तुनि सर्वशः ।
न खलु निर्गुणवस्तुसमन्वयं
न सहते सगुणस्य समन्वयः ।।

सत्यासत्यवपुस्तथा हि सगुणं ब्रह्मास्य विद्या तथा
तद्वत्तद्विषयस्य वेदवचसस्तात्पर्यमेवंविधम् ।
तेनावान्तरमस्य वेदवचसस्तात्पर्यमन्यादृशं
चान्यन्निर्गुणवस्तु तत्त्वविषयं सङ्कीर्त्यते भागशः ।।"

इति संक्षेपशारीरकोक्तरीत्या निर्गुणे सर्वेषां वेदान्तवाक्यानां महातात्पर्येणान्वयरूपः सगुणे त्ववान्तरतात्पर्येणेति व्यवस्थया पर्यवस्यति । निर्गुणप्रकरणाम्नातानामपि वाक्यानां तत्तदन्तर्गतपदप्रवृत्तिनिमित्तगुणविशिष्टे सगुणे अवान्तरपात्पर्यं युज्यत एव । ईक्षत्यधिकरणे (शा.भा.१.१.५) वेदान्तानां साङ्ख्याभिमतप्रधानकारणत्वपरतां निरस्य सगुणनिर्गुणसाधारण्येनैव ब्रह्मकारणत्वपरता प्रसाधिता । अत एव तत्र स्वाप्ययसूत्रपर्यन्तं (शा.भा.१.१.९) सद्विद्यादिनिर्गुणप्रकरणगतानि वाक्यान्युदाहृत्य गतिसामान्यसूत्रभाष्ये (शा.भा.१.१.१०) सगुणनिर्गुणसाधारण्येन चेतनकारणत्वे सर्ववेदान्तानामैककण्ठ्यं प्रदर्श्य श्रुतत्वाच्चेति सूत्रभाष्ये (शा.भा.१.१.११) सगुणस्य परमेश्वरस्य महिमनिरूपणार्थं श्वेताश्वतरोपनिषदि समाम्नातः ---

"न तस्य कश्चित्पतिरस्ति लोके
न चेशिता नैव च तस्य लिङ्गम् ।
स कारणं करणाधिपाधिपो
न चास्य कश्चिज्जनिता न चाधिपः ।।"

इति मन्त्र उदाहृतः । तदनन्तरमानन्दमयाधिकरणावतरणे (शा.भा.१.१.१२) कृत्स्नस्याध्यायशेषस्य सगुणनिर्गुणोभयपरतयैव समुत्थानं वर्णितम्, "द्विरूपं हि ब्रह्मावगम्यते, नामरूपविकारोपाधिकं तद्विपरीतं च सर्वोपाधिवर्जितम् " इत्यादिना,

"एवमेकमपि ब्रह्मापेक्षितोपाधिसम्बन्धं निरस्तोपाधिसम्बन्धं चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषूपदिश्यत इति परो ग्रन्थ आरभ्यते" इत्यन्तेन । तदनन्तरम्, यथा "आनन्दमयोऽभ्यासात्", (शा.भा.१.१.१२) "भूमा संप्रसादादध्युपदेशात्", (शा.भा.१.३.८) "अक्षरमम्बरान्तघृतेः", (शा.भा.१.३.१०) 'अदृश्यत्वादिगुणको धर्मोक्तेः' (शा.भा.१.२.२१), "शब्दादेव प्रमितः" (शा.भा.१.३.२४), "सुषुप्त्युत्क्रान्त्योर्भेदेन" (शा.भा.१.३.४२), इत्यादिसूत्रैः सत्यज्ञानानन्ताखण्डानन्दरूपे प्रतिषिद्धस्थूलत्वादिसर्वधर्मे प्रत्यगभिन्ने ब्रह्मणि वेदान्तानां समन्वयः प्रदर्शितः, एवम् "अन्तस्तद्धर्मोपदेशात्" (शा.भा.१.१.२०), "सर्वत्र प्रसिद्धोपदेशात्"(शा.भा..१.२.१), "दहर उत्तरेभ्यः" (शा.भा.१.३.१४) इत्यादिसूत्रैरुपासकानुग्रहार्थं दिव्यमङ्गलविग्रहयुक्ते सत्यकामत्वसत्यसङ्कल्पकत्वाद्यनन्तकल्याणगुणशालिनि सविशेषेऽपि ब्रह्मणि तेषां यथार्हं समन्वयः प्रदर्शितः । अविरोधाध्यायेऽपि "तदनन्यत्वमारम्भणशब्दादिभ्यः" (शा.भा.२.१.१४) इत्यादिसूत्रैर्निर्विशेष इव "न विलक्षणत्वादस्य तथात्वं च शब्दात्"(शा.भा.२.१.४), "न प्रयोजनवत्वात्" (शा.भा.२.१.३२), "वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति" (शा.भा.२.१.३४) इत्यादिसूत्रैर्जगदुपादनत्वजगत्स्रष्टुत्व-सर्वभूतानुग्राहकत्वसर्वभूतदयालुत्वादि गुणशालिनि सविशेषेऽपि ब्रह्मणि समन्वयस्य विरोधपरिहारो दर्शितः । साधनाध्यायेऽपि "आनन्दादयः प्रधानस्य" (शा.भा.३.३.११), "अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्" (शा.भा.३.३.३३) इति निर्विशेषे ब्रह्मणि ज्ञानार्थमानन्दादीनामस्थूलत्वादीनामिव "कामादीतरत्र तत्र चायतनादिभ्यः" (शा.भा.३.३.३९) इत्यादिभिर्बहुभिः सूत्रैरुपासनार्थं सविशेषेऽपि ब्रह्मणि सत्यकामत्वादिगुणानामुपसंहारो वर्णितः । फलाध्याये "आवृत्तिरसकृदुपदेशात्" (शा.भा.४.१.१); "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" (शा.भा.४.१.३), "आसीनः संभवात्"(शा.भा.४.१.७), "यत्रैकाग्रता तत्राविशेषात्" (शा.भा.४.१.११), "तदधिगम उत्तरपूर्वाधयोरश्लेषविनाशौ तव्द्यपदेशात्" (शा.भा.४.१.१३), इत्यादिसूत्रैर्निर्गुणे श्रवणादीनाम्, सगुणे उपासनानां चावृत्तिः कार्या इत्येवमादयः केचिदर्थाः सगुणनिर्गुणयोस्तन्त्रेण प्रथमपादे निरूपिताः । द्वितीयपादे सगुणोपासनफलप्राप्त्यर्थं विदुष उत्क्रान्तिप्रकारो निर्गुणज्ञानफलप्राप्त्यर्थमुत्क्रान्त्यपेक्षाभावश्च वर्णितः । तृतीयपादे सगुणब्रह्मविदामर्चिरादिमार्गः तेन मार्गेण प्राप्यं सगुणं ब्रह्मेत्ययमर्थो निरूपितः । चतुर्थे पादे "संपद्याविर्भावः स्वेन शब्दात्" (शा.भा.४.४.१) इत्यादिभिस्त्रिभिरधिकरणैर्निर्गुणब्रह्मवित्प्राप्यफलस्वरूपम् "सङ्कल्पादेव तु तच्छ्रुतेः"

(शा.भा.४.४.८) इत्यादिभिरधिकरणैः सगुणोपासकप्राप्यफलस्वरूपं च विवेचितम्।

"नन्वेवमुक्तरीत्या सूत्राणां सगुणब्रह्मविचारार्थत्वमप्यस्तीत्याविष्कृतवद्भिः शङ्कराचार्यैरेव 'सगुणमपि ब्रह्म स्वरूपप्रमाणसाधनफलैः विचारितं चेत् किमर्थं सगुणविषये श्रीकण्ठाचार्यैः भाष्यान्तरं" कृतम्? सूत्राणां कार्त्स्न्येन सगुणपरत्वयोजनया सगुणे भक्त्यतिशयसिध्यर्थं चेत् निर्गुणे विश्वासातिशयसिध्यर्थं शङ्कराचार्यैस्तेषां कार्त्स्न्येन निर्गुणपरत्वयोजना किमिति न कृतेति चेदत्र ब्रूमः- शङ्कराचार्यैः "सगुणब्रह्मसद्भावमात्रं निरूपितम्, न तु तत्परमशिव इति विष्णवादिदेवतान्तरत्वशङ्कानिरासेन निर्णीतम्।

"यद्यपि- दहराधिकरणे (शा.भा.१.३.१४) "परमेश्वर एवात्र दहराकाशो भवितुमर्हति, न भूताकाशो जीवो वा" इति सिद्धान्तमुपक्रम्य "'यदिदमस्मिन् ब्रह्म पुरे' इति पूर्ववाक्ये ब्रह्मशब्देन जीव उच्यते, तस्य देहरूपपुरस्वामित्वात्, अतः प्राक् प्रकृतः स एव दहराकाशो भवितुमर्हति" इति शङ्कापरिहारप्रस्तावे, "अथवा जीवपुर एवास्मिन् ब्रह्म सन्निहितमुपदेक्ष्यते, यथा सालग्रामे विष्णुः सन्निहितः" इति विष्णोर्दहराकाशतया निर्णिनीषतस्य" सगुणब्रह्मणश्चोपमानोपमेयभावनिर्देशादिह निरूप्यमाणं सगुणं ब्रह्म न विष्णुरूपमिति सूचितम्; दहराधिकरण एव "यद्यप्याकाशशब्दो भूतकाशे रूढः, तथापि तेनैव तस्योपमा नोपपद्यते" इति भूताकाशस्तु सत्यामप्याकाशशब्दप्रसिद्धौ उपमानोपमेयभावाद्यसंभवान्न ग्रहीतव्य इति च तत्पूर्वापरग्रन्थयोः "यावान्वा अयमाकाशः तावानेषोऽन्तर्हृदय आकाशः" इत्युपमानोपमेयभावनिर्देशेन 'दहराकाशस्य भूताकाशभिन्नत्वव्यवस्थापनात्। तस्य न्यायस्य मध्यवर्तिग्रन्थेऽप्यव्याहतं प्रवृत्तेः।

तथा यावदधिकाराधिकरण भाष्ये, (शा.भा.३.३.३२) "अपान्तरतपा नाम वेदाचार्यः पुराणर्षिर्विष्णुनियोगात् कलिद्वापरयोः सन्धौ कृष्णद्वैपायनस्संबभूव। सनत्कुमारोऽपि ब्रह्मणो मानसः पुत्रः स्वयं रुद्राय वरप्रदानात् स्कन्दत्वेन प्रादुर्बभूव" इत्युक्तिभङ्ग्या विष्णोरप्यपकृष्टत्वेन विभावितं संहाररुद्रोऽत्र निर्णिनीषितं सगुणं ब्रह्म न भवतीति तु कैमुतिकन्यायेन सूचितम्।

"संहाररुद्र एव हिं

"त्वामेव पुत्रमिच्छामि त्वया वा सदृशं विभो ।"

इति प्रार्थयमानं ब्रह्माणं प्रति वरप्रदानात्तत्पुत्रत्वेन प्रादुर्भूतः कुमारस्संभवोपाख्यानविषय इति पुराणेषु प्रसिद्धम् । एवं विष्णुरुद्रभिन्नत्वेन सूचितं सगुणं ब्रह्म त्रिमूर्त्युत्तीर्णः परमशिव इत्यपि अन्तरादित्यविद्याद्यधिकरणेषु निर्णिनीषिते सगुणब्रह्मणि प्रायः परमशिववाचकपरमेश्वरशब्दप्रयोगेण सूचितम् ।

भगवत्पादहृदयाभिज्ञैराचार्यवाचस्पतिमिश्रैरपि शास्त्रोपक्रमे---

"षड्भिरङ्गैरुपेताय विविधैरव्ययैरपि ।
शाश्वताय नमस्कुर्मो वेदाय च भवाय च ।।"

इति वेदभवशब्दाभ्यामौचित्यात् प्रमाणप्रमेयभावेनान्वितयोः नमस्कार्यत्वेन निर्देशात् षडङ्गदशाव्ययरूपकल्याणगुणगणविशिष्टत्वेन भवशब्दवाच्यत्वेन च प्रसिद्धः परमशिव एवात्र शास्त्रे निरूपणीयं सगुणं ब्रह्मेति सूचितम् ।

तथापि तत्तदधिकरणविषयवाक्यानां देवतान्तरपरत्वनिरासेन तत्र व्यवस्थापितम्, अतिगूढत्वेन सूचनामात्रेण श्रोतॄणां हृदयसाक्षिकः प्रत्ययो न भवतीति तदर्थं त्रिमूर्त्युत्तीर्णः परमशिव एवात्र शास्त्रे प्रतिपाद्यं सगुणं ब्रह्म, दहरशाण्डिल्योपकोसलवैश्वानरादिविद्याविध्युक्तप्रकारेण तस्यैवोमासहितस्योपासनं कार्यम्, सगुणोपरासनाभिरर्चिरादिमार्गेण प्राप्यं च स्थानं तदीयदिव्यलोकरूपमेवेत्यस्मिन्नर्थे वेदान्तानां न्यायतः सामरस्यमुपपादयितुमाचार्यैः पृथक् भाष्यमारब्धम् ।

नन्वेवं सति शाङ्करभाष्ये सगुणब्रह्मनिरूपणं व्यर्थमवश्यारब्धव्येनानेनैव भाष्येण

"निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः ।
ये मन्दास्तेऽनुकम्प्यन्ते सावशेषनिरूपणैः ।।
वशीकृते मनस्येषां सगुणब्रह्मशीलनात् ।
तदेवाविर्भवेत्साक्षादपेतद्वैतकल्पनम् ।।"

इति कल्पतरूक्तस्य तन्निरूपणप्रयोजनस्य सिद्धेरिति चेच्छृणु तस्यापि साफल्यम् । निर्गुणब्रह्मनिरूपणार्थमेव शङ्करभगवत्पादैः भाष्यं प्रवर्तितम् । तन्निरूपणं तत्तदधिकरणाविषयवाक्यानां जीवाद्यन्यपरत्वशङ्कारूपपूर्वपक्षनिरासपूर्वकं कार्यम् । तन्निरासश्च सर्वकर्तृत्वसर्वपालयितृत्वसर्वप्रशास्तृत्वसर्वसंहर्तृत्वादिलिङ्गैः कार्यः । तत्रेयं शङ्का भवेत् -- प्रतिषिद्धसर्वधर्मस्य शुद्धचिन्मात्ररूपस्येह निरूपणीयस्य ब्रह्मणः के धर्माः, यैः ब्रह्मलिङ्गत्वाभिमतैः जीवादिपूर्वपक्षनिरासः क्रियत इति । तत्रायं परिहारो वाच्यः-- वस्तुतो निर्धर्मकस्यापि ब्रह्मणः सन्ति व्यवहारदशायां कल्याणगुणरूपाः बहवो धर्माः । तदुपहितं तदेव निर्विशेषं ब्रह्म सविशेषमित्यप्युच्यते। तस्य सविशेषस्य दहरशाण्डिल्यवैश्वानरविद्याद्युपास्यस्य धर्माः निर्विशेषप्रकरणेऽपि तत्प्रतिपत्त्युपायत्वेन तत्स्मृत्यर्थत्वेन च य उपादीयन्ते तैर्जीवादिपूर्वपक्षनिरासः क्रियत इति तदुपयोगितयास्मिन्नपि शास्त्रे सविशेषब्रह्मप्रतिपत्त्यर्थं तद्विषयाणि वाक्यान्युदाहृत्य तन्निरूपणं कार्यम् ।

फलप्रतिपत्त्यर्थमपि तन्निरूपणं कार्यम् । तथा हि-- यद्यपि तत्त्वदृष्ट्या तत्त्वज्ञानफलं निर्विशेषब्रह्मभावाप्तिः , तथापि तदेव निर्विशेषं ब्रह्म यावत्सर्वमुक्ति सगुणेश्वरभावमापद्यावतिष्ठत इति व्यवहारदृष्ट्या सत्यकामत्वादिगुणकपरमेश्वर-भावापत्तिरूपमपि भवति तत्फलम् । अत एव प्रथमाध्याये दहराधिकरणे दहराकाशो वाक्यशेषश्रुतैः सत्यकामत्वादिगुणैः परमेश्वर इति प्रसाध्य, प्रजापतिविद्यायाम्, "य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सो विपिपासः सत्यकामस्सत्यसङ्कल्पः" इति जीवेपि तेषां गुणानां श्रवणात् न तेषां परमेश्वरलिङ्गत्वमित्याशङ्कामुद्भाव्य, तन्निरासार्थं प्रवृत्तस्य "उत्तराच्चेदाविर्भूत-स्वरूपस्तु" (शा.भा.१.३.१९) इति सूत्रस्य, मुक्तौ जीवस्य परमेश्वरभावापत्त्यैव सत्यकामत्वादिगुणाविर्भावो न तु तद्भिन्नावस्थतयेति न तेषां ब्रह्मलिङ्गत्वे काचिदनुपपत्तिरिति तात्पर्यमुक्तम्, "तस्मादविद्याप्रत्युपस्थापितमपारमार्थिकं जैवं रूपं कर्तृत्वभोक्तृत्वरागद्वेषादिदोषकलुषितमनेकानर्थयोगि, तद्विलयनेन तद्विपरीतमपहत-पाप्मत्वादिगुणकं पारमेश्वरं रूपं विद्यया प्रतिपद्यते" इति

प्रथमाध्याय एव जगद्वाचित्वाधिकरणेऽपि (शा.भा.१.४.१६) बालाक्यजातशत्रुसंवादस्योपक्रमोपसंहाराभ्यां परब्रह्मपरत्वव्यवस्थापनप्रस्तावे

"तथोपसंहारस्यापि निरतिशयफलश्रवणात् ब्रह्मविषयत्वं दृश्यते, 'सर्वान् पाप्मनोऽपहत्य सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति । य एवं वेद "इत्युक्त्या मुक्तिफलस्य सगुणेश्वरभावापत्तिरूपत्वं दर्शितम् ; परमेश्वरादन्यत्र सर्वभूताधिपत्यासंभवात् । तथा द्वितीयाध्यायेऽपि अंशाधिकरणे (शा.भा.१.३.४३) "जीवस्येश्वरांशत्वाभ्युपगमे तदीयेन संसारदुःखभोगेनेश्वरस्यापि दुःखित्वं स्यात् । यथा लोके हस्तपादाद्यन्यतमांशगतेन दुःखेनांशिनो देवदत्तस्यापि दुःखित्वं तद्वत् । अतश्च तत्प्राप्तानां महत्तरं दुःखं प्राप्नुयात् । अतो वरं पूर्वावस्था संसार एवास्त्विति सम्यग्ज्ञानानर्थक्यप्रसङ्गः" इति शङ्काग्रन्थेन प्रसिद्धेन बिम्बप्रतिबिम्बभावेन कृतासाङ्कर्यमवलम्ब्य समाहितेन मुक्तस्येश्वरभावापत्तिराविष्कृता । न च तत्रेश्वरशब्दः कथंचन शुद्धचैतन्यपरो योजनीयः । यतः "परात्तु तच्छ्रुतेः" इति तत्पूर्वाधिकरणे (शा.भा.२.३.४१,४२) जीवस्याविद्यावस्थायां कर्तृत्वमीश्वरापेक्षमिति प्रसाध्य,"नन्वेवमीश्वरस्य कारयितृत्वे सति वैषम्यनैर्घृण्ये स्याताम्" इति शङ्कोत्तरत्वेन "कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः" (शा.भा.२.३.४२) इति तदीयगुणसूत्रस्यावतारितत्वात्तदधिकरणं सगुणेश्वरविषयमिति तदनन्तर-प्रवृत्तमंशाधिकरणमपि तद्विषयमेव । तदुपक्रमे "जीवेश्वरयोरुपकार्योपकारकभाव उक्तः। स च सम्बद्धयोरेव दृष्टां लोके । यथा स्वामिभृत्ययोः । यथा वा अग्निविस्फुलिङ्गयोः । ततश्च जीवेश्वरयोरप्युपकार्योपकारकभावाभ्युपगमात् किं स्वामिभृत्यवत्संबन्धः, आहोस्विदग्निविस्फुलिङ्गवदित्यस्यां विचिकित्सायामनियमो वा प्राप्नोति; अथवा स्वामिभृत्यप्रकारेष्वीशित्रीशितव्यभावस्य प्रसिद्धत्वात्तद्विध एव सम्बन्धः प्राप्नोति" इति पूर्वपक्षप्रवर्तनेन तस्याधिकरणस्य पूर्वाधिकरण-समानविषयत्वस्फुटीकरणात् ।

तृतीयाध्यायेऽपि सन्ध्याधिकरणे (शा.भा.३.२.१) परमेश्वराभिन्नस्य जीवस्यैश्वर्यवशात् स्वप्ने साङ्कल्पिकी रथादिसृष्टिर्भविष्यतीति शङ्कोत्तरत्वेनावतारितस्य "पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ" (शा.भा.३.२.५) इति सूत्रस्य तात्पर्यकथनावसरे "जीवेश्वरयोः सत्यप्यंशांशित्वे प्रत्यक्षमेव जीवस्येश्वरविपरीत- धर्मवत्त्म् । किं पुनर्जीवस्येश्वरसमानधर्मत्वं नास्त्येव ? न नास्त्येव ; विद्यमानमपि तत्तिरोहितं अविद्यादिव्यवधानात् । तत्पुनस्तिरोहितं सत्परमेश्वरमभिध्यायतो यतमानस्य जन्तोः विधूतध्वान्तस्य तिमिरतिरस्कृतेव

दृक्छक्तिरौषधवीर्यादीश्वरप्रसादात्संसिद्धस्य कस्यचिदेवाविर्भवति" इति ग्रन्थसन्दर्भेण मुक्तस्य सगुणेश्वरभावापत्तिराविष्कृता; केवलचिन्मात्ररूपतापत्तौ सत्यसङ्कल्पादिधर्माविर्भावासंभवात्।

चतुर्थाध्याये तु "स्वेन रूपेणाभिनिष्पद्यते" इति मुच्यमानविषयायां श्रुतौ केन रूपेणाभिनिर्ष्पत्तिः विवक्षितेति बुभुत्सायाम् "ब्राह्मेण जैमिनिरुपन्यासादिभ्यः" (शा.भा.४.४.५) इति सूत्रेण यत् ब्राह्मं रूपमपहतपाप्मत्वादि सत्यसङ्कल्पत्वावसानं सर्वज्ञत्वसर्वेश्वरत्वादि तेनाभिनिष्पत्तिः "य आत्मापहतपाप्मा" इत्याद्युपन्यासेन "स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा" इत्याद्यैश्वर्यावेदनेन चेति जैमिनिमतम् "चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः" (शा.भा.४.४.६) इत्यनन्तरसूत्रेण "एवं वा अरे अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव" इत्यादिश्रुत्या चैतन्यमात्रमात्मनः स्वरूपमित्यवगतेस्तन्मात्रेणाभिनिष्पत्तिरिति मतान्तरं चोपन्यस्य तदनन्तरपठितस्य "एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः" (शा.भा.४.४.७) इति सिद्धान्तसूत्रस्य "एवमपि पारमार्थिकचैतन्यस्वरूपत्वाभ्युपगमेऽपि व्यवहारापेक्षया पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्रत्याख्यानादविरोधं बादरायण आचार्यो मन्यते" इति तात्पर्यकथनेन मुक्तस्य निरतिशयैश्वर्यशालिनी सगुणेश्वरभावापत्तिरतितरां स्पष्टीकृता । निर्गुणब्रह्मवादे तद्भावापत्तिरेव मुक्तिरिति वक्तव्ये कथं सगुणेश्वरभावापत्तिरेव मुक्तिरुच्यत इति शङ्का च समाहिता वस्तुदृष्ट्या मुक्तस्य चैतन्यमात्रत्वेऽपि बिम्बभूतपरमेश्वरभावं प्राप्तस्य तस्य परमेश्वरवदेन वद्धपुरुषव्यवहारदृष्ट्या यावत्सर्वमुक्ति निरतिशयमैश्वर्यं पारमेश्वरत्वेन प्रसिद्धं अन्यच्च सकलं धर्मजातं संभवतीति । तदेवं निर्विशेषनिरूपणार्थब्रह्मलिङ्गप्रदर्शनोपयोगितया तत्त्वज्ञानप्राप्यफलरूपसगुणेश्वरमहिमप्रपञ्चनोपयोगितया च प्रायः सकलसगुणविद्याप्रकरणाम्नाताः सर्वेऽपि परमेश्वरस्य कल्याणगुणाः प्रदर्शनीया जाता इति निरूपणीयबाहुल्यान्निर्गुणनिरूपणप्राधान्येन प्रवृत्तेऽपि भगवत्पादीये भाष्ये सगुणप्रसङ्ग एव भूयान्, निर्गुणविचारो निरूपणीयबाहुल्याभावात् स्वल्पश्च दृश्यते, यथा चतुर्ष्वपि वेदेषु सर्वप्राण्यनुग्रहार्थं ब्रह्मभावाप्तिरूपमहापुरुषार्थप्रतिपादनैदम्पर्येणैव प्रवृत्तेषु तदुपयोग्यन्तःकरणशुद्धिजनककर्मनिरूपणार्थ एव भूयान् प्रपञ्चः ब्रह्मनिरूपणार्थो वेदान्तभागस्तु निरूपणीयबाहुल्याभावात् स्वल्पः ।

नन्वेवं सगुणविचारस्य निर्गुणविचारार्थत्वे निर्गुणविचारप्रतिज्ञयैव सगुणविचारः साधनफलविचारवदर्थात् कर्तव्यत्वेन सिध्यतीति किमर्थं सगुणविचारस्यापि प्रतिज्ञातत्वसिध्यर्थं प्रथमसूत्रागतस्य विचार्यपरब्रह्मशब्दस्य सगुणसाधारण्यम् "अस्ति तावत्" इत्यादिभाष्येणोक्तमिति चेत्, ब्रह्मसूत्राणां साकल्येन सगुणपरतया योजनान्तरमप्यस्तीति सूचनार्थं तदर्थप्रतिज्ञोपयोगितया तदुक्तमित्यवेहि । तद्योजनान्तरं कथमित्याङ्क्षायां समासभेदाश्रयणादिनेति स्थालीपुलाकन्यायेन क्वचिद्दर्शयितुमेव शास्त्रयोनिसूत्रे (शा.भा.१.१.३) वर्णकद्वयं कृतम् । कल्पतरुकारैरपि भाष्यकारीयं शास्त्रयोनि सूत्रस्य सगुणनिर्गुणोभयपरतया योजानाद्वयं स्थालीपुलाकन्यायावलम्बनेन प्रवृत्तमिति प्रदर्शयितुमेव स्वयमपि "अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्" इति सूत्रस्य (शा.भा.४.१.१६) सगुणनिर्गुणोभयपरयोजनाद्वयं भाष्यसूचितं स्फुटीकृतम् । तैः खलु "अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्" इति सूत्रस्य अग्निहोत्रादिकं तस्मै "तदधिगम उत्तरपूर्वाघयोः" इति सूत्रे (शा.भा.४.१.१३) तदधिगमशब्देन प्रस्तुताय निर्विशेषब्रह्मापरोक्षज्ञानरूपाय कार्यायैव, "विविदिषन्ति यज्ञेन" इत्यादिश्रुतिदर्शनात् । समस्तकर्मवृन्ददाहकत्वेन कर्मजातिविरोधिनोऽपि तस्य ज्ञानस्य नित्ययज्ञादिकर्मविशेषकार्यत्वं नायुक्तम्, समस्तवनदाहकस्यापि दवदहनस्य वनान्तर्गतवेण्वादिकार्यत्वदर्शनात् इति निर्गुणविषयमेकं योजनं प्रदर्शितम् । अग्निहोत्रादिकं तस्य सगुणब्रह्माधिगमस्य कार्यायैव, सगुणविदां केकयादीनां यज्ञाद्यनुष्ठानदर्शनात् ; निर्गुणविद्याफलस्येव सगुणविद्याफलस्य कर्मकार्यत्वं नायुक्तम्, ब्राह्मलौकिकभोगरूपस्य तस्य सातिशयत्वदर्शनात् इति सगुणविषयं योजनान्तरं प्रदर्शितम् । एवं जिज्ञासासूत्रे (शा.भा.१.१.१) विचार्यपरस्य ब्रह्मशब्दस्य सगुणसाधारण्यप्रदर्शनेन क्वचित्सगुणनिर्गुणोभयविषययोजनाद्वयप्रदर्शनेन च शङ्कराचार्यैः सूचितमेव । सर्वेषां ब्रह्मसूत्राणां सगुणपरं योजनान्तरमुपासकानुग्रहार्थमाविष्कर्तुमेव श्रीकण्ठाचार्यैः भाष्यं प्रवर्तितम् ।

नन्वेवं निर्गुणब्रह्माभ्युपगमाविरोधेन शङ्कराचार्याभिमत एव सगुणब्रह्मनिरूपणप्रकारः श्रीकण्ठाचार्यैराविष्कृतश्चेत्तन्मते यानि सगुणब्रह्मविषयत्वेन संप्रतिपन्नानि वेदान्तवाक्यानि तान्येवाधिकरणेषु उदाहृत्यैतैर्देवतान्तरपरत्वादिनिरासपूर्वकं स्वाभिमतसगुणेश्वरपरतया निर्णेयानि स्युः । तैर्येष्वधिकरणेषु यानि वेदान्तवाक्यानि सद्विद्यानन्दवल्लीप्रदर्दनाख्यायिकाकठवल्ल्यन्तर्यामिब्राह्मणमुण्डक-

भूमविद्यादीनि निर्गुणविषयत्वेन निर्णीतानि तान्येव तेष्वधिकरणेष्वेतैः सगुणविषयतया निर्णीतानि इति सर्वत्रापि दृश्यते । तान्यपि सगुणविषयाणि चेदेतेषां किंप्रमाणमूलो निर्गुणाभ्युपगम इति श्रद्धेयम् ? तस्मान्निर्गुणप्रस्थानविरोध्येवेदं भाष्यं प्रवर्तितमिति प्रतिभातीति चेदुच्यते-

चेतनाचेतनात्मकं सर्वं जगत् ब्रह्मचिच्छक्तिरूपम्, सा च ब्रह्मणः स्वरूपभूता तदभिन्ना तदीयसकलमङ्गलगुणरूपा च, ब्रह्म च वस्तुतो निर्विकारमिति-- सन् घटः ----इत्यादिप्रत्यक्षं ब्रह्मसत्ताविषयम्, -- स्फुरति घटः ---- इत्यादिप्रत्यक्षं ब्रह्मस्फुरणविषयम्, -- अहं सुखी --- इत्यादिप्रत्यक्षं ब्रह्मानन्दलेशविषयमिति च शुद्धाद्वैतसिध्युपयोगिनीमद्वैतमर्यादामेव स्वसिद्धान्ततयाङ्गीकृतवताम्, "निरन्वयोपासकानामिहैव मुक्तिः" इति मतम्, तद्विरोध्यर्थप्रसङ्गे सर्वत्राप्युपदिष्टवतां तच्च स्वयमेवोपपादितवतां श्रीकण्ठाचार्याणां निर्गुणं निष्प्रपञ्चं सकलजीवाभिन्नं शुद्धाद्वैतरूपं ब्रह्मेति परमसिद्धान्त इत्ययमर्थः कथमपि प्रत्याख्यातुं न शक्यते, तत्प्रत्याख्याने तदीयबहुसिद्धान्तव्याकोपप्रसङ्गात् । तथा शुद्धब्रह्माभ्युपगमे च शङ्कराचार्यैस्तद्विषयत्वेन निर्णीतानि सद्विद्यादीनि वेदान्तवाक्यान्येव मूलप्रमाणानि । तेषां यत्सगुणे समन्वयनिरूपणं तन्निर्गुणे तात्पर्यं नास्तीत्यभिप्रायेण न भवति, किन्तु सगुणेऽपि तात्पर्यमस्तीत्यभिप्रायेण । अस्ति हि सद्विद्यादिनिर्गुणप्रकरणगतानामपि गुणपुरस्कारेण प्रवृत्तानां सन्दर्भाणां तत्तद्गुणविशिष्टे सगुणेऽप्यवान्तरतात्पर्यम्, यदवलम्बनेन शाङ्करभाष्येऽपि ब्रह्मलिङ्गोपन्यासः । तथा हि-- ईक्षत्यधिकरणे (शा.भा.१.१.५) प्राथमिकमीक्षणलिङ्गम् ; आनन्दमयाधिकरणे "तद्धेतुव्यपदेशाच्च" इति सूत्रोपात्तम् (शा.भा.१.१.१४) "इदं सर्वमसृजत, यदिदं किञ्च" इति वाक्योक्तं सर्वस्रष्टृत्वलिङ्गम् ; "प्राणस्तथानुगमात्" इत्यधिकरणे (शा.भा.१.१.२८) अनुगमहेतुक्रोडीकृतम् "एष लोकाधिपतिरेष लोकपालः" इत्यादिवाक्योक्तेशितृत्वादिलिङ्गम् ; "अत्ता चराचरग्रहणात्" इत्यधिकरणे (शा.भा.१.२.९) सौत्रहेतूपात्तम् "यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः " इति विषयवाक्योक्तं ब्रह्मक्षत्रोपलक्षितसर्वप्रपञ्चसंहर्तृत्वलिङ्गम् ; "अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्" इत्यधिकरणे (शा.भा.१.२.१८) सौत्रहेतूपात्तम् "यः पृथिवीमन्तरो यमयति" इत्यादिवाक्योक्तं सर्वान्तर्यामित्वादिलिङ्गम् ; "अदृश्यत्वादिगुणको धर्मोक्तेः" इत्यधिकरणे (शा.भा.१.२.२१) सौत्रहेतूपात्तम् "यस्सर्वज्ञस्सर्ववित्" इत्यादिवाक्योक्तं सर्वज्ञत्वादिलिङ्गम् ; भूमाधिकरणे

(शा.भा.१.३.८.९), "धर्मोपपत्तेश्च" इति गुणसूत्रोपात्तम् "आत्मनः प्राणः" इत्यादिवाक्योक्तं सर्वकारणत्वादिलिङ्गम् ; अक्षराधिकरणे "सा च प्रशासनात्" (शा.भा.१.३.११) इति गुणसूत्रोपात्तम् "एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादिवाक्योक्तं प्रशासितृत्वलिङ्गम् ; सुषुप्त्युत्क्रान्त्यधिकरणे "पत्यादिशब्देभ्यः " इति गुणसूत्रोपात्तम् (शा.भा.१.३.४३) "सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः" इत्यादिवाक्योक्तं सर्वाधिपतित्वादिलिङ्गम् ; "जगद्वाचित्वात्" इत्याधिकरणे (शा.१.४.१६) सोत्रहेत्वाक्षिप्तम् "यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वै तत्कर्म स वै वेदितव्यः" इति वाक्योक्तं सकलजगत्कर्तृत्वलिङ्गम् ; "वाक्यान्वयात्" इत्यधिकरणे (शा.भा.१.४.१९) अन्वयशब्देन क्रोडीकृतम् "अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदः" इत्यादिवाक्योक्तं सकलनामरूपप्रपञ्च-स्रष्ट्रत्वं चेत्येवं निर्गुणविषयेष्वधिकरणेषु सगुणब्रह्मधर्मरूपाणां लिङ्गानामुपन्यासो दृश्यते । तेन निर्गुणप्रकरणगतानामपि तत्तल्लिङ्गप्रतिपादकवाक्यानां तत्तद्विशिष्टे सगुणरूपेऽस्त्यवान्तरतात्पर्यमित्यवसीयते । तदवलम्बनं श्रीकण्ठाचार्याणां तत्र तत्राधिकरणे तस्य तस्य विषयवाक्यस्य सगुणे परमेश्वरे समन्वयकथनम् । महातात्पर्यविषये निर्गुणे समन्वयाकथनं तु तत्प्रच्छादनेन सगुणे भक्त्यतिशयसिध्द्यर्थमित्युक्तमेव ।

ननु निर्गुणे समन्वयाकथनमुक्तरीत्या भवत्वविरुद्धम् । निर्गुणप्रकरणगतानां सगुणवाक्यानां यदेकवाक्यतया महातात्पर्येण निर्गुणपर्यवसायित्वं समर्थनीयम्, तेषां साक्षान्निर्गुणविषयाणामपि वाक्यानां प्रयत्नेन सगुणे योजनं कृतं दृश्यते ; यथा तावदीक्षत्यधिकरणे (ब्र.१.१.५) --- "एकमेवाद्वितीयम्" इति वाक्यस्य, यथा वा भूमाधिकरणे (ब्र.१.३.७,८) "यत्र नान्यत्पश्यति" इत्यादिवाक्यस्य, यथा वा आरम्भणाधिकरणे (ब्र.२.१.१५) "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इति वाक्यस्य । तत्राद्ययोर्वाक्ययोः यत्सगुणपरतया योजनं कृतम्, तत्पूर्वपक्ष एवोदाहृतम् । तृतीयस्य त्वित्थं योजनाद्वयं दर्शितम्-- "विकारो नामधेयं च वाचारंभणं वाचायाः अभिलापार्थक्रियारूपव्यवहारस्य निष्पादकं भवति । मृद्द्रव्यस्यैव घटाद्यवस्था, घटादिनामधेयं चार्थक्रियाभिलापरूपव्यवहारनिष्पत्तये भवति इति यावत् । वस्तुतो घटादिकमपि मृत्तिकेत्येव सत्यम् प्रामाणिकम्, मृद्व्यतिरेकेण घटभावादर्शनात् ।

अथवा वाचारंभणं विकारः, विकारो घटो वाचारंभणं घटोऽयमिति वाचारंभविषयमात्रम् । मृद्द्रव्यमेव, व्यवहारसिध्यर्थं जायमानावस्थान्तरम्, न तु मृदो द्रव्यान्तरम् ; मृत्तिकेत्येव नामधेयं सत्यम् । घटादिकं मृत्तिकेति कृत्वैव तत्र सर्वं मृद्घटादि नामधेयं सत्यम्, सति प्रामाणिकेऽर्थे साधु, न तु द्रव्यान्तरमिति कृत्वा ; यतो घटो मृदेवेति" इदं योजनाद्वयं कारणव्यतिरिक्तस्य कार्यस्य मिथ्यात्वप्रतिपादनपरा वाचारम्भणश्रुतिरिति पक्षप्रतिक्षेपार्थं सा श्रुतिः कार्यकारणयोः तात्त्विकाभेदप्रतिपादनपरेति दर्शयितुं कृतम् । तथाहि-- प्रागेकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय तदुपपादनार्थम् "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात्" इति दृष्टान्त उपन्यस्तः । तत्र नायं दृष्टान्त उपपद्यते । मृत्पिण्डस्य तद्विकाराणां घटशरावादीनां चार्थक्रियाभिलापभेदेनात्यन्तभिन्नतया मृत्पिण्डज्ञानेन तद्विकाराणां ज्ञातत्वायोगादित्याशङ्कायां घटमृत्पिण्डादिकार्यकारणभेदव्यवस्थापनेन दृष्टान्तोपपादनार्थं वाचारंभणश्रुतिः प्रववृत इत्याचार्याणामभिमतम् ।

तस्याः प्रथमयोजनायामयमर्थः -- विकारः घटत्वपृथुबुध्नोदरत्वादिः, नामधेयम्, तत्प्रवृत्तिनिमित्तकं घटादिपदम्, तदुभयं वाचारंभणम् । वाचा = वाक् घटमानयेत्याद्यभिलापः ; तेन तज्जन्यार्थक्रियापि लक्ष्यते । आरभ्यते निष्पाद्यते अनेनेत्यारंभणम् कारणम् । वाचाया आरंभणं विकारो नामधेयं च क्रमेणार्थक्रियाभिलापयोः कारणमिति यावत् । विकारनामधेयोभयवृत्तेरारंभणशब्दस्य "नपुंसकमनपुंसकेनैकवच्चान्यतरस्याम्" इति नपुंसकैकशेष एकवद्भावश्च । अनेनैतदुक्तं भवति-मृत्पिण्डतद्विकाराणां द्रव्यैक्येऽपि पिण्डत्वपृथुबुमुघ्नोदरत्वाद्याकारभेदेन तत्प्रवृत्तिनिमित्तकनामधेयभेदेन चार्थक्रियाभिलापभेद इति ।

ननु गोमहिषवद्द्रव्यभेदेनैव तद्भेदः किमिति नेष्यत इत्याशङ्क्योक्तं मृत्तिकेत्येव सत्यम्, घटशरावादिकमपि मृत्तिकेत्येव प्रामाणिकम्, तदेव मृद्द्रव्यमिदानीं घटरूपमासीदित्यादिप्रत्यभिज्ञाप्रत्यक्षरूपेण गुरुत्वद्वैगुण्याभावादियुक्तिरूपेण च प्रमाणेन सिद्धम् । एवं प्रमाणसिद्धैक्यनिर्वाहायार्थक्रियाभिलापभेदस्य विकारनामधेयभेदोपाधिकत्वं कल्पयितुं युक्तमिति भावः ।

द्वितीययोजनायां त्वयमर्थः - वाचारंभणं विकारः, घटशरावादिविकारो

घटोऽयमिति व्यवहारविषयमात्रम्, न तु मृदो द्रव्यान्तरम् । ननु मृदो द्रव्यान्तराभावे मृदः पिण्डतादशायामप्रवृत्तं घटशरावादिनामधेयं कथं पश्चात्प्रवर्तत - इत्याशङ्कायामुक्तं नामधेयं मृत्तिकेत्येव सत्यम् । मृन्नामधेयमिव घटशरावादिनामधेयमपि तद्द्रव्यं मृत्तिकेति कृत्वैव सति प्रामाणिकेऽर्थे साधु, न तु द्रव्यान्तरमिति कृत्वा, प्रत्यभिज्ञाविरोधादिना द्रव्यान्तरस्याप्रामाणिकत्वादिति । अस्मिन् पक्षे "सत्ये साधौ च सच्छब्दः" इति स्मृतेः प्रामाणिकार्थवाचिसत्यशब्दपर्यायात् सच्छब्दात्तत्र साधुरित्यर्थे यत्प्रत्ययः । आरम्भणशब्दो विषयभावेन निष्पादकं वदन् विषयत्वपर्यवसायी; तस्य पुल्लिङ्गविशेषणत्वेऽपि "द्विगुरेकवचनम्" इतिवल्लिङ्ग-सामान्यविवक्षया नपुंसकनिर्देश इति विशेषः ।

एवं ब्रह्मणो निर्गुणत्वनीरूपत्वपराणां निष्प्रपञ्चत्वपराणां च वाक्यानां हेयगुणरूपराहित्यविषयतया सप्रपञ्चत्वविषयतया च "न स्थानतः" (ब्र.३.२.११) इत्याद्यधिकरणेषु योजनं कृतम् । किञ्च जीवस्य ब्रह्माभेदप्रमाणमूर्धन्यानि तत्त्वमस्यादीनि महावाक्यानि "इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः" (ब्र.२.१.२१), "शेषत्वात् पुरुषार्थवादो यथान्येष्विति जैमिनिः" (ब्र.३.४.२) इत्यारम्भणाधिकरण-पुरुषार्थाधिकरणगतपूर्वपक्षसूत्रभाष्ययोः जीवब्रह्माभेदपूर्वपक्षावलम्बनत्वेन विलिख्य, "अधिकं तु भेदनिर्देशात्" (ब्र.२.१.२२), "अधिकोपदेशात्तु बादरायणस्यैव तद्दर्शनात्" (ब्र.३.४.८) इति तत्सिद्धान्तसूत्रभाष्ययोः तत्त्वमसीत्यादिनैक्येनोपदेशान्न प्रत्यगात्मनो-ऽर्थान्तरभूतः परमेश्वरोऽस्तीति शङ्कोत्तरत्वेनावतारितस्य, "सुषुप्त्युत्क्रान्त्योर्भेदेन", "पत्यादिशब्देभ्यः", (ब्र.१.३.४३,४४) इति तृतीयपादाकाशाधिकरणगुणसूत्रद्वयस्य भाष्ये च बहुतरभेदश्रुत्युदाहरणपूर्वकं तयोर्भेदव्यवस्थापनेन तान्यपि तयोरभेदपराणि न भवन्तीति प्रत्याख्यानं कृतम् ।

"अंशो नानाव्यपदेशात्" (ब्र.२.३.४२) इत्याद्यधिकरणेषु ब्रह्मैवोपाधिवशात् जीवभावमापद्यत इति पूर्वपक्षनिराकरणार्थं प्रवृत्ते "तत्त्वमसि", "अयमात्मा ब्रह्म" इत्यादिकात् व्यपदेशात्तयोः जीवब्रह्मणोः व्याप्यव्यापकभावेनानन्यत्वमिति योगि-शरीराणां व्यापनीयानां तद्व्यापकस्य योगिनश्च यथा व्याप्यव्यापकभावेनापृथक्सिद्ध-रूपत्वमनन्यत्वं तथा जीवानां ब्रह्मणश्चेति साक्षादपि महावाक्यानामन्यपरत्वेन योजनं कृतम् । इदं सर्वं शुद्धाद्वैताभ्युपगमविरुद्धमेवेति चेत्---

एतदपि सर्वमविरुद्धं यथा भवति तथोपपाद्यते । "अधिकं तु भेदनिर्देशात्" इति सूत्रं जीवब्रह्मभेदव्यवस्थापकं न भवति; किन्तु किञ्चिज्ज्ञत्वसर्वज्ञत्वादि-भेदनिर्देशात् सार्वज्ञादिगुणैर्जीवादधिकं ब्रह्म, तथा च जीवे कर्तृत्वभोक्तृत्वादिबन्धः प्रातिभासिक इति जानतः तस्य तदपादानप्रपञ्चसृष्टिरनिष्टकारिणीति मूढस्य जीवस्येव तस्य भ्रान्तेरभावात् ।

"प्रतिबिम्बगताः पश्यन्नृजुवक्रादिकाः क्रियाः ।
पुमान् क्रीडेद्यथा ब्रह्म तथा जीवस्य विक्रियाः ।।"

इत्युक्तन्यायेन तस्य लीलार्थैव सा भवतीत्येतद्व्यवस्थापनपरम् । अन्यथा जीवब्रह्माभेदमवलम्ब्य शङ्कितस्य हिताकरणादिदोषस्य तयोर्भेदसाधनेनैव निराकरणीयत्वदधिकमिति सौत्रप्रतिज्ञानमनुपयुक्तं स्यात् । यद्यपि "अश्मादिवच्च तदनुपपत्तिः" (ब्र.२.१.२३) इति तदनन्तरसूत्रेण "अश्मकाष्ठलोष्टतृणादेरचेतनस्येव जीवस्याप्यज्ञत्वादिना सर्वज्ञत्वादियुक्तादीश्वरादत्यन्तविजातीयत्वश्रवणात् तयोरेक-भावानुपपत्तेः" इति तद्भाष्येण च जीवब्रह्मणोरभेदनिराकरणेन भेदव्यवस्थापनं कृतमित्याभाति, तथापि किञ्चित्सजातीयस्य जीवस्याप्यभेदो नोपपद्यते, किमुतात्यन्तविजातीयस्याचेतनस्येति कैमुतिकन्यायेन जडवर्गस्य ब्रह्माभेदनिराकरणे तस्य तात्पर्यम् । अत एव तदनन्तरभाष्यम्-- "एवं चेतनस्याप्यधिक-गुणवैषम्यादीश्वरभावानुपपत्तिः, किमुताचेतनस्य स्वरूपविलक्षणस्येति तात्पर्यम्" इति। न च प्रपञ्चसृष्ट्या हिताकरणतादिदोषे जीवब्रह्माभेदमवलम्ब्य शङ्किते तयोः भेदस्याभेदेऽपि न्यूनाधिकभावस्य वा व्यवस्थापनेन तत्परिहारो वर्णनीयः, जडवर्गस्य ब्रह्माभेदनिराकरणे नात्रोपयुज्यत इति वाच्यम् ; अत्रानुपयोगेऽपि "तदनन्यत्वमारंभण-शब्दादिभ्यः" (ब्र.२.१.१५) इति सूत्रोक्तमनन्यत्वं जडवर्गस्य ब्रह्माभेदरूपं न भवतीति व्यवस्थापने तदुपयोगात् । अत एव "इतरव्यपदेशात्". इत्यादीनि सूत्राणि (ब्र.२.१.२१-२३) भाष्यान्तरवदिह भाष्ये पृथगधिकरणार्थतया न योजितानि । एवम् "अधिकोपदेशात्" इति पुरुषार्थाधिकरणसूत्रमपि (ब्र.३.४.८) परमेश्वरो नाम कश्चन नास्ति, औपनिषदमात्मज्ञानं जीवगोचरमेव ज्ञानमिति पूर्वपक्षनिराकरणाय जीवाधिकः परमेश्वरोऽस्तीत्येतावन्मात्रप्रतिपादनपरम् । एवं सुषुप्त्युत्क्रान्त्यादिसूत्रद्वयमपि (ब्र.१.३.४३,४४) जीवाधिकपरमेश्वरसद्भावमात्रपरम्, न भेदव्यवस्थापनपरम् । अत

एवैतेषां सूत्राणां भाष्येषु पूर्वपक्षे तदवलम्बनत्वेन लिखितानां तत्त्वमस्यादिवाक्यानां भेदपरतया योजनं न कृतम् ।

यद्यप्यंशाधिकरणभाष्ये (ब्र.२.३.४२) तेषां भेदपरतया योजनं कृतमस्ति, तथापि तत् "आत्मेति तूपगच्छन्ति ग्राहयन्ति च" (ब्र.४.१.३) इत्यधिकरणभाष्येण प्रत्याख्यातम्, न स्वार्थसाधनक्षमम् । तत्र हि मुमुक्षुभिः ब्रह्मोपासनं स्वशेषित्वादिप्रकारेण स्वभिन्नतयैव कार्यम्, न तु स्वात्मतयेति पूर्वपक्षनिराकरणार्थं प्रवृत्तं सिद्धान्तभाष्यम् "यद्यपि जीवादधिकमेव शिवाख्यं परं ब्रह्म, तथाप्युपासिता-- अहं ब्रह्मास्मि इति तदुपासीत, यतः पूर्वेप्युपासितारः -- त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि-- इत्यात्मेत्येवावगच्छन्ति उपासितुरर्थान्तरत्वेऽपि तानुपासितॄननुगृह्णाति स्वस्वरूपतया परं ब्रह्म, ते च पुनः स्वात्मतया ग्राहयन्ति च परानपि शिष्यान् तत्त्वमसीत्यादिना" इति। अत्र तत्त्वमस्यादिवाक्यानामभेदार्थत्व-प्रदर्शनेन प्रागुक्तं शरीरशरीरिभावतया कृतमपृथक्सिध्यर्थत्वं प्रत्याख्यातमिति स्पष्टमेव। तदुपपादनार्थमेव "त्वं वाहमस्मि" इति जाबालवाक्यमुदाहृतम् । यदि शरीरशरीरिभावनिबन्धनं सामानाधिकरण्यम्, तदा "त्वं वा अहमस्मि" इति निर्देशो नोपपद्यत इति दर्शयितुं प्राक्प्रपञ्चितोऽयमर्थः । तत्त्वमसिवाक्यस्याप्यभेद एव स्वारस्यमित्यपि प्रागेव प्रपञ्चितम् ।

एतेनांशाधिकरणोक्तस्येदं प्रत्याख्यानं न भवति, सूत्रारूढेनाधिकरणेन प्राग्व्यवस्थापितस्य स्वयमेव पश्चात् प्रत्याख्यानायोगात् । किन्त्वंशाधिकरणोक्तरीत्या दहरादिविद्यासु ब्रह्म स्वशरीरकत्वेन वानुसन्धेयम्, अहंग्रहाधिकरणोक्तरीत्या स्वाभिन्नत्वेन वेति भाष्याभिप्रायो वर्णनीयः । एवं च "ते च पुनः स्वात्मतया ग्राहयन्ति परानपि शिष्यान् तत्त्वमसीत्यादिना" इत्यहंग्रहाधिकरणभाष्यवाक्यस्यापि । तत्त्वमस्यादिवाक्यमभेदोपासनापरमित्येव तात्पर्यं वर्णनीयम्, न तु तात्त्विकाभेदपरमिति, भेदाभेदयोः विरुद्धत्वात्-- इति शङ्काऽपि निरस्ता, जाबालवाक्यस्वारस्यविरोधेन, असिशब्दस्वारस्यविरोधेन, "निरवधिकपरमानन्दमय-शिवत्वप्राप्तिर्मुक्तिः । शिवत्वप्राप्तिरात्मनः पशुत्वनिवृत्तिमन्तरेण न भवति । पशुत्वनिवृत्तिश्च न तद्भावनां विना, अतो निरन्तरं शिवोऽहमिति भावनाप्रवाहेण शिथिलितपाशतयापगतपशुभावः उपासकः शिव एव भवति" इत्येवं शिवाभेदभावनां

विना न मुक्तिरिति व्यवस्थापनार्थाहङ्ग्रहाधिकरणभाष्यविरोधेन, मुक्त्यर्थे शिवध्याने शिवादन्यत्वेन प्रतीयमानस्य सर्वस्यापि परित्याज्यत्वव्यवस्थापकाध्यानाधिकरण-भाष्यविरोधेन च तत्त्वमसिवाक्यस्यांशाधिकरणोक्तार्थे भाष्यकारसंप्रतिपत्ति-कल्पनायोगात्, जीवस्य ब्रह्मणा सह भेदाभेदयोरिव तत्त्वमसिवाक्यस्यैकस्य द्वयोरर्थयोरपि विरुद्धत्वेन, अंशाधिकरणोक्तं भेदार्थकत्वमङ्गीकृत्य पुनरभेदोपासनरूप-मर्थान्तरमपि भाष्यकारैरङ्गीकृतमिति कल्पनायोगाच्च ।

ननु तर्हि मा भूत् तस्य शरीरशरीरिभावोऽर्थः, आरोपिताभेदोपासनारूप एक एवार्थोऽस्त्विति चेन्न, "परमानन्दप्रकाशविभूतिमयशिवशक्तिसामरस्यपरब्रह्मस्वरूपैक-रसप्रपञ्चावगाहिनं परिपूर्णमहंभावं प्रकटमनुभवति" इति मुक्तवृत्तान्तविषय-विकारावर्तिसूत्रभाष्ये, "निवृत्तब्राह्मणादिदेहाभिमानमयपशुभावस्य निरतिशय-स्वरूपानन्दमयसाक्षिस्वप्रकाशशिवरूपपराहंभावापत्तिर्मुक्तिरिति सर्वश्रुतितात्पर्यात्" इत्यहंग्रहाधिकरणभाष्ये च मुक्तावपि ब्रह्माभेदज्ञानस्यानुवर्तमानतायाः प्रतिपादितत्वेन जीवानां चिच्छक्तिद्वारकब्रह्माभेदस्यानिवार्यत्वेनाभेदोपासनस्यारोपितविषयत्वकल्पना-योगात् ।

नन्वंशाधिकरण (ब्र.२.३.४२) प्रतिपाद्यार्थनिर्वाहकतया तत्र स्वयं प्रदर्शितः शरीरशरीरिभावरूपोऽर्थः स्वयमेवान्यत्र प्रत्याख्यात इति कथमुपपद्यते ? न च वाच्यं शरीरशरीरिभावस्य तात्त्विकभेदगर्भत्वशङ्कामात्रं अभेदार्थप्रदर्शनेन प्रत्याख्यातम्, न तु शरीरशरीरिभावरूपोऽर्थ इति ; एकस्य वाक्यस्याभेदपरस्यातात्त्विकेऽपि शरीर-शरीरिभावे तात्पर्यान्तरकल्पनायोगात् । न च मन्दाधिकारिणः प्रथमं सगुणेश्वरो-पासनायां प्रवर्त्तयितुं तत्र भक्त्यतिशयसिध्यर्थं निर्विशेषपरतत्त्वप्रच्छादनेन तदुपच्छन्दनायातात्पर्यविषयोऽप्यर्थो गुडजिह्विकान्यायेन प्रदर्शित इति वाच्यम् । सगुणोपासनापि हि शिवोऽहमित्यभेदेनैव कार्या । अतोऽत्र जीवब्रह्माभेदबोधक-वाक्यानां स एवार्थः, तदभेदोपासनारूपो वार्थः प्रदर्शनीयः । उपासनाप्रतिकूलार्थप्रदर्शनं तु न युक्तमिति चेत् ।

उच्यते-- येषां मोक्षः परमपुरुषार्थ इत्यवगत्य प्राप्तुमभिलषतामपि साक्षान्मोक्षोपयोगितत्त्वावबोधार्थं श्रवणमननपूर्वके निर्विशेषनिदिध्यासने वा

तदपेक्षिततत्त्वार्थचित्तैकाग्र्यादिसंपादनद्वारा तदुपयोगिनि दहरविद्यादिरूपे सविशेषोपासने वा सामर्थ्यादिरूपस्य लौकिकस्य शास्त्रीयस्य वाधिकारिविशेषणस्य वैकल्यान्नाधिकार-पौष्कल्यम्, तानधिकृत्य प्रवर्तितोऽस्ति हि दासमार्गः पुराणेतिहासागमप्रसिद्धः ; स यद्यपि तत्क्रतुन्यायेन गाणपत्यादिरूपः हिमगिरिकैलासादिस्थानगतशिवकैङ्कर्यप्राप्ति-फलकः, तथापि तत्पदप्राप्त्यनन्तरं तत्रैवोपासनादिक्रमेण मोक्षफलकोऽपि भवति । अत एव कामिके---

"मच्चिह्नधारिणो लोके देशिका मत्परायणाः ।
मदेकशरणास्तेषु योग्यं नैवान्यजन्तुषु ।।

स्वाद्यानि खादनीयानि पेयान्यन्यानि यानि च ।
देयानि तानि वै शंभोरश्नीयाद्दासभावतः ।।
दासमार्गप्रपन्ना ये शैवे पाशुपते स्थिताः ।
तैरेव पेयं भोज्यं च घ्रातव्यं च मुमुक्षुभिः ।।"

इति शिवप्रसादस्वीकरणयोग्यविवेचने दासमार्गप्रपन्नेषु मुमुक्षुत्वविशेषणम् । एवं चोपासनाद्यनधिकृताः स्थूलबुद्धयोऽस्मिन् दासमार्गे क्रममुक्तिफलके प्रवर्त्तनेनानुग्राह्या इति तत्र तेषां रुचिमुत्पादयितुं दासमार्ग एव सर्वस्यापि मोक्षशास्त्रस्यार्थ इति (तावदा?) तदाचार्यैस्तेषु यद्वक्तव्यमस्ति तदपि क्वचित् प्रदर्शनीयमित्यभिप्रेत्य तत्त्वमसीत्यादिवाक्यानां शरीरशरीरिभावरूपस्वस्वामिभावोऽर्थ इति मार्गान्तर-मंशाधिकरणे कल्पितमिति न कश्चिद्विरोधः ।

यत्त्वारम्भणादिश्रुतीनामर्थान्तरकल्पनं तदपि सगुणविषयभक्तिदार्ढ्यप्रयोजनक-मित्यौपचारिकार्थवादमात्रम् । इदमप्यशमादिसूत्रभाष्येण प्रागुदाहृतेन विभावितम् । तेन हि भाष्येण जडवर्गस्य ब्रह्मानन्यत्वं तदभेदरूपं न भवतीत्युक्तम् । तेन तदनन्यत्व (ब्र.२.१.१५) सूत्रोक्तं तस्य ब्रह्मानन्यत्वं ब्रह्मव्यतिरेकेण निर्वचनाक्षमत्वरूपमेव पर्यवस्यति, तस्य ब्रह्माभेदाभावे ब्रह्माभिन्नचिच्छक्त्यभेदस्याप्यसंभवेन तस्य चिच्छक्तिपरिणामत्वोक्तेस्तद्विवर्ततायामेव पर्यवसानात् । अतो विकाराणामुपादाने

कल्पितत्वं वाचारम्भणश्रुत्यर्थ इत्येव यथासूत्रकारमति भाष्यकाराभिप्रायः ।

सूत्रकारस्य तथा मतिस्तु तेनैव प्रणीते महाभारते मोक्षधर्मेषु उपदिष्टेन सुवर्चलाश्वेतकेतूपाख्यानेन विभाव्यते । एवं हि तत्रोपाख्यायते -- देवलस्य कन्या सुवर्चला जन्मान्तरसंसिद्धतया सहजसिद्धब्रह्मतत्त्वावबोधा स्वसदृशं पतिमन्विच्छन्ती श्वेतकेतुमुद्दालकसुतं तथाभूतमवगम्य तं वृतवती, पित्रापि तस्मै दत्ता । ताभ्यां ब्रह्मतत्त्वावबोधवद्भ्यां दम्पतिभ्यां तदनुगुणयज्ञादिकर्माचरणयुक्तगार्हस्थ्यमाश्रित्य स्थितमिति । तत्र तयोरित्थं ब्रह्मोद्यकथारूपः संवादो वर्णितः --

"ततः कदाचिद्भर्तारं श्वेतकेतुं सुवर्चला ।
पप्रच्छ को भवानत्र ब्रूहि मे तद्द्विजोत्तम ।।
तामाह भगवान् वाग्मी त्वया ज्ञातो न संशयः ।
द्विजोत्तमोऽहं सुभगे सत्यव्रतपरायणः ।।
सा तमाहाहमात्मानं पृच्छामि हृदि शायिनम् ।
तच्छ्रुत्वा प्रत्युवाचैनां स न वक्ष्यति भामिनि ।।

मनसैव समायुक्तमात्मानं मन्यसे यदि ।
तन्मिथ्यागोत्रसद्भावे वर्त्तते देहबन्धनः ।।
अहमित्येव भावोऽत्र त्वयि चापि समाहितः ।
त्वमप्यहमहं सर्वमहमित्येव वर्तते ।।
नात्र त्वत्परमार्थं तद्यन्मां त्वमनुपृच्छसि ।।" इति ।

अत्र सद्विद्यायां तत्त्वमसीत्यसकृत् पित्रोपदिष्टः श्वेतकेतुः कथमात्मानमवबुध्यत इति जिज्ञासमानया सुवर्चलया प्रथमम् "कस्त्वं द्विजोत्तम" इति प्रश्नः कृतः । तत्प्रश्नाभिप्रायमवगच्छतापि श्वेतकेतुना क्रमेण तमर्थं सा बोधनीयेति मत्वा तत्रोत्तरमुक्तम् -- द्विजोत्तमेति संबोधयन्त्या त्वया ब्राह्मणोऽहमित्यवगत एव, किमत्र प्रष्टव्यम्-- इति । ततः सुवर्चलया-- देहोपाधिकत्वेनात्मनि कल्पितं प्रत्यक्षं ब्राह्मण्यं न पृच्छामि, किन्तु द्विजोत्तमोऽहमित्यहंशब्देन देहाद्विविक्तं हृदि वसन्तं

यमात्मानं निर्दिशसि तं पृच्छामि-- इत्युक्ते तत्रोत्तरमुक्तम्-- अहंशब्दो मनःशबलितात्मस्वरूपे वर्त्तते । तत्तु मिथ्याभूतम्, तस्मिन्नेव ब्राह्मणकुलादिजननेन ब्राह्मणादिदेहशबले कल्पितरूपे ब्राह्मणादिशब्दो वर्त्तते । अतो ब्राह्मणरूपवत् कल्पितविषयत्वादहंभावोप्यात्मस्वरूपं जिज्ञासुभिः न प्रष्टुमर्हः । अयं चाहंभावस्तव मम च तिर्यक्पर्यन्तानां सर्वेषां च साधारण इत्ययं प्रश्नः परमार्थविषयत्वाभावादात्मस्वरूपं जिज्ञासमानया त्वया कर्तुं नार्ह-- इति । तदनन्तरम्--- कर्तृत्वभोक्तृत्वादियुक्तं अहमर्थं यदि कल्पितमवगच्छसि तर्ह्येवमवगच्छन् त्वं कथं तद्विरुद्धे कर्मानुष्ठाने प्रवर्त्तसे -- इति प्रश्ने कृते, स्वानुपकारकेऽपि तस्मिन् लोकसंग्रहार्थं प्रवर्त्ते -- इत्युत्तरमुक्तम् । तदनन्तरं सर्वैरात्मनि प्रयुज्यमानोऽहंशब्दोऽयं कथं तदर्थो न स्यादित्यभिप्रायेण शब्दार्थयोः सम्बन्धप्रश्ने कृते तयोर्नास्ति संयोगादिरूपः सम्बन्धः,किन्तु वाच्यवाचकभावरूप इत्युत्तरमुक्तम् । तदनन्तरं दम्पत्योरियं प्रश्नोत्तरपरम्परा ---

सुवर्चला--

सदाहंकारशब्दोऽयं व्यक्तमात्मनि संश्रितः ।
न वाचस्तत्र वर्त्तन्त इति मिथ्या भविष्यति ।।

श्वेतकेतुः--

अहंशब्दो ह्यहंभावे नात्मभावे शुभव्रते ।
न वर्तन्ते परेऽचिन्त्ये वाचः सगुणलक्षणाः ।।

सुवर्चला--

अहंभावोऽत्र को नाम ह्यात्मभावस्तथैव च ।
तन्मे ब्रूहि यथान्यायमेवं चेन्मुनिसदत्तम ।।

श्वेतकेतुः ---

मृन्मयो हि घटाभासः तादृग्भाव इहेष्यते ।
अहंभावः परेऽचिन्त्ये ह्यात्मभावः परो महान् ।।

तस्माद्वाचो निवर्त्तन्त इति नैव विरुध्यते ।।

इति। अत्र शब्दार्थयोर्वाच्यवाचकभावः सम्बन्धोऽस्ति चेदहंशब्दः कथमात्मवाचको न स्यादिति प्रश्ने कृते, अहंशब्दो नात्मनि मुख्यवृत्त्या प्रयुज्यते, किन्त्वहमर्थे इत्युत्तरमुक्तम्। ततः को नामाहमर्थादन्य आत्मेति प्रश्ने कृते, मृदि घटाकारवदात्मन्यहंभावः कल्पित इति तयोः विवेकं कृत्वा--- कल्पिताकारोपधानेन प्रवर्त्तमानश्शब्दो न शुद्धाधिष्ठानपर्यन्तं प्रवर्त्तते, शुद्धशुक्तिस्वरूपे रजतशब्दवत् । अतः कर्तृत्वादिगुणकाहमर्थवाचकशब्दस्य शुद्धात्मनः सकाशान्निवृत्त्युक्तेः न कश्चिद्विरोध-- इत्युपसंहृतम् । तदनन्तरं अहमर्थान्निष्कृष्ट आत्मैव सकलप्रपञ्चाधिष्ठानभूतं ब्रह्मेति सिद्धवत्कृत्य यथा आकाशे प्रपञ्चस्य दृश्यमानत्वेऽपि तदसङ्गित्वमाकाशस्य, एवं ब्रह्मणोऽपीत्य- सङ्गित्वे ब्रह्मणः श्वेतकेतुनोपपादिते पुनरिमे प्रश्नोत्तरे--

सुवर्चला--

निर्विकारं ह्यमूर्तं च निरंशं सर्वगं तथा ।
दृश्यते च वियन्नित्यं तादृगात्मा न दृश्यते ।।

श्वेतकेतुः---

त्वचा स्पृशति वै वायुमाकाशस्थं पुनः पुनः ।
तत्स्थं गन्धं तथा घ्राति ज्योतिः पश्यति चक्षुसा ।।

तमोरश्मिगणं चैव मेघजालं तथैव च ।
वर्षं तारागणं चैव नाकाशं दृश्यते पुनः ।।
आकाशस्याप्यथाकाशं सद्रूपमिति निश्चितम् ।
सदर्थे कल्पितं ह्येतत्तत्सत्यं विष्णुरेव च ।।

यानि नामानि गौणानि ह्युपचारात्परात्मनि ।
न चक्षुषा न मनसा न चान्येन परो विभुः ।।
चिन्त्यते सूक्ष्मया बुध्या वाचा वक्तुं न शक्यते ।
एतत्प्रपञ्चमखिलं तस्मिन्नेव प्रतिष्ठितम् ।।इति।

अत्र आकाशवत्प्रपञ्चाधिष्ठानं ब्रह्म कुतो न दृश्यत इति प्रश्ने, वाय्वादेराकाशस्थस्यैवानुभवोऽस्ति, न तु विविच्याकाशस्य ; यदैवमाकाशे लौकिकेऽप्येषा गतिः तदा किमु वक्तव्यमाकाशादप्यतिसूक्ष्मे सद्रूपे ब्रह्मणि ? अतः सदर्थे कल्पितं सर्वम् ; तदेव सत्यं व्यापकं च, गुणोपाधिना प्रवर्त्तमानाः सर्वे शब्दाः गुणेभ्यो निष्कृष्टे तस्मिन् तत्त्वावेदकप्रमाणैर्बोध्ये मुख्यवृत्त्या न प्रवर्त्तन्ते--इत्युत्तरमुक्तम् । अस्यां प्रश्नोत्तरपरम्परायाम्, "मृन्भयो हि घटाभासः" इति दृष्टान्तोक्त्या वाचारम्भणश्रुत्यर्थः, "सद्रूपमिति निश्चितम्" इति प्रकृतस्य जीवस्य सद्रूपत्वोक्त्या तत्त्वमसिवाक्यार्थः, "सदर्थे कल्पितं ह्येतत्तत्सत्यं विष्णुरेव च" इत्युक्त्या "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा" इति श्रुत्यर्थश्च निष्प्रपञ्च-जीवाभिन्ननिर्विशेषब्रह्मसिध्यनुकूलो दर्शित इति स्पष्ट एव ।

किं च मोक्षधर्म एव प्रदेशान्तरेषु--

"निष्केवलं पदं देव काङ्क्षेऽहं परमं तव ।
एकीभावस्त्वया मेऽस्तु न मे जन्म भवेत्पुनः ।।

भेदवस्तुष्वभेदेन जानाति स यदा पुमान् ।
तदा पुनः परात्मासौ भवत्येव निरञ्जनः ।।"

इत्यादिभिरभेदः प्रतिपादितः ।

"न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः ।
देहवानिव यो विष्णुरसौ मायामयो हरिः ।।"

इत्यादिभिर्नीरूपत्वादिकं प्रतिपादितम् । विष्णुपुराणादिषु च -

"प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ।।"

इत्यादिभिर्ब्रह्मणो निरस्तसमस्तभेदनिर्विशेषचिन्मात्ररूपत्वमुक्तम् । ततः शुद्धाद्वैतमेव सूत्रकाराभिमतमिति तदीयहृदयानुसारेण तत्र तत्र प्रदेशे भाष्यकारैः शुद्धाद्वैतस्य बहुधा विभावितत्वात् तदनुसारेणैव प्रदेशान्तरेषु विशिष्टाद्वैतप्रतिपादनस्यास्मदुक्तरीत्याभिप्रायो वर्णनीयः ।

यत्तु परेषां भाष्ये विशिष्टाद्वैतनिरूपणम्, यच्चान्येषां भाष्ये शुद्धाद्वैतनिरूपणम्, तत्तु तदवस्तुतत्त्वमित्यभिप्रायेण । न तु श्रीकण्ठाचार्याणामिव तेषां शुद्धाद्वैतसंमतौ तात्पर्यं कल्पयितुं शक्यम्, श्रीकण्ठाचार्यैरिव तैः क्वापि शुद्धाद्वैतव्यञ्जकस्य प्राग्वर्णितस्यार्थस्य कुत्राप्यप्रतिपादितत्वात्; तत्तद्भाष्यकार-प्रभृतिभिरद्यतनपर्यन्तैः सर्वैरपि परैरन्यैश्च शुद्धाद्वैतनिराकरण एव सन्नह्यमानत्वाच्च । अतः प्रामाणिकानां निर्विशेषस्य परब्रह्मणः तत्त्वावबोधार्थम्, तस्यैव साधकानुग्रहाय सविशेषरूपापन्नस्य निखिलकल्याणगुणगणदिव्यमङ्गलविग्रहविशेषविशिष्टस्य मध्यमाधिकारिकर्तव्याभेदोपासनार्थम्, अवमाधिकारिकर्तव्यस्वस्वामिभावोपासनार्थं च तस्य सर्वस्यापि यथावद्विशिष्य प्रतिपादकं श्रीकण्ठाचार्याणामेव भाष्यं उपादेयमिति सर्वं समञ्जसम् ।।

इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य श्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पय्याख्यया प्रख्यातकीर्तेः साक्षादवतीर्णस्य फालाक्षस्य परमार्थपरशिवस्य लीलामात्रविरचितोऽयं शिवाद्वैतनिर्णयाख्यः

ग्रन्थस्संपूर्णः

सदाशिवपदाम्भोजन्यस्तधीरप्यदीक्षितः ।
श्रीकण्ठाभिमतं सर्वं सारमित्थं समग्रहीत् ।।

----: * :----

।। ॐ ।।

।। श्रीमते मेधादक्षिणामूर्तये नमः ।।

श्रीमदप्पय्यदीक्षितकृता शिवतत्त्वविवेकाख्यव्याख्यया सहिता ।

।। शिखरिणीमाला ।।

।।ॐ।।

यस्याहुरागमविदः परिपूर्णशक्ते-
रंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय
नारायणीसहचराय नमः शिवाय ।।
आकर्णकृष्टधनुराहितमोहनास्त्र-
मारान्निरीक्ष्य मदनं कुपितस्य किञ्चित् ।
शम्भोः समाधिसमये विकसत्कृशानु-
ज्वालाकलापजटिलं नयनं स्मरामि ।।
सर्वविद्यालतोपघ्नपारिजातमहीरुहान् ।
महागुरून्नमस्यामि सादरं सर्ववेदसः ।।
निगमशिरसि निष्ठा नित्यवस्तुन्यभीप्सा
भवचरणसरोजे भक्तिरव्याजसिद्धा ।
त्रयमपि हृदि येषां त्रातृ संसारशोकात्
सहजमुपगतं ते सन्तु सन्तः समृद्धाः ।।
पद्यैः षष्ट्या पशुपतिमहं देवमस्ताविषं यै-
रन्तस्सारैरखिलजगतामन्तरात्मानमेकम् ।
भावं तेषां प्रविशदयितुं भग्नवाचाटवाचां
वृत्तिं कुर्वे विषमविवृतिं वृद्धवर्त्मानुगानाम् ।।

इह यद्यपि "निष्कलन्निष्क्रियं शान्तं निरवद्यन्निरञ्जनम्," "यत्र नान्यत् पश्यति नान्यच् श्रृणोति नान्यद्विजानाति स भूमा," "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत्",

प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तद् ज्ञानं ब्रह्मसंज्ञितम् ।।

इत्यादिश्रुतिस्मृतिसन्दोहसम्प्रतिपन्नं निरस्तकर्तृकर्मादिभेदप्रपञ्चमखिलवाङ्मनसपथातीतं निर्गुणं शिवतत्त्वन्न स्तुतिगोचरीकर्तुं शक्यम् तथाऽपि "मायां तु प्रकृतिं विद्यान् मायिनं तु महेश्वरम्," "उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम्,"

अमूर्तं यत् परं ब्रह्म सादरं श्रुतिचोदितम् ।
सर्वव्यापि सदा नित्यं सत्यं द्वैतविवर्जितम् ।।
तस्येदमैश्वरं रूपञ्चन्द्रखण्डावतंसकम् ।
तमालश्यामलगलं लसत्फालविलोचनम् ।।

इत्यादिश्रुतिस्मृतिशतसम्प्रतिपन्नं स्वाधिष्ठितानिर्वचनीयमायादिकल्पितगुणादिविभाग-मङ्गाव्ययाद्यनन्तमाङ्गल्यगुणमणिगणरत्नाकरं नीलकण्ठत्वविरूपाक्षत्वादिविशिष्ट-शुद्धसत्वमयविविधविग्रहविभ्राजमानं शिवभवरुद्रमहेश्वरमहादेवाद्यनन्तपर्याय विख्यापितमहिमविलासं सकलभुवनसृष्टिस्थितिसंहारकारणं राजसादिवृत्त्युपाधि-परिकल्पितस्वांशरूपाणां विधिहरिगिरीशानामपि नियन्तृभूतं उन्मनान्तसकलभुवनातीत सोमलोकाख्यपरमशिवपुरनियतविहिताविर्भावमखिलजनहृदयगुहावासमशेषकर्मफलदान स्वतंत्रं सकलविप्रकुलदैवतमुमासहायं परमशिवशब्दितं तस्यैव सगुणं रूपं गौतम-दधीच्यादिशापनिर्मूलितपरमशिवपदनलिनभक्तिलेशकलिमलमलीमसहृदयकुहरविश्रान्तदु रन्तदुरितानुबन्धतन्निंदामुखरमुखबिलकुमतिकुलप्रलापदूरीकरणेन विश्वाधिकत्वविश्व-सेव्यत्वव्यवस्थापनपरैः षष्ट्या पद्यैः स्तोतुकामः परमशिवस्वरूपमहिमविषय-ग्रन्थनिर्माणे तद्बोधं विनाऽनधिकारात्, तस्य च 'यमेवैष वृणुते तेन लभ्यः, "स नो बुद्ध्या शुभया संयुनक्तु," "ईश्वराद् ज्ञानमन्विच्छेत्," इत्यादिश्रुतिस्मृतिभि-स्तत्प्रसादैकलभ्यत्वस्य प्रतिपादितत्वात्, तत्र च

'यथान्तरोपचारेण नरः स्त्रीषु प्रसीदति।
तथान्तरेण ध्यानेन प्रसीदति महेश्वरः ।।

इत्यादिस्मृतिभिरन्तरनुसन्धानस्यान्तरङ्गोगयत्वेनोपदेशाददमेव सत्कृष्टं मङ्गलमिति हृदयेनादौ कृतं ध्यानं श्लोकेन निबध्नान् प्रारिप्सितस्तोत्रव्यवस्थाप्यमर्थं सूचयति ।।

अथ शिखरिणीमाला प्रारभ्यते

श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्द्रनन्द्यादयः
प्राचीना गुरवोऽपि यस्य करुणालेशाद्गता गौरवम् ।।
तं सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालंकृतं
चिन्मुद्राकृतमुद्रपाणिनलिनं चित्ते शिवं कुर्महे ।। १।।

श्रीकान्तेति ।
'तस्मात् सह तया शक्त्या हृदि पश्यन्ति ये शिवम् ।
तेषां शाश्वतिकी शान्तिर्नेतरेषामिति श्रुतिः, ।।
'ध्यायेदनादिनिधनमाननन्दादिगुणालयम्,
इत्यादि पुराणवचनानुरोधात् ब्रह्मविद्याधिदेवतया'
सदाशिवाङ्कमारूढा शक्तिरिच्छाह्वया शिवा,
इति शिवपुराणोक्तेर्भगवत इच्छाशक्तिरूपया हैमवत्या सहितत्वेन अनन्तकल्याणगुणगणनिधित्वेन च भगवन्तमनुसन्दधानः सकृदमनस्कसङ्कीर्तनेनापि दुरितनिकरभञ्जनार्थं-
'अपि वा यश्चण्डालः शिव इति वाचं विसृजेत्तेन सह संवसेत्तेन सह भुञ्जीत',
'यद्व्यक्षरन्नाम गिरेरितं नृणां सकृत्प्रसङ्गादघमाशु हन्ति तत्,'
'विद्यासु श्रुतिरुत्कृष्टा रुद्रैकादशिनी श्रुतौ ।
तत्र पञ्चाक्षरी तस्यां शिव इत्यक्षरद्वयम्, ।।'
इत्यादिश्रुतिपुराणाभियुक्तवचनसमर्थितसकलदुरितहरणसामर्थ्योत्कर्षेण नाम्ना विशेष्यं निर्दिशति **शिवमिति।** वशिधातोः इच्छायुक्त इत्येतस्मिन्नर्थे वर्णव्यत्ययेन च अर्शआदेराकृतिगणत्वात् । शिवः कल्याणगुणनिकरोऽस्यास्तीत्यस्मिन्नर्थे अच्प्रत्ययान्तत्वेन च व्युत्पन्नमिहानुसन्धेयम् । तथाह्याद्ये व्युत्पादने शाब्दिकाभियुक्त-वचनम् -
'हिंसिधातोः सिंहशब्दो वशि कान्तौ शिवः स्मृतः ।
वर्णव्यत्ययतः सिद्धौ पश्यकः कश्यपो यथा ।।, इति ।

द्वितीये वायवीयवचनम् -

'अथवाऽनन्तकल्याणगुणैकनिधिरीश्वरः ।

शिव इत्युच्यते सद्भिः शिवतत्त्वार्थवेदिभिः ।।, इति । एवं -

'समेधयति यन्नित्यं सर्वार्थनामुपक्रमम् ।

शिवमिच्छन्मनुष्याणां तस्मादेव शिवः स्मृतः ।।

इति भारतादिवचनसिद्धान्यपि व्युत्पत्यन्तराणीहविवक्षितानि द्रष्टव्यानि । युक्तं हि विवक्षानुसाराल्लौकिकशब्दानामनेकार्थपरत्वम् । "प्रसन्नवदनं चारुहारकेयूरभूषितम्" इत्यादिध्यानगुणविधिमनुसृत्य विशेषयति मनोज्ञेति ।

'निवेश्य चेतः प्रत्यङ्गमापादाग्रमनुक्रमात् ।

धारयेद्वदनाम्भोजे प्रसन्नस्मितकोमले ।।

इत्यादिगुणविधिमनुसृत्य विशेषयति मन्दस्मितेति । इष्यमाणशिवमहिमबोधसिद्धये गुरुमूर्त्यात्मनाऽनुसन्धत्ते सर्वेति । सर्वेषां शिवज्ञानवतामादिगुरुं गुरुपरम्परा-विश्रान्तिभूमिमित्यर्थः । उक्तं हि पातञ्जले ईश्वरं प्रस्तुत्य 'स पूर्वेषामपि गुरुः कालेनानवच्छेदात्' इति । उक्तञ्च शिवपूराणे -

प्रतिसर्गं प्रसूतानां ब्रह्मणां शास्त्रविस्तरम् ।

उपदेष्टा स एवादौ कालावच्छेदवर्तिनाम् ।।

कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः ।

सर्वेषामेव सर्वेशः कालावच्छेदवर्जितः ।।, इति ।

'ईशानस्सर्वविद्यानां स एवादिगुरुर्बुधाः ।

तस्य शिष्यो महाविष्णुः सर्वज्ञानमहोदधिः ।।,इति।

श्वेताश्वतरशाखिनां मन्त्रोपनिषदि-

'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै' इति।

यद्यप्ययं मन्त्रः शिवपर इति स्पष्टन्नप्रतीयते तथापि मन्त्रोपनिषदः कार्त्स्न्येन शिवपरत्वस्य वक्ष्यमाणत्वात् , कौर्मे -

'निवेदयिति चात्मानं योब्रह्माणमितीश्वरे'

इति शिवपूजायामात्मार्पणे विनियोगात्,

'योऽग्रे मां विदधे पूर्वं ज्ञानञ्च प्रहिणोति मे ।

यत्प्रसादान्मया प्राप्तं प्रजापत्यमिदं पदम् ।।

ब्रह्माणं मुनयः पूर्वं सृष्ट्वा तस्मै महेश्वरः ।

दत्तवानखिलान्वेदान् विप्रा आत्मनि संस्थितान्' ।। इत्यादिशैवमात्स्यादिश्रुतब्रम्हादि-वचनैरुपबृम्हणाच्च शिवपरत्वं बोद्धव्यम् । उक्तमेवार्थं तत्तन्महानुभावशिष्य-विशेषोपन्यासेन स्फूटीकरोति **श्रीकान्तेत्यादिना**। श्रीकान्ताद्याः शिवज्ञानिन उपदेष्टारः महाभारतकौर्मशैवसौरस्कान्दलैंगशिवधर्मादिषु । आदिशब्देन स्वायम्भुववायुवसिष्ठ-पराशरव्यासकाश्यपादयो गृह्यन्ते । गुरुमूर्तिं चिह्नेनापि विशेषयति -- **चिन्मुद्रेति**। पाणिर्नलिनमिवेत्युपमितसमासः । चिन्मुद्राऽभिनयसम्बन्धस्य रूपकप्रतिपक्षत्वात् । एवम्भूतं शिवं चित्ते कुर्महे ध्यायामः। अत्र श्रीकान्तेत्यादिना विशेषणेन स्तोत्रेण व्यवस्थापयिष्यमाणं शिवस्य विश्वाधिकत्वं विश्वसेव्यत्वञ्चोपक्षिप्तं द्रष्टव्यम् । एवं परदेवतामनुसन्धाय व्यवस्थापयिष्यमाणसकलार्थप्रमाणभूतां परविद्यामनुसन्धत्ते -

परशिवपरोत्कर्षप्रख्यापनैकपरायणा
पवनतपनव्यासाद्युक्त्युत्करैरुपबृंहिता ।
कुमतिपरिषच्चेतःकीलायितार्थनिबन्धना
जयति नितरामाद्या विद्या जनस्य हितैषिणी ।। २।।

मूर्तित्रयातीतो मायी शिवः । तदीयनिरतिशयोत्कर्षप्रख्यापनैकप्रवणा । पवनोक्तिर्वायुसंहिता, महापुराणानामुपलक्षणम् । तपनोक्तिरादित्यपुराणमुपपुराणा-नामुपलक्षणम् । व्यासोक्तिर्महाभारतम् । आदिशब्देन स्मृतिकल्पसूत्रशिवागमानां प्रणेतारो मनुयाज्ञवल्क्यबोधायनाश्वलायनोपमन्युकुम्भसम्भवादयो गृह्यन्ते । तथा च सकलपुराणेतिहासस्मृतिकल्पसूत्रशिवागमैरुपष्टंभिता । अत एव शब्दस्वारस्योप-बृंहणाभ्यामनन्यथासिद्धतयाऽन्यथानयने यतमानानामवैदिकानां हृदयशंकुभूतार्थसंदर्भा सन्मार्गोपदेशेन सकलजनहितावहा परा विद्या अथर्वशिखादिरूपा जयतु लोके सर्वोत्कर्षेण प्रचरत्वित्यर्थः । अनेन व्यवस्थापयिष्यमाणं सर्वं श्रुतिमवलम्ब्यैव व्यवस्थापयिष्यते । श्रुतिवाक्यानाञ्च कुदृष्ट्युन्नीतार्थान्तरपरत्वनिरासः शब्दस्वार-स्योदाहृतोपबृंहणविरोधाभ्यां करिष्यत इति सूचितम् ।

अथ 'यमादित्यो न वेद इत्यादिश्रवणादमरैरप्यपरिच्छेद्यवैभवस्य परस्य ब्रह्मणः स्तुतौ स्वस्यानधिकार इत्याक्षिप्य समाधत्ते -

प्रभावं ते नालं परशिव, परिच्छेत्तुममराः
नरः स्तोतुं वाञ्छन् न कथमपहास्यत्वमयताम् ।
तथापि त्वान्नामस्मृतिगुणनिकापुण्यभजनं
कुतोऽप्यस्तु द्वारादिति मतिरिह प्रेरयति माम् ।। ३।।

आत्मीयवैदग्ध्यस्फुटीकरणाय नेयं शिवस्तोत्रनिर्माणप्रवृत्तिः येन ब्रह्मादिभिरप्य-परिच्छेद्यवैभवे तत्र मन्दानां मतिस्खालित्यस्यावर्जनीयत्वादवश्यमपहास्यता भवेदिति तत्परिहारय यतितव्यं स्यात् । किन्तु संसारचक्रे परिभ्रमतां विविधदुर्व्यापार-विक्षिप्तचेतसां विना किञ्चित् द्वारं शिवतन्नामचिन्तनानुवृत्तिर्न लभ्येति **'येन केनाप्युपायेन शिवे चित्तन्निवेशयेत्'** इत्यादिस्मृतेर्यथाकथञ्चन शिवचिन्तनतन्नाम-सङ्कीर्तनानुवृत्तये सर्वथा स्वहितमित्यादिन्यायमनुसरतो न सा दोषायेति समाध्यभिप्रायः ।

अथ स्तोत्रप्रतिप्राद्यार्थविषयां शिवोत्कर्षासहिष्णूनां शिवनिन्दाव्यसनिनाम-वैदिकानां विमतिमुपन्यस्य तेषां सद्भिर्बहिष्कार्यत्वं जन्मवैफल्यं च शास्त्रसिद्धन्तावद्दर्शयति-

त्वमेवात्मन् विश्वाधिक इति जगत्सेव्य इति च
स्फुटं ब्रूते वेदस्तदपि विवदन्ते बत खलाः ।
किमेषां त्वद्द्रोहव्यसननिहतं जीवनमिदं
यदुक्तीः श्रोतॄणां मरणमुदितं निष्कृतिरिति ।। ४ ।।

वेदः 'विश्वाधिको रुद्रः, 'शिवएको ध्येयः, इत्यादिः । किमिति गर्हितमित्यर्थः । तमिममर्थं दर्शयति मन्त्रः --
'अन्तरिच्छन्ति तं जने रुद्रं परो मनीषया गृह्णन्ति जिह्वया ससम्'।
जनेष्वन्तर्यामिभावेन तिष्ठन्तं परः परं सर्वोत्कृष्टं रुद्रं ये मनीषयेच्छन्ति अन्तर्ध्यायन्ति ते ससं सस्यविकारभूतमन्नं जिह्वया गृह्णन्तीति मन्त्रस्य शाब्दोऽर्थः । ये कुतर्कव्यसनिनोऽन्तर्नेच्छन्ति ते पुरीषमेव गृह्णन्तीति "धन्याः खलु वने वाताः"

इत्यादेरिवाप्रस्तुतप्रशंसागम्येऽर्थे कटाक्षः । तथाह्युपबृह्मितं पराशरेण।

'अन्तरिच्छन्ति ये रुद्रं सदा वन्द्यं मनीषया ।
गृह्णन्ति जिह्वया तेहि रसपूर्णामृतोदकं ।।
अन्तर्नेच्छन्ति ये रूद्रं भवानीसहितं शिवम् ।
पुरीषमेव गृह्णन्ति जिह्वया ते न संशयः ।।

इत्यत्राद्येन श्लोकेन मन्त्रस्य वाच्योऽर्थो दर्शितः द्वितीयेन गम्योऽर्थः । स चेह स्वयं बाधितत्वात्तेषां गर्हितवृत्तित्वे पर्यवस्यति । महाभारते दर्शितोऽयमर्थः

'धिक्तेषां धिक्तेषां धिक्तेषां जन्मधिगथ धिक्तेषाम् ।
येषान्नवसति हृदये कुमतिपथविमोक्षको रुद्रः ।।, इति ।

अयमेवार्थो भागवतेऽपि शिवं प्रस्तुत्य '**हसन्ति यस्याचरितं हि दुर्भगाः**, इति दर्शितः। तत्र दुर्भगाः दुष्टभगोत्पन्नाः सङ्कीर्णक्षेत्रजाता इत्यर्थः । एवं साङ्कर्यशङ्कामेव हृदि निधायोक्तं नागरखण्डे ।'

मा भूत्तस्य कुले जन्म यस्य शम्भुर्न दैवतम् । इति ।

एवं तेषां कुत्सितजीवनत्वोक्त्या तेषां सद्भिर्बहिष्कार्यत्वमेव सूचितम् । तच्च बहुधा प्रपञ्चितं कौर्मादिषु । निहतमिति विफलमित्यर्थः । इह च वहिष्कार्यत्वात्परत्र च सर्वथैवासिद्धेरिति भावः ।। उक्तमेवार्थं कैमुतिकन्यायेन व्यवस्थापयति **यदुक्तीरिति**। उक्तं हि भागवते ।

'कर्णौ पिधाय निरियाद्यदकल्य ईशे धर्मावितर्यसृणिभिर्नृभिरस्यमाने ।
छिन्द्यात् प्रसह्य रुशतीमसतां प्रभुश्चेज्जिह्वामसूनपि ततो विसृजेत् स धर्मः ।

इति । अस्यार्थः--- धर्मगोप्तरीशे निरंकुशैर्लंधितमर्यादैर्नराधमैर्दूष्यमाणे यथैकस्यापि दूषणवाक्यस्य श्रवणं न भवति तथा कर्णौ पिधाय सत्वरन्निर्गच्छेत् तन्निग्रहे यद्यशक्तः। शक्तश्चेत्तेषामसतां दूषणनिरतानां रसनां प्रसह्य छिन्द्यात् । वुद्धिपूर्वक-शिवदूषणश्रवणशीलस्तु प्राणानपि विसृजेत् । स च प्राणत्यागः सुरापाननिमित्त-प्राणत्यागवद्धर्मएवेति । एवं शिवदूषणश्रवणशीलानां मरणान्तं प्रायश्चित्तमिति स्थिते स्वयं शिवदूषणनिरतानां प्रायश्चित्तं न सम्भवतीति ते सर्वथा सद्भिर्वहिष्कार्या विफलजीविताश्चेति । उक्तश्च स्पष्टं कौर्मे व्रह्महत्यादिसकलपापप्रायश्चित्त-विधानप्रकरणे देवतान्तरनिन्दाप्रायश्चित्तविधानानन्तरं शिवनिन्दायाः प्रायश्चित्ताभावः-

'यः सर्वभूतविनुतं विश्वेशं तु विनिन्दति ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि।।, इति ।
यद्यप्यनया भङ्ग्या शिवदूषणे मरणान्तमेव प्रायश्चित्तं सूचितं भवति 'कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते, इत्यादौ मरणान्तप्रायश्चित्तविषयेषु स्मर्तॄणां निष्कृत्यभावव्यवहारदर्शनात् तथाऽपि यद्दूषणश्रवणे यत् प्रायश्चित्तं तद्दूषणकरणे ततोऽधिकं न्याय्यमिति । मरणान्तप्रायश्चित्तविधिस्त्विहक्लेशातिशययुक्तमाप्ततीति द्रष्टव्यम् । यत्तु कौर्म एव शिवनिन्दायां प्रायश्चित्तान्तरविधानम् -
'चान्द्रायणं चरेत् पूर्वं कृच्छ्रञ्चैवातिकृच्छ्रकम्।
प्रपन्नः शरणं देवं कृत्वा पापात् प्रमुच्यते ।। इति ।
यच्च पाद्मे अष्टमूर्तिपर्वणि तच्छ्रवणे प्रायश्चित्तान्तरविधानम् -
'शिवनिन्दापरं मूर्खं यदि शासितुमक्षमः ।
स्वकर्णौ तोदयेत् तोत्रैरिति शास्त्रस्य निश्चयः।
इति, एवमादिकं सर्वमधिकारिविशेषविषयत्वेन यथान्यायं व्यवस्थापनीयम्।

एवमवैदिकान् भगवद्द्वेषिणो मूर्खान्विनिन्द्य 'एष ह्येव साधु कर्म कारयति, 'अज्ञो जन्तुरनीशोऽयम्' इत्यादिश्रुतिस्मृत्यर्थमनुसृत्य वस्तुतो न ते निन्द्या इति वचनभङ्ग्या तानेवोपालभते-

वराकैरेतैः किं द्विपदपशुभिः कार्यमथ वा
न खल्वीष्टे जन्तुर्निजहिततदन्याचरणयोः ।
समस्तान्तर्यामी शिव शिव, यथा प्रेरयसि यं
तथा कुर्वन्निघ्नः स कथमिव निन्द्यः पशुपते ।।५।।

उक्तमेवार्थमुपपत्त्याऽपि द्रढयति-

विलोक्य ह्येकैकं श्रुतिषु विधिवाक्यं विदधते
मखादौ विश्वासं निखिलनिगमान्तेषु विदिते ।
तवैश्वर्ये ताराधिपशकलचूडाल भगवन्
कथं कुर्युर्नैते यदिह न भवेयुः परवशाः ।।६।।

शिवतत्त्वस्य दुरवधारणत्वेन कर्मवैलक्षण्याद्वा मुह्यन्ति मन्दभाग्या इति प्रतिपादयन् दुरवधारणत्वमेव कैमुत्येन व्यवस्थापयति-

यमग्रे दृष्ट्वापि स्मरहर, विमूढः शतधृति-
र्हरेर्वाचाऽज्ञासीत् क्षितिधरसुतायाः शतमखः ।
किमन्यैर्वैकुण्ठस्तविधियुतस्तत्र विमतौ
कथा कैव स्वामिन्, जडनरवराकस्य भवति ।।७।।

यमग्रे दृष्ट्वाऽपि विमूढ इति विशेषणं शतमखवैकुण्ठयोरपि-क्रियाकरणयोरप्युत्तरवाक्ययोरनुषङ्गः । पुरा किल नारायणनाभिनलिने स्थितः प्रजापतिर्भुवनसृष्टिस्वान्तन्त्र्याभिमानविवशः स्वानुग्रहार्थमायान्तप्राकृतरूपं महादेवं दृष्ट्वाऽप्यनधिगततन्महिमावबोधः श्रीनारायणोपदेशात् कथञ्चित्तन्महिमानमज्ञासीदिति लैङ्गकौर्मसौरादिपुराणेषु श्रूयते । इन्द्रः कदाचिदन्तर्यामिबलायत्तेनासुरविजयेन सहामर्त्यैर्दृप्तः तद्दर्पशमनेन तदनुग्रहायाविर्भूतं यक्षरूपं महादेवं दृष्ट्वाऽप्यनपेतमोहस्तत्कालसन्निहितया हैमवत्या समुपदिष्टः शिवमहिमानमवैदिति तलवकारिणामुपनिषदि स्कान्दलैङ्गशैवपुराणेषु चोपाख्यायते । हरिः कदाचित् कमलासनेन श्रैष्ट्ये विवदमानः तयोस्तत्त्वोद्बोधनाय मध्ये महालिङ्गरूपेण प्रादुर्भूतमनुपलभ्यमानमूलाग्रं शिवमाकलय्याप्यप्राप्ततन्महिमविश्वासः परमकारुणिकस्य तस्यैवोपदेशात् सर्वातिशायि तदैश्वर्यं वेधसा सह निरचैषीदिति शैवकौर्मादिषु पठ्यते । तदिदमुपाख्यानत्रयमिह निबद्धम् ।

अथवा शिवप्रसादैकलभ्यस्तन्महिमविश्वासो न वेदाभ्यासादिलभ्यः । अतस्तद्वैभुर्यात्तेषां तदनुदय इत्यमुमर्थं 'नायमात्मेत्यादिमन्त्रमनुसृत्याह ।।

त्वयि श्रद्धा नाथ, प्रवचनबलान्नैव सुलभा
न मेधांबाहुल्यान्न च विविधशास्त्रेषु घटनात् ।
प्रसादादेवैनां भव, तव लभन्ते सुकृतिन-
स्ततस्ते दुर्दान्ताः कथमिव लभेरन् कुमतयः ।।८।।

अथवा शिवभक्तेर्निखिलानर्थनिवृत्तिहेतुतया च परमश्रेयोरूपत्वात् क्षुद्रेष्वपि श्रेयस्सु बहुतरविघ्नानां जनानां देवकृतो विघ्नस्तत्रावश्यम्भावीति तत्प्रतिबन्धात् तन्निवर्तनक्षमानेकभवसञ्चितसुकृतनिकरहीनानां तत्फलोपधाननियतशिवमहिम-विश्वासानुदय इत्याशयेनाह -

तव श्रीपादाब्जे कथमपि च भक्तिर्न सुलभा
निहन्त्री दुःखानां निखिलपुरुषार्थैकवसतिः ।
विना पुण्यैर्जन्मान्तरशतसहस्रेषु विहितै-
र्नरः श्रेयोमात्रं खलु बहुलाविघ्नं न लभते ।।९।।

कथमपि च यत्किञ्चित्फलाभिलाषेणापीत्यर्थः । यद्यपि -
'फलोद्देशेन देवेशि लधुर्मम समाश्रयः ।
फलार्थी तदभावे मां परित्यक्तुं क्षमो यतः ।।
इति फलोद्देशेन प्रवृत्तिर्लघूकृता तथाऽपि साऽपि प्रतिबन्धरहितस्य पुंसः फलसम्पादनेन विश्वासातिशयसंजननद्वारोक्तरूपां समग्रचिह्नाष्टकोपेतां सात्विकशिवभक्तिं प्रसूत इति सा दुर्लभेत्युक्तम् ।

अथवा दधीचादिशापनिरपवादकलिदोषाभ्यां वा तेषां शिवोत्कर्षविश्वासानुदय इत्याह -

विधूतान्तर्ध्वान्ता विविधभवसंपन्नसुकृता
यतन्ते बोद्धुं त्वां यमनियमसत्कर्मानिरताः ।
दधीचाद्यैः शप्ता गिरिश, दनुसूनुप्रकृतयः
कथं ते जानीयुः कलिमलिनचित्ता हतधियः ।।१०।।

अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः, शौचसन्तोषतपःस्वाध्यायेश्वर-प्रणिधानानि नियमाः, अन्यानि च सत्कर्मणि कलिदोषाणामपवादकानि
'एवंविधे कलियुगे दोषाणामेकशोधनम्।
महादेवनमस्कारो ध्यानं दानमिति श्रुतिः ।।, इत्यादिव्यासवचनप्रतिपादितानि ; तेषु

निरता इत्यर्थः । दधीचशापः कौर्मे दर्शितः ।

'एवमुक्त्वा तु विप्रर्षिः शशापेश्वरविद्विषः ।
समागतान् ब्राह्मणांश्च दक्षसाहाय्यकारिणः ।।
यस्माद्बहिष्कृता वेदा भवद्भिः परमेश्वरः ।
विनिन्दितो महादेवः शङ्करो लोकवन्दितः ।।
भविष्यध्वं त्रयीबाह्याः सर्वेऽपीश्वरविद्विषः ।
निन्दन्तो ह्यैश्वरं मार्गं कुशास्त्रासक्तमानसाः ।।
मिथ्याधीतसमाचाराः सदा मिथ्याभिमानिनः ।
प्राप्य घोरं कलियुगं कलहैः कलिपीडिताः ।।
त्यक्त्वा तपोवनं कृत्स्नं गच्छध्वं नरकान् पुनः ।
भविष्यति हृषीकेशः स्वाश्रितोऽपि पराङ्मुखः ।।, इति ।

तत्रैव कलिदोषकीर्तनप्रकरणे-

'कुर्वन्ति चावताराणि ब्राह्मणानां कुलेषु वै ।
दधीचशापनिर्दग्धाः पुरा दक्षाध्वरे द्विजाः ।।
निन्दन्ति च महादेवं तमसाविष्टचेतसः । इति।

तानेवाभिप्रेत्य सौरपुराणे पठ्यते -

'पुरुषोत्तममाश्रित्य शिवनिन्दापरा द्विजाः । कलौ युगे भविष्यन्ति त्राता तेषान्न माधवः।। इति । स्कान्दे शङ्करसंहितायां शिवपूजाविधौ **'नेक्षेत पूजावेलायान्नरं वत्स बहिष्कृतम्'** इत्युक्त्वा कोऽसौ बहिष्कृत इति जिज्ञासायामुक्तम् -

'दधीचिना गौतमेन ये शप्ता ब्राह्मणाधमाः ।
कलाववतरिष्यन्ति निन्दकास्ते बहिष्कृताः।। इति। एवं स्कान्दादि प्रतिपादिता भृग्वादिशापा अपि द्रष्टव्याः । **दन्विति** । तमोगुणाविष्टतया कलिदोषापवादकानि कर्माण्यनाद्रियमाणा इत्यर्थः । **कलीति** ।

'कलौ रुद्रो महादेवो देवानामीश्वरः परः ।
न देवता भवेन्नृणां देवतानाञ्च दैवतम् ।।
इति कलिदोषप्रतिपादनात् तदापातितमोहान्धीकृता इत्यर्थः ।

ननु किमेवं सर्वात्मना शिवमहिमविश्वासः तदनुगुणभक्त्याराधनं तदुचितफललाभश्च कस्यापि नास्ति ? अस्ति भगवतो नारायणस्येति वदन्

परिसंख्यया शिवमहिमविश्वासादीनामतिविरलत्वं सूचयति -

अपारं विज्ञातुं गिरिश, महिमानं तव परं
विधातुं भक्तिं वा तव चरणयोर्नित्यमचलाम् ।
प्रसादं वा लब्धुं वरद, तव पूजाभिरधिकं
जगत्येकः शक्तो जयति वनमाली स भगवान् ।।११।।

प्रसादग्रहणादेव सकलवांछितलाभोऽप्यर्थसिद्ध इति न पृथगुक्तः ।
'कृष्णद्वैपायनः साक्षाद्विष्णुरेव सनातनः ।
को ह्यन्यस्तत्त्वतो रुद्रं वेत्ति तं परमेश्वरम् ।।
नार्जुनेन समः शम्भोर्भक्त्या भूतो भविष्यति ।
मुक्त्वा सत्यवतीसूनुं कृष्णं वा देवकीसुतम् ।।
इत्यादिकौर्मवचनसिद्धौ विष्णोः शिवमहिमपरिज्ञानतद्भक्त्यतिशयौ । यत्तु भागवते चतुर्थस्कन्धे दक्षाध्वरे कुपितस्य शिवस्य शान्तिं प्रार्थयमानान् प्रति ब्रह्मणो वचनम्
'नाहं न यज्ञो न च यूयमन्ये न देहभाजो मुनयश्च तत्त्वम् ।
विदुः प्रमाणं बलवीर्ययोर्वा तस्यात्मतन्त्रस्य क उपायं विधित्सेत् ।। इति ।
यच्चाष्टमस्कन्धे शिवं प्रति देवानां वचनम्
'न ते गिरित्राखिललोकपाल, विरिञ्चवैकुण्ठसुरेन्द्रगम्यम् ।
तेजः परं यत्र रजस्तमश्च सत्वन्न यद्ब्रह्म निरस्तभेदम् ।।
एवमादीनि वचनानि कैमुत्यनयेन शिवतत्त्वस्येतरपुरुषदुर्ग्रहत्वपराणि न तु हरेस्तदनवबोधपराणीति न विरोधः । सर्वोत्तरशिवाराधनपरत्वं तस्य तस्मिन् शिवस्य प्रसादाधिक्यञ्च -
'अहं यथावदाराद्धः कृष्णेनाक्लिष्टकर्मणा ।
तस्मादिष्टतमः कृष्णादन्यो मम न विद्यते ।।
इति सौषुप्तिके शिववचनात्।
'देवदेवस्त्वचिन्त्यात्मा अजय्यो विष्णुरव्ययः ।
सर्वरूपं भवं ज्ञात्वा लिङ्गेऽर्चयति तं विभुम् ।।
तस्मिन्नभ्यदिकां प्रीतिं करोति वृषभध्वजः ।
इति द्रोणपर्वणि व्यासवचनाच्च शिवप्रसादात्तस्य सर्वोत्तरपदलाभः ।

'तव श्रिये मरुतो मर्जयन्त रुद्र यत्तेऽजनिम चारुचित्रम् -
इति शिवाभिव्याक्तिस्थानं लिङ्गं प्रकृत्य तद्विशेषयता मन्त्रवर्णेन दर्शितः -
'पदं यद्विष्णोरुपमं न्यधायि,' इति । अस्यार्थः पराशरपुराणे स्फुटीकृतः ।
'रौद्रंलिङ्गं महाविष्णुर्भक्त्या शुद्धं शिलामयम् ।
चारुचित्रं समभ्यर्च्य लब्धवान् परमं पदम् ।। इति ।

काशीखण्डे च चतुर्भुजाभिषेकाध्याये पट्टाभिषेकपूर्वकं वैकुण्ठस्थानमखिल-जगत्प्रभुत्वमात्मनोऽप्यधिकं शौर्यमन्यच्चानितरसुलभं वरजातं शिवेन विष्णवे दत्तमित्युपवर्णितम् । आरण्यपर्वणि च तीर्थयात्राविधौ

'ततो गच्छेत् सुपर्णाक्षं त्रिषु लोकेषु विश्रुतम् ।
यत्र विष्णुः प्रसादार्थं रुद्रमाराधयत् पुरा ।।
वरांश्च सुबहून् लेभे दैवतैरपि दुर्लभान् ।
उक्तं च त्रिपुरघ्नेन परितुष्टेन भारत ।।
अपि चान्यैः प्रियतमो लोके कृष्ण भविष्यसि ।
त्वन्मुखञ्च जगत् सर्वं भविष्यति न संशयः ।।

इति प्रतिपादितम् । द्रोणपर्वणि च तपोऽध्याये मैनाके वर्षसहस्राणि तपश्चर्यया प्रसादितवते नारायणाय भगवता सर्वोत्तरं शौर्यादि दत्तमिति प्रपञ्चितम् । हरिवंशे च पारिजातसंहितायाम्'

इति संस्तूयमानस्तु भगवान् गोवृषध्वजः ।
प्रसार्य दक्षिणं बाहुं वासुदेवमथाब्रवीत् ।।
मनीषितानामर्थानां प्राप्तिस्तेऽस्तु सुरोत्तम ।
पारिजातञ्च हर्तासि मा भूत्ते मनसो व्यथा ।।
पुरा मैनाकमाश्रित्य तपस्त्वमकरोर्यदा ।
तदा मम वचः कृष्ण संस्मृत्य स्थैर्यमाप्नुहि ।।
अवध्यस्त्वमजय्यस्त्वं मत्तः शूरतरस्तथा ।
भवितासीत्यवोचं यत्तत्तथा न तदन्यथा ।।

इत्युक्तम् । एवं शैवलैङ्गादिप्रतिपादितमपि द्रष्टव्यम् । (इत्युपोद्घातः।)

अथ श्रुत्यर्थविचारः

अथ शिवस्य विश्वाधिकत्वव्यवस्थापनाय तदुपाधिं तत्प्रयुक्तगुणादिकञ्च दिदर्शयिषुरुपाधिविनिर्मुक्तं तात्त्विकं तावद्रूपमाह -

अनन्तं यत्प्राहुर्निरतिशयसच्चित्सुखवपुः
पराभूतद्वैतप्रकरविशदं प्रत्यगुदितम् ।
अखण्डार्थैर्वेद्यं वचननिकरैरौपनिषदै-
र्महादेव,ज्योतिस्तदसि परमात्मेति विदितम् ।।१२।।

विविधास्तावद्वेदान्ताः परं ब्रह्म प्रतिपादयन्ति । केचित्तत्पदार्थनिष्ठाः यथा- **'सत्यं ज्ञानमनन्तं ब्रह्म,' 'अस्थूलमनणु,'** इत्यादयः । केचित् त्वम्पदार्थनिष्ठाः यथा **'योऽयं विज्ञानमयः'** इत्यादयः । केचित्पदार्थद्वयाभेदनिष्ठाः महावाक्यरूपा यथा - **'तत्त्वमसि' 'अहं ब्रह्माऽस्मि' 'अयमात्मा ब्रह्म' 'प्रज्ञानं ब्रह्म'** इत्यादयः । तद्रीतिमनुसृत्य त्वंपदार्थः प्रत्यगित्यनेन दर्शितः । तेनात्माभिमानविषयेषु देहेन्द्रियादिष्विदन्तया बहिर्भावमापद्यमानेषु प्रातिलोम्येनान्तर्मुखतया गच्छतीव चित्तवृत्तेस्तथाऽवगमनादिति निष्कृष्टाहङ्कारो जीव उच्यते । अवशिष्टविशेषणैस्तत्पदार्थो दर्शितः । तत्रापि सच्चित्सुखवपुरात्मानन्तमिति विशेषणैः **'आनन्दादयः प्रधानस्य'** इति सूत्रे उपसंहर्तव्यत्वेन प्रतिपादितानां पञ्चानामुपसंहारो दर्शितः। पराभूतेत्यादिना **'अक्षरधियाम्'** इत्यादि सूत्रे उपसंहर्तव्यत्वेन निर्णीतानामस्थूलत्वादीनामिति विवेकः। उपसंहारश्चैषां निष्प्रपञ्चब्रह्मप्रतिपत्त्युपाय-तयेति निपुणतरमुपपादितमाचार्यैः । अन्ये तूपासनार्थमिति मन्यन्ते । प्रत्यगुदितम् उक्तरूपं ज्योतिरिति सामानाधिकरण्येन महावाक्यार्थो दर्शितः । निष्प्रपञ्चं ब्रह्म न संसर्गपरैः प्रमाणैस्सिद्ध्येदित्यत उक्तम् 'अखण्डार्थैः, इति ।

एवम्भूतस्यापि ब्रह्मणो लोकानुग्रहैकरसिकतया कल्पितगुणादिविभागं मायोपाधिकं सर्वोत्तरं सगुणं रूपं निरूपयति -

गुणातीतोऽपि त्वं सगुण इव मायाशबलितः
परिष्कुर्वन् साम्बं वपुरसितकण्ठं त्रिणयनम् ।
अभिख्याभिः ख्यातः शिवभवमुखाभिर्विजयसे
नियन्ता लोकानां सहरिहरपङ्केरुहभुवाम् ।।१३।।

इवकारेण गुणानां कल्पिततत्वेन तत्वानुप्रवेशाभावं द्योतयति । इत एव नामरूपसम्बन्धस्यापि कल्पिततत्वलाभ इति न पृथगुक्तिः । सार्वज्ञ्यादिभिरङ्गसंज्ञैः ज्ञानवैराग्यादिभिरव्ययसंज्ञैरैश्वर्यादिभिर्भगसंज्ञैरन्यैश्च सत्यकामत्वादिभिर्गुणैरलंकृत इत्यर्थः । निर्गुणस्य गुणादीनामुपपादकमुपाधिमाह **मायेति** चित्प्रतिविम्बोपाधिभूतया अविद्यात्मिकया मायया बिम्बस्थानीयत्वेनोपहितः विमलसत्व प्रधानत्वेना-विद्योपाधिभिन्नया मायया प्रतिबिम्बभावेनोऽपहित इति वाऽर्थः । **शिवेति** । तद्गुणसंविज्ञानेन श्रुतिस्मृतिपुराणकोशादिप्रसिद्धानि सर्वाणि शम्भोरभिधानानि गृह्यन्ते। शिवादिभिरष्टभिर्भवादिभिरष्टमिश्चेत्यर्थो वा । यद्यप्यन्यान्यपि शम्भु-शङ्करादीनि भगवतः परश्शतानि सन्ति नामानि तथाऽपि
'शिवो महेश्वरश्चैव रुद्रो विष्णुः पितामहः ।
संसारवैद्यः सर्वज्ञः परमात्मेति तत्त्वतः ।।
एतन्नामाष्टकं पुण्यं शिवस्य परमात्मनः ।
रहस्यं सर्वशास्त्रेभ्यः सारभूतं समुद्धृतम् ।।
इत्यादिना रहस्यागमेषु शिवादिनामाष्टकस्य वैशिष्ट्यप्रतिपादनात्, भवादिनामाष्टकस्य आपस्तम्बीयानां मन्त्रेष्वाम्नानेन आपस्तम्बसूत्र ईशानबलौ बोधायनाश्वलायनसूत्रयोः शूलगवहोमे बोधायनसूत्रे महादेवस्य प्रतिष्ठाविधौ नित्यपूजाविधौ प्रदोषपूजाविधौ च होमतर्पणार्चनेषु विनियोगेन च वैशिष्ट्यावगमात् प्राधम्यमभिप्रेत्य विशिष्य ग्रहणम् । अत्र केचित् गुणमूर्तिभ्यः परं सकलकारणभूतं तत्त्वान्तरं नेच्छन्ति । अन्ये तु मायामात्रोपहितमशरीरं शारीरकसूत्रव्यवहृतपरब्रह्मादिशब्दमात्रवाच्यं तदिति मन्यन्ते । तदुभयदृष्ट्योमासाहित्यमुक्तम् । तद्रूपविग्रहग्रहणं भवशिवादिशब्दवाच्यत्वञ्च त्रिमूर्त्यन्तर्गतस्य गुणिरुद्रस्यैवेति तेनैव रूपेण स्तोत्रप्रतिपाद्यं ब्रह्म निर्दिष्टमिति स्यान्मतिः। तदर्थं विशेषयति **सहरिहरेति** । अयमाशयः । ब्रह्मोपनिषदि तावत् "अथास्य पुरुषस्य चत्वारि स्थानानि भवन्ति नाभिर्हृदयं कण्ठो मूर्द्धा । तत्र चतुष्पदं ब्रह्म विभाति । जागरिते ब्रह्मा स्वप्ने विष्णुः सुषुप्तौ रुद्रस्तुरीयमक्षरमादित्यो

विष्णुश्चेश्वरश्च" इति ब्रह्मादिभ्यः परमक्षरशब्दितं सर्वदेवात्मकं तत्त्वान्तरं दर्शितम् । तस्यैव पुनः **'न तत्र देवाऋषय पितर ईशते'** इत्यनन्येश्वरत्वम् **'एको देवः सर्वभूतेषु गूढः'** इति सर्वान्तर्यामित्वं सकलकर्मफलप्रदत्वञ्च दर्शितम् । तापनीयोपनिषदि च **'अकारं ब्रह्माणं नाभावुकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये'** इति नाभिहृदयभ्रूमध्येष्वकारादिमात्रात्रयवाच्यानां ब्रह्मविष्णुरुद्राणामुपासनविधानानन्तरम् **'ॐकारं सर्वेश्वरं द्वादशान्ते'** इति समष्टिप्रणववाच्यं द्वादशान्तोपास्यं सर्वैश्वर्यशालि तेभ्यः परं तत्वान्तरं दर्शितम् । मैत्रेयोपनिषदि च **'तमो वा इदमेकमास'** इत्यारभ्य **'तत् परेणेरितं विषमत्वं प्रयातीतियेतद्वैरजसो रूपम्'** इत्यादिना तमोऽधिष्ठातुः परस्य सङ्कल्पेनाविद्याख्यस्य तमसो गुणविभागं निरूप्य -

'तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरिति । अथ यो ह खलु वाऽस्य राजसोंऽशोऽसौ स योऽयं ब्रह्मा । अथ यो ह खलु वाऽस्य तामसोंऽशोऽसौ स योऽयं रुद्रः । अथ यो ह खलु वाऽस्य सात्त्विकोंऽशोऽसौ स योऽयं विष्णुः' इति तमोऽधिष्टातुः परस्य रजोगुणाद्युपहिता अंशभेदा ब्रह्मादय इति प्रतिपादनेन तेभ्यः परं तत्त्वान्तरं स्पष्टीकृतम् । योगयाज्ञवल्क्ये च प्रणवतन्मात्रादेवतानिरूपणे -

'अक्षरत्रयमेतत्तु कारणत्रयमिष्यते ।
त्रयाणां कारणं ब्रह्म भारूपं सर्वकारणम् ।
एकाक्षरं परं ज्योतिस्तदाहुः प्रणवं बुधाः,

इति मात्रात्रयदेवताभ्यः **'अहं ब्रह्मा च शर्वश्च जगतः कारणत्रयम्'** इति भागवतादिपठितभगवद्वचनादिभिः कारणत्रयमिति प्रसिद्धेभ्यो गुणमूर्तिभ्यः परं प्रणवदैवतं तत्वान्तरं स्फुटीकृतम् । भागवतविष्णुपुराणादिषु च

'सत्त्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते ।
स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः श्रेयांसि तत्र खलु सत्वतनोर्नृणां स्युः'
'ब्रह्मविष्णुशिवा ब्रह्मन् प्रधाना ब्रह्मशक्तयः इत्यादिवचनैर्मूर्तित्रयातीतं परं ब्रह्म विभावितम् । अपिच जगत्कारणं ब्रह्म तावन्मायोपाधिकचैतन्यमित्यविवादम् । ब्रह्मविष्णुरुद्रास्तु तदीयगुणविशेषोपाधिचैतन्यरूपा इत्युदाहृतमैत्रेयोपनिषद्वाक्ये 'सैषा चित्रा सुदृढा बह्वंकुरा स्वयं गुणभिन्नांकुरेष्वपि गुणभिन्ना सर्वत्र ब्रह्मविष्णुशिवरूपिणी' इति, तापनीयोपनिषदि सकलपुराणादिषु चाविवादेन प्रतिपन्नम्। ततश्चोपाधिभेदे उपहितभेदस्यौचित्यात् गुणमूर्तिभ्यः परं मायोपाधिकं जगत्कारणं ब्रह्मेति वज्रलेपायते । तस्य चोमासाहित्यमुक्तरूपं वपुश्च **'उमासहायं परमेश्वरं**

प्रभुम्' 'ऋतं सत्यं परं ब्रह्म' इत्यादिकैवल्योपनिषदादिमन्त्रेभ्यः प्रतिपन्नं शिवशम्भुरुद्रेशानमहेश्वरमहादेवादिशब्दवाच्यत्वञ्चाथर्वशिरश्शिखादिदृष्टप्रयोगनिर्वचनाभ्यां निर्णीतम् । न चोदाहृतोपनिषन्निकुरुम्बप्रतिपाद्यो गुणिरुद्र इति शङ्कनीयम् । तत्र सर्वत्रापि तद्विभूतिषु ब्रह्मनारायणयोरिव गुणिरुद्रस्यापि पाठात् । न च तत्र विभूतिमध्याम्नातरुद्रशब्दो गुणिरुद्रांशभूतरुद्रान्तरपरोऽस्त्विति वाच्यम् । ब्रह्मविष्णुसन्निद्ध्याम्नातरुद्रशब्दस्य संहर्तृमूलरुद्रपरत्वौचित्यात् । **'यत्प्राये श्रूयते यच्च तत्तादृगवगम्यते'** इति न्यायात् । ननु तथाऽपि कैवल्यादिमन्त्राणामुपासनापरत्वा-दारोपितविग्रहेणाप्युपासनोपपत्तेर्न परस्य वर्णितविग्रहसिद्धिरिति चेन्न । उपासनापरेभ्योऽप्यविरोधे देवताधिकरणन्यायेन प्रतीयमानार्थसिद्धेरनिवार्यत्वात् । न च **'अपाणिपादम्'** इति श्रुतिविरोधोऽप्यस्तीति शङ्कनीयम् । एवं हि निर्गुणश्रुतिविरोधात् सत्यकामादिगुणानामप्यनभ्युपगमापत्तिः। इष्टापत्तिरिति वदतां यथा - ध्यानार्थेऽपि सत्यकामादिगुणोपदेशे तद्गुण ईश्वरः प्रसिद्धयति, इति व्यतीहाराधिकरणभाष्यविरोधः । मायाकल्पिता गुणास्तत्वतो निर्गुणत्वं न विघ्नंतीति समाधानम् । न्यायस्त्विहापि तुल्यः । यत्तु **'रूपोपन्यासाच्च'** इति सूत्रे विग्रहोपन्यासपरत्वेन सूत्रव्याख्यानानन्तरं ब्रह्मणो विग्रहाभावात्तव्द्याख्यानमयुक्तं मन्यमानानां परेषामन्यथा व्याख्यानमुपन्यस्तं भाष्यकारैस्तन्मुण्डकश्रुतौ निर्विशेषब्रह्मपरोपक्रमविरोधान्न विग्रहोपन्यासः सङ्गच्छत इत्यभिप्रायेण । उक्तश्च तैरेवान्यत्र विग्रहसद्भावः । **'स्यात् परमेश्वरस्यापीच्छावशान्मायामयं रूपं साधकानुग्रहार्थम्'** इति । सूत्रकारेण च **'भोगमात्रसाम्यलिंगाच्च'** इत्यहंग्रहोपासकानां ब्रह्मणश्च भोगसाम्यं वदता स्फुटीकृतम्। शरीरसापेक्षे वैषयिकानन्दे भोगशब्दप्रसिद्धेः । नन्वसति मानान्तरविरोधेऽन्यपर शब्देभ्योऽक्षरार्थ-सिद्धिः । "अस्ति त्विह विरिञ्चादिविग्रहत्रयव्यतिरेकेण ब्रह्मणश्चिरन्तनतुरीय-विग्रहाभ्युपगमे श्रुत्यन्तरविरोधः । मैत्रेयोपनिषदि मायोपाधिकं परं ब्रह्म प्रस्तुत्य 'तस्य प्रोक्ता अग्र्यास्तनवो ब्रह्मा रुद्रो विष्णुरिति' इति परविग्रहाणां मध्ये विरिंचादिविग्रहत्रयस्यैवाग्र्यत्वश्रवणात् । यदि हि ततोऽपि प्रचीनं मूर्त्यन्तरं स्यात् ब्रह्मणः कथं तेषामग्र्यत्वं भवेत् । अग्रे भवा ह्यग्र्या उच्यन्ते । अतो ब्रह्मादिमूर्तित्रयातिरेकेण न परस्य तुरीया मूर्तिरस्ति । तदवलम्बनेनैव च वृद्धानां ब्रह्मणो विग्रहवत्त्वव्यवहार इत्यवसीयते ।

अमुमेवार्थमुपोद्बलययंत्यत्रितपश्चर्यायां भागवतवचनानि । तत्र ह्यत्रेस्तपश्चर्यां प्रस्तुत्य 'शरणं तं प्रपद्येऽहं य एव जगदीश्वरः।
प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन्'
इति तस्य तत्फलाभिसन्धिञ्चोक्त्वाऽथ चिराद्वरप्रदानाय ब्रह्मविष्णुरुद्राणां त्रयाणां तत्र सन्निधाने सति स्तुतिप्रणामाद्युपचारानन्तरं तान् प्रत्यत्रेः -
'एको मयेह भगवान् विबुधप्रधानश्चित्ते कृतः प्रजननाय कथं नु यूयम् ।
अत्रागतास्तनुभृतां मनसो विदूरा ब्रूत प्रसीदत महानिह विस्मयो मे'
इति प्रश्ने -
'यथा कृतस्ते सङ्कल्पो भाव्यन्तेनैव नान्यथा ।
सत्सङ्कल्पस्य ते ब्रह्मन् यद्वै ध्यायसि ते वयम्'
इति तेषां प्रतिवचनोपन्यासेन विरिञ्चादिमूर्तित्रयातिरेकेण परस्य सर्वैश्वर्याभिव्यक्तिस्थानभूतं तुरीयं मूर्त्यन्तरं नास्तीति व्यक्तीकृतम् । तत्सत्त्वे तेनैव रूपेण परस्य तत्र प्रादुर्भावापत्तेः । अन्यथा ऋषेः सत्सङ्कल्पत्वविरोधात् । गजेन्द्रमोचनस्थल इव ध्यातृभावगृहीतेन रूपेण प्रादुर्भाव इत्यपीह वक्तुमशक्यत्वात् । तथा सत्येको मयेत्यादिप्रश्नायोगात् । तस्मान्न तुरीयस्य विग्रहाभ्युपगमो युक्त इति। अत्राभिधीयते - प्रतीयते तावदुमासहायमित्यादिमन्त्रवर्णेभ्यस्तुरीया उमासहायत्वादि-विशिष्टा मूर्तिः । साऽपि न ध्यानार्थमारोपितेति शक्यं वक्तुम् । धान्दोग्ये समानप्रकरणे गुणोपसंहारन्यायेनोपास्यस्य ब्रह्मण उदाहृतमन्त्रवर्णसिद्धमूर्ति-सिद्धवत्कारेण **'एष आत्माऽपहतपाप्मा'** इत्यादिना शरीरवत्त्वसामान्येन प्रसक्तानां, जरामरणजिघत्सापिपासादीनां प्रतिषेधदर्शनात् । अन्यथा तेषामप्रसक्त-प्रतिषेधत्वापातात्। न च मूर्तिवदजरत्वादयोऽपि केवलमुपासनार्थमारोपिता एवोपन्यस्यंत इत्यस्त्विति वाच्यम् । तत्रैव **'अस्मिन् कामास्समाहिताः'** इत्यादिना तेषामनारोपितेश्वरगुणत्वस्फुटीकरणात् ।

"नन्वजरत्वादि न विग्रहगुणत्वेनोपास्यम् । **'एष आत्माऽपहतपाप्मा'** इत्यादिनाऽत्मगुणत्वोक्तेस्तद्गुणैः सत्यकामत्वादिभिः सह पाठाच्चात्मनि च जरादिप्रसक्त्यभावेऽपि स्वतस्सिद्धाजरत्वाद्यस्त्येवेति तदेवोपास्यत्वेन निर्गुणप्रकरण-श्रुताजरत्वादिवदातिथ्यादावनूयाजादिनिषेधवच्च स्तुत्यर्यत्वेन वा निर्दिश्यत इति चेन्न। सर्ववेदान्तप्रत्ययन्यायेन तत्र विग्रहविशिष्टस्यैव ब्रह्मण उपास्यत्वे स्थिते औचित्यात् ।

'तस्योपरि शिवं ध्यायेत् साम्बं सर्वमनोहरम् ।
सर्वलक्षणसम्पन्नं गाढयौवनशोभनम् ।।

इत्याद्युपबृह्मणानुरोधाच्चाजरत्वादेर्विग्रहगुणत्वेनैवान्वयात् । तथात्वेऽपि तद्द्वारा आत्मगुणत्वसंभवेन तव्द्यपदेशस्य तद्गुणैः सह पाठस्य च **'त्रिलोचनं नीलकण्ठं प्रशान्तम्' 'बुद्धिमान् नीतिमान् वाग्मी श्रीमाञ्छत्रुनिबर्हणः । विपुलांसो महाबाहुः'** इत्यादाविवोपपत्तेश्च । **'तस्मिन्यदन्तस्तन्वेष्टव्यम्'** इत्यादिना विधानायानूद्यमानस्य स्तुत्यर्थत्वायोगाच्च । तस्माद्विग्रहगुणस्याजरत्वादेः स्वरूपतो विद्यमानत्वे निर्दिश्य उपास्यतया विधानेनानारोपितत्वव्यवसायात् धर्मिणो विग्रहस्याप्यनारोपितता निश्चीयत इत्युपगन्तव्यैव तुरीयस्यापि मूर्तिः । उक्तञ्च सूतसंहितायाम् -

'उमार्धविग्रहा शुद्धा त्रिनेत्रा चंद्रशेखरा ।
नीलग्रीवा परानन्दा प्रमोदात् ताण्डवप्रिया ।
ब्रह्मविष्णुमहादेवैरुपास्या गुणमूर्तिभिः ।
सर्वमूर्तिविहीनस्य सर्वतत्त्वाधिपस्य च ।।
तथाऽप्येषा परा मूर्तिरित्येषा शास्वती श्रुतिः ।। इति ।

पराशरपुराणे -

'साक्षात् परतरस्यैव वस्तुमः सर्वसाक्षिणः ।
अस्ति मूर्तिः परा शुद्धा स्वतन्त्रा पापनाशिनी ।।
तस्यासाधारणी मूर्तिः सांबा चंद्रार्द्धशेखरा'

इत्यारभ्य

'ब्रह्मविष्णुमहेशानास्तां ध्यायति निरन्तरम्' इत्यन्तेनोक्तम् । एवं **'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते'** इति रविबिम्बमध्यवर्तित्वेन प्रसिद्धवन्निर्देशस्तलवकार-श्रुतावथर्वशिरसि च श्रुतस्य ब्रह्मणो देवैः संवादस्यानुपपत्तिः।

'अजातमिममेवैकं मत्वा जन्मनि भीरवः ।
रुद्रस्यास्य प्रपद्यन्ते रक्षार्थं दक्षिणं मुखम्' इति वायूक्त्युपबृह्मित इतरव्यवच्छेदेन जन्मराहित्यप्रतिपादनेन स्फुटीकृतविग्रहानादित्वतात्पर्यः

'अजात इत्येव कश्चिद्भीरुः प्रपद्यते ।
रुद्र यत्ते दक्षिणे मुखं तेन मां पाहि नित्यम्' इति श्वेताश्वतरोपनिषन्मन्त्रश्च भगवतो

दिव्यविग्रहसद्भावे प्रमाणम् । एषाञ्च तुरीयविग्रहविषयत्वं तत्र तत्र स्फुटीकरिष्यते । किञ्च पुराणेषु सर्वत्र परमशिवनिरूपणप्रकरणे तस्य मूर्तिमत्त्वेन प्रतिपादना-द्विग्रहसिद्धिः। न च तत्र गुणिरुद्रविषयत्वेनान्यथासिद्धिः शङ्कार्हा । सर्वेष्वपि शिवमहिमपरेषु शिवपुराणेषु शिवस्य कारणत्रयपरत्वोपवर्णनात् । ततोऽपि पुनस्तुरीयस्य व्यतिरेककल्पनायां प्रमाणाभावात् । तथा हि -- कौर्मे तावत् पूर्वभागे ब्रह्मविष्णुरुद्रान् प्रस्तुत्योक्तम् ।

'एभ्यः परतरो देवस्त्रिमूर्तिपरमा तनुः ।
माहेश्वरी त्रिणयना योगिनां शान्तिदा सदा' इति । उत्तरभागेऽप्युक्तम् ।
'सर्वासामेव शक्तीनां ब्रह्मविष्णुशिवात्मिकाः ।
प्रधानाः संस्मृता देवाः शक्तयः परमात्मनः ।।
आभ्यः परस्ताद्भगवान् परमात्मा सनातनः ।
गीयते सर्वशक्त्यात्मा शूलपाणिर्महेश्वरः ।।
एनमेके वदन्त्यग्निं नारायणमथापरे ।
इन्द्रमेके परे प्राणान् ब्रह्माणमपरे विदुः ।।
ब्रह्मविष्ण्वग्निवरुणाः सर्वे देवास्तथर्षयः ।
एकस्यैवाथ रुद्रस्य भेदास्ते परिकीर्तिताः' इति।

शिवपुराणे -

'सृष्टेः प्रवर्तको ब्रह्मा स्थितेर्विष्णुर्विमोहकः ।
संहारस्य तथा रुद्रस्तयोर्नित्यं नियामकः।।
तस्मात् त्रयस्ते कथ्यन्ते जगतः कारणत्रयम् ।
कारणत्रयमेतच्च शिवः परमकारणम्' इति।

स्कान्दे -

'ब्रह्मा विष्णुश्च रुद्रश्च परतत्त्वविभूतयः ।
एषां त्रयाणामधिकः सर्वकारणमीश्वरः' इति।

लैंगपाद्मगारुडब्रह्माण्डशिवधर्मादिष्वपि वचनानि द्रष्टव्यानि । विस्तरभयात् तत्र तत्र केषाञ्चिदुदाहरिष्यमाणत्वात् सर्वैकमत्यस्य स्फुटत्वाच्च नेह लिख्यन्ते । तस्मादनेकश्रुत्यादिसिद्धत्वात् परब्रह्मणो विग्रहवत्त्वस्य तदविरोधाय मैत्रायणश्रुतौ तनुशब्दो 'राजसोंऽशम्' इत्यादिवचनस्वारस्यादंशपरः, अग्र्यशब्दः सादिब्रह्म-मूर्त्यन्तरापेक्षयाऽग्र्यत्वपर इति वा व्याख्येयम् । यद्वा 'अग्राख्यायामुरस'

इत्यादावग्रशब्दस्य प्रधाने प्रसिद्धेः प्रधाने परमशिवविग्रहे भवा इति वा व्याख्येयम् । त्रिमूर्तीनां परमशिवविग्रहे जननात् । यद्यपि 'भवे छंदसि' इत्यधिकारे 'अग्राद्यत्' इति यत्प्रत्ययस्मृतो भवार्थः सत्ता न जन्म तत्र जातस्तत्र भव इति पृथगधिकारात् , 'नमः काट्याय च नीप्याय च नमः सूद्याय च सरस्याय च' 'इत्यादौ काटादिषु परमेश्वरस्य सद्भावमात्रेण भवार्थप्रत्ययदर्शनाच्च'। तथाऽपि **'नासतो विद्यते भावः'** इति स्मृतेर्जन्मस्थले सत एव कार्यस्योत्पत्तिरिति जातेऽपि भवार्थप्रत्ययो न विरुध्यते । ऊरव्या ऊरुजा इति जाते भवार्थप्रत्ययस्यान्यत्रापि दर्शनात् । दर्शितञ्च तिसृणां मूर्तीनां परमशिवविग्रहे जननं शिवराघवसंवादे

'य एकः शाश्वतो देवो ब्रह्म वंद्यः सदाशिवः ।
त्रिलोचनो गुणाधारो गुणातीतोऽक्षरोऽव्ययः ।।
जाता सिसृक्षा तस्याथ वीक्ष्यात्मस्थं गुणत्रयम् ।
देवत्रयमिदं ज्ञेयं गुणत्रयमिदं हि यत् ।।
पृथक्कृत्यात्मनस्तद्धि तत्र सारं विभज्य च ।
दक्षिणादसृजत्पुत्रं ब्रह्माणं वामतो हरिम् ।।
पृष्ठदेशान्महेशानं त्रीन् पुत्रानसृजद्विभुः' इति ।

यत्तु भागवतवचनजातमुदाहृतं तदपि परमशिवमूर्तेरतिरहस्यत्वेनालभ्यदर्शनतयाऽत्रेः कथञ्चित्सत्सङ्कल्पत्वसिद्धये होमाद्यवतारत्रयेण लोकतन्त्रनिर्वाहाय च मूर्तित्रयेण प्रादुर्भाव इत्येतदभिप्रायमिति न विरोधः। अलभ्यदर्शनत्वञ्च परमशिवमूर्तेर्दर्शितं शिवपुराणे -

'अप्राकृतवपुः श्रीमान् लक्ष्यलक्षणवर्जितः'
इत्यादिना तन्महिमविशेषानुपवर्णयता कमलासनेन-
'हरिश्चाहं च रुद्रश्च तथाऽन्ये च सुरासुराः ।
तपोभिरुग्रैरद्यापि तस्य दर्शनकांक्षिणः' इति ।

नन्वस्त्वेवं परस्य विग्रहसद्भावस्तथाऽपि शिवभवादिशब्दानां गुणिरुद्र-वाचिनामेव वस्त्वभेददृष्ट्या तत्रापि प्रयोगोपपत्तेर्न तस्य तद्वाच्यत्वमंगीकरणीयमिति चेन्न । नीलकण्ठत्वादिविशिष्टमूर्तिशबलिते ब्रह्मणि तेषां व्युत्पत्तेः प्रसिद्धत्वा-दथर्वशिरश्शिखादिषु महेश्वरमहादेवादिशब्दानां तन्नामत्वेन निर्वचनाच्चास्य शिवादिशब्दवाच्यत्वस्याप्यभ्युपगन्तव्यत्वात् । ननु यद्युमासहायस्त्रिलोचन-

त्वादिविशिष्टमूर्तिशबलित शिवपरेषु पुराणेषु विविधमहिमाकरत्वेन लिंगादिषूपास्यत्वेन च प्रतिपाद्यमानः पुरुषस्त्रिमूर्त्यतीतं परमेव ब्रह्म तर्हि स्रष्टृपालकयोर्ब्रह्म-नारायणयोस्तृतीयः संहर्ता किन्नामरूपः ; किं चास्य प्रतिपादकं पुराणादि? उच्यते - यादृशं परमशिवस्य रूपं यानि च नामानि तादृशमेव तस्यापि रूपं तान्येव च नामानि। तदुक्तं सूतसंहितायाम्।

'तप्तायःपिण्डवद्विप्रा रुद्रमूर्तिः परस्य तु ।
मूर्त्या तुल्यान्यमूर्तिभ्यो लक्षणैर्मुनिसत्तमाः ।।
परतत्वस्य नामानि प्रत्यासत्त्या मुनीश्वराः ।
त्रिमूर्तीनान्तु रुद्रस्य चाभिधानानि सुव्रताः' इति । शिवपुराणेऽपि संहाररुद्रमाहात्म्यं प्रस्तुत्योक्तम्'

'स एष भगवानीशस्तेजोराशिर्निरामयः ।
अनादिनिधनो धाता भूतसंकोचको विभुः ।।
परमैश्वर्यसंयुक्तः परमेश्वरभावितः ।
तच्छक्त्याधिष्ठितः शश्वत्तच्चिह्नैरपि चिह्नितः ।।
तन्नामनामा तद्रूपस्तत्कार्यकरणक्षमः ।
तत्तुल्यव्यवहारश्च तदाज्ञापरिपालकः' इत्यादि । यद्यपि तस्यासाधारण्येन प्रतिपादकं पुराणं नास्ति तथाऽपि प्रत्यासत्त्यतिशयात् परमशिवपरेष्वेव पुराणेषु तत्प्रतिपादनं यथाऽनुपदमेवोदाहृतं शिवपुराणे - उक्तञ्च पराशरेण -

'माहेश्वरपुराणानि समस्तानि महामुने ।
असाधारणया मूर्त्या नाम्ना साधारणेन च ।।
वदन्ति परमं तत्वं शिवं साम्बं त्रिलोचनं ।
त्रिमूर्तीनां परं चापि तदंशं तस्य वैभवम् ।।
तदंशस्याभिमानञ्च वदन्ति च महामुने' 'इति ।

एवमाराधनमपि तस्य परमशिवाभिव्यक्तिस्थानेष्वेव लिंगादिषु । एवं परमशिवस्य गुणिरुद्रस्य च नामरूपादिसाम्यादेव स्फुटं ब्रह्मविष्णुभ्यां प्रत्यासत्त्यतिशयावगमाद्विशिष्य परमशिवाभेदेन गुणिरुद्रस्य व्यवहारः पुराणादिषु । शैवानाञ्च तत्राभिमानातिशयो गुणचरितादिसाधारण्यव्यपदेशश्च । अत एव केषाञ्चिदद्यापि तयोर्विवेकाग्रहः ।

अथ पुराणादिसिद्धासु शैवीषु मूर्तिषु काः परमशिवमूर्तयः काश्च

गुणिरुद्रमूर्तयः ? केचिदाहुः--आनन्दताण्डवविग्रहो दक्षिणामूर्तिविग्रहः ताण्डवपरोमार्द्धविग्रहश्चेति विग्रहत्रयमेव परमशिवस्य । अन्ये तु गुणिरुद्रस्येति । तन्न रोचयामहे । योगयाज्ञवल्क्ये

'पृथिव्या वायुमारोप्य लकारेण समन्वितम् ।
ध्यायंश्चतुर्भुजाकारं ब्रह्माणं परमेष्ठिनम् ।।
धारयेत् पञ्च घटिका धारणात् सिद्धिमाप्नुयात् ।
वारुणे वायुमारोप्य वकारेण समन्वितम् ।
शुद्धस्फटिकसङ्काशं पीतवाससमच्युतम् ।
धारयेत्पञ्च घटिकाः सर्वपापैः प्रमुच्यते ।।
वह्नौ चानिलमारोप्य रेफाक्षरसमन्वितम् ।
त्र्यक्षञ्च वरदं रुद्रं तरूणादित्यसन्निभम् ।।
भस्मोद्धूलितसर्वाङ्गं सुप्रसन्नमनुस्मरन्'

इत्याद्युक्त्वा -

'आकाशे वायुमारोप्य हकारेण समन्वितम् ।
बिन्दुरूपं महादेवं व्योमाकारं सदाशिवम् ।।
शुद्धस्फटिकसङ्काशं बालेन्दुकृतशेखरम् ।
पञ्चवक्त्रधरं सौम्यं दशबाहुं त्रिलोचनम् ।।
सर्वायुधोद्यतकरं सर्वभूषणभूषितम् ।
उमार्धदेहं वरदं सर्वकारणकारणम् ।।
चिन्तयन् चित्तविन्यस्तं मुहूर्तमपि धारयेत् ।
स एवमुक्त इत्युक्तस्तान्त्रिकेष्वपि शिक्षितैः'

इति परमशिवस्य पञ्चवक्त्रसदाशिवमूर्तेरपि प्रतिपादनात् । वायुसंहितायाञ्च योगेश्वराख्यपूजाविधाने तथैव तस्याः प्रतिपादनात् । कूर्मपुराणे च नीललोहितकारितब्रह्मपञ्चमशिरोलवनप्रस्तावे

'अथान्वपश्यद्गिरिशं मण्डलान्तरसंस्थितम् ।
समासीनं महादेव्या महादेवं सनातनम् ।।'

इत्यादिनैकासनस्थितोमासहायशूलधरमूर्तेरपि तदीयायाः प्रतिपादनात् । तस्माद्यथागमाचार्योपदेशमन्येऽपि विग्रहाः परमशिवस्य प्रतिपत्तव्याः । तेषां तु परिच्छेदोऽतिरहस्यत्वाद्गुरूपदेशैकगम्य इति ते नात्र प्रदृश्यन्ते।

एवं मायावपुर्ब्रह्म तुरीयं विश्वकारणम् ।
उमासहायो भगवानिन्दुमौलिरिति स्थितम् ।।

ननु मूर्तित्रयातीतं मायोपाधिकं ब्रह्म नारायण इत्यपि केभ्यश्चिद्वचनेभ्योऽवसीयते । तथा हि -- विष्णुपुराणे तावत्

'ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः ।
विभूतयो हरेरेता जगतः सृष्टिहेतवः ।।
विष्णुर्मन्वादयः कालस्तथैवाखिलजन्तवः ।
स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ।।
रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः ।
चतुर्धा प्रलयायैते जनार्दनविभूतयः' ।।

इत्येवं भागवतबृहन्नारदीयादिवचनानि क्वचित् क्वचिदुपलभ्यन्ते । प्रपञ्चसारोपक्रमे च त्रिमूर्तीनां शेषशायिनः पुरुषोत्तमस्य च प्रश्नोत्तरनिबन्धेन स्फुटीकृतोऽयमर्थः । उत्तरतापनीये च नृसिंहस्य तुरीयत्वेन व्यपदेशात् । पूर्वतापनीये च **'ब्रह्मा विष्णुर्महेश्वरः पुरुष ईश्वरः सरस्वती श्रीगौरी प्रकृतिर्विद्या'** इत्यारभ्य **'सर्वं यो वै नृसिंहो देवो भगवान्यत्र सर्वं तस्मै ते नमः'** इत्यन्तेन ब्रह्मादीनां नृसिह्मविभूतिषु पाठाच्च प्रत्यक्षश्रुतिमूलताऽप्यस्यार्थस्य प्रतीयते । तथा च कथं तुरीयः परमशिव इति निर्णयः? अत्राभिधीयते ।

पादौ वैश्वानरादीनां तुरीयो निर्गुणः श्रुतः ।
उत्तरस्मिंस्तापनीये न गुणिभ्यः परो हरिः ।।
निर्गुणात्मप्रतिक्षेपे शिवं शान्तमिति श्रुतेः ।।
तुरीयः शिव एव स्यादैन्द्रीन्यायस्त्वनुष्टुभः ।।
अस्तु वा स नृसिह्मस्तं तुरीयं पादमात्मनः।
कुर्वता तेन नोक्ता स्याद्गुणिभ्यः परता हरेः ।।

पूर्वतापनीयमन्त्रस्त्वथर्वशिखाद्यनेकश्रुत्यन्तरसिद्धं **'ममैव सा परा शक्तिर्देवी विद्येति संज्ञिता'** इति शिववचनसिद्धविद्याभिधानपाठसादेश्यगम्यसम्बन्धोमावल्लभस्येश्वरस्य त्रिमूर्तिभ्यः **'योजयामि प्रकृत्याहं पुरुषं पञ्चविंशकम्'** इति कौर्मोक्तेः प्रकृत्यन्वितात् पञ्चविंशाच्च पृथक्परिगणनेन स्वानुमतञ्च

SANSTHAN DEEMED UNIVERSITY (UNDER MINIS
ACCESSION NO. 216806
DATE 16/6/08

शम्भोस्त्रिमूर्त्यतीतमायोपहितब्रह्मरूपत्वं प्रतिक्षिप्य न विष्णोस्तथात्वविधानक्षमः । अतस्त्रिमूर्त्यन्तर्गतस्यैव तस्य वस्तुकृतसार्वात्म्यख्यापनाय प्रवृत्तस्सन् **'वृष्णीनां वासुदेवोऽस्मि'** इति कृष्णवचनवत् तमपि तद्विभूतिमद्ध्ये गणयतीति वा; **'अथ कैर्मन्त्रैः स्तुतो देवः प्रीतो भवति । एतैर्मन्त्रैर्नित्यं देवं स्तुध्वम्'** इत्युपक्रमोपसंहाराभ्यां स्तुतिपरत्वावसायात्, तदवताररूपे नृसिह्मे **'विरिञ्चनारायणशङ्करात्मने'** इति वचनं, सवितरीव स्तुत्यर्थं ब्रह्माद्यात्मत्वं व्यपदिशतीति वा नेतव्यः । एवञ्च पुराणवचनानि विष्णोरनिरुद्धादि-परत्वतात्पर्येणापि चरितार्थानि न मूर्तित्रयपरत्वं व्यवस्थापायितुं क्षमन्ते । तथा हि - शिवस्य रुद्रविष्णुदुहिणा इव तेषामपि सन्ति व्यूहा जगतां हरणभरण-समुत्पादनेष्वधिकृता वायुसंहितादिप्रसिद्धाः ; ब्रह्मणो विराट्काल- पुरुषाख्यास्त्रयो विष्णोः सङ्कर्षणप्रद्युम्नानिरुद्धाख्याः रुद्रस्य हरमृडभवाख्याः । एते च दक्षमन्वन्तकादिवत्सृष्ट्यादिष्ववान्तराधिकारिणः । एवञ्च विष्णोस्त्रिमूर्तिपरत्वपराणि वचनानि स्वव्यूहत्रयपरत्वपराण्युपपद्यन्ते । तव्द्यूहानामपि सृष्ट्याद्यधिकारादि-सामान्याद्ब्रह्मादिव्यपदेशोपपत्तेः ।

'एका भगवती मूर्तिर्ज्ञानरूपा शिवाऽमला ।
वासुदेवाभिधाना सा गुणातीता सुनिष्कला ।।
द्वितीया रुद्रसंज्ञा स्यात् तामसी शेषसंज्ञिता ।
निहन्ति सकलं चान्या वैष्णवी परमा तनुः ।।
सत्वोद्रिक्ता तृतीयाऽन्या प्रद्युम्नेति च संज्ञिता ।
जगत् स्थापयते सर्वं सा विष्णुप्रकृतिर्ध्रुवा ।।
चतुर्थी वासुदेवस्य मूर्तिर्ब्रह्मेति संज्ञिता ।
राजसी चानिरुद्धाख्या पुरुषः सृष्टिकारिका' '

इति कौर्मे तद्व्यपदेशदर्शनाच्च । एवं ब्रह्मणस्त्रिमूर्तिपरत्ववचनानामप्युपपत्तिरुन्नेया ।

वायुसंहितायां

'तदण्डेऽस्मिन्विवृद्धोभूत् क्षेत्रज्ञो ब्रह्मसंज्ञितः '

इति ब्रह्माणं प्रस्तुत्य

'त्रिधा विभज्य चात्मानं त्रैलोक्ये सम्प्रवर्तते ।
सृजते ग्रसते चैव रक्षते च त्रिभिः स्वयं'

इत्यादिना तद्व्यूहान् प्रदर्श्य

'सत्वं रजश्च ब्रह्मत्वे कालत्वे च तमो रजः ।
विष्णुत्वे केवलं सत्त्वं गुणवृत्तिस्त्रिधा विभोः' इति तद्व्यूहानां गुणविभागश्लोकेष्वपि ब्रह्मादिशब्दप्रयोगाच्च। ननु तर्हि शिवस्य त्रिमूर्तिपरत्ववचनान्यपि संहाररुद्रव्यूह-भूतभवमृडहरपरत्वपराणीति संहाररुद्र एव त्वदभिमतः शिवोऽस्तु । तस्य गुणमूर्तिभ्यः परत्वे न मानमिति चेन्न -

'सृजत्यशेषमीशस्य शासनाच्चतुराननः ।
तिसृभिर्मूर्तिभिश्चापि पाति चान्ते निहन्ति च ।।
विष्णुः पालयते विश्वं विश्वयोनेर्नियोगतः ।
सृजते ग्रसते चापि स्वकाभिस्तनुभिस्त्रिभः ।।
हरत्येतज्जगत्सर्वं हरस्तस्यैव शासनात् ।
सृजत्यपिच विश्वात्मा त्रिधा भिन्नस्तु रक्षति' इति शिवपुराणे स्वस्वव्यूहसहितानां ब्रह्मविष्णुरूद्राणां शिवनियोगेन स्वस्वकृत्ये प्रवृत्त्युपन्यासेन तत्रैव योगेश्वराख्यपूजाविधौ स्वस्वव्यूहावरणकानान्तेषां शिवावरणे पूजाविधानेन, योगयाज्ञवल्क्ये तत्तद्रूपोपन्यासेन, प्रसिद्धानेव ब्रह्मादीन् प्रस्तुत्य सदाशिवस्य तेभ्यः परत्वकथनेन च तस्य त्रिमूर्त्यतिरेकसिद्धेः । एवं तर्हि विष्णुपुराणे **'यस्य प्रसादादहमच्युतश्च'** इत्यादिब्रह्मवचनाद्विष्णोस्त्रिमूर्त्यतिरेकः कुतो न सिध्येत्, न हि ब्रह्मवक्तृके वाक्येऽनिरुद्धे अहंशब्दप्रयोग उपपद्यत इति चेन्न । अहंकाराभिमानित्वादनिरुद्धस्य । **'वैकारिकस्तैजसश्च तामसश्चेत्यहं त्रिधा'** इत्यत्रेव तत्रापि नामैकदेशत्वेनाहं-शब्दप्रयोगोपपत्तेः । तस्य वक्तृपरत्वेऽपि **'यस्माच्च मध्ये पुरुषः पुराणः'** इत्यत्र पुरुषपदस्य प्रद्युम्नपरत्वेनाप्युपपत्या ततः श्रुत्यननुरोधिनोविष्णोस्त्रिमूर्ति-परत्वस्यासिद्धेः । विष्णुपुराण एव पुराणप्रतिपाद्यं नारायणं प्रस्तुत्य **'सपरः सर्वशक्तीनां ब्रह्मणः समनन्तरः ।'** इति तस्य जगत्कारणब्रह्मापरत्वोक्तेः । भागवतोपक्रमे च ।

'तस्मादेकेन मनसा भगवान् सात्वतां पतिः ।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ।।'

इत्यादिना भगवतः श्रवणादिकं विधाय कोऽसौ भगवानिति जिज्ञासायां **'सत्वं रजस्तमः'** इत्यादिश्लोकेन सत्वगुणोपहितं परमपुरुषांशं श्रेयस्कारानुवादेन प्रागुपक्षिप्तनियतभजनीयतोपपादनपूर्वकं भगवन्तं विधाय, **'भेजिरे मुनयोऽथाग्रे'** इत्यादिना तद्भजनस्य क्रममुक्तिफलत्वमुपपाद्य, तस्य सकलवेद-

प्रतिपाद्यत्वादिकमुक्त्वा **'जगृहे पौरुषं रूपम्'** इत्यादिना तस्य लीलाविग्रहसद्भावं प्रतिपाद्य **'एतन्नानावताराणां निदानं बीजमव्ययम्** ।' इति तस्य सकलवैष्णवावतारमूलविग्रहत्वप्रदर्शनेन सत्वोपहितपरमपुरुषांश एव परं विष्णुतत्वमिति स्फुटीकरणात् । पराशरपुराणे **'माहेश्वरपुराणानि'** इत्यादिना शैवपुराणानां परमशिवसंहाररुद्रोभयपरत्वमुक्त्वा

'वैष्णवानि पुराणानि समस्तानि महामुने ।
त्रिमूर्तीनां हरेर्नाम्ना मूर्त्या तस्य परं पदम् ।।
प्रवदन्ति पुराणे द्वे बाह्ये चैवानया दिशा।'

इति वैष्णवपुराणानां त्रिमूर्त्यन्तर्गत एव विष्णौ पर्यवसानोक्त्या स एव परं तत्त्वमिति स्फुटीकरणाच्च । तस्माद्युक्तस्तुरीयः परशिव एवेति निर्णयः ।

अथ वाऽस्तु तुरीयकोटावपि नारायणमूर्तिः, न हि तुरीयकोटावेकरूपैव मूर्तिर्ब्रह्मण इति नियमस्तत्रैवाविगीतसकलशैवपुराणप्रसिद्धेः, **'गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदः'** इत्याद्यभियुक्तोक्तेश्च भवानीमूर्तेरपि सद्भावात्, इहापि **'परिष्कुर्वन् साम्बं वपुः'** इति तथैवाभ्युपगमाच्च । किन्तु स पराशक्तेर्भवान्या एव पुंरूपो विलासः ।

'एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा विनियोगकाले ।
भोगे भवानी पुरुषेषु विष्णुः कोपे तु काली समरे तु दुर्गा ।।'

इत्यागमिकोपदेशात्,

'उमा या स हरिः साक्षाद्यो हरिः सा शिवा स्मृता ।'

इत्यादिवचनात्,

'प्रकृतिस्त्वं पुमान् रुद्रः त्वयि तद्वीर्यमाहितम् ।
त्वन्नाभिपङ्कजाज्जातः पञ्चवक्त्रः पितामह ।।'

इति ब्रह्माण्डपुराणे

'नावयोर्विद्यते भेदो मच्छक्तिस्त्वं न संशयः ।
त्वं चन्द्रमा अहं सूर्यः शर्वरी त्वमहं दिनम् ।।'

इत्यादित्यपुराणे च विष्णोः शिवशक्तित्वव्यपदेशात् । कौर्मवासिष्टलैंगादित्यपुराणादिषु शिवनारायणयोर्भार्यापतिभावेन देवदारुवनप्रवेशोपवर्णनात् तत्प्रकरणे

'या तस्य पार्श्वगा बाला सा पार्वत्यंशजो हरिः ।'

उत्याद्युक्तेः , लैंगपुराणे
'एष बीजी भवान् बीजमहं योनिः सनातनः ।
स एवमुक्तो विश्वात्मा ब्रह्मा विष्णुमपृच्छत ।।
भवान्योनिरहं बीजं कथं बीजी महेश्वरः ।
एनं मे सूक्ष्ममव्यक्तं संशयं छेत्तुमर्हसि ।।
ज्ञात्वा विविदिषोत्पत्तिं ब्रह्मणो लोकतन्त्रिणः ।
इमं परमसूक्ष्मार्थे प्रश्नमभ्यवदद्धरिः ।।
कस्मान्महत्तरं भूतं गुह्यमन्यत्र विद्यते ।
महतः परमं धाम शिवमध्यात्मिनां पदम् ।।
द्वैधीभावेन चात्मानं प्रविभज्य व्यवस्थितम् ।
निष्कलं सूक्ष्ममव्यक्तं सकलस्तु महेश्वरः।।
कस्य मायाविधिज्ञस्य अगम्यगहनस्य च ।
पुरा लिंगादभूद्बीजं प्रथमं त्वादिसर्गिकम् ।
मम योनौ समासक्तं तद्बीजं कालपर्ययात् ।
हिरण्मयमकूपारे योन्यामण्डमजायत ।।'

इति विष्णोः शिवक्षेत्रत्वस्फुटीतकणाच्छिवकेशवयोः शिवनाभशिलायां लिङ्गक्षेत्रयोः सन्निधानेन हरिहरात्मके रूपे हरेर्वामार्द्धत्वेन च लिंगेनास्यार्थस्य स्फुटीकरणात् ।।

"योऽयं चकास्ति गगनार्णवरत्नमिन्दुर्योऽयं सुरासुरगुरुः पुरुषः पुराणः ।
यद्वाममर्द्धमिदमन्तकसूदनस्य देवि त्वमेव तदिति प्रतिपादयन्ति ।।"

इत्यभियुक्तोक्तेश्च । एवञ्च तुरीयकोटिनिविष्टस्यापि नारायणस्य भवानीवदेव शिवोपसर्जनत्वादिह व्यवस्थापनीयस्य शिवमूर्तेः सर्वतः परत्वस्य न विरोधः ।

मतद्वयमुपन्यस्तं विष्णुतत्त्वविनिर्णये ।
यदत्र युक्तं तद् ग्राह्यं विमृश्य विबुधोत्तमैः ।।
मतद्वयेऽपि भगवानम्बिकारमणः शिवः ।
अशेषब्रह्ममूर्तीनामादिभूतो जगत्पतिः ।।
भैरवाद्या हरस्येव मत्स्याद्याः श्रीपतेरिव ।
ब्रह्मविष्णुहरास्तस्य कलाभेदा इति स्थितम् ।।
एवञ्च यद्यपीशस्य चन्द्रखण्डशिखामणेः ।

उत्कर्षः सर्वदेवेभ्यस्तत एव प्रसिद्ध्यति ।।
तदाश्रयाणां वचसां शिष्टाकोपोदितान्नयात् ।
सर्वेषामाश्रयबलाद्बलवत्त्वावधारणात् ।।
इतरेषाञ्च देवानां श्रुतिषु स्मरणेषु वा ।
तत्साम्याधिक्यवचसां गुणवादत्वकल्पनात् ।।
किमग्निष्टोमतुल्यत्वे श्रुतेऽपि सति तत्समम् ।
अग्निहोत्रं भवेत्तस्य कर्मभूयस्त्वनिर्णये ।।
'भारतं सर्ववेदाश्च तुलामारोपिताः पुरा ।
देवैर्ब्रह्मादिभिस्तत्र त्वत्यरिच्यत भारतम् ।।
इति वेदेभ्य उत्कर्षे भारतस्य स्मृतेऽपि च ।
किं वा भवेत्तत्सर्वेभ्यो वेदेभ्यो बलवत्तरम् ।।
'मतिमन्थानमावेश्य येन वेदमहार्णवात् ।
प्रकाशो जनितो लोके महाभारतचन्द्रमाः ।।
इत्यादिवचनैर्न्याय्यैर्वेदमूलत्वनिर्णये ।
भारताधिक्यवचसामर्थवादत्वकल्पनात् ।।
तथाऽपि भवति भ्रान्तिः केषाञ्चिन्मन्दचेतसाम् ।
अवैदिकमताभ्यासधृष्टानां वा दुरात्मनाम् ।।
सत्वाद्युपहितेभ्योऽयं मायी भिन्नोऽस्तु शंकरः ।
तथाऽप्यैश्वर्यविश्रान्तिरन्यत्रैव भवत्विति ।।
उक्तैषा प्रक्रियाऽथर्वशिखादिश्रुतिमूलिका ।
तासामन्यार्थकत्वे तु नैवेयं सिद्ध्यतीति वा ।।
अतः श्रुतीनां सर्वासां सह सर्वोपबृह्मणैः ।
परभावे भगवतस्तात्पर्यं कथ्यते क्रमात् ।।

अपास्य ब्रह्मादीनमरवर, सर्वानपि सुरान्
प्रसूता भूताद्यैः प्रमितविभवास्ते परमिति ।
निदानं त्वां सर्वेश्वरमपि च निर्द्धार्य विदधे
शिखा सद्भिर्ध्येयं शिव, तदपि मुह्यत्यतिलघुः ।। १४।।

अथर्वशिखायां **'किन्तध्यानं को वा ध्याता कश्च ध्येयः'** इत्युपक्रमस्थप्रश्नानुरोधेन ध्यानध्यातृनिरूपणानन्तरं ध्येयनिर्धारणार्थमाम्नायते **'ध्यायीतेशानं प्रध्यायितव्यं सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्ते सर्वाणि चेन्द्रियाणि सह भूतैर्न कारणं कारणानां धाता ध्याता कारणन्तु ध्येयः सर्वैश्वर्यसम्पन्नः सर्वेश्वरश्च शम्भुराकाशमध्ये'** इत्यादि **'शिव एको ध्येयः शिवङ्करः सर्वमन्यत् परित्यज्य समाप्ताऽथर्वशिखा'** इत्यन्तम् । अत्र योगरूढ्या परमशिवे वर्तमानस्येशानशब्दस्य ताच्छील्यार्थे चानशः शक्ततया योगेन स्वाभाविकनिरतिशयैश्वर्यपरत्वाद्रूढ्या परमशिववाचित्वाच्च सर्वोत्कृष्टफलार्थिभिः सर्वातिशाय्यैश्वर्यः परमशिवो ध्यातव्य इति भावेनशानशब्देन विशेष्यनिर्देशः कृतः । प्रध्यायितव्यमित्याधिक्येन ध्येयतार्हदत्वेन स्तुतिः । अतः किमन्ये न तादृशाः येनैवमवधारणं बाढमिति ध्वनयितुं देवमनुष्यादिरूपे सर्वप्रपञ्चे ब्रह्मादीनां चतुर्णां प्रामुख्यमुक्त्वा तेषामप्यैश्वर्य-परिच्छेदसूचनाय तदुपपत्तितया दीपकेन सहोक्त्या च भूतेन्द्रियादितौल्येन तेषामुत्पत्तिमत्त्वं दर्शितं सर्वमिदमित्यारम्य सह भूतैरित्यन्तेन । यद्येतत् परमशिवस्यापि स्यान्न स्यात्तस्यापि तद्वदेव ध्येयत्वमित्याशंक्योक्तं न कारणं कारणानां धाता ध्यातेति । प्रसूयत इति वचनविपरिणामेनानुषङ्गः । तथाचायमर्थः -- ब्रह्मादीनां प्रसूत्युक्ति-सामर्थ्याद्यत्तेषामर्थसिद्धं कारणं तद्रूपः कारणानां ब्रह्मविष्णुरुद्राणां मन्त्रोपनिषदुक्तानां कालादीनां वा धाता स्रष्टा । ध्याता आदिसर्गसङ्कल्पकर्ता । एवंभूत ईशानः कुतोऽपि न संप्रसूयत इति । यद्यप्यनेन ब्रह्मादीनां यदर्थलब्धं कारणं तन्न प्रसूयत इत्येतावदेव प्रतीयते न त्वीशान इति तथाऽपि तस्य ध्येयत्वं विधाय ब्रह्मादीनां ध्येयत्वव्यवच्छेदार्थं तेषु दोषोद्भावनानन्तरं तर्हि तद्दोषसद्भावे तस्यापि ध्येयत्वं न स्याद्दित्यवसरप्राप्तशङ्काव्यवच्छेदाय तत्रैव तद्दोषस्य प्रत्याख्यातव्यत्वा-दन्यथान्तरालवाक्यं परित्यज्य 'विष्णुरुपांशुयष्टव्यः इत्यादिवाक्यानां यागविधायकत्वस्वीकारे उपक्रमसंकीर्तितपुरोडाशद्वयनैरन्तर्यप्रयुक्तजामितादोषपरिहारा-लाभात् तत्र वाक्यछायाया इवेहाप्यसांगत्यापत्तेः । प्रागेव वाक्यप्रवृत्तिभंग्येशाने ब्रह्मादिषूद्भावितदोषपरिहारे तात्पर्यावसायात्, ब्रह्मदीनामर्थलब्धे कारणे तत्परिहारः सामर्थ्यादीशान एव ब्रह्मादीनां कारणमिति गमयतीति तस्यैव तत्र प्रसूत्यभाव उपन्यस्त इति निर्णीयते । किञ्च केवलयौगिकत्वेनेह प्रयुक्तयोर्धातृध्यातृशब्दयोः कारणं त्वित्यत्र तुशब्दस्वारस्येन तत्र वाक्यारम्भप्रतीतेरिहैव वाक्येऽन्वितयोः स्वतो लिंगव्यवस्थाशून्यतयाऽन्यलिंगग्राहिणोः स्वसमानाधिकृतव्यवस्थितलिंगकारणशब्द-

लिंगग्राहित्वे नपुंसकलिंगापत्तेः । श्रुतपुल्लिंगनिर्वाहाय पुंल्लिङ्गविशेष्यापेक्षाया-माकांक्षितार्थसंघटनानुकूलसन्निधिश्रुतशब्दानुषङ्गे सम्भवत्यतादृशशब्दान्तराध्याहारा-योगादीशानशब्दानुषङ्गस्यावश्यकत्वेन शिवस्यैव सामर्थ्यसिद्धब्रह्मादिकारणत्त्व-सिद्धवत्कारेण तत्र प्रसूत्यभाव उपन्यस्त इति निश्चीयते । अत एवानन्तरवाक्ये कारणमित्यस्य शम्भुपदसामानाधिकरण्यं दृश्यते । 'तत्र चाकाशमध्ये, इत्युपासनास्थानकथनं परमाकाशरूपपरशिवलोकाभिप्रायम् । तेन हृदयकमल-रविबिम्बादिषु यत्र यत्र शिवस्य ध्यानं तत्र सर्वत्रापि ज्योतिर्मयं कैलासविभाव्यं तन्मध्यवृत्तित्वेन शिवो ध्येय इति विदितं भवति । 'सर्वेश्वरः' इति शिवनामत्वेन प्रयोगः **'ओङ्कारं सर्वेश्वरं द्वादशान्ते'** इति तापनीयप्रयोगेण । पुराणप्रसिध्द्या च तस्य तन्नामत्त्वावसायात् । न तु सर्वैश्वर्यपरत्वेन ; प्राचीनविशेषणेन पौनरुक्त्यापत्तेः । यद्वा यौगिकत्वे पूर्वपदेन रूढत्वे उत्तरपदेन योगरूढिमत्वे पदद्वयेन च पौनरुक्त्यापत्तेः तत्स्ववाच्यत्वं लक्षयति **'रविकिरणानुगृहीतानि भवन्ति कमलानि कमलानि'** इत्यत्र द्वितीयकमलपदमिव कमलगुणजातं । ततश्च शंभुर्न केवलं प्रसूतिरहित-ब्रह्मादिकारणात्मत्वादपरिच्छिन्नैश्वर्यः अपि त्वनन्यसाधारणसर्वेश्वरशब्दवाच्यत्वादपीति सर्वेश्वरश्चेत्यभिप्राय इति सोपपत्तिकस्सर्वैश्वर्यानुवादः । एवमुक्तिभंग्या ब्रह्मादीन् परित्यज्य शिव एव ध्येय इति निर्दशितं भवति । अमुमेवार्थं कण्ठोक्त्याऽपि स्फुटयति 'शिव एको ध्येयः इत्यादिना । एवमस्याः श्रुतेरर्थमुपबृह्मणान्येव स्फुटयन्ति । तथाहि - शिवपुराणे तावच्छिवसर्वोत्कर्षनिर्धारणप्रकरणे पठ्यते ।

'यस्मात् सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम् ।
सह भूतेन्द्रियैः सर्वैः प्रथमं सम्प्रसूयते ।।
कारणानाञ्च यो धाता ध्याता परमकारणम् ।
न सम्प्रसूयतेऽन्यस्मात् कुतश्चन कदाचन ।।
ससर्वैश्वर्यसंपूर्णो नाम्ना सर्वेश्वरः स्वयम् ।
सर्वैर्मुमुक्षुभिर्ध्येयश्शंभुराकाशमध्यगः ।।' इति ।

अत्र सर्वमिदमित्यारभ्य सहभूतैरित्यन्तस्यार्थप्रदर्शके प्रथमश्लोके मूलवाक्ये अशब्दगृहीतोऽपि शिवादुत्पद्यन्त इत्ययमर्थ उत्तरवाक्यपर्यालोचनया सामर्थ्यात् सिद्ध इति सिद्धं कृत्वा यस्मादिति निर्दिष्टम् । द्वितीयश्लोकेन न कारणं कारणानां धाता ध्यातेत्येतावदेकं वाक्यं क्रियानुषङ्गश्चेति दर्शितम् । तृतीयश्लोकेन नाम्ना सर्वेश्वरः

स्वयमिति सर्वेश्वरशब्दस्य शिवनामत्वोपन्यासेन स्वयं सर्वेश्वरशब्दवाच्य इत्यनन्यसामान्यं नामैव तस्य सर्वेश्वरत्वं ख्यापयतीत्येतदर्थपरत्वप्रदर्शनेन वा पुनरुक्तिः परिहृता ।

हरिवंशे च कृष्णकृतशिवस्तोत्रे पठ्यते -

'अहं ब्रह्मा कपिलोऽथाप्यनन्तः पुत्रास्सर्वे ब्रह्मणश्चातिवीराः ।
त्वत्तः सर्वे देवदेव प्रसूता एवं सर्वेशः कारणात्मा त्वमीड्यः ।।' इति ।

अत्र कपिलादिग्रहणम् **'ऋषिं प्रसूतं कपिलं यस्तमग्रे'** इत्यादिश्रुत्यन्तरार्थोपसंहारेण । एवङ्कारणात्मेत्यन्वयः, कारणत्वप्रकारस्यैव प्रदर्शनात् । तथाच ब्रह्मादिकारणात्मकत्वात् त्वं सर्वेश्वरस्ततश्च सर्वैरीड्य इति कारणत्वादीनामुपपाद्योपपादकभावेनान्वयः स्फुटीकृतः । एवं

'ब्रह्मविष्ण्वग्निशक्रार्कजलभूमिपुरोगमाः ।
सुरासुरास्सम्प्रसूतास्त्वत्तः सर्वे सुरेश्वर ।।'

इत्यादीनि ब्रह्माण्डपुराणादिदृष्टान्युपबृह्मणान्युदाहर्तव्यानि । तदेवं श्रुतावेव ब्रह्मादिनिखिलदेवताव्यवच्छेदेन शिवस्य सर्वेश्वरत्वव्यवस्थापनात्तदधिकदेवतान्तरजल्पनं बालिशानां व्यामोहविलासएवेत्यर्थः ।

ननु **'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्' 'इन्द्रो यातोवसीतस्य राजा विश्वस्मादिन्द्र उत्तरः' 'अग्निरग्रे प्रथमो देवतानाम्'** इति श्रुतिषु देवतान्तराणामप्यपरिच्छिन्नमैश्वर्यं श्रूयते । उच्यते । बहूनां विकल्पेन न सर्वेश्वरत्वसम्भवः, वस्तुनि विकल्पायोगात् । नापि समुच्चयेन, परस्परेशितृत्वापत्तेः । नापि कल्पभेदेन व्यवस्थया ; सर्वेषामैश्वर्यस्य कालतः परिच्छिन्नतया न कस्यापि सर्वेश्वरत्वमिति दोषापातात् । तस्मात्तादृशेषु वचनेषु कानि चित् प्रतीतार्थपराणि कानि चिदन्यथा नेयानीति सर्वैरभ्युपगन्तव्यम् । तत्रेदम्पराणि• वचनानि प्रतीतार्थपराण्यन्यपराण्यन्यथा नेयानीत्यस्मद्बुद्धिकल्पितैर्न्यायैर्व्यवस्थापनाऽयोगादुपबृह्मणानुसारेण व्यवस्थापनीयानि । पुरुषबुद्धीनामव्यवस्थितमर्यादत्वेन तदुन्नीतैर्न्यायैस्तथाऽर्थव्यवस्थित्यसिद्धेः,

**'बिभेत्यल्पश्रुताद्वेदो मामयं प्रतरिष्यति ।
इतिहासपुराणाभ्यां वेदं समुपबृह्मयेत् ।।**
वेदार्थो यः स्वयं ज्ञातस्तत्राज्ञानं भवेदपि ।
ऋर्षिभिर्निश्चिते तस्मिन् का शङ्का स्यान्महात्मनाम् ।।'

इति व्यासवचनाच्च । तथाचोदात्दृतोदाहरिष्यमाणवहूपबृह्मणदार्ढ्यादथर्वशिखायाः प्रतीतार्थपरत्वं तादृशोपबृह्मणरहितानां देवतान्तरैश्वर्यविषयाणां श्रुत्यन्तराणां मानांतराविरुद्धसंकुचिततत्तदैश्वर्यपरत्वञ्च युक्तमभ्युपगन्तुम् ।

वस्तुस्थितिस्तावदियं । यस्तु न्यायेन बलाबलविचारं विना न परितुष्यति तं प्रति ततोऽप्यस्याः श्रुतेर्बलवत्त्वं व्यवस्थापयति ---

श्रुतं पूर्णैश्वर्यं क्वचिदपि हि तत् केवलमिदं
विरोधे सङ्कोचं विमलगुण, शक्यं गमयितुम् ।
न युक्त्यैवङ्ककारं नलिनजमुखाद्दैवतगणा
द्व्यवच्छिद्यैतस्यां भवति भव, चिख्यापयिषितम् ।।१५।।

अयं भावः - विरुद्धयोरनन्यथासिद्धमन्यथासिद्धाद्बलवदिति सर्वसिद्धम् । **'हस्तेनावद्यति'** इत्यादावनन्यथासिद्धलिङ्गविरोधेनातथाभूतायाः श्रुतेरपि सङ्कोचाभ्युपगमात् । अन्यथासिद्धञ्च देवतान्तरैश्वर्यपरमुदाहृतमन्यच्च तत्प्रकारापन्नं वचनजातम् । तद्धि चातुर्मास्यफले क्षयिष्णुन्यक्षय्यत्वव्यपदेशवच्छक्यं संकुचितार्थ-परत्वे नेतुम् । यत्तु ब्रह्मादीनां ध्येयत्वव्यवच्छेदाय तेषु परिच्छिन्नैश्वर्यत्वं दोषमुद्भाव्य तत्परिजिहीर्षया ध्येयत्वेनोपदिष्टस्य शम्भोरपरिच्छिन्नमैश्वर्यं प्रतिपादयितुं प्रवृत्तं तत्तु संकुचितैश्वर्यपरत्वेऽन्यत्रोद्भावितदोषपरिहारालाभेन सङ्कोचासहिष्णुत्वादस्य लोकस्य सामगतिपरम्पराविश्रान्तिभूमित्वव्यावर्तनाय तत्रान्तवत्वदोषोद्भावनानन्तरं तथात्वेन प्रतिपादितस्याकाशस्य तद्दोषपरिजिहीर्षयाऽनन्तत्वप्रतिपादनाय प्रवृत्तं **'स एषोऽनन्तः'** इति वाक्यमिवानन्यथासिद्धम् । अत एव तत्प्रतिपादितानन्ततत्वलिङ्गस्य त्रिदशामरन्यायेन नेतुमशक्यतयोपक्रमस्थत्वात् स्वतश्च बलवतीमपि भूतभेदाभिधानश्रुतिं सम्भावितवृत्त्यन्तरत्वेनान्यथासिद्धेत्यविगणय्य तत्राकाशशब्दोदितः परमात्मेति निर्णीतम् **'आकाशस्तल्लिङ्गात्'** इत्यत्र । यदेवमनन्यथासिद्धं लिङ्गं स्ववाक्योपक्रमस्थायाः श्रुतेरपि बाधकं तदा का कथा तादृशं शिवैश्वर्यप्रतिपादनं देवतान्तरोत्कर्षपराणां श्रुत्यन्तराणां सङ्कोचकमिति । तदेवं बलाबले दैवतगणाद्व्यवच्छिद्य चिख्यापयिषितं केवलं श्रुतमिति दर्शिते । किञ्च यो गुणो यतो व्यवच्छिद्य यत्र प्रदृश्यते स तयोः समान इति वा विपरीतस्थानगतोत्कर्षापकर्ष इति वा

न युक्तमभ्युपगन्तुमिति ब्रह्मादिभ्यस्तावदैश्वर्योत्कर्षः शिवस्य दुर्वारः । तथा च तस्यैव निरतिशयोत्कर्षसिद्धिर्देवतान्तराणां तेभ्योऽपकृष्टैश्वर्यत्वात्, अन्येषामैश्वर्यन्तु शिवाद्व्यावर्त्य न प्रतिपादितमिति न तत्रैतादृशं बलवत्त्वम् । तदेतन्नलिनजमुखादिति विशेषणेन दर्शितम् । अपि चेह ब्रह्मादीनां परिमितैश्वर्यत्वं शिवस्यापरिमितैश्वर्यत्वञ्चोपपत्तिमुखेनोपन्यस्तम् । उपपत्तिश्च प्रबलं तात्पर्यलिङ्गम्, न तथाऽन्यत्र देवतान्तराणामित्यतोऽप्यस्या बलवत्त्वम् । तदिदमुक्तं न युक्त्येति । अस्य व्यवच्छिद्य चिख्यापयिषितमित्युभयोरप्यन्वयः । केवलं श्रुतमित्यस्यान्यत्रोद्भावितदोषपरिजिहीर्षां शिवाद्व्यवछेदमुपपत्त्युपन्यासञ्च विनेत्यर्थः । किंचेह शिवस्यैश्वर्यं मोक्षशास्त्ररूपतया मुसुक्षूपास्यपरदेवतानिर्धारणप्रधानायामुपनिषदि प्रधानेषु मन्त्रेष्वित्यतोऽप्यस्याः प्राबल्यम् । अपि च 'कारणन्तु ध्येयः' इत्याद्युक्त्यनन्तरमिह **'समाप्ताऽथर्वशिखा'** इति श्रुत्यन्तराणामिव विरामादेव ज्ञातुं शक्याया स्वसमाप्तेः कण्ठत उक्तिरितः परं वक्तव्याभावस्फोरणेन प्रतिपादितस्य शिवस्य निरतिशयैश्वर्यस्येतरव्यवच्छेदेन तद्ध्यानविधानस्य च तत्वार्थनिष्कर्षरूपत्वं परमहितोपदेशरूपत्वञ्च व्यञ्जयितुमित्यतोऽप्यस्याः प्राबल्यम् । श्रुत्यन्तरेष्वेवं देवतान्तरैश्वर्योपवर्णनस्य भूतार्थवादत्वानभिव्यंजनादिति । तदेवं-प्राबल्यद्वयमेतस्यां क्वचिदपीति ग्रहणेन ध्वनितम् । एतेन **"पतिं विश्वस्यात्मेश्वरम्'** इति नारायणोपनिषदि श्रवणात्, **'अग्निर्वै देवानामवमो विष्णुः परमस्तदन्तरेण सर्वा अन्या देवताः'** इति बह्वृचब्राह्मणे सर्वदेवतोत्कर्षोपदेशात्, लौगाक्षिगृह्ये **'अग्नये पृथिव्यधिपतये स्वाहा'** इत्यारभ्य **'ब्रह्मणे लोकाधिपतये स्वाहा'** इत्यन्तैर्मन्त्रैरग्निसोमवायुसूर्येन्द्रयमवरुणकुबेरमहासेनरुद्रब्रह्मणां पृथिवीनक्षत्रान्तरिक्षद्युसुरप्रेतसलिलंयक्षसेनाभूतलोकानामेकैकाधिपत्यप्रदर्शनानन्तरं **'विष्णवे सर्वाधिपतये स्वाहा'** इत्यसंकुचितसर्वाधिपत्यप्रदर्शनाच्च नारायणमूर्तावेव निरतिशयैश्वर्यविश्रान्तिः " इति मतं निरस्तम् । **'पतिं विश्वस्य '** इत्यस्य **'विश्वस्मादिन्द्र उत्तरः'** इत्यादेरिव सङ्कोचसहिष्णुत्वात्, **'अग्निरवमः'** इत्यादेराग्नावैष्णवपुरोडाशार्थवादस्य **'अग्निर्मुखं प्रथमो देवतानाम्' 'अग्निरग्रे प्रथमो देवतानाम् ' 'अग्निरेतु प्रथमो देवतानाम् ' 'अग्निस्सर्वा देवताः' 'राजानौ वा एतौ देवतानां यदग्नीषोमौ'** इत्यादिश्रुतिभिः,

'यथाऽग्निर्देवतानां स्यादृतूनां कुसुमाकरः ।
द्विपदां ब्राह्मणः श्रेष्ठः ।।'

इत्यादिस्मृतिभिः **'हुताशनपुरोगमाः'** इत्यादिविष्णुपुराणादिलिङ्गैरुपांशुयाजदेवता-

विचारे मुख्यत्वादग्निर्देवतेति पूर्वपक्षप्रदर्शनपरेण जैमिनिसूत्रेण चाग्नेरुत्कर्षप्रतीतेः सर्वदेवतान्यूनत्वायोगादग्निरवम इत्यंशे कांश्चिद्देवताविशेषान् प्रत्यग्नेरवमत्वपरतया संकुचितार्थत्वस्य सदालम्बनार्थवादरूपत्वस्य वा वक्तव्यतया तत्समानयोगक्षेमे 'विष्णुः परमः' इत्यंशेऽपि तथात्वस्य सुवचत्वात् ।

नचैवं सति **'ग्रहणार्थञ्च पूर्वमिष्टेस्तदर्थत्वात्'** इति प्रसङ्गलक्षणे सोमाङ्गभूतास्विष्टिष्वग्न्यन्वाधानं कार्यन्न वेति संशये **'ममाग्ने वर्च इति पूर्वमग्निं गृह्णाति देवता एव पूर्वेद्युर्गृहीत्वा श्वोभूते यजते'** इति प्रकृतौ तस्य देवतापरिग्रहार्थत्वोक्तेः, तास्वपि यक्ष्यमाणदेवतापरिग्रहार्थं तत् कर्तव्यमिति पूर्वपक्षे प्राप्ते **'आग्नावैष्णवमेकादशकपालं निर्वपेद्दीक्षिष्यमाणोऽग्निरवमो देवतानां विष्णुः परमो देवता एव तदुभयतः परिगृह्य दीक्षते'** इति दीक्षणीयाया- यक्ष्यमाणदेवतापरिग्रहार्थत्वश्रवणात्, **'दीक्षा सोमस्य'** इति श्रुतेस्तस्याः प्रधानभूतसोमयागार्थत्वेऽपि वैश्वदेवग्रहे सर्वदेवतासमवायात् तत्परिग्रहं कुर्वत्या तया प्रसङ्गादङ्गदेवतापरिग्रहस्यापि सिद्धेः कृतकार्यत्वान्न तासु तत् कर्तव्यमिति सिद्धान्तितस्यार्थस्याग्निरवम इत्यादेः संकुचितार्थपरत्वेऽसदालम्बनार्थवादरूपत्वे वा स्थित्यसम्भवात् प्रायणीयादिष्वप्यग्न्यन्वाधानानुष्ठानप्रसङ्ग इति वाच्यम्, विहरणानन्तरमग्नीनामानुपूर्व्येण बलवदिन्धनाधानरूपस्य तस्याग्निधारणे दृष्टे प्रयोजने सम्भवति न्यायविरुद्धं वाक्यशेषमात्रमवलम्ब्यादृष्टदेवतापरिग्रहार्थत्वकल्पनायोगात् -- सोमे सोमार्थं विहृतस्याग्नेर्धारितस्य सत्त्वेन प्रसङ्गसिद्धाग्निधारणरूपस्वकार्यत्वादेव तदङ्गेष्विष्टिष्वग्न्यन्वाधानाप्राप्तेः । द्वादशेऽप्युदाहृताधिकरणात् पूर्वतरे **'धारणार्थत्वात्सोमेऽग्न्यन्वाधानन्न विद्यते'** इत्यधिकरणे तथैव स्थितेः । उदाहृताधिकरणस्य चाविवक्षितार्थं वाक्यशेषमवलम्ब्य पुनराक्षेपे तादृशमेव वाक्यशेषान्तरमालम्ब्य तत्समाधानार्थतयाऽभ्युपेत्यवादरूपत्वस्य मीमांसकैस्तत्रैव व्यवस्थापनात्, अग्न्यवमत्वादिवचनस्य चोभयतः परिग्रहेऽपि सर्वपरिग्रहा- सम्भवेनाग्न्यवमत्वाद्ययोगेन चाविवक्षार्थत्वस्य स्पष्टत्वात्, लौगाक्षिगृह्याम्नात- मन्त्राणाञ्च कृच्छ्राङ्गेषु द्वादशसु होमेषु प्रत्येकं विनियुक्तानां **'अर्थैकत्वादेकं वाक्यम्'** इति यजुःपरिमाणनिर्णायकसूत्रोक्तन्यायेन भिन्नभिन्नवाक्यतया सम्भूयैकार्थपरत्वाभावात्। प्रत्येकं चतुर्थ्यन्तानां पृथिव्यधिपतय इत्यादीनामग्न्यादिविशेषणपदानां सम्भूयाग्न्यादिभ्यो व्यवच्छिद्य विष्णौ सर्वैश्वर्यव्यवस्थापने सामर्थ्याभावाच्च शिखावाक्यान्तर्गतपदानामिव

केभ्यश्चिद्व्यवच्छिद्य क्वचित् सर्वैश्वर्यप्रतिपादने तात्पर्याभावात् केवलं 'विष्णवे सर्वाधिपतये' इत्यस्य बलवद्विरोधेन सङ्कोचसहिष्णुत्वात्, एषु मन्त्रेषु रुद्रातिरिक्तानमिन्द्रादीनां लोकपालत्वेन रुद्रस्यापि लोकपालत्वावगमात्, लोकपालस्य च कूर्मपुराणे मेरूपरिस्थितलोकपालपुराष्टकपरिगणनप्रस्तावे

'तस्याश्च पूर्वदिग्भागे शङ्करस्य शुभा पुरी ।
नाम्ना यशोवती पुण्या सर्वेषां सुदुरासदा ।।
तत्रेशानस्य भवनं रुद्रविष्टतनोः शुभम् ।
गणेश्वरस्य विपुलं तत्रास्ते सगणैर्वृतः ।।'

इति शिवकलाविर्भावयुक्तगणनाथविशेषत्वोक्तेरिह शिवाद्व्यवच्छिद्य विष्णोरैश्वर्यं प्रतिपादितमिति शङ्काऽनवकाशाच्च। तस्मादथर्वशिखानुसारेण शिवस्यैव निरतिशयैश्वर्यसिद्धिरिति निरवद्यम् । अस्याः सर्वतो बलीयस्त्वात् ।

ननु भवत्वेवमेषा बलीयसी, तथाऽप्येतत्प्रतिपाद्यः पुरुषोत्तम इति ततस्तस्यैव निरतिशयैश्वर्यसिद्धिरित्यस्तु - तथाहि परे कल्पयन्ति "अस्याः उपक्रमे प्रणवस्य तिसृणां मात्राणां पीतशुक्लकृष्णवर्णत्वं त्रिमूर्तिदैवतत्वञ्चोक्त्वा चतुर्थ्या अर्धमात्रायास्सर्ववर्णत्वं पुरुषदैवतत्वं चोक्तं, सच पुरुषः पुरुषोत्तम एव, तस्य पुरुषशब्दाभिधेयत्वप्रसिद्धेः सर्ववर्णत्वलिङ्गाच्च; तदीयविश्वरूपविग्रहस्य 'नानावर्णाकृतीनि च' इति सर्ववर्णत्वप्रसिद्धेः। 'तस्य हैतस्य पुरुषस्य रूपं यथा महारजतं वासो यथा पाण्ड्वाविकं यथेन्द्रकोपः' इत्यादिश्रुतेश्च । एवञ्च 'वेदो वेति' नयात् प्रबलस्योपक्रमस्य श्रुतिलिङ्गाभ्यां पुरुषोत्तमपरत्वनिर्णये तदनुरोधेनोपसंहारस्थाः शिवादिशब्दा योगादिना ' शाश्वतं शिवमच्युतम्' इत्यादिवत्तत्रैव वर्तयितव्याः । किञ्च तस्यापीशानशम्भुशिवशब्दा अभिधायकाः, तन्नामसहस्रे 'इशानः प्राणदः प्राणः' इत्यादिपाठात् । अपि चोपसंहारेऽपि 'कारणन्तु ध्येयः' इति वचनं मानान्तर-सिद्धकारणानुवादेन तस्य ध्येयत्वनिर्धारणपरं, न त्विह कस्य चित् कारणत्वविधिपरम्; कश्च ध्येय इति प्रश्ने प्रवृत्तत्वात् । कारणत्वञ्च सुबालोपनिषदादिषु नारायणस्य सिद्धमिति कारणपदस्य तदनुवादपरतानिश्चयात्तत्समानाधिकृतशंभ्वादिशब्दानामपि तत्परत्वमावश्यकम् । न च ब्रह्मविष्णुरुद्रेन्द्रा इति विष्णोः कार्यत्वश्रवणान्न तस्य मूलकारणत्वं सम्भवतीति शङ्क्यम् । तस्य 'आदित्यानामहं विष्णुः' इति वचनसिद्धतद्विभूतिपरत्वसम्भवादिति' तत्र यद्यपि -

स्वरूपाख्यानमेवास्य प्रत्याख्यानं प्रतीयते ।
न्यायानां स्फुटदौर्बल्याद्विरोधाच्चोपबृह्मणैः ।।
अनन्तशाखासापेक्षे वैदिकार्थविनिर्णये ।
स्वबुद्धिकल्पितन्यायाद्गरीयोह्युपबृह्मपणम् ।।
अधस्ताद्दर्शितं तच्च हरिवंशादिषु श्रुतम् ।
कुदृष्टिकृतदुःशंकानिर्मूलोन्मूलनक्षमम् ।
किञ्च शैवमहालिंगप्रादुर्भावोपवर्णने ।
शैवत्वमस्याः कार्त्स्न्येन प्रपञ्चेन स्फुटीकृतम् ।।
प्रणवः शतरुद्रीय तथाऽधर्वशिरश्शिखा ।
एतेषां तु जपः पुण्यः स्वाध्याय इति कीर्तितः ।।
इत्यादित्यपुराणेऽपि शिवयोगनिरूपणे ।
श्रीरुद्रादिवदेवास्याः शैवत्वं प्रकटीकृतम् ।।
शैवपाराशरस्कांदेष्वनया प्रतिपादितः ।
शिवएवेति विस्पष्टं कंठोक्त्याऽप्युपवर्णितम् ।।
सर्वमन्यत्परित्यज्य शिव एव शिवंकरः ।
परो ध्येयोऽथ देवेशः समाप्ताथर्वणी श्रुतिः ।।
शिखा साथर्वणी साध्वी सर्ववेदात्तमोत्तमा ।
अस्मिन्नर्थे समाप्ता सा श्रुतयश्चापरा अपि ।।
एषां तु वचसां शक्यन्नान्यार्थत्वोपपादनम् ।
प्रस्तुत्य शिवमाहात्म्यं तत्र तत्र प्रवर्तनात् ।।
तथाऽपि -
न्यायेन प्रत्यवस्थानं तदाभासीकृतिं विना ।
न शाम्येदल्पबुद्धीनामुपबृह्मणगौरवात् ।।
इत्थं हि ग्रहिला मूर्खा विशदार्था अपि श्रुतीः ।
नयन्तो व्याकुलीभावं स्थाने तु निरपत्रपाः ।।
उपबृह्मणजातञ्च सहप्रकरणादिना ।
साहसिक्यात्कथन्नैते नयेयुः पश्यतोहराः ।।
ततो नैराश्यसिद्ध्यर्थं तेषां पण्डितमानिनाम् ।
समूलमुन्मूलयति न्याया- भासानुदाहृतान् ।।

उपक्रान्तिं साधारणगुणपदाभ्यां हरिपरा-
मनूक्त्या त्वय्यर्तादधिगमितया कारणतया ।
अमुष्या निश्चिन्वन् प्रसभमुपसंहारमपि च
स्वयं मुह्यत्वेकः कथमिव तमन्येऽप्यनुगताः ।।१६।।

अत्र यद्यप्युपक्रमस्थयोः श्रुतिलिङ्गयोरसाधारण्येऽपि नेहोपक्रमप्राबल्य-शङ्कावकाशः, उपसंहारे ईशानशम्भुशिवसर्वेश्वरश्रुतीनां प्रबलानां चतसृणां शिवाभिधायिकानां श्रवणात् । अल्पप्रमाणादुपक्रमाद्बहुप्रमाणस्योपसंहारस्यैव बलवत्त्वात् । अत एव **'आकाशो ह वै नाम'** इत्यादिवाक्यस्योपक्रमस्थाभ्यामाकाश-श्रुतिप्रसिद्धिलिङ्गाभ्यां पाश्चात्यानामप्यसंकुचितनामरूपनिर्वोढृत्वतदर्थांतरत्वामृत-त्वलिङ्गब्रह्मात्मश्रुतीनां भूयस्तया प्राबल्यात्, तदनुरोधेनोपक्रमप्राप्तमपि भूताकाश-परत्वमपोह्य ब्रह्मपरत्वं व्यवस्थापितम् **'आकाशोऽर्थान्तरत्वादिव्यपदेशात्'** इत्यत्र, पूर्वतन्त्रेऽपि कस्मिंश्चित् काम्येष्टिविशेषे ऐन्द्राग्न ऐकादशकपालः प्राजापत्यं दधि मधु घृतमाप इति पञ्चानां हविषामाद्ययोः ऐन्द्राग्रसान्नाय्यविकारत्वेन अमावास्या-विद्ध्यन्तत्वप्राप्तावुपांशुयाजविकाराणां मधूदकघृतानां चरमश्रुतत्वेऽपि भूयस्तया तदनुग्रहाय पौर्णमासविद्ध्यन्त इति निर्णीतम् **'विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्स्वधर्मत्वम्'** इति परैरपि **'अन्तर उपपत्तेः'** इत्यधिकरणे दर्शितोऽयं न्यायः उपक्रमस्थमेकं लिङ्गमुपरितनानेकगुणविरोधे दुर्बलमिति, एवमिहाप्युपसंहार-स्थप्रामाणबाहुल्यबलादुपक्रममन्यथा कृत्वा शक्यं शिवपरत्वं व्यवस्थापयितुम् । अपि चोपक्रमानुरोधेऽप्यस्याश्शिवपरत्वमेव सिद्ध्यति । तथाहि मात्राणां वर्णदेवताविभागात् प्रागेव लोकादिविभागोपदेशे **'पृथिव्यन्तरिक्षं द्यौः'** इति मात्रात्रयस्य लोकानुपदिश्योपदिष्टम् - **'याऽवसानेऽस्य चतुर्थ्यर्धमात्रा सा सोमलोकः'** इति । नात्र सोमलोकशब्दश्चन्द्रलोकपरः ; तस्य द्युलोकान्तर्गतत्वेन पृथग्ग्रहणायोगात् । किन्तूमासहायाधिष्ठितसकलभुवनातीतमहाकैलासनामकशिवधर्मोत्तरादिप्रतिपादितपरम-शिवपुरपरः । अत एव शैवे महालिङ्गप्रादुर्भावाध्याये अथर्वशिखार्थमवलम्ब्य शिव-महिमवर्णनप्रकरणे सोमलोकशब्दविवरणं दृश्यते ।

'तदूर्ध्वमुन्मनाल्लोकात्सोमलोकमलौकिकम् ।
सोमस्सहोमया यत्र नित्यं निवसतीश्वरः' इति ।

एवञ्चोपक्रमोपसंहारयोरैकार्थ्ये मध्यस्थं देवान्तरलिङ्गादिकं प्रतर्दनाख्यायिकायां

जीवमुख्यप्राणलिङ्गमिवान्यथा नेयमिति ; तथाऽपि वस्तुगतिप्रदर्शनाय परपक्षस्य सर्वथाऽनुन्मीलनसिद्धये च परोपन्यस्तश्रुतिलिङ्गयोः साधारण्येनानिर्णायकत्वं दर्शयति - **साधारणगुणपदाभ्यामिति** ।

साधारणत्वमनयोः प्राकृतैरपि हि स्फुटम् ।
विना जात्यन्धबधिरौ सर्वैः समधिगम्यते।।

तथाऽहि यद्यपि- **'पुरुषो ह वै नारायणोऽकामयत' 'सहस्त्रशीर्षा पुरुषः'** इत्यादिश्रुतिषु
'न यस्य देवी न पितामहो वा नेन्द्रो न चाग्निवरुणो न मृत्युः ।
प्रभावमद्यापि विदन्ति रुद्रं तमादिरुद्रं परुषो ददर्श ।।'
इत्यादिपुराणेषु
'संहृत्य लोकान् पुरुषोऽधिशेते' इत्यभियुक्तकाव्येषु च पुरुषशब्दस्य विष्णौ प्रयोगो दृश्यते, तथाऽपि 'पुरुषावात्ममानवौ' इत्याद्यभिधानकोशस्मृतेर्लौकिकवैदिकप्रयोग-प्राचुर्याच्चात्मसामान्ये तस्य शक्तेरावश्यकत्वेन तत एव तदुपपत्तेः न विष्णौ तस्य विशिष्यापि शक्तिः कल्पयितुं शक्या । बर्हिराज्याधिकरणविरोधात् । तत्र हि म्लेच्छैस्तृणघृतादिजातिमात्रे आर्यैः संस्कृततृणादावेव प्रयुज्यमानानां बर्हिराज्यादि-शब्दानां यववराहाधिकणन्यायेन शास्त्रस्थप्रसिद्धेर्बलवत्त्वात् संस्कारनिमित्तकत्व-माशङ्क्य शास्त्रस्थप्रयोगस्य जात्यव्यभिचारात् जातिमात्रव्यवहारस्य च संस्कारव्यभिचारादव्यभिचारिजातिशक्तिमादाय सर्वप्रयोगोपपादनसम्भवेन विरोधा-भावाज्जातिवाचितैवेति सिद्धान्तितम् । उक्तञ्च तन्त्रवार्तिके

'एकदेशेऽपि यो दृष्टः शब्दो जातिनिबन्धनः ।
तदत्यागन्न तस्यास्ति निमित्तान्तरकल्पना ।।' इति ।

एवञ्च यदा म्लेच्छगतयाऽपि सामान्यप्रसिद्ध्या सामान्यशक्तिसिद्धौ तद्द्वारैवार्यव्यवहारसिद्धिविशेषलाभ इति न विशेषशक्तिकल्पनं, तदा का कथा प्रकृतविषये ? इह सामान्यप्रसिद्धेरप्यार्यगतत्वेन दौर्बल्यशङ्काया अप्यनवकाशात् । नन्वस्तु प्रयोगान्तराणामन्यथासिद्धिः । इहैव ब्रह्मदेवत्या विष्णुदेवत्या रुद्रदेवत्येत्यादिमात्रात्रयदेवताविधानान्तरं पुरुषदेवत्येत्यर्द्धमात्रादेवताविधानैः पुरुष-

सामान्यस्य देवतात्वायोगत् त्रिमूर्तिभ्यः परस्मिन् देवताविशेषे पुरुषशब्दप्रयोगस्तत्तद्वाचिशब्दैर्देवताविधानप्रायपाठबलात् पुरुषशब्दस्य तत्र विशिष्यापि शक्तिङ्कल्पयन्ननेकश्रुत्यादिप्रतिपन्ननारायणपरप्रयोगानुरोधात्तत्रैव तात्पर्यमवसाययिष्यतीति चेन्न । सामान्यशक्त्याऽप्यभिमतविशेषपर्यवसानसम्भवे प्रायपाठमात्रस्य गौरवपराहतशक्त्यन्तरकल्पकत्वायोगात् । 'एका देया द्वादश देया चतुर्विंशतिर्देया सहस्रं देयमपरिमितं देयम्' इत्याधानदक्षिणाकल्पभेदश्रुतावपरिमितशब्दस्यापरिमाणे शिष्टस्येत्याद्यधिकरणे एकादितुल्यकल्पान्तरपरत्वेन स्थितस्याधिकं वा स्याद्बह्वर्थत्वादितरैस्सन्निधानादिति विधित्सितसङ्ख्याविशेषवाचिशब्दप्रायपाठेऽपि बहुत्वसामान्यशक्तैव न्यायलभ्ये सहस्राधिकबहुत्वे पर्यवसाननिर्णयात् ।

नन्वस्त्वेवं प्रयोगमात्रस्यान्यथासिद्धिः । तथाहि 'पुरुसंज्ञे शरीरेऽस्मिन् शयनात् पुरुषोहरिः' इति पौराणिकानान्तस्य तन्नामत्वेन निर्वचनमनन्यथासिद्धं विशिष्यापि शक्तिं कल्पयिष्यतीति चेन्न । सामान्यशक्तस्यापि पुरुषशब्दस्य श्रुत्यादिषु क्वचित् प्रकरणादिसामर्थ्यान्नारायणे पर्यवसानमस्तीत्येतावद्ज्ञापनेन चरितार्थतयाऽर्थवादप्रधानपौराणिकनिर्वचनस्य चित्राधिकरणे स्तोत्रविशेषनामधेयत्वेन सिद्धस्य प्रष्ठशब्दस्य क्वचित् 'प्रष्ठैरुपतिष्ठते' इत्यादौ तत्साधने रथन्तरादावपि लक्षणया प्रवृत्तिरस्तीति तन्निर्वाहेण चरितार्थस्य रथन्तरादौ प्रष्ठशब्दप्रवृत्तिनिमित्तप्रतिपादनपरस्य 'आपो वा ऋत्वियमार्च्छान् तासां वायुः प्रष्ठे व्यावर्तत' इत्यादेः श्रौतार्थवादस्येवान्यथासिद्धत्वेनानन्यथासिद्धाभिधानकोशस्मृत्यादिकाप्तशक्त्योपपादनीयप्रयोगविषये शक्त्यन्तरकल्पकत्वायोगात् । न हि स्तोत्रनामत्वेन सिद्धस्य प्रष्ठशब्दस्य रथन्तरादावपि लक्षणायोग्ये प्रवृत्तिनिमित्तप्रतिपादनपरोऽर्थवादोऽस्तीत्येतावता तत्रापि शक्त्यन्तरमुपेयते । भगवता जैमिनिनैव सप्तमतृतीयान्ते 'प्रष्ठैरुपतिष्ठते' इत्यत्र प्रष्ठशब्दो माहेन्द्रस्तोत्रपरो रथन्तरादिपरो वेति विचारे **'कर्मणः प्रष्ठशब्दः स्यात्तथाभूतोपदेशात्'** इति पूर्वपक्षसूत्रेण प्रष्ठशब्दोपदेशसामान्यात् स्तोत्रक्रियापरत्वमिति स्तोत्रपरत्वस्यौत्सर्गिकत्वकथनेन सिद्धान्ते 'अभिधानोपदेशाद्वा विप्रतिषेधात् दृव्येषु प्रष्ठशब्दः स्या' दिति स्तोत्रपरत्वेऽनुपपत्युपन्यासपूर्वं रथन्तरादिपरत्वव्यवस्थापनेन च तत्र लक्षणायाः स्फुटीकरणात् । भाष्यकारादिभिश्च सर्वस्तोत्रैकमत्येन लक्षणाव्यवहारात् । एतेन -

तथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते ।
तं विना पुण्डरीकाक्षं कोऽन्यः पुरुषशब्दभाक् ।।
भगवानिति शब्दोऽयं तथा पुरुष इत्यपि ।
निरुपाधी च वर्तेते वासुदेवे सनातने ।।
ब्रह्माद्याः सकला देवा यक्षगन्धर्वकिन्नराः ।
ते सर्वे पुरुषांशत्वादुच्यन्ते पुरुषा इति ।।'

इत्यादीनि परोदाहृतानि च पुरुषशब्दस्य विष्णावसाधारण्यौत्सर्गिकत्वप्रतिपादनछायापन्नानि पौराणिकवचनान्यवलम्ब्य प्रत्यवस्थानमपि निरस्तम् । सर्वसम्प्रतिपन्नाया अविशेषेणात्मसामान्यशक्तेर्दुर्वारत्वेनासाधारण्यायोगात् । 'अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः' इत्यसाधारण्येन गवाश्वानां पशुतोक्तिवदुदाहृतवचनानां स्वातन्त्र्यादिपुरुषधर्मपौष्कल्येन प्रशंसापरत्वोपपत्तेः । अन्यथा पशुशब्दस्याप्यसाधारण्यापत्तेः ।

'स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः ।
प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद्वैभवादपि ।।
स एव वासुदेवोऽयं साक्षात् पुरुष उच्यते।
स्त्रीप्रायमितरत् सर्वं जगत्स्थावरजङ्गमम् ।।'

इति नारसिह्मपुराणवचनेन तदसाधारण्यवचनानां प्रशंसापरत्वस्य स्फुटीकरणाच्च । तस्मान्न पुरुषशब्दस्य विष्णावसाधारण्यप्रयोगनिर्वचनम् । साधारण्यवचनैर्विशिष्य शक्तिर्यदि स्यात्तदा **'पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि' 'पुरुषं कृष्णपिङ्गलम्' 'तमीशानं पुरुषं देवम्'** इत्यादिश्रुतिषु **'रुद्राः पादात्पिनाकिनः'** इति प्रस्तुत्य **'पुंसान्तु पुरुषः श्रीमान् ज्ञानगम्यो न चान्यथा ।'** इति लैङ्गे **'तस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषोऽजायत'** इत्यादि श्रुतिषु च संहाररुद्रे **'अंगुष्ठमात्रः पुरुषोंगुष्ठञ्च समाश्रितः'** इत्यादौ पिण्डाण्डमूलांगुष्ठसमाश्रयणलिङ्गोपस्थापिते ब्रह्माण्डमूलभूताधारलोकवासिनि कालाग्निरुद्रे, **'यत्पुरुषेण हविषा'** इत्यादिश्रुतिषु **'तद्विसृष्टः सपुरुषो लोके ब्रह्मेति कीर्त्यते'** इति मनुस्मृतौ च ब्रह्मणि प्रयोगात् ; **'यस्मात् पुर्यनुशेते च तस्मात् पुरुष उच्यते।'** इति लैङ्गे शिवनामनिर्वचनप्रस्तावे निर्वचनात्, **'वेदान्तेषु यमाहुरेकपुरुषम्'** इत्यभियुक्तोक्तेश्शिवस्य वेदान्तेषु पुरुषत्वेन प्रतिपाद्यतयाऽभिधानात्, **'स यत्पूर्वोऽस्मात्सर्वस्मात् सर्वान् पाप्मन ऊष्टत्तस्मात्पुरुषः'** इति बृहदारण्यके

ब्रह्मनामत्वेन निर्वचनात्,

'स वै शरीरी प्रथमः स वै पुरुषउच्यते।
आदिकर्ता सभूतानां ब्रह्माऽग्रे समवर्तत ।।,

इत्याद्यनेकपुराणेषु तन्नामत्वेनानुशासनात्,

'पुरुषो नाम संपूर्णः शिवः सत्यादिलक्षणः ।
सांबमूर्तिधरो नान्यो रुद्रो विष्णुरजोऽपिवा ।।,

इति स्कान्दे ब्रह्मगीतासु शिवे असाधारण्यप्रतिपादनाच्च अन्यत्रापि स्यात् । तस्मादेकयाऽनेकया वा शक्त्या साधारणत्वान्न पुरुषश्रुत्या देवताविशेषनिर्णयो युक्तः । यदीह ततो निर्णयः स्यात्तदा **'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते,' 'यएषोऽक्षिण पुरुषो दृश्यते,' 'दिव्यो ह्यमूर्तः पुरुषः,' 'स एव तस्मात् जीवघनात् परात् परं पुरीशयं पुरुषमीक्षते,' 'अंगुष्ठमात्रः पुरुषो मद्ध्य आत्मनि तिष्ठति'** इत्यादिश्रुतीनां परमते तत एव ब्रह्मपरत्वसिद्धेः, **'अन्तस्तद्धर्मोपदेशात्,' 'अन्तर उपपत्तेः,' 'अदृश्यत्वादिगुणको धर्मोक्तेः,' 'ईक्षतिकर्मव्यपदेशात् सः' 'शब्दादेव प्रमितः'** इति तद्विचारसूत्रारंभो व्यर्थः स्यात्। कथञ्चिदारम्भसमर्थने वा धर्मोपदेशादित्यादिनानालिङ्गैर्ब्रह्मपरत्वनिर्णयोऽसङ्गतः स्यात्। प्रबलश्रुतिसम्भवे तामुपेक्ष्य लिङ्गोपन्यासस्यानुचितत्वात्। परमते ईक्षतिकर्मैव परमात्मा निरुपाधिकशान्तामृतत्वादिव्यपदेशादिति तद्व्याख्या। भूतयोन्यधिकरणस्याक्षरमिव दिव्योह्यमूर्त इति मन्त्रार्थः, पुरुषो विषयः । ईक्षतिकर्माधिकरणस्य ध्यायतिकर्मेवेक्षतिकर्मापि । यद्यप्यंगुष्ठाधिकरणसूत्रस्यांगुष्ठप्रमितः परमात्मा पुरष इति तदभिधानशब्दादित्यर्थो वर्णयितुं शक्यस्तथाऽप्युक्तन्यायैस्तस्य साधारण्यं मन्वानैर्भगवत्पादैः शब्दादीशानशब्दादित्येव व्याख्यातम् । परभाष्यकृताऽपि, ईशानो भूतभव्यस्येति परमात्मवाचिशब्दादित्येव व्याख्यातम् । परभाष्यव्याख्यानेऽप्युक्तमीशानशब्दस्यैव शब्दशब्देन विवक्षितत्वादिति । किञ्च तन्मते स्वप्नसृष्टिः जीवकर्तृकेति पूर्वपक्षोपमर्देन परकर्तृकेति निर्णयार्थं प्रवृत्ते सन्दिग्धे निर्णयार्थे सृष्टिरित्यधिकरणे **'निर्मातारं चैके,'** इतिसूत्रव्याख्याने **'एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः'** इति वाक्यमुदाहृत्य पूर्वपक्षः कृतस्तदप्यत्यन्तमसंबद्धं स्यात्। नहि सिद्धान्तोपपादिन्येव श्रुतिः पूर्वपक्षोपपादिनी भवति । ननु वैश्वानराधिकरणे **शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न ; तथा दृष्ट्युपदेशासम्भवात् । 'पुरुषमपि चैनमधीयते,'** इति सूत्रे **'स एषोऽग्निर्वैश्वानरो यत्पुरुषः,** इति

पुरुषश्रुत्या वैश्वानरशब्दस्य परमात्मपरत्वं निर्णीतम् । सत्यं । न तत्र पुरुषशब्दो ब्रह्मण्यसाधारणिति ततो निर्णयोऽभिमतः, तथा सत्यत्रैव क्रियमाणायाः पुरुषान्तःप्रतिष्ठितत्वलिङ्गेन वैश्वानरस्य जाठरत्वशङ्काया निरालम्बनत्वापातात् । किंत्वग्न्यादिशब्दपुरुषान्तःप्रतिष्ठितत्वादिलिङ्गैः स जाठर इति स्थिते शङ्किते तस्य त्रैलोक्यशरीरत्वासम्भवान्न स जाठरइत्युक्त्या तन्निराकरणाय हेत्वन्तरमुपन्यस्तं पुरुषमपीत्यादिना । चेतनवाचिपुरुषशब्दश्रवणान्नाचेतनस्स जाठर इति तदभिप्रायः । स च प्रधाननिराकरणायोपन्यस्ते क्षितिलिङ्गवत्सर्वचेतनसाधारण्येऽपि शंक्यमान-पक्षान्तरव्यावर्तन क्षमत्वाद्युक्तएव । नन्वत एव **'न देवता भूतञ्च'** इत्येतत्सूत्रोक्तं हेतुं परामृश्य तेनैवाग्न्यभिमानिदेवतात्वमपि निराकृतम् । सत्यम् । तत एव इत्य-सम्भवादिति हेतुमात्रं परामृश्यते । विभक्त्यैकरूप्यात्, **'प्रजापतिर्वरुणायाश्वमनयत् स स्वान्देवतामार्च्छत्'** इत्यत्र इत्यनेनेव प्रजापतिः । उभयपरामर्शे वा भूतत्वमात्रनिराकरणान्वयिनी पुरुषश्रुतिरस्तु भगवत्पादैर्लिखिते **पुरषविधमपि चैनमधीयत** इति पाठान्तरे न कोऽपि शङ्कालेश इत्यलं प्रपञ्चेन । एवं लौकिकवैदिकानेकवस्तुसाधारण्यात् श्रीसदाशिवमूर्तौ प्रतिमुखं वर्णभेदप्रसिद्धशिवस्यापि सर्ववर्णविग्रहसद्भावात्तस्य विश्वरूपविग्रहस्यापि तादृशस्यागमादिषु प्रतिपादनाच्च न सर्ववर्णत्वलिंगादपि निर्णयप्रत्याशा ।

अपि च वासुदेवेन यत्पार्थाय प्रदर्शितं रूपं निर्वर्णितं गीतासु तच्च शैवमेव प्रतीयते । **'दर्शयामास पार्थाय परमं रूपमैश्वरम्'** इति तत्रैव तस्यैश्वरत्वकीर्तनात् । तद्रूपमास्थितेन कृष्णेन **'मयैवैते निहताः पूर्वमेव निमित्तमात्रं भव सव्यसाचिन्'** इति विपक्षाणां प्रत्यक्षहननात् प्रागेव स्ववीर्यविनिहतत्वमुपवर्ण्य समयान्तरे स्वरूपस्य शैवत्वव्यक्तीकरणात् । कथं ? कृष्णेन शैवमास्थितेन मोक्षधर्मे पार्थं प्रत्येव -

'निहतांस्तेन पूर्वं त्वं हतवानसि वै रिपून् ।
अप्रमेयप्रभावं तं देवदेवमुमापतिम् ।।
भजस्व नित्यं प्रयतो विश्वेशं हरमव्ययम् ।'

इति तेषां शिववीर्यप्रभावनिहतत्वोपदेशेन तस्य रूपस्य शैवत्वव्यक्तीकरणात् । कथं कृष्णेन शैवं रूपमात्मीयतया दर्शितमिति संगच्छत इति चेत्, को भावः ? किं भेदान्न संगच्छत इति ? नैतद्युक्तम् । लैंगे दधीचेन महर्षिणा शैवं रूपं योगप्रभावात् प्रदर्शितमिति प्रतिपादनात्, इहापि **'दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम्'** इति

वचनाच्च योगप्रभावादेव दर्शितमिति कल्पनोपपत्तेः। वस्तुतस्त्वभेदस्य वैदिकमर्यादासिद्धत्वात् गिरिराजाय पार्वत्यै(त्या?) अभेदादैश्वररूपमात्मीयतया प्रदर्शितमिति संगच्छतेतराम् । न हि स्वकीयमेव रूपान्तरं प्रदर्शितमिति कल्पने काचिदनुपपत्तिः । तथा सति तस्याद्य वैष्णवरूपत्वकल्पनेऽप्यसंगति तादवस्थ्यापत्तेः । कृष्णस्य तत्र शैवरूपप्रदर्शने का प्रसक्तिरिति चेत्तव वैष्णवरूपप्रदर्शने या प्रसक्तिः सैव। तथा हि प्राक्तनप्रबन्धेन कृष्णस्य सकलसृष्टिसंहारादिस्वातन्त्र्यलक्षणं महिमजातं तन्मुखादवधारितम् । **'इमं विवस्वते योगम्'** इत्यध्याये **'अपरं भवतो जन्मे'**त्यादिप्रश्नोत्तरसामर्थ्येन सर्वमेतन्महिमजातं कृष्णेन स्वस्य किञ्चिदाद्यं सर्वोत्तरं रूपं सिद्धवत्कृत्य तदभिप्रायेणोच्यत इति निश्चितवतः पार्थस्य -

भवात्ययौ हि भूतानां श्रुतौ विस्तरतो मया ।
त्वत्तः कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ।।
एवमेतद्यथातत्त्वमात्मानं परमेश्वरम् ।
द्रष्टुमिच्छामि ते रूपमेश्वरं पुरुषोत्तम ।।'

इति तदीयदिव्यरूपप्रदर्शनप्रार्थनं हि विश्वरूपप्रदर्शने कारणम् । तथा च यदेव तस्य पूर्णैश्वर्यशालि सर्वोत्तममाद्यं रूपं तदेव तस्मै प्रदर्शनीयमिति शैवस्यैव रूपस्य तथाभूतत्वात् तदेव भक्तवत्सलो भगवान् वासुदेवः प्रादर्शयदिति किन्न संगच्छते । यदि तु

'अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतं महेश्वरम्।।'

इति प्राचीनकृष्णवचनस्थमहेश्वरादिशब्दश्रवणादग्रे गीतार्थविचारे वक्ष्यमाणगमकजाताच्चैश्वरमेव कृष्णस्य मूलभूतं परं रूपमिति विशिष्यापि निश्चित्य **'द्रष्टुमिच्छामि ते रूपमैश्वरं पुरुषोत्तमे'**ति तत्प्रदर्शनं पार्थः प्रार्थयतेति कल्प्यते, तदा नैवात्र कश्चिदुपपादनीयलेशः । तदेवं गीतोपवर्णितविश्वरूपविग्रहस्यापि शैवत्वप्रतीतेः कथमपि नोक्तलिङ्गेन विष्णुपरत्वनिर्णयः । या तु 'तस्य हैतस्ये' त्यादिश्रुतिरुदात्दृता, साधिदैविकाध्यात्मिकभेदभिन्नामूर्तब्रह्मरूपवाय्वाकाशरसभूतव्यष्टिसमष्ट्यात्मककारणरूपविषयवासनाभेदप्रतिपादनपरतया सोपपत्तिकं भगवत्पादैः बृहदारण्यकभाष्ये व्याख्यातेति न तया प्रत्यवस्थानं सावकाशम् । पराभिमतार्थेऽपि पुरुषो नारायण इत्यत्र न निर्णायकं पश्यामः । वस्तुतस्तु याऽवसानोऽस्य चतुर्थ्यर्धमात्रा, सा सर्ववर्णेति सर्ववर्णत्वं ध्यानार्थमर्धमात्रागुणत्वेनैव श्रुतं, न तद्देवतागुणत्वेनेति न तेन

तद्देवताविशेषनिर्णयचोद्यावकाशः । तस्मादुदाहृतश्रुतिलिङ्गयोस्साधारणत्वाद-निर्णीतार्थस्योपक्रमस्यं **'सन्दिग्धे तु वाक्यशेषादि'** ति न्यायेन शिवादिशब्दैः निर्णीतार्थेन उपसंहारेणैवार्थनिर्णयो युक्तः । यत्तु तेषामपि विष्णुवाचित्वं शङ्कितं, तन्न तावत्तत्र प्रयोगमात्रात्, वृत्त्यन्तरोच्छेदापत्तेः । नापि तन्नामसु परिगणनात्, कोशेष्वदर्शनात्, सार्वात्म्याभिप्रायेण वा **'यानि नामानि गौणानी'** त्युपक्रमे भूमलिङ्गसमवायान्यतरेण नाम्नां गौणत्वोक्त्या क्रतुपरश्येनादिनामवत् गौणनामत्वाभिप्रायेण वा नामसहस्रमध्ये अनेकदेवतान्तरनामपरिगणनदर्शनेन तस्य तद्वाचित्वे प्रमाणाभावात् । अन्यथा भारतलैङ्गादित्यपुराणादिपठितशिवनाम-सहस्रेष्वनन्तर्भूतविष्णुनामासम्भवात् ।

'नामानि तव गोविन्द यानि लोके महान्ति च ।
तान्येव मम नामानि नात्र कार्या विचारणा।।'

इति हरिवंशे कैलासयात्रायां शिववचनेन सर्वेषां विष्णुनाम्नामन्येषां चोत्कृष्टनाम्नां हिमकरनाम्नां घनसारनामत्ववत् शिवनामत्वस्य सिद्धेश्च क्वचिदपि नाम्ना विष्णुपरत्वनिर्णयो न स्यात् । किं च शिवं प्रस्तुत्य **'सर्वाणि ह वा एतस्य नामधेयानी'** त्याश्वलायनस्मरणात् अभिधानश्रुत्या वस्त्वन्तरनिर्णय एव लुप्येत । तस्मादुदाहृतशब्दानां कोशेषु शिवनामसु परिगणनात् लौकिकवैदिकव्यवहारैकमत्याच्च तन्नामत्वनिश्चये व्यवस्थितार्थोपसंहारानुरोधेन उपक्रमेऽर्धमात्रावाच्यत्वेन प्रतिपन्नः पुरुषशिव एवेति युक्तम् । अत एव तस्यार्धमात्रावाच्यत्वं प्रतिपादितं शिवधर्मोत्तरे --

'अथवान्यप्रकारेण ब्रह्मविष्णुमहेश्वराः ।
क्रमान्मात्रास्समुद्दिष्टाः तत्परश्चार्धमात्रया ।
भावना मात्रगम्यत्वात् विचिन्त्यः परमशिवः ।।' इति ।

वायुसंहितायामपि प्रणवमात्रात्रयस्य वेदगुणमूर्तित्रयविभागं प्रदर्श्यानन्तरमभिहितम् -

'एवं तिसृभिरेवैतन्मात्राभिरखिलं त्रिधा ।
अभिधाय शिवात्मानं बोधयत्यर्धमात्रया' इति ।।

तदेवमुपक्रममवलभ्य प्रत्यवस्थानं निराकृतम् । **'कारणं तु ध्येय'** इत्यत्र यच्चोदितं, तत्राह - **अनुक्त्येति** । अयं भावः ---**'अभ्यासस्सामिधेनीनां प्राथम्यात् स्थानधर्मः स्यादि'** त्यत्रं'त्रिः प्रथमामन्वाह त्रिरुत्तमा'मिति प्रथमोत्तमशब्दयोः प्रथमोपस्थित-प्राथम्यादिस्थानातिक्रमेण तदुपलक्षितप्रवोवाजादिऋत्विग्विशेषपरत्वस्येवात्र कारण-शब्दस्य प्रथमोपस्थितकारणत्वधर्मातिक्रमेण तदुपलक्षितदेवताविशेषपरत्वस्याभावात् ।

कारणत्वमात्रपरत्वस्थितौ तस्य प्रतियोगिसापेक्षार्थस्य **'सहस्रं देयमपरिमितं देय'** मित्यत्रापरिमितशब्दस्य बहुत्वार्थस्य सन्निहितसहस्रापेक्षया बहुत्ववत् सन्निध्युपवर्णित-कार्यभावानां ब्रह्मविष्णुरुद्रादीनां कारणे पर्यवसानात् ब्रह्मविष्णुरुद्रशब्दैः स्वरसतः प्रतीयमानानां गुणमूर्तीनां त्रयाणां कारणत्वेन श्रुत्यन्तरेऽपि शिवादन्यस्य प्रतिपादनादर्शनात् कथंचित्सर्वकारणत्वादिप्रतिपादनान्तर्भावेन तत्र तत्सिद्ध्युपगमे इहैव ब्रह्मादीनां प्रसूत्युक्त्यन्तर्भावेन सिद्धस्य तत्कारणसामान्यस्य सत्त्वात् । समनन्तरवाक्यभिद्धस्यैवानुवादसम्भवेन श्रुत्यन्तरमुखनिरीक्षणायोगात्, ध्यायोतेशान-मिति ध्येयविशेषस्य प्रागेव निर्धारितत्वेन सोपपत्तिकं पुनस्तदर्थोपसंहारपरेऽस्मिन् वाक्ये ध्यानविषयपरस्य शब्दस्य देवतान्तरविषयत्वकल्पनस्यात्यन्तानुचितत्वात् कथंचिदस्यैव वाक्यस्य ध्येयविशेषनिर्धारणपरत्वकल्पनेऽपि समानाधिकृतशम्भ्वादि-पदस्वारस्याविरोधाय समनन्तरवाक्यसिद्धकारणानुवादस्यैव युक्तत्वात्, अभ्युदयोष्टि-वाक्ये चरुत्वस्येव सामर्थ्यसिद्धस्याप्यनुवादसम्भवाच्च उदाहृतश्रुत्यर्थकथनप्रस्तावोप-वर्णितेन सामर्थ्येन शिवरूपेणावगमितं समनन्तरवाक्यसिद्धमेव कारणमिह कारणशब्देनानूद्यते, न श्रुत्यन्तसिद्धमिति ।।१६।।

किं च -

यदि कारणमत्रान्यश्रुतिसिद्धमनूद्यते ।
न पूर्ववाक्यसामर्थ्यपरिप्राप्तमिति ग्रहः ।।
तथापि न कुदृष्टीनां सफला प्रत्यवस्थितिः ।
श्रुत्यन्तरे शिवस्यैव कारणत्वव्यवस्थितेः।।

इत्याशयेनाह---

जडानीशौ नैव प्रभवत इति ब्रह्म जगतां
निदानं निश्चित्य त्वथ विमृशतां कि नु तदिति ।
महादेव्या दृष्ट्या त्वमिति मतिरासीद्यमवताम्
इति त्वाह श्वेताश्वतरनिगमान्तशिवपरः ।।१७।।

श्वेताश्वतराणां मन्त्रोपनिषदुपक्रमे 'ब्रह्मवादिनो वदन्ति-
किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठा ।
अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ।।' इति केषाञ्चित्

ब्रह्मवादिनामृषीणां ब्रह्म जगन्मूलकारणमित्ये तावन्निश्चितवतां कारणभूतं ब्रह्म को देव इति विशिष्यावुध्यमानानां कारणं ब्रह्म किमित्यादिरूपान् संशयान् प्रदर्श्य
'यः कारणानि निखिलानि तानि कलात्मयुक्तान्यधितिष्ठत्येकः ।' इत्यारभ्य
'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः ।'
'संयुक्तमेतत् क्षरमक्षरं च व्यक्ताव्यक्तं हरते विश्वमीशः ।'
इत्यादिभिस्तैर्निर्णीतमर्थं प्रदर्शयद्भिर्मन्त्रैः कालाद्यवान्तरकारणवृन्दस्याधिष्ठाता हरेशादिशब्दवाच्यो भगवान् परमशिव एव कारणं ब्रह्मेति स्फुटीकृतम् । ननु, **'क्षरं प्रधान'** मिति मन्त्रे हरशब्दस्य न क्षराक्षरेश्वरदेवताविशेषसमर्पणपरत्वेनान्वयः, किं तु **'संयुक्तमेतत्क्षरमक्षरं चे'** त्यादिमन्त्रश्रुतक्षरशब्दार्थबुभुत्सायां क्षरं प्रधानमिति क्षरशब्दविवरणानन्तरं अक्षरशब्दार्थविवरणवाक्ये विधेयपरत्वेन। अन्यथा तद्वाक्यापरिपूर्तेः । न चामृताक्षरमिति पदद्वयसत्त्वादमृतपदेनाक्षरपदविवरणं क्रियत इति तत्परिपूर्णमिति वाच्यम् । समासपदस्यैकप्रसरेण विशिष्टैकार्थबोधनस्वभावस्य उद्देश्यविधेयोभयपरत्वे प्रसरभेदेन सामर्थ्यविघातात्समासासम्भवप्रसङ्गात् । अत एव **'पशौ त्र्यङ्गैः स्विष्टकृतं यजती'** त्यत्र त्र्यङ्गपदस्य समस्तस्य प्रधानहविर्भूत-हृदयाद्यङ्गानुवादेन त्रित्वविधायित्वं न सम्भवतीति त्रित्वविशिष्टाङ्गान्तरविधायित्वं निर्णीतम् **'इज्याशेषात् स्विष्टकृदिज्येत प्रकृतिवदि'** त्यधिकरणे । उच्यते - अमृताक्षरमिति नेदं समासपदम् । एकार्थयोः पदयोः विशेषणविशेष्यभावायोगेन समासस्यैव तावल्लक्षणविरुद्धत्वात् । न चामृताक्षरमिति विवरणीयानुवादो युक्तः । सन्निहितमन्त्रान्तरश्रुताक्षरशब्दार्थस्यैव बुभुत्सितवात् । नापि हरशब्देन तद्विवरणं युक्तम्। तस्य शिवे रूढत्वात् । जीवप्रतिपादनक्षमेण हि शब्देनेह विवरितव्यम् । नियम्ययोः प्रधानपुरुषयोर्नियन्तुरीश्वरस्य च पूर्वोत्तरमन्त्रसन्दर्भे उपन्यासदर्शनात्
'क्षरं माया चाक्षरं जीवरूपं क्षरात्मानावीशते देव एकः ।।'
इति ब्रह्मगीतोपबृंहणाच्च । न हि हरशब्दो जीवे दृष्टप्रयोगः । कथञ्चिदवयवार्थकल्पनेऽपि उत्तरत्रान्वयेन शक्यसमर्थनाया रूढेस्त्यागायोगात् । तस्मादसम्बद्धोऽयं प्रलापः 'अमृताक्षरं हर इत्युद्देश्यविधेयभावेनान्वय' इति, । किंत्वमृतेति भिन्नं पदं, 'नारायणपरं बह्मे' त्यत्र नारायणपदमिव **'तृतीयातत्कृतार्थेने'** तिसूत्रे तत्कृतपदमिव च **'सुपां सुलुगि'** त्यादिसूत्रेण लुप्तविभक्तिकं जीवपरम् । **'क्षरं त्वविद्या ह्यमृतन्तु विद्या विद्याविद्ये ईशते यस्तुसोऽन्यः ।।'** इत्यस्यामेव श्रुतौ तत्र तस्य दृष्टप्रयोगत्वात्। **'जीवापेतं वावकिलेदं म्रियते न जीवो म्रियत'** इति श्रुत्यन्तरे

तत्र तदर्थसद्भावोक्तेश्च । तेन च बुभुत्सिताक्षरशब्दार्थविवरणं क्रियते । क्षरशब्दस्तु क्षराक्षरेश्वरदेवताविशेष- निर्धारणपरत्वेनोत्तरत्रान्वेतीति युक्तः पन्थाः । उपबृंहणमपि वायुसंहितायां तथैव दृश्यते --

'यच्चेदं क्षरमव्यक्तं यच्चाप्यमृतमक्षरम् ।।

तावुभौ यः क्षरात्मानावेको देवस्स्वयं हरः ।।

ईशते तदाभिध्यानात् योजनात्तत्त्वभावतः ।।' इत्यादि ।

यदि चामृताक्षरमिति समासपदं, तथाप्यक्षरशब्देनैवाक्षरशब्दविवरणमिति न तत्र हरशब्दान्वयः । **'सप्तदशारत्निर्वाजपेयस्य यूप'** इत्यत्र यूपपदमुख्यार्थतानुरोधात् समासपदेऽप्यरत्न्युद्देशेन साप्तदश्यविधिस्वीकारात् इहापि हरपदमुख्यार्थताद्य- नुरोधाज्जगत्कारणे ब्रह्मण्युपक्षिप्तविशेषसंशयव्युदासलाभाय हरपददुस्योत्तरत्र देवताविशेषसमर्पणपरत्वेनान्वयस्यावश्यकत्वाच्चागत्या असमर्थसमासाभ्युपगमो न दोषः ।

स्यादेतत्, नात्र कारणं ब्रह्म ब्रह्मादिदेवानां मध्ये को देव इति संशयं प्रदर्श्य देवतान्तरकारणत्ववादनिरासपूर्वकं शिव एवेति निर्धारणं क्रियते, किं तु जगत्कारणं वस्तु ब्रह्म वा, ततोऽन्यत्कालादिकं वेति प्रथममन्त्रेण संशयं प्रदर्श्यानन्तरं ब्रह्मैव कारणमित्येतावन्निर्णीयते ।

'कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरष इति चिन्त्यम् ।

संयोग एषां न त्वात्मभावादात्माप्यनीशस्सुखदुःखहेतोः'

इति द्वितीयमन्त्रे कालादिकारणवादनिरासदर्शनात् । अन्यथा देवतान्तरकारणवादस्यैव कोट्यन्तरस्य निरसनीयतया तदसाङ्गत्यापत्तेः । तस्मात् ब्रह्म जगत्कारणं, न कालादिकमित्येतावत एवेह व्यवस्थापनेन कारणस्य ब्रह्मणो देवताविशेषरूपत्व- स्यानिर्दिधारयिषितत्वात् न तदनुरोधेनोत्तरत्र हरशब्दान्वयसिद्धिः । उच्यते - नात्र यत्कारणभूतं वस्तु,तद् ब्रह्म, कालादिकं वेति विमर्शो दर्शितः । द्वितीयकोटेरश्रवणात्। संशयवाक्यं हि सामान्यतस्सम्भावितयावत्कोट्युपस्थापनक्षमकिंशब्दमात्रघटितं वा स्यात्, यथा कोऽयं वृक्ष इति, विशिष्य तत्तत्कोटिपरशब्दविशेषघटितं वा, यथा अयं वृक्षश्चूतः पनसो वेति । विशिष्यैककोटिमात्रोपन्यासस्तु व्युत्पत्तिविरुद्ध इति समभिव्याहृतब्रह्मपदान्वयलाभाय कोट्यन्तराध्याहारस्तावदवर्जनीयः । किं यज्ञदत्त इति वदुत्कटकोटिकसंशयवाक्यरूपत्वे **कुतस्स्म जाता** इत्यादिकोट्युत्कटत्व- शून्याग्रिमविमर्शवाक्यानामानाञ्जस्यापत्तेः । अपि चात्र किंशब्दः कोऽयं पुरोवर्ती

स्थाणुः पुरुषो वेत्यत्रेव तथातथाविकल्प्यमानधर्मिपर्यन्तो वा, किमयं स्थाणुः, उत पुरुष इत्यत्रेव विकल्पमात्रपरो वा । आद्ये सामान्यतो विमर्शवाक्यमेकं विशिष्य कोटिद्वयविमर्शपरं वाक्यमन्यदिति प्रतीतैकवाक्यताभङ्गः, विशिष्य प्रदर्शित-कोटिद्वयस्य वैकल्पिकत्वप्रत्यायकवाकाराद्यध्याहारापत्तिश्च । द्वितीये 'कुतः स्म जाता' इत्यादिधर्मिपर्यन्तकिंशब्दान्तरप्रायपाठाननुरोधः, पक्षद्वयेऽपि विशेषविमर्शवाक्यस्या-तादृशविमर्शवाक्यान्तरप्रायपाठाननुरोधश्च। अग्रे कालादिकारणवादनिरासान्यथा-नुपपत्तिबलात्कारणं ब्रह्म, कालादिकं वेति विमर्शवाक्यस्य कल्पनीयतया सर्वमिदं न दोषायेति चेन्न । तस्यैव तत्कल्पनापरिपन्थित्वात् । तथाहि - 'ते ध्यानयोगानुगता अपश्यन्' इत्यादिस्तदनन्तरपठितमन्त्रः स्वतो निर्णयाशक्तानां तेषां तन्निर्णयाय देवताध्यानानुष्ठानं श्रावयतीति ततः प्रागेव संशयविषयकोट्यन्तरदूषणस्फुरणे कथं तत्सङ्गच्छेत । न च सन्दिहानानां तन्निर्णयार्थध्यानकोट्यन्तरनिरासयोः पौर्वापर्यनियमात् क्रमे कोपाधिकरणन्यायेन पाठक्रमादर्थक्रमस्य बलवत्त्वात् । **'एतस्माज्जायते प्राणः'** इत्यादिमन्त्रे प्राणादिजन्मखादिजन्मादिवत् देवताध्यानात् परकोट्यन्तरनिरासः कल्प्यत इति वाच्यम्। अन्योन्याश्रयापत्तेः । न हि कालादिकारणवादस्य कोट्यन्तरत्वं तन्निरासस्य ध्यानानन्तरत्वकल्पनं विना सिध्यति । किं च यदि कारणधर्मिकविशेषसंशयकोट्यन्तरनिरासार्थः 'कालः स्वाभाव' इति मन्त्रः, तदा यदृच्छापक्षस्यानुपपत्तिः । ' न किञ्चित्कारणमस्ती' ति पक्षो हि यदृच्छापक्षः । किं च कारणस्य संशयात् प्रागेव चेतनत्वसम्प्रतिपत्त्यभावे अचेतनस्य तस्याधिष्ठातृत्वासम्भवात् अधिष्ठिताः केनेति विमर्शानुपपत्तिः । तस्मात् सामान्यतो ब्रह्म कारणमित्येतावन्निश्चितवतां किं कारणं ब्रह्मेति सम्भावितसकलकोटि-विकल्पविशेषितधर्मिपरेण किं शब्देन कारणं ब्रह्मविष्ण्वादिदेवानां मध्ये को देव इति विमृशतां जगतोऽकारणकत्व- स्यान्यकारणकत्वस्य वोपपत्तौ ब्रह्म कारणमित्येतावदेव सिद्धमिति संशयस्य निरालम्बनत्वप्रसङ्गो माभूदिति पक्षद्वयस्यापि निरासः निर्णयार्थध्यानात् प्रागेवेति तदभिप्रायवर्णनं युक्तम् । तदेतत् सर्वं मनसि कृत्वा कालादिकारणत्वनिरासस्य संशयधर्म्युपपादनपरतयान्वयो दर्शितः - जडानीशौ नैव प्रभवत इतीति । ननु, युक्तमेतदेवं कालादिकारणवादनिरासाभिप्रायवर्णनं, तथापि कारणं ब्रह्म को देव इति न विमर्शः, किं त्वद्वितीयस्य सकलसहकारिविधुरस्य ब्रह्मणः कथं कारणत्वं समर्थनीयमित्यभिप्रायेण ब्रह्म जगदुत्पत्तौ साध्यायां किमुपकरणकमिति । एवं च तेषां ध्यानानन्तरं तदीयाविद्याशक्तिदर्शनोपन्यास-

स्सङ्गच्छते । ब्रह्मणो जगत्सृष्टौ किं सहकारीति सन्दिह्य स्वयं निर्णयाशक्त्या ब्रह्म ध्यायतां तत्प्रसादादघटितघटनापटीयसी मायाशक्तिस्सहकारिणीति तेषां निर्णय आसीदिति तात्पर्यवर्णनाञ्जस्यात् । अन्यथा त्वत्र मायाशक्तिदर्शनोपवर्णनमसङ्गतमेव स्यादिति, उच्यते - एवं सहकारिविचारपरत्वकल्पनायां कारणपदं तावत् सहकारिलक्षकं कल्पनीयं स्यात् । कुतः स्म जाता इत्यादिविमर्शाश्च नोपपद्येरन् । यदि कारणसामान्योपगमपूर्वकं तत् ब्रह्मान्यद्वेति संशय इति कल्प्येत, यदि वा कारणं ब्रह्मेत्यभ्युपगमपूर्वकं तत् शिवो वा, देवतान्तरं वेति, तदा ते ब्रह्मणोऽन्यस्माद्वा वयं जाता इत्यादिप्रकारेण वा शिवात् देवतान्तरद्वा वयं जाता इत्यादिप्रकारेण वा युज्येरन्। ब्रह्म सकलजगज्जननजीवनादिकारणमिति निश्चये तद्विशेषाजिज्ञासानुदये च तत्सहकारिमात्रं जिज्ञासमानानां कः कुतस्स्म जात इत्यादिविचारस्य प्रसङ्गः । तत्र किं सहकारिकादित्यादिव्याख्याने वह्वी क्लिष्टकल्पना । अग्रे मायाशक्तिदर्शनोपवर्णनं त्वसिद्धम् । ब्रह्मविद्याधिदेवतायाः पराशक्तेः अम्बिकायाः प्रसादाद्विमृश्यमानार्थनिर्णयो भविष्यतीत्यभिप्रायेण तां ध्यायतां तेषां तत्साक्षात्कारोपवर्णनपरत्वात् **'ते ध्यानयोगानुगता'** इत्यादिमन्त्रस्य । अत एव तत्र शक्तिशब्दस्याविद्यासाधारण्यात् तद्ग्रहणं मा भूदिति आत्मेति विशेषणम् । अम्बिका हि देवस्य चन्द्रमौलेरात्मभूता शक्तिः ।

'आचक्षते तयोर्भेदमज्ञानात्परमार्थतः ।
अभेदश्शिवयोस्सिद्धो वह्निदाहकयोरिव ।।'

इति स्मरणात् । अविद्या तु तस्यानात्मभूता, मिथ्यात्वात् । उक्तं च संक्षेपशारीरके -

'चिच्छक्तिः परमेश्वरस्य विमला चैतन्यमेवोच्यते
सत्येवास्य जडा परा भगवतश्शक्तिस्त्वविद्योच्यते ।।' इति ।

न च आत्मपदस्य देवपदेन कर्मधारये शक्तिपदस्याविद्यापरत्वमपि सम्भवतीति शङ्कनीयम् । तदा 'दीर्घसोमे सन्तृद्ये धृत्या' इत्यत्र सोमपदस्य प्रकृते ज्योतिष्टोमे वृत्तौ समानाधिकरणस्य दीर्घपदस्येव 'स्वेन रूपेणाभिनिष्पद्यते' इत्यत्रात्मीयपरत्वे स्वेनपदस्येव चेहान्यतरस्य पदस्याव्यावर्तकतया वैयर्थ्यापत्तेः, विशेषणविशेष्यभावासम्भवेन कर्मधारयानुपपत्तेश्च । न च **'द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यं समासवचन'** मिति वार्तिकस्य 'वाक्त्वचप्रियः चित्रगवधन' इत्यादिसमासकृत-वैरूप्यसम्भवस्थलविषयत्वात् बृहद्रथन्तरसामा कार्य इतिवदिह विनैवावयवतत्पुरुषम्

अनेकपदसमास इति शङ्कितुं शक्यते । अबहुव्रीहित्वात् । 'अनेकमन्यपदार्थ' इति बहुव्रीहावेवानेकग्रहणेनानेकपदसमासज्ञापनात्, कथञ्चित्साधुत्वसम्भवेऽपि वैयर्थ्यस्य वज्रलेपायिततत्वाच्च । किं च 'ईक्षाध्यानयोरेकः कार्यकारणभूतयोरर्थ औत्सर्गिक इति ईक्षतिकर्मादिकरणोक्तरीत्यादर्शनध्यानयोः कार्यकारणयोरेकविषयत्वं वक्तव्यम् । न च तदुपपद्यते । दर्शनस्याविविद्याविषयत्वपक्षे इदानीं सहकारिणि सन्दिहानानां तस्मिन् सहकारित्वनिर्णयो भविष्यतीति अनवगच्छतां जडशक्तिविषयमेव निर्णयरूपं ज्ञानमुद्दिश्य तद्ध्याने प्रवृत्त्ययोगेन ध्यानं ब्रह्मविषयमिति वक्तव्यत्वात् । तस्मादम्बिकाप्रसादादस्माकमयमर्थो निर्णीतो भविष्यतीत्यभिप्रायेण प्रत्यक्षीकरणाय तां ध्यायन्तस्तामपश्यन्नित्येतदर्थपरः **'ते ध्यानयोगानुगता'** इतिमन्त्रः। तत्कृपाकटाक्षमहिम्ना परं कारणं महादेवमपश्यन्नित्येतदर्थपरो **'यः कारणानी'** त्याद्यनन्तरमन्त्रसन्दर्भ इति युक्तम् । तदेतत्सर्वमभिप्रेत्योक्तं - **महादेव्या दृष्ट्या त्वमिति मतिरासीद्यमवतामिति** । यमवतां यमाद्यङ्गकं योगमास्थितानामित्यर्थः । महादेव्या इति कर्मणि कर्तरि वा षष्ठी । ततश्च तद्दर्शनात्तत्कृपाकटाक्षादिति वार्थः । एवमेषां मन्त्राणामर्थनिष्कर्षः कूर्मपुराणे संक्षिप्य स्पष्टीकृतः --

'समेत्य ते महात्मानो मुनयो ब्रह्मवादिनः ।
वितेनिरे बहून्वादानात्मविज्ञानसंश्रयान् ।।
किमस्य जगतो मूलमात्मा वास्माकमेव हि ।
कोऽपि स्यात्सर्वभूतानां हेतुरीश्वर एव च ।
इत्येवंमन्यमानानां ध्यानकर्मावलम्बिनाम् ।।
आविरासीन्महादेवी गौरी गिरिवरात्मजा ।'

इत्यारभ्य -

'निरीक्षितास्ते परमेशपत्न्या तदन्तरे देवमशेषहेतुम् ।
पश्यन्ति शम्भुं कविमीशितारं रुद्रं बृहन्तं पुरुषं पुराणम् ।।'

इत्यादिना । अत्र किमस्य जगतो मूलमिति किं कारणं ब्रह्म कुतस्स्म जाता इत्येतदर्थो दर्शितः । 'आत्मा वास्माकमेवहीति दर्शितः 'जीवाम केन' इत्यादिविमर्शजातार्थः । आत्मशब्दस्याधिष्ठातृपरत्वात्। 'कोऽपि स्यादि'त्यादिना 'कालस्स्वभाव' इत्यादिमन्त्रप्रतिपादितकालकारणत्वादिवादनिराससामर्थ्यसिद्धसर्वकारणत्वसर्वेश्वरत्व-विशिष्टपुरुषसंप्रतिपत्त्युपन्यासेन संशयानां ब्रह्मधर्मिकत्वं स्पष्टीकृतमित्यादि व्यक्तम् ।

शिवपुराणेऽप्यम्बिका माहात्म्यं प्रस्तुत्य

'मुमुक्षया पुरा केचिन्मुनयो ब्रह्मवादिनः ।
संशयाविष्टमनसो विमृशन्ति यथातथम् ।
किं कारणं कुतो जाता जीवामः केन वा वयम् ।
क्व चास्माकं सम्प्रतिष्ठा केन वाधिष्ठिता वयम् ।
केन वर्तामहे शश्वत् सुखेष्वन्येषु वानिशम् ।
अविलङ्घ्या च विश्वस्य व्यवस्था केन वा कृता ।
कालः स्वभावो नियतिर्यदृच्छा नात्र युज्यते ।
भूतानि योनिः पुरषः योगो वैषां परोऽथवा ।
अचेतनत्वात्कालादेश्चेतनत्वेऽपि चात्मनः ।
सुखदुःखाभिभूतत्वादनीशत्वाद्विचार्यते ।
ते ध्यानयोगानुगताः प्रापश्यञ्छक्तिमैश्वरीम् ।
पाशविच्छेदिकां साक्षान्निगूढां स्वगुणैर्भृशम् ।
तथा विच्छिन्नपाशास्ते सर्वकारणकारणम् ।
शक्तिमन्तं महादेवमपश्यन्दिव्यचक्षुषा ।
यः कारणान्यशेषाणि कालात्मसहितान्यपि ।
अप्रमेयोऽनया शक्त्या साकमेकोऽधितिष्ठति ।।'

इत्यादिना स्फुटीकृतः । तस्मादुक्तविधया शिवस्य जगन्मूलकारणत्वनिर्णयार्था एवैते श्वेताश्वतरमन्त्राः ।।१७।।

नन्वस्त्विदमेवं तथापि शिव एव कारणमिति कुतोऽवधारणासिद्धिः । श्रुत्यन्तराम्नातेषु सृष्टिप्रकरणादिषु देवतान्तरनाम्नामपि कारणे ब्रह्मणि प्रयोगदर्शनादित्यशङ्क्याह ---

प्रवृत्तेष्वन्यार्थं प्रभुतिलक सर्गश्रुतिगणे -
ष्वमुख्यार्थं युक्तं मतमपि पदं कारणपरम् ।
इह त्वन्नामेशो हर इति च तन्निर्णयवच-
स्यमुख्यार्थं नीतं यदि बत हता निर्णयकथा ।।१८।।

अयमर्थः- सृष्टिप्रकरणं स्रष्टृसद्भावस्रष्टव्यपदार्थविशेषतत्तत्क्रमादि-प्रतिपादनेन कृतार्थेषु कारणे ब्रह्मणि प्रयुक्ता देवतान्तरवाचिनश्शब्दाः शक्या

मुख्यार्थतात्पयविधुरमकल्पयितुम् । तथा स्वीकृताश्च तद्विषयाः प्राणाकाशाक्षरादि-शब्दाः। उदाहृतमन्त्रजाते तु श्रुत्यन्तरप्रतिपादितं स्रष्टुसद्भावादिकं सिद्धं कृत्वा स्रष्टुर्ब्रह्मणो देवताविशेषरूपेण निर्णयार्थं प्रवृत्ते निर्णयवाक्ये कारणे प्रयुक्तं शिवासाधारणं नाम स्ववाच्योपस्थापनैकप्रयोजनमनन्यपरं न स्वार्थतात्पर्यविधुरं कल्पयितुं शक्यमिति । तथा च यथा पौर्णमास्यामाग्नेयाग्निषोमिययोः क्रमेणानुष्ठानायापेक्षिते स्मृतिक्रमेऽनुष्ठेयार्थस्मृत्येक प्रयोजनमन्त्रपाठक्रम एव नियामकं इति तद्विरोधात् यागस्वरूपमात्रविधानेन चरितार्थयोः ब्राह्मणयोः पाठक्रमो न नियामकः, तथा छान्दोग्यबृहदारण्यकादिषु सृष्टिवाक्येषु सामान्यतोऽवगतसद्भावस्य स्रष्टुरपेक्षिते विशेषपर्यवसाने वि(श)षयोपन्यासपूर्वकं शिवस्य कारणत्वनिर्णयार्थं प्रवृत्तं किंशब्देनौचित्यात् कोट्यन्तरत्वेन विमृष्टानां देवतान्तराणां कारणत्वव्युदासपर्यवसायि उदाहृतं मन्त्रजातमेव नियामकं, न तु प्रमेयान्तरप्रतिपादनेन चरितार्थानि सृष्टिवाक्यानीति तत्र तत्र सृष्टिवाक्ये कारणे श्रूयमाणमपि देवतान्तरनामवृन्दम् । अश्वमेधे 'न चतुस्त्रिंशदिति ब्रूयात् षड्विंशतिरित्येव ब्रूयात्' इत्यस्मिन् तत् प्रतिषिध्य प्रकृतिर्नियुज्यते । सा 'चतुस्त्रिंशद्वाच्यत्वादि'त्यधिकरण-समर्थितेन न्यायेन 'चतुस्त्रिंशद्वाजिनो देवबन्धोरि'ति वैशेषिकाध्रिगुवचनप्रतिषेधमात्रपरे वाक्ये 'षड्विंशतिरित्येव ब्रूयादि'ति चोदकप्राप्ताध्रिगुवचनानुवादभागः षड्विंतिरिति सङ्ख्याविशेषग्रहणे तात्पर्यवैधुर्यात् षड्विंशतिरभ्यासेन पशुगणे तत्प्रकृतित्वादित्यधिकरणोक्तन्यायप्राप्तस्य तूपरगोमृगयोरश्वस्य च वङ्क्रीणां समस्य वचनस्याबाधेन यथाप्राप्ताध्रिगुवचनमात्र इव मन्त्रोपनिषन्मन्त्रसमर्पित एव विशेषे पर्यवसानमर्हतीति भावः । एतेनेदं निरस्तंयत्परे प्राहुः- जगत्कारणं वस्तु छान्दोग्यादिषु सद्ब्रह्मात्मादिशब्दैः उत्तरोत्तरं विशेषप्रयवसायिभिश्चेतनरूपतापर्यन्तबुद्धिगृहीतं महोपनिषदादिषु अनितरसाधारणेन नारायणशब्देनाभिधानात् 'छागो वा मन्त्रवर्णादि'ति न्यायेन नारायण एवेति पर्यवस्यति । क्वचित् प्रदेशे कारणे श्रूयमाणानां शिवशम्भ्वादिशब्दानां 'शिवास्ते सन्तु पन्थानः' 'शम्भुः स्वयंभूर्द्रुहिण' इत्यादिदर्शनादसाधारण्याभावात् इति । यथास्ति नारायणशब्दस्य विष्णावसाधारण्यं, तथा शिवे हरशब्दस्यापि । अन्यत्र साधारण्यानुशासनाद्यदर्शनात् । तथा च परोक्तन्यायेन निर्णयासम्भवात् अस्मदुक्तरीत्या हरशब्दस्य तात्पर्यवत्त्वात्तत एव निर्णयो युक्तः । न च्र क्वचित्क्वचिन्नारायणशब्दस्य कारणेऽभ्यासदर्शनात् तस्यापि तात्पर्यवत्त्वमवगतमिति वाच्यम् । तत्र बहुशोऽभ्यस्तस्यापि तस्य तद्विषय-

प्राणाकाशादिशब्दवत् वृत्त्यन्तरकल्पनासहिष्णुत्वेनान्यथासिद्धत्वात्, इह स्ववाच्यतदितरदेवताविशेषदोटिककारणसंशयानन्तरनिर्णयवाक्ये श्रुतस्य हरशब्दस्य अयं स्थाणु पुरुषोवेति संशयानन्तरम् 'अयं पुरुष एवे'ति निर्णवाक्ये श्रुतस्य पुरुषशब्दस्येव व्यवच्छेदनीयायां प्रतिकोटौ वृत्त्ययोगात् । यत्तु शिवादिशब्दानां शिवे असाधारण्यं नास्तीत्युक्तं, तत्र शिवशब्दे तावत्पृच्छामः - किं तस्य 'पन्थानस्सन्तु ते शिवा' इत्यादिप्रयोगविषयसाधारणशुभतारूढिव्यतिरेकेण शिवे असाधारणरूपेण शक्तिरेव नास्तीत्युच्यते, उत तत्सत्त्वेऽप्यक्षादिशब्दवदनेकशक्तिकत्वात् स्वतो न निर्णायकत्वमिति । नाद्यः । 'कल्याणं मङ्गलं शिव' मित्याद्यनुशासनव्यतिरेकेण 'शिवश्शूली महेश्वरः ।

ईशानश्शशिशेखरः पशुपतिश्शूली शिवश्शङ्करः ।

व्योमकेशो महादेवः प्रमथाधिपतिश्शिवः ।

शिवं मोक्षे च भद्रे च सलिले च शिवो हरे ।

शिवो बोले पद्मरागे हरे कीले शिवं जले ।

शिवं भद्रं शिवश्शम्भुः शिवा गौरी शिवा हया

इत्याद्यन्यथासिद्धानुशासनवलात् **'विष्णुर्नारायणः कृष्ण'** इत्याद्यनुशासनबलात् कृष्णशब्दस्य वर्णविशेषे रूढिव्यतिरेकेण विष्णाविव **'शस्तं चाथत्रिषु द्रव्ये पापपुण्यसुखादि च'** इति स्मृतां सर्वद्रव्यसाधारणामर्थवल्लिङ्गतां विना नित्यपुल्लिङ्गतया असाधारणरूपेणापि तस्य तत्र शक्तेरवश्यमभ्युपगन्तव्यत्वात् । अन्यथा पथ्यादिवदेव तत्र पृथगनुशासनानपेक्षणेन तद्वैयर्थ्यापत्तेः । नापि द्वितीयः । केवलयोगेन कुमुदादिषु प्रयुज्यमानस्यापि पङ्कजादिशब्दस्य योगरूढ्युभयानुग्रहलाभेन पद्मपरत्वस्येव शिवशब्दस्य शुभत्वनीलकण्ठत्वादिविशिष्टरूपविषयशक्तिद्वयानुग्रहलाभेन परमेश्वरपरत्वस्यौत्सर्गिकतया प्रकरणोपपदाद्यनुपपीडितात्ततः सर्वत्र परमेश्वरस्य प्रतीतेः स्वत एव च तस्य निर्णायकत्वात् । न चानेकशक्तस्यैकस्य शब्दस्य सकृच्छ्रुतस्यानेकशक्यपरत्वं न क्वापि दृष्टं, युगपद्वृत्तिद्वयस्य विरुद्धत्वादयुक्तं चेति वाच्यम् । सभङ्गश्लेषस्थले आवृत्तिं विना युगपदनेकशक्यानुसन्धानासम्भवात् । सैन्धवमानयेत्यादौ नानार्थस्थले क्रमानुसन्धेयभङ्गविशेषानपेक्षणेन सामग्रीपौष्कल्याद्युगपदनुसंहितशक्तिद्वयेन चक्षुषा युगपदुत्पन्नसंयोगद्वयेनार्थद्वयप्रकाशवदर्थद्वयस्मरणोपपत्तावपि स्वतन्त्रार्थयस्यापि प्रत्येकमानयनान्वयापत्त्या वाक्यभेदप्रसङ्गाच्च । अन्यत्र तथात्वेऽपि अत्र सभङ्गत्वाभावेनावृत्त्यनपेक्षणान्निखिल-

भुवनक्षेमङ्करे भगवति नीलकण्ठ एव प्रवृत्तिनिमित्तद्वयस्यापि विश्रान्तेः स्वतन्त्रार्थद्वय-परत्वाप्रसङ्गेन वाक्यभेदापत्त्यभावाच्च युगपदुन्मिषिताविरुद्धशक्तिद्वयस्य योगरूढि-स्थल इवानुग्राह्यतया संयोगविप्रयोगसाहचर्यादिभिरन्यतरावच्छेदायोगेनासाधारण-शिवरूपवाचिनश्शिवशब्दस्य निरुपाधिशिवरूपत्वपरत्वस्याप्यभ्युपगन्तव्यत्वात् ।

'समा भवन्ति मे सर्वे दानवाश्चामाराश्च ये ।
शिवोऽस्मि सर्वभूतानां शिवत्वं तेन म सुराः ।।'

इति कर्णपर्वणि शिववचनेन तद्वाचिनश्शिवशब्दस्य निरुपाधिशिवरूपतापरत्व-स्याप्यवगमाच्च । तस्माच्छिवशब्दः शक्तिद्वयानुग्रहलाभेनौत्सर्गिकशिवतात्पर्यवत्त्वात् तदसाधारण इत्येव युक्तम् । एतेन योगेनान्यत्रापि प्रयुज्यमानानामीश्वरमहेश्वरेशानादि-शब्दानामप्यसाधारण्यं व्याख्यातम् । आहुश्चाभियुक्ताः - **'यस्मिन्नीश्वर इत्यनन्यविषयश्शब्दो यथार्थाक्षरः'** । **'महेश्वरस्त्र्यम्बक एव नापरः ।'** इत्यादि । ईशानशब्दस्य त्वसाधारण्यं **'शब्दादेव प्रमित'** इतिसूत्रेण भगवता बादरायणेनैव स्पुटीकृतम् । यत्तु शम्भुशव्दस्य द्रुहिणसाधारण्यं शङ्कितं, तत्सत्यमेव । तथापि **'शम्भुराकाशमध्य'** इत्यादौ ब्रह्मणः कार्यकोटौ श्रवणेन तत्परत्वायोगे शिवपरत्त्वमेव सिध्यतीति न तावता अव्यवस्थापत्तिः । अन्यथा विष्णुपुराणे

'ब्रह्मानारायणाख्योऽसौ कल्पादौ भगवान्यथा ।
नारायणाख्यो भगवान् ब्रह्मा लोकपितामहः' ।।

इत्याद्यनेकप्रदेशेषु, कौर्मे

'अवाप्य संज्ञां गोविन्दात् पद्मयोनिः पितामहः ।।'

इति प्रस्तुत्य

'नारायणाख्यो भगवान्यथापूर्वं प्रजापतिः ।।'

इति, आश्वलायनस्मृतौ,

तस्मादण्डाभूत्स्रष्टा शिवात्मा चतुराननः ।
सर्वलोकस्य निर्माता ब्रह्मा विश्वसृजां पतिः ।
स चाप्सु शयनादेव शिवात्मा स्वेच्छया चिरम् ।
नारायणाख्यामभजच्छक्तिरूपः प्रजापतिः' ।।

इति च ब्रह्मणोऽपि नारायणसंज्ञाभिधानेन नारायणशब्देन निर्णय इति पराभिमानस्यापि भङ्गापत्तेः । तस्मात् 'निस्साधारण्यनारायणपदविषये निश्चयं यान्त्यबाधे सद्ब्रह्माद्या-स्समानप्रकरणपठिताश्शङ्कितान्यार्थशब्दाः ।।' इति परोक्तमसङ्गतम् ।।१८।।

साक्षान्मन्त्रवर्णेनैव सर्वेषां कारणवाक्यानां शिवे पर्यवसानस्य दर्शितत्वाच्च तद्विरोधिन्यायाभासमात्रमवलम्ब्य परोक्तमसङ्गतमित्याह

अमुष्मिन्नाम्नातः शिखरितनयावल्लभ यदा
तमस्तन्नेत्येष स्वयमुपदिशन् कारणगिराम् ।
अरोषाणां मन्त्रो भवति भगवन् पर्यवसितं
नयत्युन्मत्तानामितरपरतोक्तं विफलताम् ।।१९।।

अस्यामेवोपनिषदि --

'यदा तमस्तन्न दिवा न रात्रिः न सन्न चासञ्छिव एव केवलः ।
तदक्षरं तत्सवितुर्वरेण्यं प्रज्ञा च तस्मात्प्रसृता पुराणी ।।'

इत्याम्नायते मन्त्रः । अयं च सर्वेषां कारणवाक्यानां शिवविषयत्वनिर्धारणार्थः । कथं ? यदा तम इति 'तमो वा इदमेकमास नासदासीन्नोसदासीत्तदानीं तम आसीत्प्रजापतिर्वा इदमेक आसीन्नाहरासीन्न रात्रिरासीत्सोऽस्मिन्नन्धे तमसि प्रासर्पत्" इत्यादिश्रुत्यन्तरप्रतिपन्नतमोविशेषाङ्कितकालविशेषानुवादेन तदित्यादिना शिवस्य तत्कालवर्तित्वेन विधानात् पुरोडाशादिद्रव्यसम्बन्धितया आग्नेयादिवाक्यप्रतिपन्नानां यागानामेव चतुरवत्तं जुहोती'ति तत्तत्पुरोडाशादिद्रव्यावदानसम्बन्धिहोमविधि-बलाद्धोमरूपतेव तत्कालवर्तित्वेन पुरोवादप्रतिपन्नस्य परादिशब्दोदितस्य ब्रह्मण एव शिवरूपता पर्यवस्यतीत्येवं तावत्पूर्वार्धं केषाञ्चित्कारणवाक्यानां विषयविशेषोपसंहारपर्यवसायि । तथा तदक्षरमिति मुण्डकादीनां 'तत्सवितुर्वरेण्य' मिति आदित्यमण्डलवर्तिनि परमपुरुषे कारणत्वाक्षेपकलिङ्गं सर्वान्तर्यामित्वमुपवर्णयन्त्या गायत्र्याः 'प्रज्ञा च तस्मात्प्रसृता पुराणीति, तदैक्षत बहु स्यां प्रजायेयेति, स ईक्षत लोकान्नु सृजा इति, सोऽकामयत बहुस्यां प्रजायेयेति तपसा चीयते ब्रह्मे'ति च स्रष्टुरादिसृष्टिपूर्वकालीनं स्रष्टव्यवस्तुजातालोचनं प्रतिपादयतां छान्दोग्यादि-श्रुतकारणवाक्यानाम् ईक्षणादिशब्दैरुपात्तस्य स्रष्टव्यालोचनस्य तदन्यतशब्देन ग्रहणे तच्छब्दयुक्तश्रुतिमात्रविषयोपसंहारशङ्का स्यादिति सर्वसाधारणेन प्रज्ञाशब्देन तदुपादाय च विषयविशेषोपसंहारपर्यवसायीत्येवमयं कृत्स्नो मन्त्रः सकलकारणवाक्यविषयविशेषनिर्धारणार्थः । एवं साक्षाद्वेदोपदर्शितविषयविशेष-निर्धारणविरुद्धं मूर्खजल्पितमनादेयमित्यर्थः ।।१९।।

यत्तु परैरुक्तं - नायं मन्त्रः स्वयं कारणस्य तमसः प्रापकः । यदेति कालविशेषप्राप्तानुवादात् । प्राप्तिश्च -

'अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते ।
तमः परे देव एकीभवती'ति

सुबालोपनिषद्वाक्येन । तस्यां चाव्यक्ताक्षरक्रमेण 'यस्य शरीरमित्युपक्रम्य **'एष आत्मा अपहतपाप्मा दिव्यो देव एको नारायणः'** इति पाठान्नारायणाधिष्ठितस्य तमसः प्रापकं श्रुत्यन्तरमिह पुरोवाद इति तदनुरोधादनुवादमन्त्रश्रुततमोऽधिष्ठातृपरशिवशब्दो नारायणपर एव । **'तमो वा इदमेकमास'** इत्यादिश्रुत्यन्तरस्य पुरोवादत्वाश्रयणेऽपि तस्य सौबालवाक्यप्रतिपन्नविशेषपर्यवसायित्वेनाविशेषात् । एवं च 'तदक्षर मित्यादीनापि नारायणस्यैव प्रकारविशेषोपदेश इति । तत्र यथा 'विश्वजित्सर्वपृष्ठो भवती'ति विधेयपरबहुविषयसर्वशब्दार्थानुरोधात् बृहद्रथन्तररूपप्राकृतपृष्ठत्यागेन षाडहिकपृष्ठानुवादपरत्वं कल्प्यते, तथा यदा तम इत्यस्यापि शिवविधितात्पर्यानुरोधात् आपाततोऽन्यविषयसौबालादिवाक्यत्यागे श्रुत्यन्तरेषु विरुद्धानेकविशेषश्रवणात् क्वचिदप्यपर्यवसितमैत्रायणश्रुत्यादिप्रापितार्थानुवादपरतैवेति वक्तुं शक्त्येऽपि परमते वृद्धिलाभेन मूलहानिन्यायं सूचयितुं तन्मते मन्त्रस्यैव तावद्वैयर्थ्यापत्तिं दर्शयति --

पुरोवादश्रुत्यन्तरविदितरूपे यदि परं
नियच्छेदात्मानं पठितमिह मन्त्रे शिवपदम् ।
यदेत्याद्यं कालं मनुरयमनूद्य स्मररिपो
विधत्तां किन्नाम स्थितिमविदधानस्तव तदा ।।२०।।

अयमर्थः --- सत्यं 'यदा तम' इत्यनुवादः , न तु सौबालवाक्यमेव पुरोवादः। अन्येषामप्यनूद्यमानार्थस्य प्रापकाणां श्रवणेनाविशेषात् । नापि 'तत्र दिवे'त्यादिरप्यनुवादः । तद्वृत्तयोगेन तत्काले कस्यचिद्विधेयताप्रतीतेः । विधेयश्च तत्र न दिननिशाविभागाभावः , सदसदात्मकप्रपञ्चाभावो वा । पुरोवादेभ्य एव तयोः प्राप्तेः । न हि किञ्चिदनूद्य किञ्चिद्विधातुं प्रवृत्तं वाक्यमनुवादायावश्य-मपेक्षितात्पुरोवादादेवप्राप्तेऽर्थे पर्यवस्यत्साफल्यमश्नुवीत । अतस्तत्रापि न दिवेत्यादिरनुवादः । एवं च शिवशब्दोऽपि यदि कथञ्चिदौत्सर्गिकार्थपरतां हित्वा पुरोवादविशेषप्राप्ते नारायण एव पर्यवस्येत्, तदा 'यदा तमस्तदि'ति

किञ्चिद्विधातुमुद्यम्यार्धपथे स्थितं वाक्यं किंविधेयमासाद्य विश्राम्यतु । न हि तस्य नारायणवृत्तित्वे पुरोवादादप्राप्तं कञ्चिदर्थं पश्यामः । तस्मात् परमते वाक्यमेव तावद्वैयर्थ्यं प्राप्तमिति । ततश्च 'यथा 'एकादशपशोरवदानानि तानि द्विरवद्यती' ति विधिवैयर्थ्यपरिहाराय यद्यपि 'चतुरवत्तं यजमानः पञ्चावत्तैव वपा कार्या' इत्यत्र वपापदस्य विशिष्य वपाग्रहणे न तात्पर्यं, किंतु सामान्यतः पशुप्रकृतिकहविर्मात्रग्रहण इति निर्णीतं, तथात्राप्येतद्विधिवैयर्थ्यपरिहाराय पुरोवादे नारायणपदस्य विशिष्य विष्णूपाधौ न तात्पर्यं, किं तु सामान्येन परब्रह्ममात्रोपलक्षणमिति व्याख्येयम् । अन्यथा पुरोवादान्तरश्रुतप्रजापतिशब्दस्याप्येवं स्वार्थपरत्वे शिवशब्दस्य क्व पर्यवसानामित्य-निर्णयापाताच्च । तस्मात्तत्तत्पुरोवादश्रुततमोऽधिष्ठातृपरपरब्रह्म प्रजापतिनारायणादि-सकलशब्दार्थनिर्धारणेदंपरैतद्विधिबलात्सौबालश्रुतेरपि शिव एव पर्यवसानं स्यादिति भावः । पर्यवसानप्रकारस्तु सदृष्टान्तमग्रे व्युत्पादयिष्यते ।।२०।।

किं च मन्त्रोपनिषदः कार्त्स्न्येन शिवपरत्वादपि तदन्तर्गत-मन्त्रस्यान्यपरत्वोक्तिरयुक्तेति सूचयन्नेतदेव व्यवस्थापयति --

इयं मानोत्कृष्टा हरशिवमुखानन्यविषय-
त्वदाख्यारत्नालंकृतनिखिलमन्त्राङ्गमधुरा ।
समस्तेनैवास्तीत्युपनिषदुमावल्लभ दृढं
भवत्येवाधत्ते सकलमपि भावं गुणनिधौ ।।२१।।

वेदान्तरूपत्वात्सर्वप्रमाणमूर्धन्या, हरशिवेशरुद्रेशानमहेश्वरशब्दैः लोकप्रसिद्धैः 'अथ कस्मादुच्यते सर्वव्यापी' 'विश्वे देवाश्च यत्तस्मिन्विश्वरूपस्ततस्स्मृतः।' 'हंसो नाम सदाशिवः । अथाष्टभिर्नामभिः' इत्याद्यथर्वशिरोमहाभारतबोधायनसूत्राद्यवगमित-शिवनामभावैः सर्वव्यापिविश्वरूपहंसमहदादिशब्दैश्चानन्यविषयैर्देवतान्तराविषयैरन्य-देवतावाचिशब्दान्तरव्यतिकररहितैर्वा शिवनामरत्नैरलंकृतैः 'क्षरं प्रधानममृताक्षरं हरः। भावाभावकरं शिवम् । भूयः सृष्ट्वा पतयस्तथेशः । एको रुद्रो न द्वितीयाय तस्थुः । ईशानो ज्योतिरव्ययः । तमीश्वराणां परमं महेश्वरम् । सर्वव्यापी च भगवान् तं विश्वरूपं भूवभूतमीड्यम् । एको हंसो भुवनस्यास्य मध्ये । महान् प्रभुर्वै पुरुषः ।' इत्यादिभिस्सर्वमन्त्रावयवैर्मधुरा ' न तत्समश्चाभ्यधिकश्च दृश्यते ।' इति कण्ठोक्त्यैव

शिवसदृशपुरुषान्तरप्रतिषेधं कुर्वतीयं श्वेताश्वतराणां मन्त्रोपनिषत्

'छन्दांसि यज्ञाः क्रतवो भूतानि भूतभव्यं यच्च वेदा वदन्ति ।
अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्धः ।
मायान्तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्।।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं
(१. सर्वं परापरमिति पाठान्तरम्) जगत् ।।
यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः ।
तमाहुरग्र्यं पुरुषं महान्तं स एव काले भुवनस्य गोप्ता ।
विश्वाधिपस्सर्वभूतेषु गूढः स्वभावमेके कवयो वदन्ति ।
कालं तथान्ये परिमुह्यमानाः दैवस्यैष महिमा तु लोके ।
येनेदं भ्राम्यते ब्रह्मचक्रम् तमीश्वराणां परमं महेश्वरम्
तं दैवतानां परमं च दैवतम् पतिं पतीनां परमं परस्तात्
विदाम देवं भुवनेशमीड्यम् ।
न तस्य कश्चित् पतिरस्ति लोके न चेशिता नैव च तस्य लिङ्गम् ।
स कारणं करणाधिपाधिपो न चास्य कश्चित् जनिता न चाधिपः ।
स विश्वकृद्विश्वविदात्मयोनिः ज्ञः कालकालो गुणी सर्वविद्यः ।
प्रधानक्षेत्रज्ञपतिर्गुणेशः संसारमोक्षस्थितिबन्धहेतुः ।
यो ब्रह्माणं विदधाति पूर्वं यो व वेदांश्च प्रहिणोति तस्मै ।
तं ह देवतात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये ।'

इत्यादिमन्त्रेष्वत्यन्ताभ्यासस्फुटीकृतं सकलमूलप्रकृत्यधिष्ठातृत्वसर्वकारणत्व-सर्वेश्वरत्वसर्वोत्तमत्वानन्याधिपतित्वमुमुक्षूपास्यत्वादिपरभवविषयं सर्वमपि भावमनेकमन्त्राभ्यस्यमानशिवरुद्रादिश्रुतिसमर्पिते निखिलकल्याणगुणरत्नाकरे भवति साम्बशिव एव निधाय कार्त्स्न्येन तत्रैव पर्यवसितेत्यर्थः । अत्र विशेषणसाम्यात् अप्रस्तुतनायिकावृत्तान्तस्य समासोक्त्यैव गम्यतया तद्वाचिपदाप्रयोगः । स्पष्टीकृतं चास्याः कार्त्स्न्येन शिवपरत्वं कूर्मपुराणे सुशीलोपाख्याने -

'अथास्मिन्नन्तरेऽपश्यत्समायान्तं महामुनिम् ।
श्वेताश्वतरनामानं महापाशुपतोत्तमम् ।।'

इत्यादिना सुशीलस्य राज्ञः श्वेताश्वतरस्य महर्षेर्दर्शनं तद्वन्दनादिकं शिष्यभावेन परिग्रहप्रार्थनं चोपन्यस्य' सोऽनुगृह्याथ राजानमि'त्यादिना महर्षेस्तत्प्रार्थन-

-स्याङ्गीकारादिकमुक्त्वा

'ददौ तदैश्वरं ज्ञानं स्वशाखोक्तं हितप्रदम् ।
अशेषवेदसिद्धं तत् पशुपाशविमोचनम्'
इति पाशुपतज्ञानस्य श्वेताश्वतरशाखोक्तत्वकीर्तनेन,
'उवाच शिष्यान् संप्रेक्ष्य एतदाश्रमवासिनः ।
ब्राह्मणाम् क्षत्रियान्वैश्यान् ब्रह्मचर्यपरायणान् ।
मया प्रदर्शितां शाखामधीत्यैवेह योगिनः ।
समासते महादेवं ध्यायन्तो निष्कलं शिवम् ।
इह देवो महादेवो रममाणस्सहोमया ।
अध्यास्ते भगवानीशो भक्तानामनुकम्पया ।'

इति तच्छाखोक्तमार्गेण तेषां शिवध्यानोपवर्णनादिना च । इयं ह्युपनिषत् श्वेताश्वतरेण महर्षिणा दर्शिता शाखा ।
'तपः प्रसादाद्देवप्रसादाच्च ब्रह्म ह श्वेताश्वतरोऽथ विद्वान् ।
अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम् ।।' इत्यन्ते श्रवणात् । वायुसंहितायां चतुर्थे पशुपतिनिर्णयाध्याये शिवपरत्वमस्याः प्रपञ्चेनोपदर्शितम् ।।२१।।

यत्त्वस्याः शिवपरत्वमसहमानैः परैरुक्तम् अस्याः तृतीयेऽध्याये - **'वेदाहमेतं पुरुषं महान्तम् ।।'** इति पुरुषसूक्तपठितमन्त्राम्नानेन तत्प्रतिपाद्यस्य नारायणस्य प्रत्यभिज्ञानात्तत्परताऽस्या अवसीयते । न च **'तेनेदं पूर्णं पुरुषेण सर्वम्।।'** इत्यन्तेन तमनूद्य 'ततो यदुत्तरतरमि'त्यादिमन्त्रेण ततः परस्यैव कस्यचिद्वेदनममृतत्वसाधनमुक्त्वा तदनन्तरमन्त्रे **'तस्मात्सर्वगतश्शिव'** इति तत्र शिवपदप्रयोगात् ततोऽपि परत्वेन शिवप्रतिपादन एवास्यास्तात्पर्यमिति वाच्यम् । प्रथममेव वेदाहमेतमिति मन्त्रेण नारायणवेदनस्यैव मोक्षहेतुत्वस्य 'यस्मात्परं ने'त्यनन्तरमन्त्रेण तस्मात्पराभावस्य च प्रतिपादनात् तदनन्तरश्रुतमन्त्रसन्दर्भस्य तद्विरुद्धेऽर्थे तात्पर्यकल्पनायोगेन तत्रापि **'सहस्रशीर्षा पुरुषः'** **'पुरष एवेदं सर्वम्'** इति पौरुषसूक्तमन्त्रद्वयप्रत्यभिज्ञानात् **'सत्त्वस्यैष प्रवर्तक'** इति सत्त्वगुणोपाधिलिङ्गोपन्यासाच्च तस्यापि नारायणपरत्वनिश्चयेन च तदनुरोधेन ततः शब्दद्वयस्य पूर्वमन्त्रार्थस्य हेतुकरणे पूर्वमन्त्रान्तनिर्दिष्टस्य विश्वस्यावधिकरणे वा तात्पर्यकल्पनमिति' तन्निराकरोति -

क्वचित् पुंसूक्तस्य स्पृशति शिवमन्त्रानिति कथं
जहात्वेषानेकश्रुतिनियमितां त्वद्विषयताम् ।
अपि श्रीरुद्राणामिह बहुषु मन्त्रेषु भगवन्
अधीतेष्वज्ञानं किमिव च ततो निर्णयवचः ।।२२।।

श्रुतयो हि प्रत्यभिज्ञानात् स्थलद्वयपरामर्शापेक्षत्वेन विलम्वितात् वलवत्तराः । अथ चोपनिषदुपक्रममारभ्यानुवर्तमानात्यन्ताभ्यस्तानेकाभिधानश्रुतिप्रापितं शिवविषयत्वमपोह्य न देवतान्तरविषयत्वमापादयितुं शक्नोति पुरुषसूक्तमन्त्रप्रत्यभिज्ञा । छान्दोग्यश्रुतायामुपनिषदुपक्रमपर्यालोचनलब्धोद्गीथावयवविषयायामुद्गीथविद्यायां बृहदारण्यकश्रुतकृत्स्नोद्गीथकर्तृविषयोद्गीथविद्याप्रकरणपठितदेवासुरसङ्ग्रामासुरात्याभिप्रायाद्यर्थवादप्रत्यभिज्ञेव तदेकविषयत्वं , 'यः पशुकामस्स्यात् सोऽमावास्यामिष्ट्वा वत्सानपाकुर्यात् ये मध्यमास्स्युस्तानग्नये दात्रे पुरोटाशमष्टाकपालं कुर्यात् ये स्थविष्ठास्तानिन्द्राय प्रदात्रे दधंश्चरुं येऽणिष्ठास्तान्विष्णवे शिपिविष्टाय श्रृते चरुमि'ति विशिष्टकर्मविधिवाक्ये अभ्युदयोष्टिश्रुतदेवतासम्बन्धपरवाक्यच्छायाप्रत्यभिज्ञेव दधिपयसोः प्रदेयधर्मत्वमिति भावः । न च तत्र तत्र प्रतिपाद्यभेधेऽप्यर्थवादादिमात्रसारूप्यं न विरुद्धम् । इह तु पुरुषसूक्तमन्त्रोपनिषदोः प्रतिपाद्यभेदे द्वयोः सार्वात्म्याद्ययोगात् 'पुरुष एवेदं सर्वमि'ति 'नान्यः पन्था' इति चोभयत्र पाठो विरुद्ध इति वाच्यम् । ऐक्यवादे वास्तवैक्यसत्त्वेन भूमात्मनोरिव परमते पुरुषसूक्तशाण्डिल्यविद्ययोर्विद्याभेधेऽपि तद्विषययोरिव सार्वात्म्योपदेशस्य सर्वमूर्त्यनुस्यूतनिरुपाधिकचैतन्याभिप्रायेण तद्वेदनस्यैव मुक्त्युपायत्वभित्यवधारणस्य च तयोः प्रतिपाद्यमूर्तिभेदेऽप्युपपन्नतमत्वात् पररीत्याश्रयणेऽपि शिवस्यापि **'सर्वो वै रुद्रः अहमेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्तः ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ।।'** इत्यादिश्रुतिषु सार्वात्म्याद्युपदेशदर्शनेनान्यतरसार्वात्म्योपदेशस्य **'आपो वा इदं सर्वम्'** इत्यादिवत् गौणत्वस्य द्वयोरपि क्रमेण मुक्त्यर्थं भजनीयत्वे प्रासादाधिरोहणे सोपानपर्वणोरिव तयोः पथ्यन्तरव्यवच्छेदेन मुक्तावुपायत्वोपदेशस्य च समर्थयितव्यतया श्रुत्यन्तरेष्विवात्रापि शिवस्य सार्वत्म्याद्युपदेशस्य श्रुतिद्वयेऽपि प्रतिपाद्ययोः जगत्कारणत्वावगमस्य बलानुरोधिन्या व्यवस्थया वक्ष्यमाणन्यायेन मूलकारणत्वावान्तरकारणत्वविषयत्वस्य चोपपन्नत्वेनान्यथासिद्धप्रत्यभिज्ञामात्रेण

प्रबलानेकश्रुतिबाधनायोगात् । अन्यथा मन्त्रोपनिषन्मन्त्रप्रत्यभिज्ञा पुरुषसूक्तस्यैव पराभिमतनारायणवाचिपुरुषश्रुत्यादिबाधेन शिवपरत्वमिति वैपरीत्यापत्तेर्दुष्परिहरत्वात्। तस्मादकिञ्चित्करीह पुरुषसूक्तप्रत्यभिज्ञा। परोपन्यस्तं लिङ्गं तु सत्त्वशब्दस्यानेकार्थत्वादनेकश्रुतिविरुद्धैकलिङ्गानुन्मेषाच्च न शङ्कार्हमित्युपेक्षितम् । किं च रुद्राध्यायमन्त्राणामपि इह पठितत्वेन तत्प्रत्यभिज्ञाया अपीह सत्त्वात् तामनादृत्य पुरुषसूक्तप्रत्यभिज्ञैकपक्षपातेन परेषां ततो निर्णयकथा वृथेत्याह -- **अपि श्रीरुद्राणामिति** । पठ्यते ह्यस्या तृतीयाध्याय एव -- **'या ते रुद्र शिवा तनूः' 'यामिषुं गिरिशन्त हस्ते'** इति मन्त्रद्वयम् । न च **'मा हिंसीः पुरुषं जगत्'** इत्येतदनन्तरं **'ततः परं ब्रह्म परं बृहन्तम्'** इत्युपक्रम्य वेदाहमित्यादिमन्त्रपाठात् रुद्रात् परत्वेन विष्णोः प्रतिपादनेऽस्यास्तात्पर्यमस्त्विति वाच्यम् । प्रथममेव **'य एको जालवानीशत ईशनीभिः'** इत्यादिमन्त्रैः सर्वेश्वरत्वमुक्तिप्रदत्वसकलसृष्टिसंहारस्थिति-स्वातन्त्र्यविश्वाधिकत्वादिधर्मवत्तया शिवस्य प्रतिपादनेन तद्विरुद्धेऽर्थे तदनन्तरमन्त्र-सन्दर्भस्य तात्पर्यकल्पनायोगात् । तत्रापि **'मानस्तोक'** इत्यादिरुद्रमन्त्रप्रत्यभिज्ञानेन **'रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यमि'**ति रुद्रपदसमभिव्याहारानुगृहीत-दक्षिणमुखसद्भावसूचितश्रीसदाशिवदक्षिणामूर्त्यन्यतरविग्रहलिङ्गबलेन च तस्यापि शिवपरत्वावसायाच्च तदनुरोधेन अत्रापि ततःशब्दो हेत्वादिपर इति परोक्तरीत्यैव सुवचतया परेषां स्ववाग्वज्रेणैव प्रहतानामिह शङ्कानवकाशात् । तस्मात् परस्परप्रतिपक्षिते प्रत्यभिज्ञाद्वये शिवरुद्राद्याभिरभिधानश्रुतिभिरेव देवताविशेषनिर्णय इति भावः ।।२२।।

प्रत्यभिज्ञयोरपि रुद्राध्यायमन्त्राणां पुरुषसूक्तमन्त्रेभ्यः प्राक्पश्चाच्च संदंशन्यायादुभयत आम्नानेनाग्न्यादिसाधारण्येऽपि शङ्क्यमानैतच्छ्रुतिविषयभाव-देवतान्तरव्यावृत्तेन रुद्र इति लोकप्रसिद्धेन गिरित्रगिरिशन्तेतिवेदप्रसिद्धेन च शिवनाम्ना घटितत्वेन शिवासाधारणानेकनामरूपायुधादिप्रकाशनेन शिवविषयत्वस्य स्पष्टत्वेन च तत्प्रत्यभिज्ञाया बलवत्त्वात् विषयविशेषसमर्पणक्षमत्वाच्च तत एवास्याः प्रतिपाद्यविशेषनिर्णयो युक्त इत्याशयेनाह --

मनूनां रौद्राणां प्रथममनुचाम्नानमिह यत्
यदप्येते नाथ स्फुटतरभवन्नामघटिताः ।

दृढं रुद्राध्यायो यदपि च भवत्येव नियतः
ततस्तेषामेव प्रमितिकरमाम्नानमिह नः ।।२३।।

पुंसूक्तमन्त्रास्तु रुद्रमन्त्रसन्दर्भमध्यपतिताः, न पृथगाम्नाताः, न च देवताविशेषा-साधारणपदघटिताः । नापि पुंसूक्तस्य शिवादन्यत्र पर्यवसानमित्यत्र किञ्चित्प्रमाणमस्ति। पुरुषशब्दासाधारण्यस्य प्रागेव निराकरणात् । कथञ्चिदेतत्सूक्त-प्रतिपाद्यस्यासाधारण्येन पुरुषाभिधानकल्पनायामपि तावता शिवादन्यत्र पर्यवसानाभावात् । अन्यस्य च श्रुत्यादीनामन्यतमस्य प्रामाणस्यानुपलम्भादिति तत्प्रत्यभिज्ञाया दौर्बल्यं, विरुद्धविषयसमर्पणाक्षमत्वं चार्थात्सूचितम् ।।२३।।

एवं पुरुषसूक्तस्य देवतान्तरपरत्वेऽपि श्रुतीनां रुद्रोपनिषत्प्रत्यभिज्ञायाश्च प्रबलत्वाद्वस्तुतो देवतान्तरपरत्वे प्रमाणानुपलम्भाच्च तत्प्रत्यभिज्ञानमकिञ्चित्करमिति मन्त्रोपनिषदः कार्त्स्न्येन शिवपरत्वमास्थितं निर्व्यूढम् । अधुना तत्प्रसङ्गात्तस्यापि शिवपरत्वमेवाभ्युपगन्तुं युक्तमिति उपपादयति --

उरीकर्तुं युक्ता हर पुरुषसूक्तस्य च बुधैः
त्वयीशानश्रुत्या समधिगमिते पर्यवसितिः ।
भवन्त्यप्यन्येज्याविधिषु विनियोगा विधिबलात्
अदोनिर्वाहार्थान्यपि विवरणानि स्मृतिकृताम् ।।२४।।

उतामृतत्वस्येशान इतीशानपदश्रुतिः ।
रूढ्या शिवमुपस्थाप्य सूक्तं नयति तद्वशम् ।

नन्वमृतत्वस्येतीशितव्योपादानात्तदैश्वर्यरूपयौगिकार्थविधित्सयाप्रयुक्तमीशानपदं **'सर्वस्यै वाच ईशाने'** त्यत्रेव केवलयोगिकत्वान्न रूढ्या शिवस्य प्रतिपादकमिति चेत्, न । तदनुपादान इव तदुपादानेऽप्यवयवशक्त्या यौगिकार्थं प्रतिपादयत एव तस्य समुदायशक्त्या शिवस्यापि प्रतिपादकत्वस्यौत्सर्गिकस्य दुर्वारत्वात् इह केवलयौगिकत्वस्यैवासिद्धेः । न ह्यवयवार्थप्रतिसम्बन्ध्यनुपादान एवं समुदाय-शक्त्युन्मेष इति कश्चिद्व्युत्पत्तिसिद्धो नियमः । **'शब्दादेव प्रमित'** इत्याधिकरणे

'अङ्गुष्ठमात्रः पुरुषः' इति मन्त्रप्रतिपाद्यस्य पुरुष**'स्येशानो भूतभव्यस्ये'**तीशितव्योपादानेऽपीशानश्रुत्या परब्रह्मत्वनिर्णयात् । अन्यथा तत्रापीशानशब्दादैश्वर्यरूपपरब्रह्मलिङ्गमात्रप्रतीत्यापत्त्या तदभिधानश्रुतिरूपशब्दान्निर्णयाभावापातात् । न च तत्र लिङ्गादेव निर्णयोऽस्त्विवति वाच्यम् । प्रथमश्रुताल्पपरिमाणरूपजीवलिङ्गविरोधिना चरमश्रुतेन लिङ्गमात्रेण निर्णयायोगात्। तस्य जीवलिङ्गत्वाभावे पूर्वपक्षबीजाभावेनाधिकरणानारम्भापत्तेः, सौत्रशब्दपदस्यासामञ्जस्यापत्तेश्च । यथाश्रुतार्थसमर्थनसम्भवेन तस्य क्लिष्टार्थान्तरकल्पनासहिष्णुत्वात् परैरपि तत्र तस्य स्वाभिमते ब्रह्मणि शक्त्यभिमानेन नेश्वरसम्बन्धिलिङ्गान्निर्णयः, किंत्वीश्वरवाचिशब्दादेवेत्येवकाराभिप्राय इत्युक्तत्वाच्च। तस्मादङ्गुष्ठमन्त्रवत्पुरुषसूक्तस्यापीशानश्रुतिसमर्पिते परब्रह्मणि श्रीसदाशिवे पर्यवसानमिति युक्तम् । नन्वस्य सामविधिब्राह्मणे **'इदं विष्णुः वृक्षस्य वृष्ण'** इत्यादिना वैष्णव्यां संहितायामुपदेशात् आथर्वणेऽष्टादशमहाशान्तिप्रकरणे तत्तच्छान्तिषु तत्तद्देवत्यमन्त्रविनियोगावसरे वैष्णव्यां पुरुषसूक्तमिति विधानात् शौनकबोधायनादिस्मृतिषु विष्णुपूजाध्यानहोमादिषु विनियोगाच्च विष्णुपरत्वं प्रतीयत इत्याशङ्क्याह - भवन्त्विति । अयमाशयः - अस्ति तावच्छिवाराधनेऽपि विनियोगः तदभिधानश्रुत्याद्यनुकूलः, बोधायनसूत्रे शिवसङ्कल्पादिभिस्सह श्रीरुद्राङ्गन्यासमन्त्रेषूपदेशात् । छन्दोगानां केषाञ्चिद्वाजसनेयिनां च महारुद्रजपमध्ये विनिवेशात् ।

'नमकं चमकञ्चैव पुंससूक्तं च नित्यशः ।
जपन्नेति महादेवं गृहं गृहपतिर्यथा ।।

इति पुराणेष्वपि श्रवणात् । वास्तुशान्तौ

'आवाह्य कुम्भे देवेशं रुद्रं भुवननायकम् ।'

इत्युपक्रम्य

'नमकं चमकं चैव पौरुषं सूक्तमेव च ।'

इत्यादिना जपे विनियोजनात् लैङ्गादित्यपुराणादिषु

'सकूर्चेन सपुष्पेण स्नापयेन्मन्त्रपूर्वकम् ।
मन्त्रांश्च ते प्रवक्ष्यामि श्रृणु सर्वार्थसिद्धये ।।

'इत्युपक्रम्य

'ज्येष्ठसाम्नां त्रयेणैव तथा देवव्रतैरपि ।
रथन्तरेण पुण्येन सूक्तेन पुरुषेण च ।।'

इति शिवाभिषेकमन्त्रेषु परिगणनाच्च । एवं च यथा **'उद्बुध्यस्वाग्ने' 'अग्निर्मूर्धा दिवः ककुत्'** इत्यादिमन्त्राणां ग्रहयज्ञे तत्तद्ग्रहाराधने तत्तद्देवत्यमन्त्रविधानावसरे बुधभौमादिपूजासु विनियुक्तानामपि बहुशस्तस्याराधनजपहोमादिषु विनियुज्यमानानामपि विरुद्धविनियोगमात्रेण श्रुतितदनुकूलविनियोगान्तरप्राप्तमाग्रेयत्वादिकं न हीयते, तथास्यापि **'अथ नारायणाभ्यामुपस्थानम्' 'यजेत्पुरुषसूक्तेन धनदं विश्वरूपिणम्'**। इत्यापस्तम्बसूत्रशातातपस्मृत्यादिसिद्धविनियोगान्तरेणेव विष्णुसमाराधने विनियोगेनापि श्रुतिप्राप्तं तदनुरोधिविनियोगानुमोदितं च शिवपर्यवसायित्वं न हीयत इति । नन्वस्त्वेवं विनियोगमात्रस्यान्यथासिद्धिः, तथापि पुराणेषु केषुचित्पाञ्चरात्रसंहिताविशेषेषु च नारायणस्यैतत्सूक्तप्रतिपाद्यसहस्रशीर्षत्वादिविशिष्टब्राह्मणाद्युत्पत्तिस्थानतत्तदवयवयुक्तरूपोपदेशैरेतत्सूक्तस्थतत्तन्मन्त्रार्थकथनमुखेन नारायणपरतया विवरणदर्शनात्तत्परत्वमभ्युगन्तव्यम् । उपबृंहणानुरोधित्वाद्वैदिकार्थव्यवस्थाया इत्याशङ्क्य मन्त्रविवरणरूपोपबृंहणानां श्रुतविनियोगान्तरनिर्वाहार्थत्वेनान्यथासिद्धिसम्भवान्न तैः श्रुतितदनुकूलविनियोगावगमितं

'द्यौर्मूर्धा तु विभोस्तस्य खं नाभिः परमेष्ठिनः ।
सोमसूर्याग्नयो नेत्रं दिशश्श्रोत्रे महात्मनः ।
वक्राद्वै ब्राह्मणास्सर्वे ब्रह्मा च भगवान्प्रभुः ।
इन्द्राविष्णू भुजाभ्यां तु क्षत्रियाश्च महात्मनः ।
वैश्याश्चोरुप्रदेशात्तु शूद्राः पादात् पिनाकिनः ।।'

इत्यादिलैङ्गादिदृष्टोपबृंहणानुमोदितं च शिवपरत्वमस्य हापयितुं शक्यमित्याशयेनाह - **अदोनिर्वाहार्थानीति** । इदमत्र विवक्षितम् - अस्त्यन्यदेवत्यानामपि मन्त्राणां विधिबलात् देवतान्तरयजनेऽपि विनियोगः । स च मन्त्राधिकरणन्यायेन मन्त्रविनियोगस्य वाक्यार्थप्रतिपादनद्वारत्वात् मन्त्रस्थितदेवतापरेण पदेन मुख्यवृत्त्यभावे ऐन्द्राधिकरणन्यायेन वृत्त्यन्तरेणापि यजनीयदेवतायाः प्रतिपादनेन तत्समभिव्याहृतविशेषणपदानाञ्च **'दर्भैस्तृणीत हरितैरि'** त्यत्र दर्भादिषु हरितत्ववत् तत्र सम्भवदर्थानां तद्विशेषणगुणादिप्रकाशनद्वारा **'सोमः पवते जनिता मतीनामि'**ति मन्त्रे सोमलतायामिन्द्रादिजनयितृत्ववत् तत्रासम्भवदर्थानामसमवेतस्यापि समवेतविशेषणतयाभिधानं मन्त्रश्रुतविशेषणविशिष्टरूपप्रकाशनमभ्युदयकारीति नियमादृष्टार्थमिति **'अवचनं तेषामितरार्थं प्रयुज्यत'** इति नावमिकाधिकरणे व्यवस्थापनात् अभ्युदयार्थं, **'अगन्मस्सुवः सुवरगन्म'** इत्यत्र फलाभिधानवदादरादिशयजननार्थं वा

तदसमवेतस्यापि गुणजातस्याभिधानद्वारा तत्र पर्यवसानेन च निर्वाह्य इति विदितमेतन्मीमांसापरिचयशालिनाम् । तदिह पुरुषसूक्तस्य श्रुत्यादिनियमित-शिवैकान्त्यस्यापि श्रुतिस्मृतिदृष्टविनियोगान्तरनिर्वाहाय धनदादिप्रतिपादनप्रकार-वन्नारायणप्रतिपादनप्रकारस्यापि कस्यचित्पुराणाद्यभावे पुरुषबुध्यापि कल्पनीयत्वात् स एव तत्समाराधनतदङ्गतत्फलादिप्रपञ्चनप्रधानेषु पुराणागमेषु नियमित इत्यन्यथासिद्धान्युपबृंहणामि । दृश्यन्ते हि असमवेतार्थविशेषणानामपि मन्त्राणां तथैव पुराणागमेषूपबृंहणानि -

'सोमं ससर्ज यज्ञार्थं सोमाद्द्यौस्समजायत ।
धरा च वह्निः सूर्यश्च वज्रपाणिश्शचीपतिः ।
विष्णुर्नारायणः श्रीमान् सर्वं सोममयं जगत् ।।' इत्यादीनि ।

तस्मान्न तानि श्रुत्यादिप्रापितं शिवपरत्वं हापयितुमीशत इति । न चैवमेकेन मन्त्रेणानेकार्थप्रतिपादने कश्चिद्विरोधः । एकस्यैव मन्त्रस्यानेकविनियोजक-प्रमाणद्वयोपनिपातेनानेकविनियोगवत्तन्निर्वाहान्यथानुपपत्तिकल्प्यस्यानेकार्थपरत्वस्यापि प्रमाणबलायातस्य सर्वसम्मतत्वात् । लोकेऽप्येकस्यैव पदस्य प्रयोगभेदेनानेकार्थ-परत्वस्योपलम्भेनात्रापि प्रयोगभेदेनानेकार्थप्रतिपादनस्य संम्भवाद्वस्तुविरोधाभावाच्च । नन्वेवं प्रयोगभेदेनाप्यनेकदेवताप्रतिपादनपरमिदं सूक्तमनेकत्रासमभवत् **'नान्यः पन्था अयनाय विद्यते'** इत्यादिकं प्रतिपादयत् क्व वस्तुवृत्त्यैतन्महिमजातं प्रतिपादयति, क्व वा असमवेतमपि केवलमभ्युदयार्थं प्रकाशयतीति कथमवसेयमिति चेत्, इत्थम् -- अनेकत्र विनियुक्तानां मन्त्राणां यत्र देवतायां तदभिधानश्रुत्यादिसद्भावेन स्वारस्यं, तत्र श्रुतविशेषणजातस्य वस्तुतः प्रतिपादनमित्युत्सर्गः । अभिधानश्रुत्याद्यनुग्रहातिलङ्घने कारणाभावात् । तत्तद्देवतोत्कर्षवादिभिस्सर्वैरपि तान्त्रिकैरन्यत्रापि तत्र तत्र विनियुक्तानां तत्तद्देवतालिङ्गानां मन्त्राणां तत्तद्देवतोत्कर्षे प्रमाणतयोपन्यासाच्च । यत्र तु शब्दस्वारस्यविषये प्रतिपाद्यविशेषणानां मानान्तरेण बाधनिश्चयः तत्रोत्सर्गस्य त्यागः, यथामानं कथञ्चिद्वृत्त्यन्तरोपस्थिते चान्यत्र तेषां वस्तुतः प्रतिपाद्यत्वेनान्वयः । अन्यत्राप्यन्वयायोग्यानां तु स्तुत्याद्यर्थवाद इति वस्तुस्थितिः । ततश्च भेदवादे यद्यत्र उत्सर्गोऽनुरुध्यते, यदि वा तद्बाधशङ्कया श्रुत्यन्तरं निरीक्ष्यते, उभयथापि परमशिव एवैतन्महिमजातं वस्तुवृत्त्या प्रतिपादयतीत्यवसेयम् । तस्यैवेहाभिधानश्रुतेः पाठात् । तस्यैव मन्त्रोपनिषदथर्वशिरःकैवल्यश्रुत्यादिषु **'नान्यः पन्था विद्यतेऽयनाय'**, **'यदा चर्मवदाकाशं'** **'तेषां शान्तिश्शाश्वती नेतरेषां, नान्यः पन्था विमुक्तये'**

इत्यादिप्रदेशेषु मुक्त्युपायत्वावधारणाच्च । एतेन विनियोगोपबृंहणाभ्यामस्य सूक्तस्य विष्णुपरत्वव्यवस्थापनं परेषां निरस्तम् । न च पुरुषशब्दस्यानेकसाधारण्येऽपि आरुणकेतुके **'पूर्वमेवाहमिहासमि'**ति कूर्माकृतिलिङ्गोपस्थापितस्य नारायणवचनं प्रदर्श्य **'तत्पुरुषस्य पुरुषत्वम्'** इति तदर्थं तत्र पुरुषशब्दस्य प्रवृत्तिनिमित्तमभिधाय **'सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात्** । भूत्वोदतिष्ठत्'इत्यनन्तरपाठात् सहस्रशीर्षेत्यादिमन्त्रस्थपुरुषशब्दस्य तत्प्रवृत्तिनिमित्तकत्वेन नारायणपरत्वनिर्णयात् तस्य चात्र सूक्तादौ श्रवणात् **'महादेवं महापुरुषं वार्चयेदि'**ति कल्पसूत्र-प्रयोगावगमिततदसाधारण्यस्य महापुरुषशब्दस्य **'वेदाहमेतमि'** ति मन्त्रे पाठात् **'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'** **इति लक्ष्मीपतित्वलिङ्गोपन्यासेन'** **'यमन्तस्समुद्रे कवयो वयन्ति विद्यतः पुरुषादधी'**ति समुद्रशायित्वविद्युद्वर्णपुरुषत्वलिङ्गितपुराणादि-प्रदेशविशेषप्रतिपादितकनकवर्णनारायणमूर्तिप्रतिपादनपरेण **'अम्भस्यपार'** इति सूक्ते स्मृतिषु तत्समाराधने हविर्निवेदने विनियुक्तैः **'हिरण्यगर्भः समवर्तताग्र'**इत्यादिमन्त्रैश्च सह **'उद्भ्यः सम्भूतो हिरण्यगर्भ इत्यष्टौ'** इति तदनुवाकश्रुतवाक्योपपादितेनैक-वाक्यत्वेन च नारायणपरतया सिद्धेन समनन्तरानुवाकेन स्वप्रतिपाद्यमहापुरुषमहिम-वर्णनप्रवृत्तेनैकवाक्यत्वात् नारायणानुवाकेन नारायणे प्रतिपन्नस्य सहस्रशीर्षत्वादि-धर्मस्य सुबालोपनषदि **'चक्षुश्च द्रष्टव्यं च नारायणः'** इत्यादिना नारायणात्मकत्वं सर्वस्योक्त्वा तदुपसंहारे पाठितस्य **'पुरुष एवेदं सर्वं'** इति मन्त्रस्य च प्रत्यभिज्ञानात् **'पुरुषेण नारायणेन यजमान उपतिष्ठत'** इत्यापस्तम्बादिभिस्तन्नाम्ना सूक्तस्य व्यपदेशाच्च नारायणपरत्वमस्य स्पष्टमिति परोक्तं युक्तम् । सर्वस्याप्यस्य गगनललेख्यायमानत्वात् । आरुणकेतुके **'कूर्मः पुरुषो भूत्वोदतिष्ठत्'** इत्यत्रापुरुषस्य पुरुषभावापत्तिप्रतिपादनेन सहस्रशीर्षेत्यादिमन्त्रस्थपुरुषपदस्यानन्तर-वाक्यप्रतिपन्नप्रवृत्तिनिमित्तकत्वव्यरेकेस्यावसायात् । अन्यथा तेन प्रवृत्तिनिमित्तेन प्रागपि तस्य पुरुषशब्दाभिलप्यतया पुरुषो भूत्वेत्युक्तिविरोधापत्तेः । परोक्तरीत्यैव

'पुरुषो नाम सम्पूर्णः शिवः सत्यादिलक्षणः ।
साम्बमूर्तिधरो नान्यो रुद्रो विष्णुरजोऽपि वा ।।'

इति स्कान्दोक्तेः पूर्णत्वेन प्रवृत्तिनिमित्तेन पुरुषशब्दस्य शिवे असाधारण्यात् **'यत्रयत्र कर्मभ्रेषो वा यज्ञभ्रंशो वा, तत्रतत्र पुरषं विचिन्तयन् पुरुषसूक्तं ब्रूयात् पूर्णत्वात्पुरुष इति विज्ञायतेही'**ति वाधूलसूत्रे पुरुषसूक्तश्रुततत्प्रतिपाद्य-परपुरुषशब्दस्य तत्प्रवृत्तिनिमित्तकत्वावसायात् । **'सर्वो वै रुद्रः'**

इत्युक्त्यनन्तरमौचित्यात् **'पुरुष एवेदं सर्व'**मिति मन्त्रविरोधशङ्कानिराकरणार्थया **'पुरुषो वै रुद्र'** इत्यादिश्रुत्या तस्य रुद्रपरत्वेन व्याख्यानाच्च तस्य परमशिवश्रुतित्वस्यैव सूपपादत्वान्महापुरुषशब्दस्यापि क्वचिदपि नारायण-नामत्वेनानुशासनाभावात् प्रयोगमात्रस्य गौतमस्मृतिपठितकृचछ्रमन्त्रेषु महापुरुषायेति शिव इव योगेनाप्युपपत्तेरतदभिधानत्वात् तथात्वेपि **'पुरुषं महान्तमि'**ति पृथक्पदयोरेवेह श्रवणेन तस्याश्रवणादवयवार्थव्यवस्थितिसिद्धो योगरूढपद-प्रतिपादायावयवार्थपरवाक्यस्यान्यत्रापि प्रयोगम्य दुर्निवारंत्वात् । अन्यथा पङ्कजादि-शब्दानां योगरूढिवादिना केवलयोगावादिनं प्रत्यन्यत्रापि प्रयोगप्रसङ्गस्यापादकोक्तौ मूकीमावापत्त्याऽऽपादयितुमशक्यवत्वापत्तेः । भवादिशिवनामाष्टकमध्ये पठितस्य **'अथाष्टभिर्नामभिरि'** त्यादिबोधायनसूत्रे तन्नामत्वेन व्यवहृतस्य

'पूजयते यत्सुरैर्नित्यं महांश्चैव प्रमाणतः ।
धातुर्महेतिपूजायां महादेवस्ततस्स्मृतः ।'

इति साम्बपुराणे तन्नामत्वेन निरुक्तस्य महच्छब्दस्य **पुरुषं महान्तमिति** पाठे नामतश्शिवपरत्वस्यैव प्रतीतेः **'अम्भस्यपार'** इति सूक्ते **'यमन्तः समुदे कवयो वयन्ति विद्युतः पुरुषादधी'**ति उपन्यस्तलिङ्गयोः

'लिङ्गमर्ति महाज्वालामालासंवृतमव्ययम् ।
लिङ्गस्य मध्ये रुचिरं चन्द्रशेखरविग्रहम् ।
व्योममार्गे तथा लिङ्गे ब्रह्माणं हंसरूपिणम् ।
विष्णुं वराहरूपेण लिङ्गस्याधस्त्वधोमुखम् ।।
ब्रह्माणं दक्षिणे तस्य कृताञ्चलिपुटं स्थितम्।
वामे विष्णुं महाबाहुं कृताञ्चलिपुटं तथा ।।
मध्ये लिङ्गं महाघोरं महाब्धेरम्भासि स्थितम् ।
ध्यात्वा प्रदोषसमये शिवसायुज्यमाप्नुयात् ।।
एकार्णवे तु त्रैलोक्ये ब्रह्मा नारायणात्मकः ।
भोगिशय्यागतश्शेते त्रैलोक्यग्रासबृंहितः।।
जनस्थैर्योगिभिर्देवश्चिन्त्यमानोऽब्जसम्भवः ।
ततोऽवतीर्य विश्वात्मा देहमाविश्य चक्रिणः ।।
सुष्वाप योगशयने एकीभूयाऽथ विष्णुना ।
ब्रह्मा कमलवर्णाभो रुद्रः कालाग्निसंन्निभः ।।

पुरुषः पुण्डरीकाभो रूपं तत् परमात्मनः ।
तप्तहेमनिकायाभं शितिकण्ठं त्रिलोचनम् ।।
प्रसादसुमुखं वीक्ष्य प्रणेमुर्जातकौतुकाः ।।'

इत्यादिपुराणदर्शनात् । **'हिरण्यगर्भ'** इत्यादिमन्त्राष्टकस्य च **'य ईशे अस्य द्विपदश्चतुष्पद'** इति **'एतावन्तो वै पशवः द्विपादश्च चतुष्पादश्चे'**ति श्रुत्यन्तरप्रतिपन्नद्विपाच्चतुष्पाद्रूपपशुपतित्वलिङ्गोपन्यासेन हिरण्यगर्भश्रुत्या च शिवप्रजापतिसाधारण्यात्तस्य नारायणैकान्त्यासिध्द्या तदेकवाक्यतया च **'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ'** इत्यत्र हल्लेखावाच्योमापतित्वलिङ्गस्यापि प्रतीत्या लक्ष्मीपतित्वलिङ्गेन नकोत्तरनारायणस्य नारायणपरत्वव्यवस्थित्ययोगेन तदेकवाक्यतयापि परेप्सितानिर्वाहात् **'अम्भस्यपार'** इत्यादेरन्ते **'पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि तन्नो रुद्रः प्रचोदयात्'** इति श्रवणान्मध्येऽपि **'नैनमूर्ध्वं न तिर्यञ्चमेष हि देवः प्रदिशोनु सर्वाः विश्वतश्चक्षुरुत विश्वतोमुखः'** इत्यादीनां मन्त्रोपनिषदथर्वशिरस्समाम्नातानां मन्त्राणां प्रत्यभिज्ञानात् **'प्रजापतिश्चरति गर्भे अन्तरि'**त्यत्र प्रजापतिशब्दस्य परमत इव योगेन

'यस्मात्पाति प्रजास्सर्वाः प्रजापतिरिति स्मृतः ।
देवेषु च महादेवो महान्देवस्ततः स्मृतः ।।'

इति लैङ्गे शिवनामसु च निर्वचनदर्शनेन शिव एव प्रवृत्त्युपपत्तेः

'हिरण्यमस्य गर्भेऽभूत् हिरण्यस्यापि गर्भजः ।
तस्याद्धिरण्यगर्भोऽसौ पुराणेऽस्मिन्निरुच्यते ।।

इति' तत्रैव निर्वचनात् बोधायनसूत्रे शिवशङ्करादिद्वादशनाम्नां मध्ये परिगणनाच्च । **'हिरण्यगर्भस्समवर्तताग्र'** इत्यत्र हिरण्यगर्भशब्दस्यापि तत्र प्रवृत्त्युपपत्तेः **'हिरण्यगर्भस्समवर्तताग्र इत्याधारमाधारयती'**ति वायव्यपशौ ऐन्द्रे द्वितीयाधारे विनियोगवत् नारायणसमाराधने तद्विनियोगस्याप्यविरोधाच्च तदेकवाक्यत्वात् 'ह्रीश्च त' इति मन्त्रस्य केषांचित् ग्रहयज्ञे सोमाधिदैवतगौरीपूजायां विनियोगस्य स्मृत्यर्णवादिषूक्तत्वात् अन्यत्र च विनियोगानुपलम्भात् प्रथमश्रुतत्वाच्च हल्लेखाह्वयभुवननायिकापरत्वात् तदनुरोधन लक्ष्मीशब्दस्य वायुसंहितायां

'तत्र माहेश्वरी लक्ष्म्या मूर्तिमूर्तिमतः प्रभोः' ।।

इत्यारभ्य

'तस्याङ्कमण्डलारूढा शक्तिर्माहेश्वरी वरा ।

महालक्ष्मीरिति ख्याता श्यामा सर्वमनोहरा ।।'

इति श्रुतायां महेश्वरशक्तिरूपायां परशक्त्यंशलीलायां वृत्त्युपपत्तेः **'श्रीश्च ते लक्ष्मीश्च पत्न्यौ'** इति वाजमसनेयिपाठे श्रीशब्दस्य समानप्रकरण-गतत्दृल्लेखाश्रुत्यनुरोधेनोमायामेव **'श्रियं लक्ष्मीमौपलामम्बिकां गामि'**त्यायुष्यसूक्ते तत्र प्रयोगदर्शनाद्वृत्त्युपपत्तेः । हृल्लेखायाः कमलायां प्रयोगादर्शनेन वैपरीत्यशङ्का-नवकाशात् लैङ्गे ब्रह्मनारायणकृतशिवस्तोत्रे

'नमोऽस्तु लक्ष्मीपतये श्रीपते ह्रीपते नमः ।।'

इति शाखाभेदभिन्नपाठद्वयोपसंहारेण उपबृंहणाच्च **'ह्रीश्च ते लक्ष्मीश्च पत्न्या'**वित्यनेन उमापतित्वलिङ्गाभिधानप्रतीतेः, **'अहोरात्रे पार्श्वे'** इत्यस्य **'शर्वरी त्वमहं दिनमि'**ति उमामहेश्वरसंवादोक्तेरर्धनारीश्वररूपे स्वारस्यात् **'नक्षत्राणि रूपमि'**त्यस्य

'स्वरूपं त्रिपुरघ्नस्य वक्ष्ये कालस्वरूपिणः ।
येनाम्बरं मुनिश्रेष्ठा व्याप्तं लोकहितैषिणा ।
यत्राश्विनी च मरणी कृत्तिकायास्तथांशकः ।
मेषराशिः कुजक्षेत्रं तच्छिरः कालरूपिणः ।।'

इत्यादिना

'प्रोष्ठपद्यंश एकश्च उत्तरा रेवती तथा ।
द्वितीयं जीवसदनं मीनस्तु चरणावुभौ ।।'

इत्यन्तेन वामनपुराणवचनजातेन प्रतिपादिते कालात्मके भगवद्विग्रहे सामञ्जस्यात् कार्त्स्न्येन श्रीरुद्राङ्गमन्त्रत्वेन विधानाच्च उत्तरनारायणस्य शिवपरत्वनिश्चयात्तदेक-वाक्यतयापि तत्परत्वस्यैव सुकरोपपादनत्वात् श्रुत्यन्तरशब्दार्थप्रत्याभिज्ञानानुरोधेऽपि तत्सारूप्यबाहुल्येन शिवपरत्वस्यैव युक्तत्वात् । **'पुरुषेण नारायणेन यजमान उपतिष्ठत'** इत्यत्र **'अस्य पौरुषसूक्तस्य ऋषिर्नारायणः स्मृत'** इति शौनकस्मृतेः देवताद्योतनाय पुरुषेणेतिसूक्तप्रतिपाद्यपरपदेन व्यपदेशानन्तरं ऋषिसूचनाय **'नारायणेनेति त्रिर्जपेदघमर्षणमि'** तिवत् ऋषिनाम्ना व्यपदेशोपपत्तेः । **'नारायणदृष्टेन पुरुषसूक्तेन उपस्थितां चितिमुपतिष्ठमान इह जन्मनि पुरुषो भवेदि'**ति वाधूलसूत्रेण तथैव स्पष्टीकरणाच्च नारायणसमाख्यानेनापि तत्परत्वासिद्धेः। प्रत्युतोदाहृतकल्पसूत्रवचनजातेन नारायणस्य ऋषित्वसिद्धेः वेदाहमेतमित्यत्राहंशब्दस्य तत्परतया **'कर्मकर्तृव्यपदेशाच्चे'**ति सूत्रोक्तन्यायेन सूक्तप्रतिपाद्यस्य स्वरसतो व्यतिरेकस्यैव प्रतीतेश्च । तस्मात्परोक्तन्यायैर्नारायणपरत्वासिद्धेः तैरेव शिवपरत्वस्य

सुसाधत्वाच्च अस्मदुक्तरीत्या शिवमहिमप्रतिपादनपरमेव पुरुषसूक्तमित्यभ्युपगन्तव्यम् ।।२४।।

वदन् सर्वात्मत्वं विबुधसमुपास्यत्वमपि ते
विरिञ्चोपेन्द्रादीनपि तव विभूतीरुपदिशन् ।
निरुक्त्या ते नाम्नामपि च विभवं ते विशदयन्
गिरां गुम्भः श्रैष्ठ्यं प्रकटयति तेऽथर्वशिरसः ।।२५।।

अथर्वशिरसि प्रथमखण्डे - **'देवा ह वै स्वर्गं लोकमगमन् ते देवा रुद्रमपृच्छन्'** इत्युपक्रम्य को भवानिति पृष्टवतो देवान् **'सोऽब्रवीत् अहमेकः प्रथममासं वर्तामि च भविष्यामि च नान्यः कश्चिन्मत्तो व्यतिरिक्त'** इत्यादिना **'एवं मां यो वेद स सर्वान् देवान् वेदे'**त्यन्तेन शिववचनेन शिवस्य सर्वात्मत्वं प्रतिपादितम् । अनन्तरं **'ततो देवा रुद्रं नापश्यन् ते देवा रुद्रं ध्यायन्ति ततो देवा ऊर्ध्वबाहवस्स्तुन्वन्ती'**ति देवैरुपास्यमानत्वं स्तूयमानत्वं च दर्शितम् । ततश्च द्वितीयखण्डे - **'यो वे रुद्रस्स भगवान् यश्च ब्रह्मा भूर्भुवस्सुवः तस्मै वै नमो नम'** इत्यारभ्य **'यश्च विष्णुर्यश्च महेश्वर'** इत्यादिप्रकारेण ब्रह्मविष्णुरुद्रोमालक्ष्मीसरस्वतीन्द्रादीनां महाभूतादीनां च तद्विभूतित्वं प्रथमखण्डोक्तसर्वात्मत्ववचनेन सिद्धं विशिष्य निरूपितम् । तृतीयचतुर्थखण्डयोस्तदीयनामबृन्दनिर्वचनमुखेन तस्य परभावस्स्फुटीकृतः । पञ्चमखण्डे तस्योपासनादेव मोक्ष इत्युक्त्वा पाशुपतयोगात्मकतदुपास्तिप्रकारो दर्शितः। तदेवमादित आरभ्यान्तं विमृश्यमानमथर्वशिरोवचनजातं स एव सर्वतो ज्यायानिति स्पष्टीकरोतीत्यर्थः ।।२५।।

यत्त्वत्र परैः प्रलपितम् - अथर्वशिरसि रुद्रस्य सार्वात्म्योपदेशात् न तस्य सर्वैश्वरत्वसिद्धिः, वामदेववच्छास्त्रदृष्ट्या तदुपदेशात् । अत एव तदनन्तरं परमात्मनः खलु सार्वात्म्यं प्रसिद्धं, तत्कथं तवेति शङ्काव्यवच्छेदाय स्वस्मिन् परमात्मानुप्रवेशात् तद्दृष्ट्या सार्वात्म्योक्तिमुपपादयितुं तस्यैव वचनं - **'सोऽन्तरादन्तरं प्राविशत् दिशश्चान्तरं सम्प्राविशदि'**ति । अत्र स इति परमात्मोच्यते । अनन्तरवाक्यस्य परमात्मदृष्ट्या सार्वात्म्योपदेशपरत्वेन तत्राहंशब्दस्य परमात्मपर्यन्ततया तस्य प्रस्तुतत्वात् । स परमात्मान्तरात् प्राणादेरप्यन्तरं स्वात्मानं दिशस्सकल-

दिग्वर्तिवस्तुजातस्य चान्तरं जीववर्गमन्तर्यामितया प्राविशदिति तस्यार्थः । न चोक्तार्थपरमिदं वाक्यं रुद्रस्यैव सर्वान्तर्यामितया प्रवेशकथनपरं, पूर्ववाक्यमपि स्वरूपेणैव तस्य सार्वात्म्यकथनपरमस्तु इति वाच्यम् ; तथा सत्यस्य वाक्यस्य रुद्रवाक्यमध्यपठितत्वेनाहं प्राविशमिति प्रयोगापत्तेः । न च **'नान्यः कश्चिन्मत्तो व्यितरिक्त'** इत्यत्रत्येनेतिकरणेन रुद्रवाक्यस्य समाप्त्यवगमात् 'सोऽन्तरादि'त्यादि-श्रुतिवाक्यमेवेति वाच्यम् । प्राविशदित्येतदनन्तरमपि 'सोऽहं नित्यानित्य' इत्यादिरुद्र-वाक्यानुवृत्त्या तत्समाप्त्यसिद्धेः । अन्यथा मध्ये श्रुतिवाक्येन शिववाक्यसन्दर्भविच्छेदे उत्तरत्र सोऽब्रवीदित्यध्याहारप्रसङ्गात् । इतिकरणं तु **'सोऽन्तरादन्तरमि'**ति वाक्यान्वयितया परमात्मानुप्रवेशेन प्रकारेण हेतुना वा सार्वात्म्यमिति प्रकाराद्यर्थत्वेनाप्युपपन्नम् । समाप्त्यर्थकत्वे तु तस्य कृत्स्नशिववाक्यसमाप्ता-न्वयोऽस्तु। अध्याहाराद्व्यवहितान्वयस्य ज्यायस्त्वात् **'धर्मिकल्पनात'** इत्यादिन्यायात् । यत्तु द्वितीयखण्डे **'यो वै रुद्रस्य भगवानि'** त्यादिस्तुतिवाक्यं, **तदप्यहमेकः प्रथममासमिति** रुद्रवाक्यानुरोधित्वेन तदैकार्थ्यात्तदन्तर्यामिण एव सार्वात्म्यपरम् । तृतीयचतुर्थखण्डयोरोङ्कारादिमहादेवान्तनामनिर्वचनं तु प्रणव-विषयमेव, तद्वाच्यपरमात्मपर्यवसानेऽपि उक्तरीत्याप्यन्तर्यामिपरम् । यच्च पञ्चमखण्डे रुद्रोपासनस्य मोक्षोपायत्वेन विधानं, तदप्युक्तन्यायेन तदन्तर्याम्युपासनापरम् । मधुविद्यायां वस्वादिभोग्यादित्योपासनस्य वस्वन्तर्यामिविषयत्वस्य **'मध्वादिष्वसम्भवादि'**त्यधिकरणे व्यवस्थापनात् इहापि तथैवोपपत्तेः । एवमनयोपनिषदा प्रतिपाद्यस्तदन्तर्यामी नारायण एव **'सर्वभूतान्तरात्माहतपाप्मा दिव्यो देव एको नारायण'** इति सुबालश्रुतेः **'तवान्तरात्मा मम च ये चान्ये देहमाश्रिताः । सर्वेषां साक्षिभूतोऽसौ न ग्राह्यः केनचित् क्वचित्'**
इति स्मृतेश्च । यदि तु सोऽन्तरादित्यादि श्रुतिवाक्यं, तथापि **'चक्षुश्च द्रष्टव्यं च नारायणः श्रोत्रं च श्रोतव्यं च नारायण'** इत्यादिश्रुत्यन्तरदर्शनादनेक-सार्वात्म्यायोगाच्च

'यस्य यस्य हि यो भावस्तेन तेन हि तं नरम् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत्।' इत्यत्रेव प्रवेशशब्दस्य बुध्यनुप्रवेशपरत्वमङ्गीकृत्य रुद्रस्सर्वान्तरं नारायणं समाधिना प्राविशत्साक्षादकृत इति शास्त्रदृष्ट्या तदीयसार्वात्म्योपदेशोपपादनपरश्रुतिवाक्यतया योजनीयमिति सर्वथापीय-मपि श्रुतिर्नारायणपरैव । अत एव **'यो वै रुद्रस्य भगवानि'** त्यादौ तदसाधारण-

भगवत्पदप्रयोगोऽपीतितन्निराचिकीर्षुः स्वाभिमतं तावत् सोऽन्तरादित्यदेरर्थमन्वयस्थलं च दर्शयति-

अमुष्मिन्नन्तर्धिस्तव समुदितो येन वचसा
त्वदुक्तानामन्ते परमशिव योज्येन वचसाम् ।
यदस्य स्वस्थानेऽन्वयमलभमानस्य घटने
खलानां मौढ्यं तत्परिणमति पाण्डित्यविधया ।।२६।।

अयमर्थः--- **'आयुरायुषा सत्यं सत्येन धर्मं धर्मेण तर्पयामिस्वेन तेजसा'** इत्यन्तं तत्र शिववाक्यम् । अनन्तरं **'ततो देवा रुद्रं नापश्यन्'** इत्यादेः श्रुतिवाक्यत्वस्य स्फुटत्वात् तत्र च शिववाक्यपर्यवसानबोधायेतिकरणं, नापश्यन्नित्य-दर्शनोपपादनाय तदन्तर्धानप्रतिपादनं चापेक्षितमिति सोऽन्तरादित्यादि च सम्प्राविशदित्यन्तमतिक्लेशं विना न स्वस्थानान्वयि । तदन्तरेणैव च **'नान्यः कश्चिन्मत्तो व्यतिरिक्तस्सोऽहं नित्यानित्य'** इत्यादि ऋज्वन्वयमिति स्पष्टमेतत् । शक्नोति च तत्तत्रापेक्षितं पूरयितुम्।। तेन देव दृश्यं स्थूलं रूपं विहाय ततः परं सर्वान्तरं सर्वतो रहस्यं परिपूर्णं रूपं प्राविशदिति तदन्तर्धानप्रतिपादनोपपत्तेः । ततश्चान्योन्याकाङ्क्षावशाद्व्यवहितोऽप्यन्वयो युक्तः । आकाङ्क्षायास्सन्निधानात् बलीयस्त्वात् ।

'यस्य येनार्थसम्बन्धो दूरस्थेनापि तेन सः ।
अर्थतोऽह्यसमर्थानामानन्तर्यमकारणम् ।'

इति वार्तिकोक्तेः **'आनन्तर्यमचोदने'**ति जैमिनिसूत्राच्च अध्याहाराद्व्यवहितान्वयस्य ज्यायस्त्वे परेषामप्यविप्रतिपत्तेश्चेति शिववाक्यमध्यपठितस्यापि सोऽन्तरादित्या-देश्श्रुतिवाक्यत्वेन तदन्त एव निवेशः । दृश्यते हि **'एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मींस्त्वं पर्यावर्तयात् वहवो वैते भविष्यन्ती'**ति, **'न वा असी विष्यमिमानखादन्निति होवाच कामो म उदपानम्'** इत्यादिश्रुतिषु किञ्चित्पुरुषवक्तृकवाक्यमध्ये श्रुतस्यापि इत्यादेरन्योन्याकाङ्क्षया तदन्ते श्रुतिवाक्यत्वेनान्वयः । उपबृंहणैश्चायमेवान्वयोऽस्य वाक्यस्य निर्णीतः । तथा हि सूतसंहितायां पठ्यते--

'पुरा विष्णवादयो देवास्सर्वे सम्भूय कारणम् ।
विचार्य जगतो विप्रास्संशयाविष्टचेतसः ।
अतीव सुखदं शुद्धं रौद्रं लोकं समाविशन्
तेषां मध्ये महादेवस्संसारद्रावको हरः ।
रुद्रः परमकारुण्यात् स्वयमाविरभूद्द्विजाः ।
अदृष्टपूर्वं तं दृष्ट्वा देवा विष्णुपुरोगमाः ।
प्रणिपत्य महादेवमपृच्छन् को भवानिति ।
सोऽब्रवीद्भगवान् रुद्रः पशूनां पतिरीश्वरः ।
सर्वज्ञस्सर्वतत्त्वानां तत्वभूतस्सनातनः ।।
अहमेको जगद्धेतुरासं प्रथममीश्वरः ।
वर्तामि च भविष्यामि न मत्तोऽन्योऽस्ति कश्चन ।
मन्मायाशक्तिसंक्लृप्तं जगत्सर्वं चराचरम् ।'

इत्यारभ्य

'इत्युक्त्वा भगवान् रुद्रः पूर्णं रूपं समाविशत् ।
नापश्यंश्च ततो रुद्रं देवा विष्णुपुरोगमाः ।।' इति । लिङ्गपुराणेऽपि शिवं प्रस्तुत्य

'तमपृच्छंस्ततो देवाः को भवानिति मोहिताः ।
सोऽब्रवीत् भगवान् रुद्रो ह्यहमेकः पुरातनः ।
आसं प्रथममेवाहं वर्तामि च सुरोत्तमाः ।
भविष्यामि च लोकेऽस्मिन् मत्तो नान्योऽस्ति कश्चन ।
नित्यानित्योऽहमनघो ब्रह्माहं ब्रह्मणस्पतिः ।।'

इत्युपक्रम्य

'धर्मं धर्मेण सर्वं च तर्पयामि स्वतेजसा ।
इत्युक्त्वा भगवान्रुद्रस्तत्रैवान्तरधीयत ।
नापश्यंश्च ततो देवाः ।।' इत्यादि ।

तत्राध्यायद्वयेन कृत्स्नस्याप्यथर्वशिरसश्शिवपरत्वमाविष्कृतम् । ग्रन्थविस्तरभयान्नेह लिख्यते । एवं वायुसंहितायामादित्यपुराणे च पठितमप्युपबृंहणं द्रष्टव्यम् ।।२६।।

एवं स्वाभिमतमन्वयप्रकारं प्रदर्श्य परोक्तं दूषयति---

इहात्मीये रूपे वरद परिपृष्टे तव सुरैः
त्वयान्यस्यैवोक्तं तदिति किमियं ग्रन्थघटना ।
त्वमन्तर्यामी संस्तमितरमवोचः स्वयमिति
प्रलापो वा केषां विशति हृदयान्यप्यविदुषाम् ।।२७।।

युक्तं प्रतर्दनाख्यायिकायां **'मामेव विजानीही'** त्यादेरिन्द्रवाक्यस्य शास्त्रदृष्ट्या ब्रह्मविषयत्वम् । तत्र **'त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस'** इति प्रश्नवाक्यस्य वस्तुतो यद्धिततमं, तद्विषयत्वेनेन्द्रविषयत्वाभावात्। युक्तं च **'अहं मनुरभवं सूर्यश्चे'**त्यादिवामदेवसार्वात्म्यकथनस्यापि शास्त्रदृष्ट्या ब्रह्मविषयत्वं, तत्र प्रश्नवाक्यस्यैवाभावात् । इह तु देवानां 'को भवानि'ति शिवासाधारणरूपस्य प्रश्ने तदुत्तररूपस्य 'अहमेकः प्रथममासमि'त्यादिशिववाक्यस्यान्यसार्वात्म्यपरत्वे प्रश्नोत्तरयोर्वैयधिकरण्यापत्तेः नेह तन्न्यायसञ्चारणावकाश इति **'सर्वो वै रुद्रो ह्येवैतत्सर्वम् '** इत्यादिश्रुतिकल्पसूत्रादिवचनान्तरानुगृहीतैतच्छ्रुतिबलात् **'सर्वं खल्विदं ब्रह्मे'**ति सर्वात्मत्वेन प्रतिपन्नं ब्रह्म शिव एवाध्यवसीयते । अतो यद्यनेकस्य सार्वात्म्योपदेशो विरुद्ध इति सौबालश्रुताविह वा क्व चिच्छास्त्रदृष्टया उपदेश इति नेतव्यं, तदा वैयधिकरण्यदोषाप्रसङ्गात् तत्रैव तदुपदेशस्तथा नेतव्यः । तथासति **'चक्षुश्च द्रष्टव्यं च नारायण'** इत्याद्यनन्तरं मन्त्रोपनिषदादौ शिवपरतया प्रतिपन्नेन **'पुरुष एवेदं सर्व'**मिति मन्त्रेण तदुपसंहारोऽपि शोभतेतराम् । न चाहंशब्दस्य वक्तरि शिव एव पर्यवसाने तदन्यस्य शब्दसन्निधापितत्वाभावात्स इत्यनेन तदन्यपरामर्शानुपपत्तेः स्वस्य तत्पदेन परामर्शापत्तिरिति कुदृष्टिभिर्वक्तुमपि शक्यम् । यत्र यस्यानुपचरिताहंपदप्रयोगः, तत्र तस्यैव तत्पदप्रयोगस्योपपन्नत्वाभ्युपगमे सोऽन्तरादित्यादेर्वक्तृशिवपरत्वस्यैव सम्भवेन तत्पक्षे तत्र दूषणानवकाशापत्तेः । किं च सोऽन्तरादित्यादिशिववाक्यं तत्र सइतिपदं चाहंपदसन्निधापितपरामर्शीति परपक्षेऽपि तस्य वाक्यस्य शिवस्यैव सर्वान्तर्यामित्वप्रतिपादनपरत्वं युक्तम् । परैर्गीतासु **'तमेव शरणं गच्छ, मद्याजी मां नमस्कुरु ।'** इत्यादौ तत्पदाहंपदयोरन्तरात्मदृष्टिं विना स्वात्मन्येव पर्यवसानाभ्युपगमेन स्वात्मनि तत्पदप्रयोगोऽनुपपन्न इति शङ्कितुमप्यशक्यत्वात् । अहंशब्दस्य श्रोतृभिर्वक्तृव्यतिरिक्तपरत्वानवगमेन स इत्यस्य तान्प्रति तद्व्यतिरिक्तबोधकत्वानुपपत्तेश्च । न च मध्ये कुदृष्टिकल्पितशङ्कया तस्य तद्बुद्धिस्थत्वात् कथञ्चित् बोधकत्वं शक्यम् । शङ्कावाक्यस्य गमकस्य

चानुपलम्भेन तथा दुश्शङ्काकल्पनायाः प्रमाणपराहतत्वात्शिवस्यैव सर्वान्तर्यामित्वेन तेन तदन्यस्यान्तर्यामित्वमुपदिष्टमिति वाक्यार्थकल्पनाया अत्यन्तमयुक्तत्वाच्चेति तात्पर्यनिष्कर्षः ।।२७।।

कुतोऽस्य सर्वान्तर्यामित्वमधिगम्यत इति चेत्, तत्राह--

त्वमेवान्तर्यामीत्यधिगमितमेतत्खलु विभोः
अशेषाधिष्ठानप्रकटनपरैरौपनिषदैः ।
त्विषांपत्युर्बिम्बे कृतनिवसतेस्तस्य भगवन्
उमानेत्रानन्दं वपुरुपदिशद्भिश्च मुनिभिः ।।२८।।

श्रूयन्ते हि शिवस्याशेषाधिष्ठानप्रतिपादनपरा मन्त्राः मन्त्रोपनिषदि --

'यो योनिं योनिमधितिष्ठत्येकः यस्मिन्निदं सं च विचैति विश्वम्'
'एवं स देवो भगवान्वरेण्यो योनिस्स्वाभावानधितिष्ठत्येकः ।
सर्वमेतद्विश्वमधितिष्ठत्येकः गुणांश्च सर्वान्विनियोजयेद्यः ।
घृतात्परं मण्डमिवातिसूक्ष्मं ज्ञात्वा शिवं सर्वभूतेषु गूढम् ।
एष देवो विश्वकर्मा महात्मा सदा जनानां हृद्ये सन्निविष्टः ।
यो देवोऽग्नौ यो अप्सु यो विश्वं भुवनमाविवेश ।
य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमोनमः' । इत्याद्याः । रुद्रोपनिषदि च 'नमो भवाये'त्याद्यनुवाकपञ्चके --- **'नमः स्त्रोतस्याय च द्वीप्याय च ।'** इत्याद्याः सर्वषु वस्तुषु शिवस्य सद्भावप्रतिपादनपराः। महोपनिषदि च - **'यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा भुवना विवेश ।'** इत्याद्याः । अपि च 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' इत्यादिश्रुतिप्रतिपाद्योऽन्तरादित्यवर्ती पुरुषस्तावन्दतर्यामीति सर्वसम्प्रतिपन्नमेवैतत् । **'भेदव्यपदेशाच्चान्य'** इति ब्रह्मसूत्रेण ज्ञापनात् । तस्य च महोपनिषदि **'आदित्यो वा एष एतन्मण्डलमि'** त्यादितत्प्रकरणे **'सर्वो वै रुद्र'** इत्यारभ्य **'नमो हिरण्यबाहवे हिरण्यपतयेऽम्बिकापतय उमापतये नमोनमः'** इति मन्त्रः, रुद्रोपनिषदि **'असौ यस्ताम्रो अरुण'** इति प्रस्तुत्य **'असौ योऽवसर्पत्ति नीलग्रीवो विलोहितः'** इत्यादिमन्त्रः, कृच्छ्राङ्गादित्योपस्थानमन्त्रेषु -

'नमो रुद्राय पशुपतये महते देवाय त्र्यम्बकायैकचराधिपतये हरये शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नमोनमः सूर्यायादित्याय नमोनमः नमो नीलग्रीवाय शितिकण्ठाय नमोनमः नमश्चन्द्रललाटाय कृत्तिवाससे नमः' इत्यादिमन्त्राश्च उमासहायत्वनीलग्रीवत्वादिविशिष्टं रूपमुपदिशन्ति । न च महोपनिषदि **'सर्वो वै रुद्र'** इत्यारभ्य सवितृमण्डलविद्याप्रकरणविच्छेदश्शङ्कनीयः । असम्बन्धिपदनिचयव्यवधानादेर्विच्छेदकस्याभावात् । अन्तरादित्यवर्तिनो हिरण्मयपुरुषस्योपासनार्थमपेक्षितरूपविशेषसमर्पणपरत्वेनैकवाक्यत्वस्य समर्थ्यत्वात् । कूर्मपुराणे सूर्यहृदये -

'नमस्ते घृणिने तुभ्यं सूर्याय ब्रह्मरूपिणे ।
त्वमेव ब्रह्म परममापो ज्योतीरसोऽमृतम् ।
भूर्भुवस्स्वस्तवमोङ्गकारस्सर्वो रुद्र स्सनातनः ।
पुरुषस्त्वं महोऽतस्त्वां प्रणमामि कपर्दिनम्।
त्वमेव विश्वं बहुधा जातं यज्जायते च यत् ।
नमोऽग्निजाय रुद्राय त्वामहं शरणं गतः ।
प्रचेतसे नमस्तुभ्यं नमो मीढुष्टमाय च ।
नमोनमस्ते रुद्राय त्वामहं शरणं गतः ।
हिरण्यबाहवे तुभ्यं हिरण्यपतये नमः ।
अम्बिकापतये तुभ्यमुमायाः पतये नमः ।।'

इति **'सर्वो वै रुद्र'** इत्यादनुवाकत्रस्य **'घृणिस्सूर्य'** इत्याद्यनुवाकैकवाक्यतयान्तरादित्यविद्यापेक्षितरूपसमर्पणपरत्वस्य स्पष्टीकरणाच्च । न च कृच्छ्राङ्गमन्त्रेषु हरिपदप्रयोगाद्विष्णुपरत्वं शङ्कनीयम् । पूर्वापरबहुश्रुतिलिङ्गविरोधात् **'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजि'**ष्विति कोशदर्शनात् आदित्यनामत्वेनैव तदन्तर्यामिणि प्रयोगोपपत्तेः ।

'एष रुद्रो महादेवः कपर्दी च घृणी हरिः ।
आदित्यो भगवान् सूर्यो नीलग्रीवस्त्रिलोचनः ।।
अधीयते सहस्त्रांशुस्सामगाध्वर्युहोतृभिः ।।'

इति कौर्मे आदित्यत्यमण्डलान्तर्वार्तित्वेन परमशिवस्य प्रतिपादकेषु दक्षं प्रति दधीचवचनेषु हरिपदप्रयोगस्य तथैव निर्वाह्यत्वाच्च।

ननु, छान्दोग्योपनिषदि **'य एषोऽन्तरादित्ये हिरण्मयः पुरुष'** इत्युपक्रम्य **'तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी'** इति पुण्डरीकाक्षत्वोपन्यासेन तस्य वैष्णवं रूपमुपदिशतीति प्रतीयत इति चेत्, न तावत्पुण्डरीकतुल्यनयनत्वं तस्यासाधारणलिङ्गं, लोकवेदयोरन्यत्रापि च बहुलं तत्प्रसिद्धेः । तस्य साधारण्येऽपि पुण्डरीकाक्षशब्दस्य योगरूढ्या विष्णावसाधारण्योपपत्तेश्च। नापि 'तस्य यथे'त्यादिश्रुतिरिति वक्तुं शक्यते । न च योगरूढशब्दावयवार्थपरवाक्यस्यापि प्रयोगनियमोऽस्तीत्युक्तं पुरुषसूक्तार्थविचारे । तथापि लोचनद्वयोपन्यासस्त्रैयम्बके रूपे न सङ्गच्छत इति चेन्न । हविरार्त्यधिकरणन्यायादुद्देश्यगतद्वित्वस्याविवक्षिततया अपरिच्छेदकत्वात् । ललाटलोचनस्य मुकुलितत्वेन लोचनद्वयस्यैव विकसितनलिन-सादृश्यमिति तस्य विवक्षितत्वेऽप्यविरोधाच्च। छान्दोग्योपनिषदपि महोपनिषद्रुद्राध्याय-मन्त्राभ्यां निर्धारिते शैव एव रूपे पर्यवस्यतीति न विरोधः । अत एव वायुसंहितायामुदाहृतश्रुतित्रयस्यापि शिवविषयत्वेनोपसंहारो दर्शितः-

'सर्वो रुद्रो नमस्तस्मै पुरुषस्सन् परो महान् ।
हिरण्यबाहुर्भगवान् हिरण्यपतिरीश्वरः ।
अम्बिकापतिरीशानः पिनाकी वृषवाहनः ।।'

इत्यारभ्य

'हिरण्यकेशः पद्माक्षो ह्यरुणस्ताम्र एव च ।
योऽयं सर्पत्यसौ देवो नीलग्रीवो हिरण्मयः ।।'

इत्यन्तेन । एवं च यदाग्नेयपुराणे विष्णुसमाराधनविधानान्ते **'ध्येयः सदा सवितृमण्डलमध्यवर्ती'**त्यादि पठ्यते, तत् सवितृमण्डलस्य हृदयादिवत्सकल-देवतोपासनास्थानतया विष्णुपूजान्ते च तत्र तदुपस्थानं कर्तव्यमिति तावन्मात्रपरम् । पुराणेष्वागमेषु च दुर्गागणपत्यादिपूजकानामपि सन्ध्यासमये पूजान्ते च तत्र तत्तद्देवतोपासनाविधानदर्शनादिति न कश्चिद्विरोधः । एवं शिवस्य सर्वाधिष्ठान-प्रतिपादनेनान्तर्यामिणि शैवरूपोपदेशेन च शिव एव सर्वान्तर्यामीत्यौपनिषदा मन्त्रास्समधिगमयन्तीत्यर्थः ।।

ननु, **'एष सर्वभूतान्तरात्मे'**ति नारायणस्यान्तर्यामित्वं श्रूयते, सत्यं श्रवणमिहाप्यविशिष्टं, किंतु

आदित्यमण्डले शैवमधितिष्ठन्वपुः पुनः ।

अन्तर्नियच्छतीत्येष निर्णयो निरवग्रहः।।
अतः कृष्णे दशास्यादिहन्तृत्वव्यपदेशवत् ।
तादृशां वेदवचसां युक्तं तात्पर्यवर्णनम् ।।
अवतारेषु भिन्नानां चरितानां रमापतेः ।
अन्यथा न व्यवस्था स्यादपरत्रापि कीर्तनात् ।
अन्यावतारचरितानि च भारतादौ कर्माणि यानि पुरुषोत्तमसाधितानि ।
गङ्गासुतप्रभृतिभिस्तदभेददृष्ट्या कृष्णस्तुतिप्रकरणेषु हि कीर्तितानि ।

तस्मात् प्रबलप्रमाणानुरोधाच्छिव एव सर्वान्तर्यामिति निर्णये तत्रैवान्तर्यामिब्राह्मणादेरपि पर्यवसानमित्यङ्गीकरणीयम् । केचित्तु **'एतानि हवा अमृतस्य नामधेयानी'**ति जाबालश्रुतिप्रयोगदर्शनेन निरुपपदामृतपदस्य शिवपरत्वस्वारस्यात्तत एवान्तर्यामिब्राह्मणस्य शिवपरत्वं व्यक्तमित्याहुः ।।२८।।

इतश्च शिव एव सर्वान्तर्यामीति वक्तव्यमित्याह--

महाभूतान्यर्कशिशिररुचिरात्मेति भगवन्
अशेषं वस्त्वेतत्तव खलु तनुत्वेन विदितम् ।
अधिष्ठातृत्वं ते हर किमियता नाध्यवसितं
मुधा मूर्खानेतान्मुखरयति मोहस्त्वितरथा ।।२९।।

अष्टौ पृथ्व्यादयस्तावत् मूर्तयः पुरवैरिणः ।
प्रसिद्धाश्शैवलैङ्गादिपुराणेष्वागमेषु च। ।
अन्तर्यामिब्राह्मणेऽपि तेऽन्तर्यामिण ईशितुः ।
नियम्यभावमापन्नाश्शरीराणीति वर्णिताः।।
अतस्तदैकरूप्येण मूर्त्यष्टकपरा गिरः ।
सर्वान्तर्यामितां शम्भोः साधयेयुर्निरङ्कुशम् ।
नन्वन्तर्यामिणस्तत्र सह पृथ्वीजलादिभिः ।
शरीरत्वेन वर्ण्यन्ते वस्तूनि सकलान्यपि ।
अष्टावेव तु पृथ्व्याद्या मूर्तयो गिरिजापतेः ।
प्रसिद्धास्तत एवासावष्टमूर्तिश्च गीयते ।
तस्मादन्तर्यमयितुस्समस्तचिदचित्तनोः ।

पृथिव्याद्यष्टकतनुर्भिन्न एवेति युज्यते ।
उच्यतेऽष्टासु कामारेरन्तर्भवति मूर्तिषु ।
अन्तर्यामिब्राह्मणोक्तं नियम्यं सकलं वपुः ।
भूतेषु तद्विकाराणामप्यन्तर्भावसम्भवात् ।
'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।'
इति स्मृत्योपकरणं मायान्तर्यामिणो विभोः ।
निरुक्तेति नियम्येषु न कैवल्यं तदग्रहात्।
अत एव च कालस्य योगस्य शिवमाययोः ।
न सङ्ग्रहः कृतोऽत्रेति शङ्कापि विनिवर्तिता ।
आत्मा तस्याष्टमी मूर्तिश्शिवस्य परमा तनुः ।
व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकम् ।
इति शैवे समीरेण षट्कुलीनानृषीन् प्रति ।
जीववर्गस्तु कार्त्स्न्येन कथितो मूर्तिरष्टमी।
एवं गृहीते कार्त्स्न्येन वर्गे चिदचिदात्मके ।
किंनाम भुवने वस्तु सङ्ग्राह्यमविशिष्यते ।।
ननु च ।।
'भूम्यम्भोऽग्निमरुद्व्योमभास्करा दीक्षितश्शशी ।'
इति लैङ्गेऽह्यष्टमात्मस्थाने यज्वा निवेशितः ।
अतश्छागपशुन्यायादौचित्यादुपसंहृतेः ।
शैवे श्रुतोऽप्यात्मशब्दो विशेषे पर्यवस्यति ।।
नैतद्युक्तम् ।।
व्यापिकेतरमूर्तीनां विश्वं तस्माच्छिवात्मकम् ।।
इत्यस्या घटनात्तस्य सामान्यपरतां विना ।
वृक्षस्य मूलसेकेन शाखाः पुष्यन्ति वै यथा।
शिवस्य पूजया तद्वत्पुष्यत्यस्य वपुर्जगत् ।
सर्वोपकारकरणं सर्वानुग्रहणं तथा ।
सर्वाभयप्रदानं च शिवस्याराधनं विदुः ।
देहिनो यस्य कस्यापि क्रियते यदि निग्रहः ।।

अष्टमूर्तेरनिष्टं तत्कृतमेव न संशयः ।
इत्यनन्तरसन्दर्भे सर्वेषामेव देहिनाम् ।
अविशेषेण भगवन्मूर्तित्वोक्तेश्च वैशसात् ।
सामान्यविधिरस्पष्टस्संह्रियेत विशेषतः ।
स्पष्टोऽयमित्यतोऽप्यस्य युज्यते नोपसंहृतिः ।
लैङ्गे यदात्मसामान्यस्थाने दीक्षितकीर्तनम् ।
लोकोपकारातिशयख्यापनार्थं तु तत् क्वचित् ।
विश्वरूपस्य देवस्य सरोजभवसम्भव ।
भूम्यम्भोऽग्निमरुद्व्योमभास्करा दीक्षितश्शशी ।
इति तत्र ह्युपक्रम्य मूर्तीनां सम्प्रदर्शिता ।
एकैकस्याः प्रपञ्चेन सर्वलोकोपकारिता ।
एवं तदन्यथासिद्धं तत्र दीक्षितकीर्तनम् ।
आत्मान्तराणां मूर्तित्वं न निषेधेत्पिनाकिनः ।
यथाग्निवाक्ये कासाञ्चिद्विकृतीनामनुक्रमः ।
प्रकृत्यैकविधानार्थो नान्यास्वग्निं निवारयेत् ।
यथा च विद्याभेदेषु पथः प्राप्तस्य कीर्तनम् ।
स्तुत्यर्थमाध्यानार्थं वा न तमन्यासु वारयेत् ।
लैङ्गेऽपि तत्कृताशेषलोकानुग्रहवर्णने ।
दीक्षितग्रहणेऽप्यन्ते सामान्येनोपसंहृतम् ।
आत्मा तस्याष्टमी मूर्तिस्सर्वभूतशरीरगः।
इत्यादिवचनैश्शैवपुराणोक्तेन वर्त्मना ।
तद्विश्वमूर्तिरेवेत्थमष्टमूर्तिः प्रगीयते ।
विभक्तमष्टधा विश्वमधितिष्ठत्ययं यतः ।
यद्येवं नेष्यते सर्वं चेतनाचेतनात्मकम् ।
अन्तर्भूतं महेशस्य जगदष्टासु मूर्तिषु ।
तदा तु शिवमूर्तीनां न परिच्छेदिकाऽष्टता ।
अवयुत्यानुवाद्या सा वैश्वानरकपालवत् ।
यथा तत्र कपालेषु द्वादशस्वष्ट केवलम् ।
अवयुत्यानुगण्यन्ते स्तुतिभेदविवक्षया ।

एवं वस्तुषु लोकेषु मूर्तिभूतेषु शूलिनः ।
अनूद्यन्ते विशिष्याष्टौ स्तुत्यर्थमिति कल्प्यते ।
यद्वा मूर्तिष्वसङ्ख्यास्वप्यष्टानामिह वर्णनम् ।
नामभेदविधानार्थमर्चनायेति कल्प्यते।
शैवादिषु पुराणेषु मूर्त्यष्टकनिरूपणे ।
अष्टानामपि मूर्तीनां नामभेदानुशासनात् ।
दृष्टं हि दशरात्रादेस्सत्स्वहस्स्वितरेष्वपि ।
धर्माप्त्यै नामभेदार्थं सौत्यानामनुकीर्तनम् ।
अथवैकादशत्वेन सप्तप्राणा इव क्वचित् ।
ध्यानार्थं मूर्तयः काश्चित् गृह्यन्त इति कल्प्यते ।
स्थानेष्वेतेषुये रुद्रं ध्यायन्ति प्रणमन्ति च ।
तेषामष्टतनुर्देवो ददाति परमं पदम् ।
इति पौराणिकैस्तासु विशिष्याष्टासु मूर्तिषु ।
विश्वमूर्तेरपीशस्योपासनाभेदवर्णनात् ।
अथवा वाजिशाखोक्तषष्ठाग्न्यनुमतावपि ।
साम्पादिकाग्न्यभिप्रायात् दृष्टं पञ्चाग्निकीर्तनम् ।
एवं च मूर्तिष्वष्टानां वैशिष्ट्येनैव केनचित् ।
अष्टमूर्तिरिति ख्यातिरपि देवस्य युज्यते ।
दृष्टा षट्त्रिंशताऽहोमः सम्पाद्यस्यापि च क्रतोः ।
प्रधानत्वेन सौत्यानां द्वादशाह इति प्रथा ।
सर्वथापि च मूर्तित्वमन्तर्यामितया विभोः ।
अनुप्रवेशादेवैषामष्टानामिति युज्यते ।
अष्टमूर्तिप्रक्रियासु पुराणेष्वागमेषु च ।
अन्तर्यामिब्राह्मणार्थ प्रत्यभिज्ञानदर्शनात् ।
पृथिव्यां तिष्ठति विभुः पृथिवी वेत्ति नैव तम् ।
रूपं च पृथिवी यस्य तस्मै भूम्यात्मने नमः ।
इत्यादित्यपुराणादिश्रुतमूर्त्यष्टकोक्तिषु ।
स्फुटं तत्प्रत्यभिज्ञानं न युक्तं ह्यपबाधितुम् ।

तस्मात् स भगवान् परमशिव एव सर्वान्तर्यामी । यत्तु 'तवान्तरात्मा मम चे'

त्यादिस्मृतिवचनं, तन्महाभास्ते

'बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु ।।'

इति प्रश्ने

'बहवः पुरुषा राजन् साङ्ख्ययोगविचारिणः । नैतदिच्छन्ति पुरुषमेकं कुरुकुलोद्वह ।।'

इति परमतमुपन्यस्य---

'बहूनां पुरुषाणां हि यथैका योनिरुच्यते ।
तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम् ।'

इति श्लोकेन **'स वा एष पुरुषोऽन्नरसमयः'** इति श्रुतिदर्शनात् पुरुषशभ्दाभिलप्यमानानां शरीराणां 'यथैका पृथिवीयोनिरि'ति सैव सर्वशरीरभावेनावतिष्ठते । तथैकमेव परं पुरुषं विश्वं सर्वजीवभावेनावतिष्ठमानमाख्यास्यामीति स्वमतप्रतिज्ञानन्तरं पठितत्वादैकात्म्यपरं, न तु कस्यचिदन्तर्यामित्वविधानपरम् । अपृष्टोत्तरत्वापत्तेः । यच्च

'विष्णुरात्मा भगवतो भवस्यामिततेजसः ।

इत्यादिकर्णपर्ववचनं, तत्राप्यात्मशब्दो मोक्षधर्मे--

'तस्मादात्मानमेवाग्रे रुद्रं संपूजयाम्यहम् ।'

इति कृष्णवचनश्रुतात्मशब्दवत् अभिन्नस्वरूपपरः । तत्रैव स्वारस्यात् ।

'मायाया गुणभेदेन रुद्रं विष्णुं पितामहम् ।
सृष्टानुप्राविशत्तेषामन्तर्यामितया हरः ।।'

इति स्कान्दवचनदर्शनात् परमशिवस्य कर्मवश्यस्वांशभूतेषु जीवेष्विव तदवश्यस्वांशभूतासु गुणमूर्तिष्वपि अनुवृत्तिसम्भवाच्च तस्यैव सर्वान्तरात्मत्वनिर्णयेनात्रात्मशभ्दस्यान्तर्यामिपरत्वायोगाच्च । एवं च शिव एव सर्वान्तर्यामीत्यस्यार्थस्य व्यवस्थितेः 'सोऽन्तरादि' त्यादेरन्यपरत्वकल्पनायोगे स्थिते **'यो वै रूद्र'** इत्यादेर्नारायणविषयत्वकल्पनं रुद्रेशानमहेश्वरमहादेवादिनामनिर्वचनस्य प्रसिद्धिविरुद्धं तद्विषयत्वकल्पनं, रुद्रोपासनाविधानस्य परोदितमधुविद्यान्यायेन तत्परत्वकल्पनं च परेषां निरस्तम् । भगवच्छब्दस्यान्यत्रापि पूज्यमात्रे पुराणादिषु प्रचुरप्रयोगदर्शनात्तस्यापि तदसाधारण्यासिद्धेश्च । यत्तु नामनिर्वचनानां प्रणवविषयत्वमुक्तं, तदप्ययुक्तम् । रुद्रेशानमहेश्वरादिनामनिर्वचनानां नामिनो जगत्सृष्टिपालनसंहारस्वातन्त्र्यप्रतिपादनपराणां प्रणवविषयत्वायोगात् । कथं तर्हि रुद्रादिनामसमानविषयत्वं तत्रोङ्कार-

प्रणवादिनामनिर्वचनानां ? नामनामिनोरभेदोपचारात् । यथोक्तं वायुसंहितायां -
'शिवो वा प्रणवो ह्येष प्रणवो वा शिवः स्मृतः ।
वाच्यवाचकयोर्भेदो नात्यन्तं विद्यते क्वचित् ।।' इति,
'तस्मादेकाक्षरं देवमाहुरागमपारगाः ।
वाच्यवाचकयोरैक्यं मन्यमाना मनस्विनः ।।' इति च ।। तस्मादथर्वशिरोऽपि शिवस्यैव सर्वोत्कर्षं प्रतिपादयतीति सिद्धम् ।।२९।।

शिवं नीलग्रीवं शिखरिपतिकन्यासहचरं
त्रिणेत्रं त्वां ध्येयं गिरिश दहराम्भोजकुहरे।
विधायैकं साकं द्रुहिणकमलावल्लभहरैः
विभूतिं कैवल्यश्रुतिरखिलमाख्याति भवतः ।।३०।।

'विविक्तदेशे तु सुखासनस्थश्शुचिस्समग्रीवशिरश्शरीरः ।
अत्याश्रम- स्थस्सकलेन्द्रियाणि निरुध्य भक्त्या स्वगुरुं प्रणम्य ।
हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्य मध्ये विशदं विशोकम् ।
अचिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्म योनिम् ।
तथादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ।
उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् ।
ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसः परस्तात् ।
स ब्रह्मा स शिवस्सेन्द्रस्सोऽक्षरः परमस्स्वराट् ।
स एव विष्णुः स प्राणस्स कालोऽग्निस्स चन्द्रमाः ।
स एव सर्वं यद्भूतं यच्च भव्यं सनातनम् ।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ।' इति कैवल्योपनिषदि शिवस्य दहरोपासनाविधिप्रकरणे सह ब्रह्म विष्णुरुद्रैस्सर्वस्यापि जगतस्तद्विभूतित्वाम्नानेन शिवस्य सर्वोत्कर्षस्स्फुटीकृत इत्यर्थः । नन्वत्र ' स ब्रह्मे' त्यादौ तत्पदानां सन्निहिते प्राप्यत्वेनोक्ते भूतयोनौ वृत्तेरुचितत्वात् ब्रह्मादीनां तद्विभूतित्वमेवाम्नातं सिध्यति, न तूपास्यविभूतित्वमिति चेन्न । भूतयोनिशब्दस्यापि यौगिकस्य सन्निहिते शिव एव वृत्तेः। तत्क्रतुन्यायात्तदुपासनया तत्प्राप्तेरेव युक्ततया तस्य शिवान्यवृत्तित्वकल्पनायोगाच्च । कथं 'ज्ञात्वा तमि'ति तज्ज्ञानान्मुक्तिप्रतिपादनमिति चेन्न । सगुणब्रह्मवादे तज्ज्ञानादेव

मुक्तेरुपपन्नतरत्वात् । निर्विशेषब्रह्मवादे सगुणब्रह्मज्ञानान्मुक्तिर्नोपपद्यत इति 'ज्ञात्वा तमि' त्यत्र तत्पदस्य निर्विशेषब्रह्मपरत्वस्यावश्यकतया पूर्वेषामपि तत्परत्वं सिध्यतीति चेत्, न । **'सदेव सोम्येदमग्र आसी'** दित्यादिश्रुतौ **'तत्तेजोऽसृजते'** त्यादिवाक्यश्रुततत्पदानां सविशेषवृत्तावपि तत्त्वमसीति वाक्यश्रुततत्पद-मात्रस्यैवानुपपत्त्या निर्विशेषे लक्षणावत् यत्रानुपपत्तिः, तस्यैव 'ज्ञात्वा तमि' ति तत्पदस्य तत्र लक्षणाया न्याय्यत्वेन योजनप्राप्यायां कावेर्यां मलमल्लकबन्धनस्यायुक्तत्वात् । एवं चोमासहायत्वादिविशिष्टरूपेण सगुणेषूत्कृष्टस्य परमशिवस्य ध्यानात् तमोवश्यत्वरहितमखिलजगत्कारणं तमेव परमशिवमुपासकः प्राप्नोति, यद्विभूतयस्सर्वे ब्रह्मादयः क्रमेण निष्कृष्टचैतन्यैकतानस्य तस्यैव प्रत्यग्भावेन ज्ञानादपवर्गं प्राप्नोतीति श्रुत्यर्थस्सम्पद्यते । एवमेव चास्याः श्रुतेरर्थो वामनपुराणे षष्ठाध्यायेन प्रदर्शितः । तत्र हि कैवल्योपनिषत्प्रक्रिययैव

'पुराश्वलायनस्साक्षान्मुनिस्सत्यपरायणः ।
भगवन्तं जगन्नाथमुपेत्य परमेष्ठिनम्' इत्यादिना आश्वलायनप्रश्नं, तत्र परमेष्ठिनः प्रतिवचनमुखेन **'अचिन्त्यमव्यक्तमनन्तरूपमि'**त्यादिना सप्रपञ्चं शिवध्यानप्रकारं च प्रदर्श्य

'इत्थं ध्यात्वा मुनिस्साक्षात् साक्षिणं तमसः परम् ।
भूतयोनिं पुरारातिं गच्छति स्वात्मविद्यया।
योऽयं ध्येयतया प्रोक्तश्शिवस्साम्बस्सनातनः ।
ब्रह्मविष्णवादिरूपेण स विभक्त इव स्थितः ।
'स ब्रह्मा स शिव' इत्यारभ्य
'ज्ञात्वा तं मृत्युमत्येति प्रत्यगात्मतयैव तु ।
अन्तरेण परिज्ञानं नान्यः पन्था विमुक्तये ।'

इत्यन्तेनास्मदुक्तोऽर्थस्स्पष्टमादर्शितः । तथा ब्रह्मगीतासु चैवमस्याः श्रुतेरर्थः प्रतिपादितः । तस्मात् ब्रह्मादीनां प्राप्यविभूतित्वमेव, नोपास्यविभूतित्वमिति न युक्तम् ।।३०।।

उदाहृतकैवल्यश्रुत्यैकार्थ्येन तैत्तिरीयाणां महोपनिषद्याम्नातस्याणोरणीया-नित्याद्यनुवाकत्रयस्यापि मध्यमानुवाकोपवर्णितनारायणमहिमप्रपञ्चनप्रसञ्जितान्य-परत्वशङ्कोन्मूलनपूर्वकं शैवदहरोपासनाविधिपरत्वव्यवस्थापनात् ततोऽपि तस्य

सर्वोत्कर्षं विभावयति --

तया संक्षिप्योक्तां तव दहरविद्यां विदधती
विशेषैरन्यैरप्युपनिषदुमाकान्त महती ।
अनुध्यानार्थं ते हृदि मुररिपोरान्तरतया
प्रसज्यैनं मध्ये प्रबलयति मोहं हतधियाम् ।।३१।।

एवं तावदिह शङ्कोत्तिष्ठति -- नारायणानुवाको न शिवोपासनापरः । **'सहस्रशीर्षं देवमि'**त्यादिना नारायणस्य महिमानमुपवर्ण्य **'पद्मकोशप्रतीकाशमि'**त्यादिना तदुपासनास्थानहृदयपुण्डरीकसंस्थानविशेषादिकं प्रदर्श्य **'तस्याश्शिखाया मध्ये परमात्मा व्यवस्थित'** इति तस्य तत्र स्थित्युपन्यासेन तस्य दहराम्बुजे नारायणपोपासनाविधिपरत्वावसायात्। अत एव कैवल्योपनिषदीव ब्रह्मादिवन्नारायणस्य नोपास्यविभूतिषु परिगणनं कृतम् । नन्वस्मिन्ननुवाके नोपासनाविधिः, किं तु **'तस्मिन्यदन्तस्तदुपासितव्यमि'**ति पूर्वानुवाकविहितोपासनापेक्षितगुणविधिमात्रम् । तत्र यत्पदस्य गगनपदस्य वा उपास्यदेवतासमर्पणपरस्य शब्दस्य 'यो देवानां, यद्वेदादावि'ति पूर्वापरमन्त्र-समर्पितरुद्रमहेश्वरशब्दितविशेषपर्यवसायितया उत्पत्तिशिष्टकल्पशिवान्वयविरोधात् न नारायणस्योपास्यत्वेनान्वयो युज्यत इति चेत्, मा भूत्तत्रान्वयः । इहैव नारायणगुणगणवर्णनसामर्थ्यात् सम्भृत्यधिकरणन्यायेन तदुपासनाविधिकल्पनमस्तु । न च 'पद्मकोशप्रतीकाशमि' त्यादेः पूर्वानुवाकविहितोपासनासम्बन्धिहृदयपुण्डरीक-संस्पर्शात्तदपेक्षितगुणविधिपरत्वमवसीयत इति वाच्यम् । निवित्पदैस्सामिधेनी-प्रकरणस्येव नारायणगुणगणकीर्तनपरैः अनन्वयिपदैः व्यवधानेन शिवोपासना-प्रकरणस्य विच्छिन्नतया निवित्पदान्तरितोपव्यानस्य सामिधेन्यङ्गत्वेनेव तदन्तरितस्य 'पद्मकोशे'त्यादिमन्त्रार्थस्य शिवोपासनाङ्गत्वेनान्वयासम्भवात् । न च जुह्वादीनाम-व्यभिचरितक्रतुसम्बन्धवद्दहरस्यापि अव्यभिचरितशैवदहरविद्यासम्बन्धोऽस्ति ; येन प्रकरणाभावेऽपि जुह्वादिद्वारेण पर्णतादीनां क्रत्वन्वयवत् हृदयद्वारेण तद्धर्माणां वाक्यप्रमाणेन तदन्वयो भवेत् । तथा सति **'शुक्रं प्रविध्य हृदयं प्रविध्य'** इत्यादिमन्त्राणामपि हृदयद्वारेण विद्याङ्गत्वापत्तेः **'वेधाद्यर्थभेदादि'**त्यधिकरण-विरोधप्रसङ्गात् । तस्मात् पूर्वानुवाकस्य शिवोपासनाविधिपरत्वेऽपि

पद्मकोशेत्यादिस्सन्निहितनारायणगुणगणकीर्तनसामर्थ्यकल्प्योपासनान्तर एवान्वयो युक्त इति । अथवा परोक्तरीत्या पूर्वानुवाकोऽपि नारायणोपासनाविधायितया तत्पर एव । ते खल्विदमाहुः - न तावत् ' यो देवानामि'तिमन्त्रश्शिवपरः । तत्र यो देवानामित्यादिना हिरण्यगर्भकारणत्वेनानुवादस्य **'नारायणात् ब्रह्मा जायत'** इत्यादिपुरोवादानुसारेण नारायणविषयतया रुद्रपदस्यापि तत्रैव कथञ्चिद्वृत्तेः कल्पनीयत्वात् , नापि 'यद्वेदादावि'ति मन्त्रश्शिवपरः । तस्य ह्यमर्थः--

'प्रणवाद्या मुने वेदाः प्रणवे पर्यवस्थिताः'

इति स्मृतेर्वेदानामुत्पत्तिलयस्थानतया तदाद्यन्तयोः प्रतिष्ठितो यस्स्वरः ओङ्कारः, तस्य **'अकारो वै सर्वा वागि'**ति श्रवणात् सर्ववाक्प्रकृतितया स्वप्रकृतावकारे लीनस्याकारात्मतां प्राप्तस्य यः परो वाच्य इदंपरस्तत्पर इत्यादौ वाच्ये परपदप्रयोगदर्शनात् स महेश्वरः इत्थं सर्वशब्दजालप्रकृतिभूताकारवाच्यस्सर्वलोकानां महानीश्वर इति । एवं च सर्वशब्दजातप्रकृतितया निखिलवाचकोत्कृष्टाकारवाच्यस्य निखिलवाच्योत्कर्षो युक्त इत्यौचितीमवलम्ब्याकारवाच्यस्य सर्वेश्वरत्वप्रतिपादनपरोऽयं मन्त्रः **'अकारो विष्णुवाचक'** इति स्मृतिदर्शनात् नारायणपरत्वप्रतिपादनपरः पर्यवस्यति। तस्मात् पूर्वापरमन्त्रयोः शङ्कितान्यार्थयोरपि नारायणपरत्वात् मध्ये उपरासनाविधानं तद्विषयमेवेति निश्चीयते । अनन्तरं सहस्रशीर्षं देवमित्यादि-मन्त्रजातस्य स्पष्टं तद्विषयत्वम् । तच्च सकलपरविद्योपास्यविशेषनिर्धारणार्थं, न तु प्रकृतदहरविद्यामात्रोपास्यविशेषस्पष्टीकरणार्थम् । तस्य तत्तद्विद्यासु जगत्कारणत्व-जगदन्तरात्मत्वमुक्तप्राप्यत्वमुमुक्षूपास्यत्वादिना प्रदिपादितं वस्तु तत्तत्प्रकरणश्रुतैः परब्रह्मपरतत्त्वपरज्योतिः परमात्माक्षरशिवशम्ववादिशब्दैः प्रत्यभिज्ञाप्य तस्य सर्वस्यापि वाक्यप्रमाणेन नारायणत्वविधिपरत्वात्, प्रकरणाच्च वाक्यस्य बलीयस्त्वात् । एवं सर्वपरविद्योपास्यनिर्धारणार्थस्य प्रकृतदहरविद्यासंस्पर्शोऽप्यस्तीति तदनन्तरं 'पद्मकोशप्रतीकाशमि'त्यादिना गुणविधानं देवतान्तराणामुपास्यनारायणविभूतित्व-प्रतिपादनेन तस्य सर्वोत्कर्षख्यापनं चेत्येवमनुवाकद्वयमपि नारायणपरमिति तस्मात् सर्वथापि नारायणानुवाकश्शिवोपासनापर इत्ययुक्तमिति । तत्र तावदाद्यानुवाके नारायणोपासनाविधिरिति पराभिमानोन्मूलनं हृदि निधायाह-- तव दहरविद्यां विदधतीति । अयमाशयः - न तावद्यो देवानामिति मन्त्रो नारायणपरः। अथर्वशिखायां शिवस्य ब्रह्मकारणत्वप्रतिपादनात् तदनुवादसम्भवे रुद्रपदस्यामुख्यार्थत्वकल्पनायोगात्। तत्प्रतिपादनं क्वापि नास्तीत्यभिमानवतो 'यो देवानामि'त्यादेरनुवादत्वशङ्काया एव

उत्थानानर्हत्वात् एतस्यैव मन्त्रस्य सदाशिवस्य ब्रह्मकारणत्वविधायित्वपर्यवसानात् । न हि प्रतीयमानार्थस्य प्राप्तिमन्त्रेण यदुपबन्धसहस्रेणापि शक्यते कल्पयितुमनुवादकत्वम् । नारायणस्य ब्रह्मकारणत्वं श्रुत्यन्तरे सिद्धमिति चेत्, न । अहो व्यधिकरणोत्तरकौशलमायुष्मतः । यश्शिवस्य ब्रह्मकारणत्वपरवचनस्य पुरोवादापेक्षायां नारायणस्य तत्कारणत्वश्रुतिमुपन्यस्यति । न हि यदाग्नेयवाक्ये यदुपबन्धेऽपि पुरोवादाभावादविधायकत्वोक्तौ सौर्यादिवाक्यमस्तीति प्रत्यवस्थानं शोभते। नारायणे रुद्रपदस्य लक्षणाभ्युपगमे न वैयधिकरण्यमिति चेन्न । अग्न्यादिशब्दानामपि यत्किञ्चिदर्थे लक्षणायां तत्प्रापकं यत्किञ्चित् प्रमाणं सम्भवतीति यदाग्नेयादिवाक्यानामप्यविधायकत्वप्रसङ्गात् । अन्योन्याश्रयापाताच्च रुद्रशब्दस्य नारायणे लक्षणासिद्धौ वैयधिकरण्याभावात् 'नारायणात् ब्रह्मा जायत' इत्यादेः पुरोवादत्वसिद्धिः, तस्य च पुरोवादत्वसिद्धौ च तस्मिन् पुरोवादानुसारेण तस्य तत्र लक्षणेति । तस्मात् प्राप्त्यसम्भवे यदुपबन्धादीनां नानुवादलिङ्गत्वमिति न तद्बलादनुवादकत्वकल्पनं युक्तम् । यदि तु द्वयोर्हिरण्यगर्भकारणत्वं न सम्भवेत्, तदा श्रुतिविशेषश्रुतयोः रुद्रनारायणपदयोरन्यतरस्य लक्षणाया आवश्यकत्वात् यदुपबन्धानुग्रहाय 'नारायणात् ब्रह्मा जायत' इति श्रुत्यनुरोधाय यो देवानामित्यत्र रुद्रपदस्यैव लक्षणोच्यत इति शङ्क्येतापि । सम्भवति तु द्वयोरपि तत्कारणत्वं कल्पभेदेन इति प्रदर्शयिष्यामः । किंचैकस्मिन्नपि कल्पे तयोस्तत्कारणत्वं मातापितृभावेन सम्भवति । नारायणस्य शिवशक्तित्वव्यवस्थापनात् । तस्मात् सर्वथायं मन्त्रः शिवपर एव । अस्य चायमर्थः -- महर्षिः महान् द्रष्टा **'यस्सर्वज्ञस्सर्ववित्'** **'अशेषविषयामोघशुद्धिबुद्धिविजृम्भण'** इत्यादिश्रुतिस्मृति-प्रतिपन्नाशेषविशेषविषयबोधसमृद्धः विश्वस्माच्चिदचिदात्मकप्रपञ्चादधिकः कृत्स्नस्य पशुपाशवर्गस्य नियन्तृत्वात् यो रुद्रः, स भक्तानां संसारदुःखस्य द्रावको देवः देवानां मध्ये प्रथमं हिरण्यगर्भं पुरस्तात् कल्पादौ स्वसंकल्पेन स्वस्मात् जायमानं करुणापरिपूर्णया सकलभुवनसृष्टिसामर्थ्यवितरणविचक्षणया आज्ञादृष्ट्या अपश्यत्, स देवोऽस्मान् शुभया परमानन्दप्राप्तिकारिण्या **'स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष'** इति श्रुतिप्रसिद्धया स्वविषयया स्मृत्या संयोजयत्विति । एवं ह्युपबृहितं लैङ्गे--

'अव्यक्तादभवत्स्थाणुश्शिवः परमकारणम् ।
सत्कार्यकारणोपेतः ऋषिर्विश्वाधिकः प्रभुः।
देवानां प्रथमं देवं जायमानं मुखाम्बुजात् ।

ददर्श चाग्रे ब्रह्माणं चाज्ञया तमवैक्षत।
दृष्टो रुद्रेण देवेशस्ससर्ज सकलं जगत् ।।' इति । कौर्मे च
'हिरण्यगर्भो जगदन्तरात्मन् त्वत्तो हि जातः पुरुषः पुराणः ।
स जायमानो भवता नियुक्तो यथाविधानं सकलं ससर्ज ।।' इति। एतेनास्य मन्त्रस्य शिवपरत्वं स्वीकृत्य यदवैदिकानामन्यथाव्याख्यानं-- महर्षिर्योगबलेन कालत्रयवत्त्र्यर्थसाक्षात्कारसमर्थो रुद्रस्स्वाविर्भावात्प्रागेव नारायणात् जातं हिरण्यगर्भं जायामानावस्थाविशिष्टं योगपलात् साक्षादकृतेति, तदपि गलहस्तितम् । श्वेताश्वतरे-- **'हिरण्यगर्भं जनयामास पूर्वमि'**त्येवास्य मन्त्रस्य पाठदर्शनाच्च । एवं चैतदनुरोधेन यस्मात्परमित्यनन्तरमन्त्रोऽपि शिवपर इति स्पष्टमेव । अत एवाश्वलायनस्मरणं--
'यस्मात्परं नास्ति नापरं च परात्मनः ।
न ज्यायोऽस्ति न चाणीयो नमस्तस्मै स्वयम्भुवे ।
येनेदमखिलं पूर्णं यन्मया मूर्तयस्स्मृताः ।
तस्मै शिवाय महते नमस्सूक्ष्माक्षरात्मने ।।' इति।

यच्च यद्वेदादाविति मन्त्रस्य नारायणपरत्वमुत्प्रेक्षितं, तदप्ययुक्तम् । परमते शब्दानां भूतपञ्चकगुणत्वेन तन्मतेऽपि तेषामन्योन्यमुपादानोपादेयभावायोगात् प्रकृतिवाच्यत्व- विवक्षायां तस्य या प्रकृतिः, तस्या यः पर इति वक्तव्यत्वेन **'तस्य प्रकृतिलीनस्य यः पर'** इति शब्दायोगाच्च । कथञ्चित्तदुभययोगेऽपि अकारस्य प्रणवप्रकृतित्वे मानाभावाच्च । न**'न्वकारो वै सर्वा वागि'**ति श्रुत्याकारस्य सर्ववाङ्भयप्रकृतित्वं प्रतिपद्यामहे । तत एव तस्य प्रणवप्रकृतित्वमपि सिध्यति । न चैवम् **'ओङ्कारेण सर्वा वाक्सन्तृण्णे'**त्यपि श्रवणाद्वैपरीत्यं शङ्क्यम् । अकारस्य प्रणव इव तस्याकारे अनुगमादर्शनेन तस्यास्स्तुतिपरत्वकल्पनादिति चेन्न । **'मात्रामात्राः प्रतिमात्राः कृत्वे'**ति श्रुतौ अकारोकारमकारार्धमात्राणामुत्तरोत्तरस्य पूर्वपूर्वलयस्थानत्व- विभावनेनार्धमात्राया एव त्रिमात्रप्रकृतित्वस्फुटीकरणात् अप्रकृतौ लयासम्भवात् **'अकारो वै सर्वा वागि'**ति श्रुतेः **'अग्निः सर्वा देवता'** इतिवत् स्तुतिपरत्वेनाप्युपपत्तेः । भागवते--
'समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः । हृदाकाशाद्भून्नाद'इति नादरूपामर्धमात्रां प्रस्तुत्य 'ततो ह त्रिवृदोङ्कार' इति तस्याः प्रणवप्रकृतित्वस्य कण्ठरवेणाभिधानाच्च । तस्मादस्य मन्त्रस्य पररीत्यार्थकल्पनेऽपि योऽर्धमात्रावाच्यः,स

महेश्वर इत्यर्थः पर्यवस्यति । अर्धमात्रावाच्यशिशव एवेति स्पष्टीकृतः । अथर्वशिखाविचारे यदि प्रणवप्रकृतिरकारः, तथापि **'अकारो ब्रह्मविष्णवीशकमठेष्वङ्कणे रण'** इति कोशकारैरनेकार्थनुशासनात् अकारवाच्यस्य महेश्वरत्वाभिधानं विष्णावेकान्तेन न पर्यवस्यति । ननु, प्रणवप्रकृतिवाच्यस्य महेश्वरत्वविधानमिहेत्युक्तं, तत्प्रकृतिश्च प्रथममात्रारूपोऽकारः । तथा च प्रणवप्रथम-मात्रारूपेणाकारेण यस्याभिधानं, तस्य ग्रहणे न सामान्यतोऽकारमात्रावाच्येष्वतिप्रसङ्ग इति चेन्न। तथासत्यथर्वशिखोत्तरतापनीयादिश्रुतिषु स्मृतिपुराणागमेषु ब्रह्मणस्तद्वाच्यत्व-प्रतिपादेन तस्यैवेह ग्रहणापत्तेः । अपि च **'चमसवदविशेषादि'**तिसूत्रोक्तरीत्या अजामन्त्रन्यायेनानेकधा योजयितुं शक्यानां मन्त्राणां प्रकरणोपबृंहणादिभिरैदम्पर्य-मास्थेयम् । अन्यथा व्यवस्थित्यसिद्धेः । शक्यते ह्यस्य मन्त्रस्य विधान्तरेणाप्यर्थोत्प्रेक्षणम् । **'अग्निमीले पुरोहितं' 'योनिस्समुद्रो बन्धुः समानं परमि'**त्येतेषु श्रुतानामकारोकारमकाराणां वेदादिमध्यान्तवर्णत्व प्रसिद्धेः अकारो वेदादौ प्रोक्तस्स्वरः, स एव तदन्ते प्रतिष्ठितः 'समानं परमि'त्यत्र उपान्त्यः । ततः परं स्वराभावेन तस्यैवान्त्यस्वरत्वात्, **'तस्य प्रकृतिलीनस्य'** प्रकृतिर्विष्णुः, 'वासुदेवः परा प्रकृतिरि'ति श्रुतेः, 'प्रकृतिस्त्वं पुमान् रुद्र' इत्यादिस्मृतेश्च । तस्मिन् लीनस्य वाच्यवाचकभावेनाभेदं प्राप्तस्य **'वाच्यवाचकयोर्भेदो नात्यन्तं विद्यते क्वचिदि'**ति वायूक्तेः, तस्य यः परः वेदाद्यन्तपाठगमिताभ्यर्हितभावस्याकारवाच्यस्य प्रकृतिरूपस्य विष्णोः यः परः प्रधानभूतः **'प्रकृतिस्त्वं पुमान् रुद्र'** इत्यादिवचनसिद्धो रुद्रः, **'ततस्तदालोकनतत्पराणामि'**त्यादौ परशब्दस्य प्रधाने प्रयोगात् शब्दविषयः, तत्परव्यवहारेऽपि शब्दप्रतिपाद्यस्य प्राधान्यात् प्रधानवाचित्वेनैव परपदप्रयोगोपपत्तौ वाच्ये पृथक्छक्तिकल्पनायोगात् स महेश्वरः स रुद्रो महानीश्वर इति । अथवास्य मन्त्रस्य यजुर्वेदपठितत्वात वेदो यजुर्वेदस्तस्यादौ पठितस्स्वरइकारः 'इषेत्वे'ति स एव तदन्तेऽपि प्रतिष्ठितः 'एव तपती'ति, तस्य प्रकृतिर्लक्ष्मीः, **'तत्र श्रीरभवद्देवी'**त्युपक्रम्य **'मूलप्रकृतिरव्यये'**ति कौर्मे प्रयोगात् । तस्यां वाच्यवाचकभावेन लग्नस्य ईकारस्य लक्ष्मीनामत्वात् दैर्ध्यावस्थां प्राप्तस्येति यावत्, तस्य यः परः पञ्चमीविषये षष्ठी, तस्माद्यः परः उत्तरो वर्ण उकारः स महेश्वरः, तद्वाच्यशिवस्सर्वेश्वर इति । तस्मात् स्वतन्त्रोत्प्रेक्षणे अर्थस्य व्वस्थित्यसिद्धेः ऐदंपर्यावधारणाय प्रकरणादिकमुपन्यसनीयम्। प्रकरणं च शिवराघवसंवादे त्रिपुण्ड्रधारणाङ्गभस्मसम्पादने शैवे कर्मणि विनियुक्तेन **'धातुः प्रसादान्महिमानमीशमि'**ति शिवनामाङ्कितेन **'अणोरणीयानि'**ति मन्त्रेण

उपक्रमात् मध्ये **'यो देवानामि'**ति मन्त्राम्नानाच्च शिवविषयमवसीयते । **'यः परस्स महेश्वरः'** इत्यत्र महेश्वरशब्दस्य च रूढिप्राबल्यात् अनूदितस्य परस्य स्ववाच्यशिवरूपताविधौ तात्पर्यं निश्चीयते । अतो निश्चितविधेयानुरोधेनैवानेकधा योजयितुं शक्यस्यास्यानुवादभागस्य योजनमुचितम् । **'यस्योभावग्नी अनुगतौ अभिनिम्रोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्ति'** रित्यत्र हविरार्त्यधिकरणन्यायेनाग्निद्वित्वस्याविवक्षया एकैकाग्न्यनुगमस्यापि पुनराधेयनिमित्ततयानुवादप्रतीतेः व्यवस्थितत्वेऽपि अग्निद्वयोत्पादकतया वाक्यान्तरावगताधानाभ्यासरूपस्य विधेयस्य पुनराधेयस्य एकाग्निमात्रोत्पादनाक्षमतया विधेयानुरोधेनानुवादभागेऽग्निद्वित्वविवक्षायाः **'पुनराधेयमोदनवदि'** त्यधिकरणे निर्णीतत्वेनाव्यवस्थितानुवाद्यार्थप्रतीतिस्थले विधेयानुरोधेनानुवाद्यार्थवर्णनौचित्यस्य कैमुतिकन्यायसिद्धत्वादिति सर्वथा परमशिववैभवपर एवायं मन्त्रः । अक्षरार्थोऽप्यस्य --

'यं वेदादौ स्वरं प्राहुर्वाच्यकभावतः ।
वेदैकवेद्यं याथार्थ्याद्वेदान्ते च प्रतिष्ठितम् ।
स एव प्रकृतौ लीनो भोक्ता यः प्राकृतो मतः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ।
तदधीनप्रवृत्तित्वात् प्रकृतेः पुरुषस्य च ।'

इति वायुसंहितायां श्रवणादुपबृंहणानुरोधेन वेदादौ यः स्वरः प्रोक्तः प्रणवः प्रतिपाद्यप्रतिपादकयोरभेदोपचारात् लक्षणया तत्प्रतिपाद्यं निर्विशेषं ब्रह्म, तदेव वेदान्ते च प्रतिष्ठितं, वेदान्तभागप्रतिपाद्यत्वात्. तस्य प्रकृतावविद्याख्यायां प्रतिबिम्बभावेन लग्नस्य प्रकृतिसहितस्य पुरुषस्य यः परः नियन्तृत्वेन प्रधानभूतः **'प्रधानक्षेत्रज्ञपतिर्गुणेश'** इत्यादिश्रुतिप्रसिद्धः, स महेश्वरशब्दितः श्रीसदाशिव एव, न देवतान्तरमिति स्वीकार्यः । एवं चोपक्रमोपसंहारपरामर्शैश्शिवपरत्वेन निर्णीते **'अणोरणीयानि'**त्यनुवाके विधीयमाना दहरविद्या शिवदेवत्येति न तत्रोपास्यतया देवतान्तरान्वयावकासः इति । अपि च कैवल्याद्युपनिषदाम्नातगुण- निकरप्रत्यभिज्ञानादप्यस्यास्तदेकविषयत्वमवसीयते । तथा बि-- स्पष्टं तावदुपासनास्थानसाम्यं तथोपास्यरूपमपि तत्र **'उमासहायमि'**त्यादिना प्रतिपादितम् । इहापि तथैवोपवर्णितम् -- **'ऋतं सत्यमि'**ति मन्त्रेण । विरूपाक्षकृष्णपिङ्गलपदयोः त्रिलोचनोमासहायपदसमानार्थत्वात् ।

'अर्धालकमवस्त्रार्धमस्थ्युत्पलदलस्रजम् ।
अर्धपुल्लक्षणं वन्दे पुरुषं कृष्णपिङ्गलमि'ति

भविष्यत्पुराणवचनेन कृष्णपिङ्कलशब्दस्य उमाशाबल्यपरत्वेन विवरणात् विरूपाक्षविश्वरूपश्रुतिभ्यां **'नमस्कुर्यान्महोदेवमृतं सत्यमितीश्वर;**मिति कौर्मे शिवनमस्कारे विनियोगविधानात् बोधायनसूत्रे-- **'अथातो महादेवस्य पादोदकविधिं व्याख्यास्याम'** इत्युपक्रम्य ऋतं सस्तयमिति मन्त्रेण प्राशयेदिति शिवापादोदकप्राशने विनियोगाच्च शिवपरत्वेन निश्चितेऽस्मिन्मन्त्रे श्रुतस्य तथैव विवरणस्य न्याय्यत्वाच्च। यत्तु कश्चिदनाघ्रातशब्दार्थव्युत्पत्तिगन्धस्वकल्पितकदध्वानुरोधिश्रुतिस्मृतिवचनकल्पना-कुलितनिखिलवैदिकमर्यादस्सकलजनापहास्यनिजमरुदवतारत्वोद्घोषणतदर्थकश्रुति-स्मृत्युदाहरणविख्यापितविप्रलिप्सोत्कर्षविरचितान्ध्यः प्रललाप--

'ऋतं सत्यं परं ब्रह्मेत्याद्युद्देश्याद्वितीयकाः ।
विभक्तिरूर्ध्वरेतादिः प्रथमा रुद्रगोचरा ।
तस्माद्विष्णुं परं ब्रह्म प्रति रुद्रो व्रते स्थितः ।
ऊर्ध्वरेता इति ह्येव श्रुत्यर्थोऽवसितो भवेदि'ति,

तदेतत् मन्त्रतात्पर्यकथनमाबालमखिलापहास्यं निराकरणाभिनिवेशनमपि वक्तारमिव विफलीकुर्यादित्युपेक्ष्यते । ऊर्ध्वरेता इत्यत्र तु ऊर्ध्वज्वलनात्मककृशानुरेतस्त्वोक्तिः । न चास्य मन्त्रस्य शिववैभवपरत्वेऽपि दहरोपासनायामुपास्यरूपसमर्पणपरत्वे न मानमिति वाच्यम् । तस्यामपेक्षितोपास्यरूपसमर्पणक्षमस्याकाङ्क्षानुरोधेनान्वय-स्यावश्यम्भावात्, योगयाज्ञवल्क्ये ध्यानाध्याये--

'अथवा परमात्मानं परमानन्दविग्रहम् ।
गुरूपदेशाद्विज्ञेयं पुरुषं कृष्णपिङ्गलम् ।
ब्रह्म ब्रह्मपुरे गार्गि दहराब्जखमध्यमे ।
अभ्यासात् सम्प्रपश्यन्ति सन्तस्त्वं च तथा कुर्वि'ति

तथैव दर्शितत्वाच्च । तदेवं प्रत्यभिज्ञाविशेषैरन्यैरपीति समुच्चयार्थेनापिशब्देन द्योतितैः, अन्यैः हृदयकमलसंस्थानविशेषादिभिः । नन्वेवं कथं मध्ये नारायणपरमन्त्राणां सङ्गतिरित्याशङ्क्याह--- अनुध्यानार्थमिति । अयं भावः- न त्त्र तावत्परोक्तरीत्या तेषां सर्वविद्योपास्यनिर्धारणपरत्वम् । सहस्रशीर्षदेवमित्यादिभिः द्वितीयान्तपदैर्नारायणमनूद्य 'तद्विश्वमुपजीवती'ति तेषामेकवाक्यतया तस्य विश्वोपजीव्यत्वप्रतिपादनपरत्वं स्वरसतः प्रतीयमानं परित्यज्य द्वितीयानां

प्रथमार्थत्वकल्पनस्य प्रत्युद्देश्यं विधिपर्यवसानेनानेकवाक्यत्वकल्पनस्य चायुक्तत्वात् । परोक्तरीत्या सर्वो वै रुद्र इत्यादिवाक्यानां स्पष्टभेदानां विरुद्धविभक्तितत्साकाङ्क्षाक्रियासमभिव्याहारादिप्रतिबन्धकरहितानां सर्वपुरुषसदादिशब्दैश्शाण्डिल्यविद्यापुरुषसूक्तविद्यासद्विद्याव्याहृतिविद्यादिसकलपरविद्योपास्यप्रत्यभिज्ञापनपूर्वकं तस्य रुद्ररूपत्वनिर्धारणपरताया दुर्निवारत्वेन अथर्वशिखायां च कश्च ध्येय इति विद्याविशेषक्रमोपक्रमाभावात् सकलपरविद्यासु ध्येयप्रश्ने शिवस्य ध्येयत्वनिर्धारणस्य स्पष्टत्वेन च सहस्रशीर्षं देवमित्यादिमन्त्राणां क्लिष्टकल्प्यतद्विरुद्धार्थपरत्वशङ्काया उत्थानानहतत्वाच्च। नापि प्रकृतदहरविद्योपास्यनिर्धारणपरत्वम् । सन्निहितमन्त्राभ्यामेव रुद्रमहेश्वरशब्दितशिवरूपतया तन्निर्धारणस्य 'ऋतं सत्य'मिति मन्त्रेण तदुचितरूपसमर्पणस्य च सिद्धत्वात्। नापि **'ब्रह्मज्येष्ठा वीर्या सम्भृतानी'**त्यादिमन्त्राणामिव गुणकीर्तनसामर्थ्यकल्प्योपासनान्तरपरत्वम्। प्रकृतदहरविद्यानङ्गभूतस्वतन्त्रनारायणोपासनापरत्वकल्पने समनन्तरानुवाकसमाप्तिपर्यन्तमनुवर्तमाने तत्प्रकरणे अनन्वयेन तत उत्कर्षकल्पनापत्तेः, प्रकरणे सम्भवति तत्कल्पनायोगात् । अङ्गत्वमपि दहरविद्यां प्रति नारायणध्यानस्याग्नेयादियागान् प्रति प्रयाजादियागानामिवारादुपकारकत्वरूपं न युक्तम् । **'पद्मकोशप्रतीकाशमि'**त्यादिना **'तस्य मध्ये महानग्नि'**रित्यादिना **'तस्य मध्ये वह्निशिखे'**त्यादिना च हृदयकमलमहाग्नितच्छिखागुणकीर्तनसामर्थ्यलभ्यानां तद्ध्यानानां हृदयकमलकुहरविलसन्महावह्निशिखामध्यवर्तित्वेन शिवोपासनानुकूलतया सन्निपातित्ववन्नारायणान्तरत्वेन पूर्वानुवाकविहितसन्निध्याम्नातक्रममुक्तिफलान्वितशिवोपासनानुकूलतया संनिपातित्वोपपत्तौ आरादुपकारकत्वकल्पनायोगात् । कौर्मे श्रीमदीश्वरगीतासु--

'चिन्तयित्वा तु पूर्वोक्तं हृदये पद्ममुत्तमम् ।
आत्मानमथ कर्तारं तत्रानलसमप्रभम् ।
मध्ये वह्निशिखाकारं पुरुषं पञ्चविंशकम् ।
चिन्तयेत् परमात्मानं तन्मध्ये गगनं परम् ।
ओङ्कारबोधितं तत्त्वं शाश्वतं शिवमच्युतम् ।
अव्यक्तं प्रकृतौ लीनं परं ज्योतिरनुत्तमम् ।.
तमसः परमं तत्त्वमात्माधारं निरञ्जनम् ।
ध्यायीतं तन्मयो नित्यमेकरूपं महेश्वरम् ।।'

इति प्रथमं स्वस्थाने हृदयकमलस्य तन्मध्ये मूलश्रुतावग्नित्वेन निरूपितस्य कर्तृत्वादिविशिष्टस्य विज्ञानमयकोशस्वरूपस्य अहंकारस्य तन्मध्ये निष्कृष्टचैतन्यैकतानस्यानन्दमयकोशरूपस्य तत्र वह्निशिखात्वेन निरूपितपञ्चविंशस्य तन्मध्ये सहस्रशीर्षं देवमित्यादिनोपवर्णितस्य तस्याश्शिखाया इत्यादिना शिखामध्यवर्तित्वेनोपदिष्टस्य नारायणस्य तदन्तः 'यः परः स महेश्वर' इत्युक्तस्य शिवस्योपासनमिति उपासनाप्रकारविशेषस्फुटीकरणाच्च । तस्मिन्नेव यतिधर्मप्रकरणे-- **'सन्न्यस्याह्नि विशेषेण चिन्तयेन्नित्यमीश्वरमि'**त्युपक्रम्य **'कृत्वा हृत्पद्मनिलयं विष्णवाख्यं विश्व(श)सम्भव'**मित्यादिना हृदयकमले विष्णोर्भावनां विधाय **'तदन्तस्सर्वभूतानामीश्वरं ब्रह्मरूपिणमि'**त्यादिना **'पुराणं पुरुषं शम्भुं ध्यायन्मुच्येत बन्धनादि'**त्यन्तेन तदान्तरत्वेन शिवोपासनाविधानस्य दृष्टत्वाच्च । तस्माद्यथान्तरादित्यविद्यायां **'आदित्यो वा एष एतन्मण्डलं तपती'**त्यादिना मण्डलाभिमानिपुरुषकीर्तनं तदान्तरत्वेन परमेश्वरस्योपासनाविधानार्थमेव दहरविद्यायामपि नारायणकीर्तनमिति न किञ्चिदसाङ्गत्यम् । अन्ये तु **'स ब्रह्मा स शिव'** इत्यादिकैवल्यश्रुतिप्रत्यभिज्ञानुरोधात् **'तस्याश्शिखाया मध्ये परमात्मा व्यवस्थित'** इत्यादिना प्रागुपास्यत्वेनोपदिष्टपरमेश्वरपरमेवेति मन्यामाना मध्यमानुवाके प्रथमं नारायणस्य गुणकीर्तनम्, अनन्तरं हृदयकमलस्य, ततो महाग्नेः, ततस्तच्छिखायाः, ततः प्रागुपास्यत्वेन विहितस्य परमात्मन इति क्रमदर्शनात् प्रथमं नारायणात्मना स्वात्मानमनुसन्धाय स्वस्य हृदम्बुजे वैश्वानाराग्निशिखामध्यवर्तित्वेन ध्यातव्यः परमश्शिव इति ध्यानप्रकारं मन्यन्ते । एवं च **'स ब्रह्म स शिव'** इत्यादेः परमशिवविभूत्युपदेशपरत्वे स्थिते कैवल्यश्रुताविव विभूतिषु नारायणस्यापरिगणनमुपासककोटिनिवेशादेव ; तस्य तदुपसर्जनत्वस्य स्पष्टत्वादिति चाहुः । अयमपि प्रकारः सम्मतः पौराणिकानाम् । तथाह्युपबृंहितं सूतसंहितायाम् -

'अथवाहं हरिस्साक्षात्सर्वज्ञः पुरुषोत्तमः ।।
सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ।।
विश्वो नारायणो देवो ह्यक्षरः परमः प्रभुः ।।
इति ध्यात्वा पुनस्स्वस्य हृदयाम्भोजमध्यमे ।।
प्राणायामैर्विकसिते परमेश्वरमन्दिरे ।।
अष्टैश्वर्यदलोपेते विद्याकेसरसंयुते ।
ज्ञाननाले महाकन्दे प्रणवेन प्रबोधिते ।

विश्वार्चिषं महावह्निं ज्वलन्तं विश्वतोमुखम् ।
वैश्वानरं जगद्योनिं शिखातन्विनमीश्वरम् ।।
तापयन्तं स्वकं देहमापादतलमस्तकम् ।।
निवातदीपवत्तस्मिन् दीपितं हव्यवाहनम् ।
नीलतोयदमध्यस्थविद्युल्लेखेव भास्वरम् ।
नीवारशूकवद्रूपं पीताभासं विचिन्तयेत् ।
तस्य वह्नेश्शिखायास्तु मध्ये परमकारणम् ।
परमात्मानमानन्दं परमाकाशमीश्वरम् ।
ऋतं सत्यं परं ब्रह्म परं संसारभेषजम् ।
ऊर्ध्वरेतं विरूपाक्षं विश्वरूपं महेश्वरम् ।
नीलग्रीवं स्वमात्मानं पश्यन्तं पापनाशनम् ।
ब्रह्मविष्णुमहेशानैर्ध्येयं ध्येयविवर्जितम् ।
सोऽहमित्यादरेणैव ध्यायेद्योगीश्वरेश्वरम् ।।' इति ।

एवं च नारायणस्य यद्युपासककोटिनिवेशनं श्रुत्या विवक्षितं, यदि वा उपासकस्य हृदये तस्याप्यान्तरत्वेन शिवस्यानुध्यानम्, उभयथापि तस्माच्च स्वविभूतित्वेन तद्विभूतित्वेन वोपदिष्टेभ्यो ब्रह्मादिभ्यश्च परमशिवोत्कर्षस्सिध्यतीति तस्यैव सर्वोत्कर्ष इति निष्प्रत्यूहम् । ननु चात्रैव **'नारायणपरं ब्रह्मे'** ति कण्ठोक्त्या परब्रह्मभावेनोपदिष्टस्य नारायणस्य कथमन्योपसर्जनभावः कथ्यते । नैष दोषः । **'नारायणपरमि'**त्यस्य समासपदत्वेन तत्त्वं ब्रह्म नारायणात् परं ज्यायः, नारायणस्तु परः तदन्य इति अत्रैव **'ऋतं सत्यं परं ब्रह्मे'** त्युपास्यत्वेन निर्दिष्टस्य परब्रह्मणशिवस्य नारायणस्य च वविक्षितप्रधानोपसर्जनभावोपपादनपरतयैव तन्मन्त्रव्याख्यानोपपत्तेः । यत्त्वत्र परैरुक्तं - महोपनिषदि समानप्रकरणे **'नारायणः परं ब्रह्मे'**ति पदविच्छेदेनाध्ययन-दर्शनात्तदनुरोधादिहापि भिन्नपदस्य नारायणेत्यस्य 'सुपां सुलुगि'त्यादिना प्रथमाविभक्तेर्लुगादेशस्य कल्पनीयत्वात् समस्तपदत्वेऽपि निषादस्थपत्यधिकरणन्यायेन सामानाधिकरण्यस्यैवोचितत्वात्

'अहमेव परं ब्रह्म परं तत्त्वं पितामह ।
अहमेव परं ज्योतिः परमात्मा त्वहं विभुः ।'

इति लैङ्गे उपबृंहणदर्शनाच्च नाराग्रणस्यैव परब्रह्मभावप्रतिपादनपरोऽयं मन्त्र इति, तदयुक्तम् । महोपनिषदि एवम्मन्त्राम्नानस्यैव तावत् सम्प्रदायक्रमागतेषु

पाठेष्वनुपलम्भात्, तत्र तत्सत्त्वेऽपि नारायणानुवाकपाठानुरोधेन महोपनिषत्पाठ एव 'सुपां सुलुगि' त्यादिना पञ्चम्यास्स्वादेशकल्पनोपपत्तौ प्रकरणादिस्वारस्यभङ्गायोगात् समर्थपरिभाषाविरोधेन समानाधिकरणसमासस्याप्यसङ्गतत्वात् लक्षणविरुद्धात् कर्मधारयात् तदनुरोधिनः पञ्चमीतत्पुरुषस्याभ्यर्हितत्वात् **'तपरस्तत्कालस्ये'**ति सूत्रे तपरसमासदर्शनेन तद्वत् पञ्चमीति योगविभागात् इहापि समासोपपत्त्या अत्र पञ्चमीसमासस्य लक्षणानुरोधित्वात् त्वत्पक्षेऽस्मिन् मन्त्रे मध्यमपरशब्दयोः पुल्लिङ्गयोस्तत्त्वंज्योतिर्विशेषणत्वस्याप्यन्याय्यत्वात्। **'अहमेव परं ब्रह्मे'** त्यादिलैङ्गश्रुतनारायणवचनस्य महालिङ्गप्रादुर्भावात् पूर्वं ब्रह्मनारायणयोः परस्परोत्कर्षविवादप्रस्तावे पठितस्यानन्तरं तद्विवादप्रशमनार्थोद्भूतमहालिङ्ग-मध्यसन्निहितस्य शिवस्य

'पश्यतं मां महादेवं भयं सर्वं प्रमुच्यताम् ।
युवां प्रसूतौ गात्राभ्यां मम पूर्वं महाबलौ ।।
त्रिधा भिन्नोऽस्म्यहं विष्णो ब्रह्मविष्णुशिवाख्यया ।
सर्गरक्षालयगुणैः निष्कलः परमेश्वरः ।
सम्मोहं त्यज विष्णो त्वम्'

इत्यादिभिर्वचनैस्तत्रैवापोदितस्यार्थतथात्वाव्यवस्थापकत्वात्। तादृशापवादरहितेन **सपरस्सर्वशक्तीनां ब्रह्मणस्समनन्तरः** ।।' इति नारायणं प्रकृत्य विष्णुपुराणवचनेन तस्य ब्रह्मपरत्वस्यैवोपबृंहितत्वाच्च परोक्तार्थग्रहणेऽपि **'नारायणपरं ब्रह्म' 'ऋतं सत्यं परं ब्रह्मे'**ति द्वयोः परभावोपदेशासम्भवेन आवश्यके कस्यचिदन्यथानयने अङ्गगुणविरोधाधिकरणन्यायेन गुणभूतस्य नारायणस्यैव परभावोपदेशस्य **'ब्रह्मोच्यते परमसौ परमं च तत्त्वमि'**ति श्लोकेन सुदर्शनाचार्यैरुपदिष्टया रीत्यान्यथा नेतव्यत्वेन तद्बलादुपक्रमादिप्रतिष्ठापितार्थव्याकुलीकरणायोगाच्च । **'अङ्गगुणविरोधे तादर्थ्यादि'**त्यधिकरणे हि एकाहादिदीक्षापक्षेषु दीक्षिणीयासोमयागयोरन्यतरस्या-सम्भावात् यदिष्ट्यादिवाक्यप्राप्तपर्वकालत्वस्यावश्यके त्यागे प्रधानानुग्रहस्योचितत्वात् दीक्षिणीयाया एव तत्त्याग इति निर्णीतम् । तस्मान्न कश्चिदुपपादितेऽर्थे विरोधगन्धः । वस्तुतस्तु **'नारायणपरं ब्रह्मे'**त्यादेर्नारायणस्यानुपचरितब्रह्मभावप्रतिपादनपरत्वेऽपि तस्य शिवोपसर्जनभावस्संघटत इति पुरस्तान्निपुणतरमुपपादयिष्यते ।।३१।।

श्रुतीनां मूर्धानश्शुभद बृहदारण्यकमुखाः
प्रभावं हार्दस्य प्रणिजगदुरन्येऽपि भवतः ।
गुणानां बोद्धारस्सकलमुपसंहारनियमं
विदुस्त्वय्येवैषां हृदयमिति किं मूढवचनैः ।।३२।।

बृहदारण्यकश्रुतिस्तावत् **'य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते'** इति दहरविद्योपास्यं हार्दं परमेश्वरमुपक्रम्य **'सर्वस्य वशी सर्वस्येशानस्सर्वाधिपतिः स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयान् एष सर्वेश्वरः एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाये'**ति तस्यानन्यसाधारणं प्रभावमवर्णयत् । तथा छान्दोग्यश्रुतिरपि **'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश'** इत्युपक्रम्य **'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकाम-स्सत्यसङ्कल्प'** इति तद्गुणकीर्तनेन **'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान् तेषां सर्वेषु लोकेषु कामचारो भवती'**त्यादिना तदुपासकानां सहाफलकीर्तनेन च तस्य महिमानं प्राकाशयत् । तथा 'अथातो महोपनिषदमेवे'त्युपक्रम्य महोपनिषदपि नारायणानुवाकप्रक्रियया **'सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवमि'**त्यादिना उपासकतादात्म्येनानुसन्धेयं नारायणं तस्य हृदयकमलं तत्र वैश्वानराग्निशिखां च वर्णयित्वा **'तस्यै शिखायै मध्ये पुरुषः परमात्मा व्यवस्थित'** इति हार्दस्य शिवस्य तन्मध्यवर्तित्वप्रदर्शनेन **'स ब्रह्मा स ईशान'** इत्यादिना इतरेषां तद्विभूतित्वख्यापनेन च तस्य वैभवं व्यद्योतयत्। यद्यपि नारायणानुवाके **'तस्याश्शिखाया मध्य'** इत्यादेः नारायणविषयत्वपक्षे तत्प्रत्यभिज्ञानुरोधादिह **'तस्यै शिखायै मध्य'** इत्याद्देशस्तद्विषयत्वादियमुपनिष-न्नारायणोपासनापरैवेति क्वचित् कर्मण्युपसर्जनत्वेन यष्टव्याया देवतायाः कर्मान्तरे प्रधानत्वेन यष्टव्यत्ववद्दहरोपासनासूपसर्जनत्वेन ध्यातव्यस्य हृदयपुण्डरीकस्य पातञ्चलशास्त्रोक्तफलविशेषार्थं प्राधान्येन ध्यातव्यत्ववच्च शैवदहरोपासनाया-मुपसर्जनत्वेनोपास्यस्य नारायणस्यैतद्बलात् प्राधान्येनोपास्यत्वं लभ्यते, तथापि **'तस्याश्शिखाया मध्य'** इत्यादि शिवपरमि'ति सूतसंहिताद्यभिमतपक्षे तद्वदियमप्युपनिषत् शिवोपासनापरैव पर्यवस्यति। एवमन्या अपि श्रुतयो यथासम्भवं द्रष्टव्याः ।

स्यादेतत् - बृहदारण्यके निर्विशेषप्रकरणे तस्यैव स्तुत्यर्थं वशित्वादयो धर्मास्समाम्नाताः । न तत्र कैवल्यशाखादिश्रुतदहरविद्योपास्यस्य शिवस्य कश्चित् प्रसङ्गोऽस्ति । छान्दोग्ये यद्यप्युपासनाविधानमस्ति, तथपि तत्र शिवोपासनमिति न किञ्चित् प्रमाणमुपलभ्यते । न च कैवल्यशाखादिश्रुतोपासनैक्यात् तथात्वसिद्धिः ; आत्मप्रबोधोपनिषदि **'अथ यदिदं ब्रह्मपुरमिदं पुण्डरीकमि'**त्यारभ्य **'शोकमोहविनिर्मुक्तं विष्णुं ध्यायन्न सदिती'**त्यन्तेन दहरपुण्डरीके विष्णूपासनस्यापि विहितत्वेन तदैक्यस्यैव नियन्तुमशक्यत्वात् । यत्तु मबोहनिषन्मन्त्रजातमुदाहृतं, तत्र नारायणानुवाक इव पूर्वं शिवप्रस्तावाभावान्न तदुपासनापरत्वं शक्यते वक्तुम् । **'एको ह वै नारायण आसी'**दित्युपक्रममारभ्य नारायणस्य प्रस्तावेन तदुपासनापरत्वस्यैव प्रतीतेः । न च नारायणानुवाकप्रक्रियाप्रत्यभिज्ञानात् शिवोपासनापरत्वम् । **'एको ह वै नारायण आसी'**दित्याद्युपक्रमविरोधेनानन्तरं तत्प्रत्यभिज्ञानस्य च्छान्दोग्ये **'ओमित्येतदक्षरमुद्गीथमुपासीते'**त्युपक्रमानुरोधेन उद्गीथभक्त्यवयवविषयाया-मुद्गीथविद्यायां वाजसनेयकश्रुतकृत्स्नोद्गीथभक्तिकर्तृविषयोद्गीथविद्यार्थवादादि-प्रत्यभिज्ञानस्येवाकिञ्चित्करत्वात् एतत्प्रक्रियाप्रत्यभिज्ञानात् तस्यैव नारायणोपासना-परत्वमिति वैपरीत्यस्यैव पराभिमतत्वाच्चेत्याशङ्क्याह-- **गुणानामिति** । अयमाशयः-- बृहदारण्यके वशित्वाम्नानं यद्यपि निर्गुणप्रकरणमध्यपाति, तथापि निर्विशेषे वशित्वाद्यभावात् सगुणोपाधिविशेषगतगुणकीर्तनद्वारैव स्तुतौ पर्यवसानस्य वक्तव्यत्वात् हृदयकोशमध्यगतस्य ईशानसर्वेश्वरभूताधिपतिशब्दितस्य शिवस्यैव गुणकीर्तनस्य स्तुतिद्वारत्वेन प्रतीतेः शिवविषयमेव वशित्वादिगुणाम्नानम् । तथा छान्दोग्ये **'दहरोऽस्मिन्नन्तराकाश'** इति दहराधिकरणोक्तन्यायात् ब्रह्मपरेणाकाश-पदेनोपास्यं ब्रह्म प्रस्तुत्य **'तस्मिन्यदन्तस्तदन्वेष्टव्यमि'** त्याद्युक्त्वा **'किं तदत्र विद्यते, यदन्वेष्ष्वव्यमि'** त्यादिना स्वयमेव परिचोद्य **'अस्मिन् कामास्समाहिता'** इति तदुत्तरवाक्येन तदन्तर्वर्तित्वेनोपदिष्टानां सत्यकामादिगुणानां तैत्तिरीयोपनिषदि **'तत्रापि दहं गगनं विशोक'** इति विशोकत्वगुणान्वयस्वारस्यसिद्धब्रह्मतात्पर्येण गगनपदेन पूर्वापरमन्त्रसमर्पित- शिवरूपमुपास्यं ब्रह्म प्रकृत्य **'तस्मिन्यदन्तस्तदुपासितव्यमि'**ति छान्दोग्यरीत्या तदन्तर्वर्तित्वेनोपदेशात् छान्दोग्ये सत्यकामादिगुणोपदेशः, तद्विशिष्टब्रह्मोपासनाविधानं चेत्युभयमपि शिवपरमेव । **'कामादीतरत्र तत्र चे'** त्याद्यधिकरणे छान्दोग्याम्नातानां सत्यकामादिगुणानां बृहदारण्यके वशित्वादिगुणैस्सहोपसंहारस्य सर्वैरभ्युपगतत्वाच्च । तथा महोपनिषदि **'सहस्रशीर्षं**

देवमि' त्याद्याम्नानमपि शिवोपासनाप्रकारविशेषपरम् । कार्त्स्न्येन नारायणानुवाकप्रक्रियाप्रत्यभिज्ञानात् । यत्त्वत्रोपक्रमविरोध इति शङ्कितं, तत्र पृच्छामः, किमुपक्रमे नारायणस्योपासना विहितेति तद्विरोधः, उत तद्विभूत्युपन्यासात् तदुपासनाविधित्सोन्नीतेति, अथवा उपक्रमे सर्वोत्कर्षेणोप- वर्णितत्वादन्योपसर्जन- तयोपासनानुप्रवेशकल्पनमयुक्तमिति विरोधः । न तावदाद्यः । महोपनिषद्युपासना- विधेरेवाश्रवणात् । नापि द्वितीयः । नारायणानुवाकप्रत्यभिज्ञया नारायणान्तरत्वेनैव शिवोपासनाप्राप्तेः नारायणस्याप्युपासनाविषयकोटावनुप्रवेशेन तत्प्रत्यभिज्ञादरेऽप्युप- क्रमविरोधाभावेन तदादरस्य युक्तत्वात् । छान्दोग्ये **'तस्मिन्यदन्तस्तदन्वेष्टव्यमि'** त्युपक्रमे सत्यकामादिगुणमात्रोपासनाप्रतीतावप्य- विरोधात् । **'अथ य इह आत्मानमि'** त्युपसंहारानुरोधेन तद्विशिष्ट- ब्रह्मोपासनाभ्युपगमान्नारायणोपनिषदि **'तस्मिन्यद न्तस्तदुपासितव्यमि'**ति गुणमात्रोपसनाप्रतीतावपि छान्दोग्य- प्रत्यभिज्ञानुरोधात् गुणोपसर्जनकगुण्युपासनाभ्युपगमाच्च । छान्दोग्यश्रुतोद्गीथविद्याया वाजसनीयकोद्गीथविद्याप्रत्यभिज्ञाने तु प्राणदृष्ट्योद्गीथ- कर्तुरुपासनायां कथञ्चिद्विशेषणत्वेन उद्गीथावयवस्योङ्कारस्यानुप्रवेशसम्भवेऽपि **'अथ य एवायं मुख्यप्राणस्तमुद्गीथमुपासाञ्चकिर'** इत्यादिच्छान्दौग्यश्रुतिप्रतिपन्नं तस्य प्राणदृष्ट्योपासनं विरुध्येते'ति युक्तो भेदः । नन्वस्तु तर्हि तृतीयः कल्पः । **'तस्मिन्यदन्तस्तदन्वेष्चव्यं तस्मिन्यदन्तस्तदुपासितव्यमि'** त्यनयोरुपसंहारानुरोधेन यत्तत्पदयोः **'त्यदादीनि सर्वैर्नित्यं' 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामि'**ति विधानादाकाशतद्गतगुणजातोभयपरत्वं परिकल्प्य तदुमयोपासनाविधिपरत्वस्य वर्णयितुं शक्यत्वात् ; **'एको ह वै नारायण आसीदि'**त्यादिना नारायणस्य सर्वोत्कर्षप्रतिपादनस्यान्योपसर्जनत्वकल्पनासहिष्णुत्वाच्चेति चेत्, न । **'एको ह वा'** इत्यादेश्शिवोपसर्जनत्वकल्पनानुकूलत्वेनैवाग्रे निपुणतरं व्याख्यास्यमानत्वात् । एतेन महोपनिषदनुरोधेन नारायणानुवाक एव नारायणोपासनामात्रपर इति पराभिमानो गलहस्तितः । तथा सत्येकोपासनाश्रुत्यनुरोधेन उभयोपासनाश्रुतेः नयने छान्दोग्यश्रुतेरपि तैत्तिरीयश्रुत्यनुरोधेन गुणमात्रोपासनापरत्वापत्तेः । तस्मात् बृहदारण्यकाद्युदाहृतश्रुतयो दहरविद्यान्वयिगुणादिकथनेन शिवस्य निरतिशियं प्रभावं ख्यापयन्तीति साधूक्तम् ।।३२।।

किं च -

विधत्ते माण्डूक्यश्रुतिरपि समस्ताधिपतितां
समानार्थश्रुत्यनन्तरविवृतभावा तव विभो ।
तथेशानो मन्त्रः स्मरमथन रुद्रोपनिषदि
प्रतीता मन्त्राश्च प्रकटतरमन्ये च बहवः ।।३३।।

अत्रेयं विषयशुद्धिः--- अधिदैवतमध्यात्मं चात्मनो निर्विशेषस्योपाधिभिर्विभक्तानि त्रीणि सन्ति रूपाणि, वैश्वानरश्च हिरण्यगर्भश्च ईश्वरश्चेत्यधिदैवतं, विश्वश्च तैजसः प्राज्ञ इत्यध्यात्ममिति श्रुतिः । देहयोः स्थूलरूपयोस्तत्र व्यष्टिसमष्ट्योर्द्वावभिमानविधायिनौ विश्ववैश्वानराविष्टौ। सूक्ष्मयोस्तु प्रकथितौ तैजसाभिधहिरण्यगर्भौ प्राज्ञेश्वरानुपहितावुक्तौ । अज्ञानमायाभ्यां विश्वो जाग्रदवस्थायां जीवस्स्वप्ने स्यात्तैजसः अविद्यामात्रसाक्षित्वात् सम्प्रसादे प्राज्ञो भवेत् ।

वैश्वानरोऽत्र भगवान् विराट्पुरुष उच्यते ।
शरीरं यस्य निखिलं त्रैलोक्यं सचराचरम् ।।
हिरण्यगर्भो जगतां सूक्ष्मसृष्टेर्विवर्धिता ।
यदुपाधेः प्राणकल्पं सूत्रं वेदविदो जगुः ।।
विशुद्धसत्त्वविलसन्मायधिष्ठानरसिकः ।
ईश्वरस्त्वेष भगवानम्बिरार्धाङ्गरुचिरः।।

मायाविद्योपाधिभेदावप्रकल्प्यैवात्र केचिदविद्यया जीवमाहुः प्रतिबिम्बम् बिम्बमीशम् । एतत्सर्वं शास्त्रोदितं व्यक्तं तच्छिक्षाशालिनाम् । तस्मादस्मिन् मूलस्थिता गिरोऽस्माभिर्नोदाहृताः । तत्र विश्ववैश्वानरौ तैजसहिरण्यगर्भौ प्राज्ञेश्वरौ च स्थूलसूक्ष्मसूक्ष्मतरत्वोपाधिभिरेकीकृत्य तेषां पादत्रयत्वं शुद्धस्य तुरीयपादत्वं च सम्पाद्य पूर्वपूर्वपादप्रविलापनेन तुरीयप्रतिपत्तिसौकर्याय **'सोऽयमात्मा चतुष्पादि'**त्यादिना चतुष्पादमात्मानं निरूपयन्ती माण्डूक्यश्रुतिः **'जागरितस्थान'** इत्यादिना पादद्वयनिरूपणानन्तरं **'सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक्चेतोमुखः प्राज्ञस्तृतीयः पाद'** इति तृतीयपादनिरूपणावसरे **'एष सर्वेश्वर एष सर्वज्ञः एषोऽन्तर्यामी एष योनिस्सर्वस्य प्रभवाप्ययौ हि भूतानामि'**ति तस्य सर्वाधिपत्यं विदधाति । ननु, यद्यपि प्राज्ञस्य स्वतस्सर्वेश्वरत्वाद्यसम्भवात् तस्य तत्प्रतिपादनं मायोपहितेन ब्रह्मणा तस्यैक्यविवक्षां गमयति, तथापि तस्य

देवतान्तररूपत्वस्यापि सम्भवात् नैषा श्रुतिरीश्वरपरेति नियन्तुं शक्यत इति मन्दशङ्कानिराकरणायाह-- समानार्थेति उत्तरतापनीये माण्डूक्यप्रक्रिययैव **'सोऽयमात्मा चतुष्पादि'**त्यादिना चतुष्पादमात्मानं निरूपयन्त्या **'प्राज्ञ ईश्वरस्तृतीयः पाद एष सर्वेश्वर'** इत्यादिना तृतीयपादनिरूपणे प्राज्ञस्यैवेश्वरैक्यमुक्त्वैव सर्वेश्वरत्वाद्याम्नानात् तदेकार्थाया माण्डूक्यश्रुतेरपि तथैव भाव उन्नीयत इत्यर्थः । **'ईशानस्सर्वविद्यानामि'**त्यादीशानो मन्त्रः । 'रुद्रोपनिषत् शतरुद्रीयम्, 'एकशतं यजुश्शाखाः, तासु सर्वासु रुद्रोपनिषदाम्नायतठ इति चरणव्यूहे प्रयोगात् तदाम्नाता **'नमो हिरण्यबाहव'** इत्यारभ्य एकविंशतिमन्त्राः। ते हि शिवस्य दिगाद्यैकैकाधिपत्योपन्यासमुखेन सर्वाधिपत्यं स्फुटयन्ति। अन्ये मन्त्राः आयुष्यसूक्तशिवसङ्कल्पादिपठिताः ।।३३।।

किं च -

अनन्यप्राप्यं ते कमपि महिमानं प्रकटय-
न्त्यसङ्खेया मन्त्रा निरवधिनमस्कारघटिताः ।
स्वयं शूद्रादीनामपि शिव पतन्तश्चरणयोः
नमस्कारे भारं न विदधति मूर्खा न तु बुधाः ।।३४।।

चतुष्टयेऽपि वेदानां चन्द्रशेखरगोचराः ।
मन्त्राः प्रायेण दृश्यन्ते तन्नमस्कारशेखराः ।।
द्विरुक्तैस्सकृदाम्नातैराद्यन्तपठितैरपि ।
अलंकृता नमस्कारैरसङ्ख्यास्त इति स्फुटम् ।
अन्येषां विबुधानां तु मन्त्राश्श्रुतिषु विश्रुताः ।
क्वचित क्वचित् नमस्कारयोगेऽपि न तथाविधाः ।

तथा च स्वविषयोत्कर्षलिङ्गनमस्कारबाहुल्येनानितरदेवतासाधरणेन त्वरितरुद्राथर्वशिरोरुद्राध्यायदेवव्रतादयशिशवस्यानन्यसामान्यं महिमानं ख्यापयन्तीति स्पष्टमेतत् । यत्त्वत्र परैः प्रलपितं-- नमस्कारो न स्वविषयोत्कर्षे लिङ्गम् । कुतश्चित् स्वहिंसासक्तात् भयादपि तन्नमस्कारस्यापि लोके दर्शनात् । वेदेऽपि **'नमस्ते अस्तु मा मा हिंसी'**रिति भयप्रयुक्तनमस्कारोपलम्भाच्च। इह तु तद्भूयस्त्वं भयभूयस्त्वादुपपन्नमिति, तन्निरासमभिप्रेत्याह-- **स्वयमिति** । अयं भावः--

यदीह भयभूयस्त्वाद्भूयस्त्वं नमसामिदम् ।
तदेवानन्यसामान्यं ब्रह्मतां गमयेद्विभोः ।।
महत् भयं वज्रमिति कठवल्लीषु दर्शनात् ।।
कम्पनादिति सूत्रे च तस्य तल्लिङ्गतेरणात्।।
भयादपि नमस्कारो नैवोत्कर्षं विना श्रुतौ ।
शूद्रवन्दनवल्लोके को वा नास्ति व्यतिक्रमः ।।

न हि 'नमस्ते अस्तु मामा हिंसीरि'ति नमस्कारस्य भयप्रयुक्तत्वेऽपि ततस्तद्विषयस्योत्कर्षासिद्धिः । **'नमस्ते हरसे शोचिष'** इति मन्त्रश्रुतनमस्कारस्य तत्तुल्यरूपस्यैव **'नमस्ते हरसे शोचिष इत्याह।' 'नमस्कृत्य हि वसीयांसमुपचरन्ती'**ति तन्मन्त्रब्राह्मणेन औत्सर्गिकस्वविषयोत्कर्षप्रयुक्तत्वात्यागोक्तेः । किं च **'सर्वो वै रुद्र,'** इत्यादिमन्त्रेषु भयलिङ्गरहितेषु केवलं शिवस्य सार्वात्म्यादिप्रतिपादनायैव प्रवृत्तेषु निबध्यमाना नमस्कारा विषयगौरवैकप्रयुक्ता इति न तत्र काचिदन्यथासिद्धिः वक्तुं शक्यते उक्तं च लैङ्गे-

'सर्वं रुद्रेति वै प्राहुर्मुनयस्तत्त्वदर्शिनः ।
नमस्करेण सहिता गौरवात् परमेष्ठिन' इति ।

तस्मादनन्यसामान्यानेकनमस्कारमालालंकृतास्त्वरितरुद्रादयो निरङ्कुशं शिवस्य निरतिशयं महिमानमावेदन्यतीति वज्रलेपायते । अतो लोकवेदविद्विष्टदुर्मतप्रविष्टवृषलादिचरणनिपतनापतन्निजनैच्यनिह्नवायैव परं परेषां नमस्कारो नोत्कर्षप्रयुक्त इति प्रलापः । नासौ विदुषां हृदयसङ्गम इति ।।३४।।

किं च -

नमस्यानामेकं विषयमखिलानां च वचसां
महाविष्ण्वादीनामपि जनयितारं दिविषदाम् ।
वदन्तस्त्वामन्ये वरद तव शंसन्ति विभवं
गुरूकुर्वन्तस्ते गिरिश गणनाथानपि भृशम् ।।३५।।

'यस्मै नमस्तस्मै त्वा जुष्टन्नियुनज्मी'तिमन्त्रस्तावच्छिवस्य सर्वनमस्कारविषयत्वं दर्शयति । स्वस्वोद्देश्यकनमस्कारविषयत्वस्य सर्वसाधारणत्वेन तेनासाधारणशिवस्वरूपसमर्पणायोगेन तस्य सर्वनमस्कारविषयत्वपरत्वावश्यम्भावात्।

न च नमस्कारभूमविषयत्वे तस्य तात्पर्यमस्तु, तस्य रुद्राध्यायादिमन्त्राणां नमस्कारभूम्नां शिवासाधारणत्वेन तत्स्वरूपसमर्पणक्षमत्वात् सर्वनमस्कारविषयत्वस्य शिवे प्रमाणान्तरादनवगमेन तेन रूपेण तदनुवादायोगाच्चेति वाच्यम् - देवतान्तरनमस्कारेभ्यो बाहुल्यरूपस्य शिवनमस्काराणां भूम्नोऽत्र प्रतिपादकस्य शब्दस्याभावात् नमश्शब्दस्यैव तत्तात्पर्यकल्पने लक्षणापत्तेः । सर्वनमोविषयत्वस्य नमश्शब्देन जात्याख्याबलात् 'यस्मा एव नम' इति सर्वं वाक्यं सावधारणमि'ति सामान्यव्युत्पत्तिसिद्धोचितस्थलान्वयावधारणबलाद्वा सिद्ध्युपपत्तेः तस्य शिवे श्रुत्यन्तरादनवगमेऽपि **'यो ब्रह्माणमि'**ति मन्त्रे परमेश्वरस्याध्यापयितृत्ववदनुवाद-सामर्थ्यादेव सिद्धिसम्भवात् दहरविद्यान्वयिपरमेस्वरगुणप्रतिपादनपरे **'ऋतं सत्यमि'**ति मन्त्रे **'विश्वरूपाय वै नम'** इति भागस्यापि सर्वनमस्कारशेषित्वलक्षण-तदन्वयितद्गुणविशेषपरत्वौचित्येन पुरोवादस्यापि सम्भवाच्च । एवं **'यस्मै नमस्तच्छिर'** इत्यादिकमपि अत्रोदाहार्यम् । तथा **'इमा रुद्राय स्थिरधन्वने गिर'**इतिमन्त्रः कृत्स्नस्यापि शब्दराशेः प्रतिपाद्यं शिवं दर्शयति । तदनन्तरपठितरुद्रसूक्तान्तर्गतमन्त्रगिरां शिवपरत्वस्य स्पष्टत्वेनानुपदेश्यतया इमा इतीदंशब्दस्य प्रत्यक्षादिसन्निधापितसकलशब्दपरत्वात् । यद्यपि **'नमो ब्रह्मणे नमो ब्राह्मणेभ्य'** इत्यादयोऽन्यविषया अपि नमस्काराः, सर्वशब्दप्रतिपाद्यत्वव्यपदेशाश्च उपलभ्यन्ते, तथापि **'तद्य इमे वीणायां गायन्त्येतं ते गायन्ती'**ति सवितृमण्डलमध्यवर्तिनः पुरुषस्य लौकिकेष्वपि गानेषु गीयमानत्वव्यपदेशवत् सर्वनमस्कारविषयत्वसर्वशब्दजालप्रतिपाद्यत्वव्यपदेशः परमेश्वरस्य सार्वात्म्याभिप्राय इति **'यस्मै नम'** इत्यादयस्सर्वात्मत्वाविष्करणेन तस्य परब्रह्मभावं प्रतिपादयन्तीति भावो द्रष्टव्यः ।

'कानिचिद्वेदवाक्यानि ब्राह्मणा वेदवित्तमाः ।
रुद्रमूर्तिं समाश्रित्य शिवे परमकारणे ।।
पर्यवस्यन्ति विप्रेन्द्रास्तथा वाक्यानि कानचित् ।
विष्णुमूर्तिं समाश्रित्य ब्रह्ममूर्तिं च कानिचित् ।।
आग्नेयीं मूर्तिमाश्रित्य श्रुतिवाक्यानि कानिचित् ।
सूर्यमूर्तिं मुनिश्रेष्ठास्तथैवान्यानि कानिचित् ।
एवं मूर्त्यभिधानेन द्वारेणैव मुनीश्वराः ।
प्रतिपाद्यो महादेवः स्थितस्सर्वासु मूर्तिषु ।' इत्यादिस्कान्दोक्तिदर्शनात् । **'स्तोमं**

वो अद्य रुद्राय शित्वसे क्षयद्वीराय नमसादिदिष्टने'ति मन्त्रबलेनान्यविषयत्वेन प्रतीयमानानामपि स्तुतिनमस्काराणामन्तर्यामिणि शिवे पर्यवसान कल्पनात् **'श्वभ्यः श्श्वपतिभ्यश्च वो नम'** इत्यादीनां तत्पर्यवसानकल्पनावश्यम्भावाच्च **'यस्मै नम'** इत्यादिकं सर्वान्तर्यामित्वाभिप्रायकमिति केचिद्राचार्याः । तथा **'सोमः पवत'** इति मन्त्रो महाविष्ण्वादीनामपि देवानां जनकमीश्वरं प्रतिपादयति । **'जनितोत विष्णोरि'** त्युतपदेन **'जनिताग्नेरि'**त्याद्युक्तार्थेभ्य उत्कर्षद्योतनेन विष्णुपदस्य जगत्पालके महाविष्णौ तात्पर्यात् तदवतारजनकत्वस्य दशरथादावपि सत्त्वेनाग्न्यादिजनकत्वात्तस्य उत्कर्षाभावात्

'एकः पुरस्ताद्य इदं बभूव यतो बभूव भुवनस्य गोपाः ।
यमप्येति भुवनं सांपराय'

इति आयुष्यसूक्तमन्त्रे शिवस्य जगत्कारणत्वतत्पालकत्वतत्संहर्तृत्वप्रतिपादनपरे **'यतो बभूव भुवनस्य गोपा'** इत्यस्य जगत्पालनस्वातन्त्र्यस्फोरणाय सत्त्वोपाधिकमहाविष्णु-मूर्तिजनकत्वपरत्वावश्यम्भावाच्च,

'त्वं मतीनां दिवः पृथ्व्या वह्नेस्सूर्यस्य वज्रिणः ।
साक्षादपि महाविष्णोस्सोमो जनयितेश्वरः ।।' इति रुद्रसंहितायामुपबृंहणाच्च । नन्वयं मन्त्रः पवमानविषयः, सत्यं, तथापि तत्राग्न्यादिकारणत्वस्य वस्तुतः प्रतिपाद्यत्वेनान्वयायोगात् उपबृंहणाच्च तदेकशब्दे उमासहित एवान्वयः । एतच्च पुरुषसूक्तार्थविचारे निरूपितप्रायम् । न चैवंसति मन्त्रस्थसोमपदस्य सखण्डत्वापत्त्या पदाध्ययनसंप्रदायविरोधः । विनियोगार्थलतापरत्वस्यापि सत्त्वेन तद्विषयतया पदाध्ययनोपपत्तेः,

'उमया सहितश्शम्भुस्सोम इत्युच्येत बुधैः ।
स एव जनकस्साक्षात्तद्विष्णोरपि च श्रुतिः ।।'

इत्यादित्यपुराणवचनदर्शितेन योगेन शिवपरत्वस्याप्यावश्यकत्वाच्च । तथा देवव्रत-रुद्राध्यायादयश्शिवस्य पार्षदानपि नितरां स्तुतिनमस्कारादिभिः बहूकुर्वन्तस्तस्या-परिमितं महिमानं ख्यापयन्ति । एषां पदं

'द्वितीयं जप्त्वा गाणापत्यमवाप्नोति तृतीयं जप्त्वा देवमेवानुप्रविशति।'

'गीतिज्ञो यदि योगेन न गच्छेत्परमं पदम् ।
रुद्रस्यानुचरो भूत्वा तेनैव सह मोदते ।।'

इत्यादिश्रुतिस्मृतिभिरपवर्गस्य नेदिष्ठत्वेनावगमितम् । **'एक एव रुद्रो न द्वितीयाय तस्य'** इत्यादयोऽपि मन्त्राशिशववैभवपरा उदाहर्तव्याः । यत्तु कर्मविशेषे एक एव रुद्रो देवता, न त्वनेक इति तद्व्याख्यानं, तदयुक्तम् । श्वेताश्वतरोपनिषदि विनापि कर्मप्रसङ्गम् **'एक एव रुद्रो न द्वितीयाय तस्थुः, य इमान् लोकानीशत ईशिनीभि'** रिति श्रवणात् । तस्मादेक एव रुद्र इति **'एकमेवाद्वितीय'** मित्यनेन समानार्थकम् ।।३५।।

इति शिवतत्त्वविवेके श्रुत्यर्थविचारः ।।

इति पूर्वभागस्समाप्तः

ॐ

अथ उत्तरभागः

उपबृंहणार्थविचारः

एवं वेदान्तभागे च कर्मकाण्डे च कानिचित् ।
उदाहृतानि वाक्यानि वैभवे पार्वतीपतेः ।।
अथ तत्र पुराणानि शिवशास्त्रोत्तमानि च ।
भारतादीनि चान्यानि प्रमाणमिति कथ्यते-

असङ्ख्याभिश्शाखावितितिभिरुपन्यस्तमखिलं
सुसूक्ष्माभिर्न्यायावलिभिरवसेयं च भवतः ।
प्रभावं निष्कृष्य स्फुटमिह पुराणानि बहुधा
कपर्दिन्नात्रालं करबदरकल्पं विदधते ।।३६।।

श्रीशिवपुराणे तावत्--
'मुनीनां षट्कुलीनानां ब्रुवतामितरेतरम् ।
इदं परमिदं नेति विवादस्सुमहानभूत् ।
परस्य दुर्निरूपत्वात् जातस्तत्र न निश्चयः ।।'
इत्युपक्रम्य तेषामृषीणामन्योन्यं विवदमानानां ब्रह्मसभोपसर्पणमुक्त्वा
'भगवन्नन्धकारेण महता वयमावृताः ।
खिन्ना विवदमानाश्च न पश्यामोऽत्र यत्परम् ।'
इत्यादिना तेषां सामान्येन सकलकारणभूतस्य परदैवतस्य प्रश्नमुत्थाप्य
'एवं पृष्टस्तदा ब्रह्मे' त्यारभ्य
'उत्थाय सुचिरं ध्यात्वा रुद्र इच्युच्चरन् गिरम् ।
आनन्दक्लिन्नसर्वाङ्गः कृताञ्जलिरभाषत ।।
यस्मात् सर्वमिदं ब्रह्मविष्णुरुद्रेन्द्रपूर्वकम् ।
सह भूतेन्द्रियैस्सर्वैः प्रथमे सम्प्रसूयते।।'

इत्यादिना ब्रह्मवाक्येनानितरसाधारणावाङ्मनसगोचरानेकशाखाविप्रकीर्णबहुविधवैभव-

निष्कर्षपरेण प्रपञ्चेन शिव एव परदेवतेति व्यवस्थापितम् ।

एतं प्रदेशमखिलश्रुतिराशिसीमसारार्थसङ्ग्रहपरं द्रुहिणोपदेशम् ।
अध्यापितास्सुकृतिनो न गलत्यमीषां जन्मान्तरेऽपि परदैवतधीर्महेशे ।।

तथा पाद्मे--

'श्रुतानि सर्वशास्त्राणि पुराणान्यखिलान्यपि ।
धर्मशास्त्राणि सर्वज्ञ त्वत्तस्सूत महामते।।
अस्माकं संशयः कश्चित् सुमहान् हृदि वर्तते ।
येनान्धा इव सञ्जाताश्छेत्तुं तं च त्वमर्हसि ।।
को देवः परमो ज्ञेयः कथं चाराध्यते हि सः ।
आराधिते फलं किं स्यादेतत्सर्वं ब्रवीहि नः ।।'

इति श्रुतचरानेकपुराणादिप्रदेशेषु नानादेवतोत्कर्षप्रतिपादनानां किं तत्त्वविवक्षया प्रवृत्तं, किं च श्रोतृबुध्द्यनुसारादिति स्वयं निर्धारयितुमशक्नुवतामृषीणां प्रश्नमुपन्यस्य

'अत्र वः कथयिष्यामि इतिहासं पुरातनम् ।
विष्णोस्सनत्कुमारस्य संवादं पापनाशनम् ।।
इममेव पुरा प्रश्नं पृष्टवान् विष्णुमव्ययम् ।
सनत्कुमारो भगवान् परापरविभागकृत् ।
मुनेस्तस्य वचः श्रुत्वा विष्णुस्सर्वविदांवरः ।।
यदुवाच्च महाभागास्तच्छृणुध्वमतन्द्रिताः ।'

इतिं सूतस्य प्रतिवचनं चोपक्षिप्य

'एक एव शिवो ज्यायान् द्विधा च बहुधा श्रुतः ।
वेदेषु च पुराणेषु साङ्गोपाङ्गेषु गीयते ।।'

इत्यादिना विष्णुवचनेन शिवस्य सर्वोत्कर्षप्रतिपादनेन

'साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
ज्ञानान्येतानि पञ्चैव ज्ञेयश्चैको महेश्वरः ।।'

इत्यादिना सर्वशास्त्राणां शिवे पर्यवसानप्रकारस्य शास्त्राणां प्रस्थानभेदवृत्तिप्रयोजनस्य च उपपादनेन

'सर्वाकारो निराकारो महात्मा पार्वतीपतिः।
तस्मात्परतरं नास्ति ज्ञानज्ञेयात्सदाशिवः ।'

इत्यादिना तस्मात् परभावव्यवस्थापनेन

'एवं विलपतोऽत्युच्चैर्ये श्रृण्वन्ति न मे वचः ।
सन्धुक्ष्यन्ते मुनिश्रेष्ट तदर्थं नरकाग्नयः।'
इति कृतोपदेशेऽनादरे प्रत्यवायवर्णनेन च दृढीकृतोऽयमर्थः । ब्रह्माण्डपुराणे च -
'पुरा पितामहं देवं मेरुश्रृङ्गे महर्षयः ।
प्रोचुः प्रणम्य देवेशं किमेकं तत्त्वमव्ययम् ।'
इति तावत्प्रश्नेनोपक्रम्य
'स मायया महेशस्य मोहितो लोकसम्भवः ।
अविज्ञाय परं भावं स्वात्मानं प्राह चर्षिणाम् ।'
इत्यादिना ब्रह्मणः स्वस्य परभावोपदेशं तमाकर्ण्यासहमानस्य यज्ञात्मनो नारायणस्य स्वस्य परभावप्रतिपादनं चावतार्य
'एवं विवदतोर्मोहात्परस्परजयैषिणोः ।
आजग्मुस्तत्र तौ देवौ वेदाश्चत्वार एव च ।।
अन्वीक्ष्य देवं ब्रह्माणं यज्ञात्मानं च संस्थितम् ।
प्रोचुस्संविग्नहृदया याथार्थ्यं परमेष्ठिनः ।
ऋग्वेदः -
'यस्यान्तस्स्थानि भूतानि यस्मात्सर्वं प्रवर्तते ।
यदाहुस्तत्परं तत्त्वं स देवः स्यान्महेश्वरः ।।'
यजुर्वेदः -
'यो यज्ञैरखिलैरीशो योगेन च समर्च्यते ।
यमाहुरीश्वरं देवं स देवस्स्यात्पिनाकधृत्।।'
श्रीसामवेदः -
'येनेदं भ्राम्यते चक्रं यदाकाशान्तरं महत् ।
योगिभिर्वेद्यते तत्त्वं महादेवस्स शङ्करः ।।'
अथर्ववेदः -
'यं प्रपश्यन्ति देवेशं यतन्तो यतयः परम् ।
महेशं पुरुषं रुद्रं स देवो भगवान् भवः ।
एवं स भगवान् ब्रह्मा वेदानामीरितं शुभम् ।
श्रुत्वा विहस्य विश्वात्मा यज्ञश्चापि विमोहितः ।
कथं तत् परमं ब्रह्म सर्वसङ्गविवर्जितम् ।

रमते भार्यया सार्धं प्रमथैश्चातिगर्वितैः ।
इतीरितोऽथ भगवान् प्रणवात्मा सनातनः ।
अमूर्तो मूर्तिमान् भूत्वा वचः प्राह पितामहम् ।'
प्रणवः--
'न ह्येष भगवान् पत्न्या स्वात्मनोऽव्यतिरिक्तया ।
कदाचिद्रमते रुद्रस्तादृशोऽपि महेश्वरः ।
अयं स भगवानीशस्स्वयंज्योदिस्सनातनः ।
स्वानन्दभूता कथिता देवी नागन्तुकी शिवा ।'

इति वेदानां सप्रणवानामुपदेशेन तमप्यविगणय्य स्थितस्य ब्रह्मणः तत्कालाविर्भूतसंहाररुद्रकृत्तिपञ्चमशिरोलवनानन्तरमधिसवितृबिम्बमाविर्भूतस्य साक्षात्परमशिवस्योपदेशेन च तस्य परभावः स्पष्टीकृतः । कौर्मे च कार्त्स्न्येनोक्ततदर्थोपवर्णनेन बहुधा शिवोत्कर्षव्यवस्थापनानन्तरं व्यासगीतान्ते

'इत्येष मानवो धर्मो युष्माकं कथितो मया ।
महेशाराधनार्थाय ज्ञानयोगश्च शाश्वतः ।
अनेन विधिना युक्तो ज्ञानयोगं समाचरेत् ।
स पश्यति महादेवं नान्यः कल्पशतैरपि ।
स्थापयेद्यः परं धर्मं ज्ञानं तत्पारमेश्वरम् ।
न तस्मादधिको लोके स योगी परमो मतः।
यस्संस्थापयितुं शक्तो न कुर्यान्मोहितो जनः ।
स योगयुक्तोऽपि पुनर्नात्यर्थं भगवत्प्रियः ।।'

इति शिवोत्कर्षस्य व्यवस्थापनीयत्वविधानेन च स्पष्टीकृतोऽयमर्थः । आदित्यपुराणे च वर्णाश्रमधर्मविवेचने-

'विश्वेश्वरमुमाकान्तं विश्वान्तर्यामिणं शिवम् ।।
न ब्रह्माद्यैस्समं ब्रूयाच्छक्तिभिश्चापि पार्वतीम् ।
ब्रूयाद्यदि समं शम्भुं ब्रह्मविष्णवादिभिस्सुरैः ।
यः कश्चित्तमसाविष्टः कदाचिन्नैव तं स्पृशेत् ।
सर्वस्मादधिकं ब्रूयात् भगवन्तमुमापतिम् ।'

इत्यादिना शिवस्येतरसाम्योक्तिनिषेधेन तदाधिक्यप्रतिपादनविधानेन चावेदितस्तदुत्कर्षः ।। स्कान्दे च

'ये मां ब्रह्मादिभिस्तुल्यं ये त्वां लक्ष्म्यादिशक्तिभिः ।
गुरुं ये प्राकृतैस्तुल्यं संस्मरन्त्यल्पबुद्धयः ।
तेषां पापानि नश्यन्ति शिवरात्रिप्रजागरात् ।।'

इतीतरदेवतासाम्यस्मरणे प्रायश्चितोपदेशेन तदुत्कर्षः विभावितः । एवं सर्वेष्वपि पुराणेषु मायोपहितस्य परब्रह्मणस्तुरीयस्य परमशिवस्योत्कर्षः प्रतिपादितः विद्वद्भिरालोचनीयः । तस्य क्वचिदपि निकर्षोक्तिशङ्काभावात् क्वचित् क्वचित् द्रुहिणान्नरायणाद्वा निकर्षविभावनस्य संहाररुद्रतदवतारविशेषनीललोहितादिविभूति-विषयत्वात् ।

वाराहभागवतवैष्णवगारुडादिष्वंशेभ्य एव खलु केवलमन्तकारेः ।
विष्णोर्विधातुरपि सन्त्यधिकत्ववादास्साक्षान्न तु क्वचन साम्बशिवात्तुरीयात् ।।

अनुपदं चैतत्प्रपञ्चयिष्यामः ।।३६।।

इति पुराणानां शिवपरत्वनिरूपणम् ।

प्रभावं ते भीम प्रकटतरमावेदयति नः
प्रभूणामाद्यानां प्रथम भगवन् भारतमपि ।
मुकुन्दं यत्र त्वच्चरणनलिनाराधनपरं
भवन्तं च ब्रह्माच्युतहरपरं नाथ श्रृणुमः ।।३७।।

महाभारते बहुषु स्थलेषु शिवाराधनपरत्वं नारायणस्य प्रतिपादितम् । उदाहृतं च नवमश्लोकविवरणे । तच्च सर्वं तेन परब्रह्ममूर्त्यन्तररूपेण शिवस्य स्वाराध्यत्वेन स्वस्यापि मूलभूतत्वख्यापनाय सर्वाराध्यंत्वख्यापनाय वा लोकानुग्रहार्थमादिमूर्त्या देवमानुषावतारविशेषैश्च नित्यत्वबुध्या तत्तत्फलोद्देशेन च शिवाराधनमनुष्ठीयत इत्येतत्परं सत् शिवस्य विश्वाधिकत्वविश्वाराध्यत्वप्रतिपादने पर्यवस्यतीति वक्तव्यम् । महर्षेर्बहुशस्तन्निबन्धप्रयासस्य प्रयोजनान्तरादर्शनात् । लैङ्गेऽपि

'सर्वे विष्णुमया देवास्सर्वे विष्णुमया गणाः ।
न हि विष्णुसमा काचित् गतिरन्या विधीयते ।

इत्येवं सततं वेदा गायन्ते नात्र संशयः ।
स एव भगवान् देवस्तव लिङ्गार्चने रतः ।
तव प्रणामैकरतः कथं देवो ह्यभूत् प्रभो ।'
इति पृष्टवन्तं पितामहं प्रति
'भवान्नारायणश्चैव शक्रस्साक्षात् सुरेश्वरः ।
मुनयश्च सदा लिङ्गं संपूज्य विधिपूर्वकम् ।
स्वं स्वं पदमनुप्राप्तास्तस्मात् सम्पूजयन्ति ते ।'
इति शिववचनात्
'ब्रह्मणा विष्णुना वापि रुद्रेणान्येन केन वा ।
लिङ्गाराधनमुत्सृज्य क्रियते स्वपदस्थितिः ।'
इत्यादिशिवपुराणादिवचनाच्च नारायणस्य परब्रह्ममूर्त्यन्तरतया कर्मासम्पादनीय-निरतिशयैश्वर्यवत्त्वेन तदीयशिवाराधनस्य स्वपदस्थित्यर्थत्वायोगात्, अर्थवादमात्रत्वात्, अवतारैस्त्वदाराधनेन तव ख्यातिं सम्पादयिष्यामीति विष्णुना रुद्राय वरो दत्त इति वाराहे प्रतिपादनात् स्वदत्तवरपरिपालनाय तस्य कृष्णाद्यवताररूपैः परं तदाराधनमिति परेषां तदन्यथासिद्धिवचनस्य च -

'ततोऽन्वपश्यत् गिरिशस्य वामे स्वात्मानव्यक्तमनन्तरूपम् ।
स्तुवन्तमीशं बहुभिर्वचोभिश्शंखासिचक्रार्पितहस्तमाद्यम् ।'

इति कृष्णतपश्चर्यायां शिवप्रत्यक्षीकरणसमये विष्णोरादिमूर्त्यापि शिवाराधन-परत्वप्रदर्शनात् वाराहवचनस्यापि वस्तुसदुत्कर्षख्यापनार्थं विष्णोश्शिवाराधन-मित्येतत्परत्वोपपत्तेः तत्र वरदानकीर्तनस्यापि वक्ष्यमाणन्यायेन पाशुपत्यवरदान-कीर्तनवदन्यथासिद्धिसम्भवाच्च अयुक्तत्वात्, तामसजनव्यामोहनार्थं तस्य शिवाराधमिति मूर्खप्रलापस्य च सर्वप्रमाणविरुद्धस्य निराकरणानर्हत्वात्, कृष्णस्य नित्यं शिवलिङ्गार्चनं निरीक्ष्य
'कस्समाराध्यते देवो भवता कर्मभिश्शुभैः ।
ब्रूहि त्वं कर्मभिः पूज्यो योगिनां ध्येय एव चे'ति
कृतप्रश्नं मार्कण्डेयं प्रति
'भवता कथितं सर्वं तथ्यमेव न संशयः ।
तथापि देवमीशानं पूजयामि सनातनम् ।'

इत्यादिना

'न वै पश्यन्ति तं देवं मोहिता मम मायया ।
ततोऽहं स्वात्मनो मूलं ज्ञापयन् पूजयामि तम् ।।'

इत्यन्तेन कौर्मपठितकृष्णवचनेन तदीयशिवाराधनस्य स्वस्यापि मूलभूततया शिवस्य विश्वाधिकत्वज्ञापनार्थत्वस्य मोक्षधर्मे

'यद्यहं नार्चयेयं तमीश्वरं वरदं शिवम् ।
आत्मानं नार्चयेत् कश्चिदिति मे भावितं मनः ।
मया प्रमाणं हि कृतं लोकस्तदनुवर्तते ।।
न हि देयोऽस्ति कश्चिन्मे वरः पाण्डवनन्दन ।।
इति संचिन्त्य मनसा पुराहं विश्वमीश्वरम् ।
पुत्रार्थमाराधितवानहमात्मानमात्मना ।।' इति तद्वचनेन तस्य शिवस्य सर्वाराध्यत्वज्ञापनार्थत्वस्य च कण्ठतः प्रतिपादनाच्च,

'जन्मकर्मतपोयोगास्तयोस्तव च पुष्कलाः ।
आभ्यां लिङ्गेऽर्चितो देवस्त्वयार्चायां युगेयुगे ।।'

इति द्रोणपर्वण्यपि अश्वत्थामानं प्रति लिङ्गार्चनादेव कृष्णार्जुनयोरुत्कर्षं प्रतिपादयतो बादरायणस्य वचनेन,

'क्लिश्यमानेषु भूतेषु तैस्तैर्भावैः पृथक्पृथक् ।
दुर्गाण्यतितरेद्येन तन्मे ब्रूहि पितामह ।।'

इति इह परत्र च दुर्गातितरणोपायं पृष्टवन्तं युधिष्ठिरं प्रति वर्णाश्रमधर्मानतिक्रमेण

'य एनं संश्रयन्तीह भक्त्या नारायणं हरिम् ।
ते तरन्तीह दुर्गाणि न तेऽत्रास्ति विचारणा।।'

इत्यादिना नारायणपितामहशतक्रतुभजनानां दुर्गातितरणोपायत्वप्रतिपादनानन्तरं

'यं विष्णुरिन्द्रश्शुम्भुश्च ब्रह्मा लोकपितामहः ।
स्तुवन्ति विविधैस्स्तोत्रैर्देवदेवं महेश्वरम् ।
तमर्चयन्ति ये शश्वत् दुर्गाण्यतितरन्ति ते ।'

इति शान्तिपर्वणि भीष्मवचनेन च

'यस्य ब्रह्मा च विष्णुश्च त्वं च शक्र सहामरैः ।
अर्चय(ध्वं)ध्वे सदा लिङ्गं तस्मात् श्रेष्ठतरो हि सः ।'

इत्यानुशासनिके इन्द्रं प्रत्युपमन्युवचनेन च शिवस्य विष्ण्वाराध्यत्वेन

निरतिशयोत्कर्षस्य स्फुटीकरणाच्च । तस्मान्महाभारते बहुशश्शिवस्य गीताद्यनेकप्रदेशप्रतिपादितापरिमितमहिमर्वाविशिष्टनारायणाराध्यत्वनिवन्धनेन तस्यापि मूलत्वं तत एव्र सर्वाराध्यत्वं च विभावितमवसीयते । तथा

'स एष भगवानीशस्सर्वतत्त्वादिरव्ययः ।
सर्वतत्त्वविधानज्ञः प्रधानपुरुषेस्वरः ।
सोऽसृजद्दक्षिणादङ्गात् ब्रह्माणं लोकसम्भवं ।
वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरम् ।
युगान्ते चैव संप्राप्ते रुद्रं प्रभुरथासृजत्।।'

इत्याद्यानुशासनिकवचनप्रपञ्चेन

'ईश्वरश्चेतनः कर्ता पुरुषः कारणं शिवः ।
विष्णुर्ब्रह्मा शशी सूर्यश्शक्रो देवाश्च सान्वयाः ।
सृज्यते ग्रस्यते चैव तमोभूतमिदं यदा ।
अप्रज्ञातं जगत्सर्वं तदा ह्येको महेश्वरः ।'

इत्यादिशान्तिपर्वादिवचनैश्च ब्रह्मविष्ण्वादिसकलप्रपञ्चमूलभूतत्वं शिवस्य कण्ठतोऽपि प्रतिपादितं दृश्यते । अतो गीतादिषु कृष्णस्य सर्वकारणत्वादिवचनानामपि तन्मूर्तावसम्भवात् आर्थिकतया क्वचित् मूलमूर्तौ पर्यवसानसानापेक्षाणां प्रदेशान्तरप्रसिद्धसर्वादिमूलभूतशैवमूर्तावेव पर्यवसानमग्रे प्रपञ्चयिष्यमाणं सुखेन संघटत इति कृत्स्नमपि भारतमविरोधेन शिवोत्कर्ष एव विश्राम्यति । यत्तु तत्र क्वचित्क्वचित्तन्निकर्षवचनमिव प्रतीयते, तत् सर्वं विष्णुविरिञ्चाद्युद्भूततदवतार-भेदविषयमेव । तथाहियत्रयत्र भारते पुराणे वा क्वचित्क्वचिद्विष्णोर्विधातुर्वा रुद्रादुत्कर्षः प्रतीयते, प्रायस्तत्र सर्वत्रापि स रुद्रस्तमोगुणोपाधित्वसंहारकारित्व-हरिक्रोधप्रभवत्वविरिञ्चललाटसम्भवत्वाद्यन्यतमपरमशिवव्यावृत्तविशेषणोपादानेन तद्विभूतिविशेषरूपो ज्ञाप्यते । यत्र न तादृशविशेषणोपादानं, यथा महाभारते -

'ब्रह्मा सुरगुरुः स्थाणुः मुनश्च परमेष्ठजः ।'

इत्यादौ, **'ब्रह्मा स्थामुर्मनुर्दक्ष'** इत्यादौ च 'प्रजापतीनां परिगणने, यथा च सुन्दोपसुन्दोपाख्याने -

'तत्र विष्णुर्महादेवः तत्राग्निर्वायुना सह ।' इत्यारभ्य **'ऋषयस्सर्व एवैते पितामहमुपासते ।'** इत्यन्तेन विष्ण्वादिसकलदेवतानामृष्यादीनां च पितामहमुपासीनानां तत्सद्भावस्थितिवर्णनानन्तरम्

'इन्द्रस्स्थाणुश्च भगवान् धैर्यं त्यक्त्वा प्रतिष्ठिताावि'ति ।

एवं चतुर्मुखः स्थाणुर्महादेवोऽभवत्पुरे'ति तिलोत्तमादर्शनाय रुद्रस्य मुखचतुष्टयसृष्टिकीर्तने,

यथा वा मृत्युसम्भवोपाख्याने 'ततो हरो जटी स्थाणु'रिति प्रस्तुत्य तस्य ब्रह्माणं प्रति 'भवता हि नियुक्तोऽहं प्रजानां परिपालने ।' इत्यादिवचनोपन्यासे, एतादृशस्थलेष्वपि स्थाणुशब्दग्रहणस्य प्रायिकत्वात् तेनैव सर्वविभूतिविशेषरूपः ख्याप्यते ।

'स्वात्मजैरेव तै रुद्रैः निवृत्तात्मा व्यतिष्ठत ।
स्थाणुत्वं तेन तस्यासीद्देवदेवस्य शूलिनः ।।'

इति कौर्मे,

'ततः प्रभृति देवोऽसौ न प्रसूते शिवाः प्रजाः ।
ऊर्ध्वरेतास्थितः स्थाणुर्यावदाभूतसंप्लवम् ।।'

इति वायूक्तौ,

'ततः प्रभृति विश्वात्मा न प्रसूते शिवाः प्रजाः ।
स्थाणुवन्निश्चलो यस्मात् स्थितः स्थाणुरिति स्मृतः।

'इत्यादित्यपुराणे च ब्रह्माङ्गभुवं शिवस्यावताररूपमंशं शम्भुं प्रस्तुत्य स्थाणुशब्दस्य तन्नामत्वप्रतिपादनात्, महाभारतेऽपि भीष्मपर्वणि सभापर्वणि च

'यत्र भूतपतिस्सृष्ट्वा सर्वलोकान् सनातनः ।
उपास्यते तिग्मतेजाः वृतो भूतैस्सहस्रशः ।' इति मैनाके उपास्यस्य शिवस्य सन्निधानमुक्त्वा

'नरनारायणौ ब्रह्मा यमस्स्थाणुश्च पञ्चमः ।
उपासते यत्र परं सहस्रयुगपर्यये ।। '

इति तदुपासकपरिगणनपरे अनन्तरश्लोके शिवोपासकेषु परिगणनेन राजधर्मे

'भूयस्स भगवान् ध्यात्वा चिरं शूलवारायुधः ।
तस्यतस्य निकायस्य चकारैकैकमीश्वरम् ।।
देवानामीश्वरं चक्रे देवं दशशतेक्षणम् ।
यमं वैवस्वतं चापि पितॄणामकरोत्पतिम् ।।' इत्युपक्रम्य

'रुद्राणामपि चेशानं गोप्तारं विदधे प्रभुः ।
महात्मानं महादेवं विशालाक्षं सनातन'मिति

शिवनियम्येषु परिगणनेन च स्थाणुशब्दितस्य परमशिवमूर्तिव्यतिरिक्तावताररूप-मूर्त्यन्तरत्वस्फुटीकरणाच्च । राजधर्मवचने हि विशालाक्षशब्देन स्थाणुरेवोच्यते । तत्रैव प्रदेशान्तरे ब्रह्मप्रणीतां नीतिं प्रस्तुत्य

'ततस्तां भगवान्नीतिं पूर्वं जग्राह शङ्करः ।
बहुरूपो विशालाक्षः शिवस्स्थाणुरुमापतिः ।'

इति तस्य तत्र प्रयोगात्, अनन्तरं

'स देवस्सर्वभूतात्मा महादेवस्सनातनः ।
असङ्ख्यातस्सहस्राणां रुद्राणां स्थानमव्ययम् ।
युगानामायुषो ह्रासं विज्ञाय भगावान् शिवः ।
सञ्चिक्षेप ततश्शास्त्रं महार्थं ब्रह्मणा कृतम् ।
वैशालाक्षमिति प्रोक्तं तदिन्द्रः प्रत्यपद्यत ।।'

इति तत्कृतनीतिशास्त्रे वैशालाक्षसमाख्याकीर्तनाच्च । यत्र तादृशस्य अंशविशेष-नाम्नोऽप्यग्रहणं, तत्रापि विधातुर्विष्णोर्वा परमशिवादुत्कर्षस्यासम्भावात् परंरपि त्रिमूर्त्युत्तीर्णस्य तस्यानभ्युपगमे च रुद्रनिकर्षविभावनानां संहाररुद्रतदवतारादि-विषयत्वस्य अवश्यवक्तव्यत्वात्

'वैष्णवेषु पुराणेषु योऽपकर्षस्तु दृश्यते ।
रुद्रस्यासौ हरस्यास्य विभूतेरेव केवलम् ।।'

इत्यादिपराशरपुराणादिवचनदर्शनाच्च तथावसीयते । नच शिवस्य विष्णोर्विरिञ्चाद्वा उद्भवादिवचनादपि निकर्षसूचनं शङ्कनीयम् ।

'अहं च भवतो वक्त्रात् कल्पान्ते घोररूपधृत् ।
शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रकः ।
अनादिनिधनो देवश्चैतन्यादिसमन्वितः ।
ज्ञानानि च वशे यस्य तारकादीन्यशेषतः ।
अणिमादिगुणोपेतमैश्वर्यं न च कृत्रिमम् ।
सृष्ट्यर्थं ब्रह्मणः पुत्रो ललाटादुत्थितः प्रभुः ।' इत्यादिकौर्मराजधर्मादिवचनैस्तस्य लोकानुग्रहार्थमैच्छिकावतारत्वोक्तेः । तस्मात्सर्वथाप्यविरोधेन महाभारतं शिवोत्कर्ष एव विश्राम्यतीति भावः ।।३७।।

इति महाभारतस्य शिवपरत्वनिरूपणम् ।

प्रबन्धो वाल्मीकेरपि तव परत्वं द्रढयति
स्फुटं यत्र ब्रह्माच्युतहरपरत्वं तव विभो ।
यियक्षोर्भावोक्त्या भवति हयमेधे रघुपतेः
तदाराध्यत्वं ते दृढमपि च यत्र प्रकटितम् ।।३८।।

रामायणे युद्धकाण्डे तावदादित्यहृदये-
'ब्रह्मेशानच्युतेशाय सूर्यायादित्यवर्चसे ।
भास्वते सर्वभक्षाय रौद्राय वपुषे नमः ।।' इति ब्रह्माच्युतहरेश्वरत्वं शिवस्य प्रतिपादितम् । मण्डलाभिमानिन्याधिकारिके तदन्वयायोगात् 'रौद्राय 'वपुषे' इति विशेषणसामर्थ्याच्च तस्य तदन्तर्वर्तिनि शिवे पर्यवसानात् ।
'एष ब्रह्मा च विष्णुश्च शिवस्स्कन्दः प्रजापतिः ।'
इत्यादिना कृत्स्नस्यापि स्तोत्रस्य तत्परचावगमाच्च । अपि चोत्तररामायणे अश्वमेधारम्भात् प्राक्कर्तव्यक्रतुविशेषविचारसमये अश्वमेधेन विष्णुमाराध्य शतक्रतुः ब्रह्महत्यामतरदिति अश्वमेधे लक्ष्मणेन श्लाघिते तस्य श्लाघ्यतामङ्गीकृत्य स्वयमिलोपाख्यानकथनेन तस्य शिवप्रीतिकरत्वं प्रतिपादयतो रामचन्द्रस्य
'नान्यं पश्यामि भैषज्यमन्तरेण वृषध्वजम् ।
नाश्वमेधात् परो यज्ञः प्रियश्चैव महात्मनः ।।'
इति तदुपाख्यानान्तर्गततदीयवचसा तेन शिव एवाराधनीय इति भावसूचनेन रहसि संमन्त्रणानन्तरं वसिष्ठादीनाहूय चिकीर्षिते ख्यापिते
'ते तु रामस्य तच्छ्रुत्वा नमस्कृत्वा वृषध्वजम् ।
अश्वमेधाद्द्विजास्सर्वे पूजयन्ति स्म नित्यशः' । इति शिवसम्बन्धेनैवाश्वमेधस्य श्लाघोपन्यासेनाश्वमेधेन रामचन्द्रश्शिवमारराधेति सूचितम् ।
'रामोऽपि पालयामास राज्यं परमधार्मिकः ।।'
इत्यारभ्य पठितेन
'विशेषात् ब्राह्मणान् सर्वान् पूजयामास चेश्वरम् ।
यज्ञेन यज्ञहन्तारमश्वमेधेन शङ्करम् ।' इति 'कौर्मवचनेन,
अभिषिक्तस्ततो राज्ये रामो राजीवलोचनः ।
पालयन् पृथिवीं सर्वां धर्मेण मुनिपुङ्गवाः ।
अयजद्देवदेवेशमश्वमेधेन शङ्करम् ।' इति आदित्यपुराणवचनेन च कण्ठोक्तं

शिवस्य तदाराध्यत्वं विभावितम् । तथारण्यकाण्डे

'कृताभिषेकस्स रराज रामस्सीताद्वितीयस्सह लक्ष्मणेन ।
कृताभिषेकस्त्वगराजपुत्र्या रुद्रस्सविष्णुर्भगवानिवेशः ।'

इत्युपमानिबन्धनव्याजेनाप्यादिकविना शिवोत्कर्षस्स्फुटीकृतः । वासिष्ठरामायणे च

'न देवः पुण्डरीकाक्षो न च देवस्त्रिलोचनः ।'

इत्यादिना सदाशिवस्यैव पूजनीयत्वोपदेशेन तस्य सर्वोत्तरत्वं प्रकटीकृतम् । कथं च ज्ञायते तत्र स एव पूजनीयत्वेन उपदिष्ट इति, **'पूजयेच्चेतनं शिव'**मिति, **'इमं ध्यायेत् परं शिवं, सर्वत्र परमं शिवमि'**ति व्यवहारात् मनोन्मनशक्तिस्थपञ्चाक्षर-कल्पादिप्रसिद्धशैवपीठस्थित्युपन्यासात् **'उन्मनान्तपदातिग'**मिति उन्मनान्तसकल-लोकातीतलोकावस्थानप्रतिपादनाच्च। यत्तु बालकाण्डे शिवनारायणयोस्समरसन्नाहे **'अधिकं मेनिरे विष्णुमि'**ति देवानां नारायणस्य बलाधिक्यप्रतिपादकं वचनं, तत् भारतादिषु शिवेन तस्मै स्वाधिकं शौर्यं दत्तमिति प्रतिपादनात् स्वदत्तवरपरिपालनार्थं शिवस्य न्यूनबलत्वाभिनयेनान्यथासिद्धं न विष्णोरुत्कर्षं गमयितुमीष्ट इति न विरोधः।।३८।।

।। इति रामायणस्य शिवपरत्वनिरूपणम् ।।

प्रसिद्धाःस्मर्तारश्शुभद मनुयोगीश्वरमुखाः
पतञ्जल्याद्याश्च प्रथितमतयो दर्शनकृतः ।
प्रभिन्दाना मार्गानपि च विविधानन्यविषये
भवन्तं विश्वस्मादधिकमुपगच्छन्ति भगवन् ।।३९।।

मनुस्तावद्धमेशास्त्रोपसंहारे -
'प्रशासितारं सर्वेषामणीयांसमणोरपि ।
रुक्माभं स्वप्नधीगम्यं विद्यात्तु पुरुषं परम् ।।' इति
सर्वान्तर्यामित्वादिगुणकं परमात्मानमुपदिश्य
'एनमेके वदन्त्यग्निं मरुतोऽन्ये प्रजापतिम् ।
इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ।।'

इति तत्र वैदिकव्यवहारबाहुविध्यं प्रदर्श्य

'एष सर्वाणि भूतानि पञ्चभिर्व्याप्य मूर्तिभिः ।
जन्मवृद्धिक्षयैर्नित्यं संसारयति चक्रवत् ।'

इति मूर्तिपञ्चकेन सर्वभूतव्याप्तिलिङ्गप्रदर्शनेन शिव एव ब्रह्मेति स्वमतं स्पष्टीचकार। प्रतिपादिता हि तैत्तिरीयोपनिषदा सवितृमण्डलमध्यस्थं शिवं प्रस्तुत्य तस्य मूर्तिपञ्चकेन सर्वभूतव्याप्तिः **'स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतमि'**त्यादिना। यद्यपि पञ्चात्मेत्यविशेषेण श्रुतं, तथापि तत्र प्राक्सद्योजातादिमूर्तिपञ्चकस्य प्रतिपादनात् तदेवेह व्याप्त्युपदेशायोपन्यस्तमिति गम्यते । अत एव लैङ्गपुराणादिषु-

'मूर्तयः पञ्च विख्याताः पञ्चब्रह्माह्वयाः पराः ।
सर्वलोकशरण्यस्य शिवस्य परमात्मनः ।'

इति तस्य सद्योजातादिमूर्तिपञ्चकं विधाय **'पञ्चब्रह्मात्मकं सर्व जगत्स्थावरजङ्गममि'**ति सामान्यत ईशानादिक्रमेण तेषां क्षेत्रज्ञप्रधानमहदहंकार-मनश्श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थवियदादिपञ्चभूततन्मात्रातत्कार्यभूत-पञ्चकाद्यधिष्ठातृत्वप्रतिपादनेन विशेषतश्च तस्य सर्वभूतव्याप्तिः प्रतिपादिता । यत्त्वत्र परेषां मतं - मनुना धर्मशास्त्रोपक्रमे **'ततः स्वयंभूः भगवानि'**त्युपक्रम्य **'तेन नारायणः स्मृत'** इत्यन्तेन नारायणस्य सर्वकारणत्वप्रतिपादनात् तत्रैव प्राशासितारमित्याद्यपि योजनीयम् । अत्र **'प्रशासितारं सर्वेषामि'**ति नारायणस्य सर्वान्तर्यामित्वम् **'एनमेक'** इति श्लोकेन तस्य सर्वान्तर्यामित्वलब्ध-तदभिधानभावैरग्न्यादिशब्दैः एकैकेषु वेदभागेषु परस्पराविरोधेन प्रतिपाद्यत्वम्, **'एष सर्वाणी'**तिश्लोकेन स्वाधिष्ठितैर्वियदादिभिः सर्वप्राणिजातव्यापित्वं च प्रतिपाद्यत इति, तत्रोपक्रमे विरोधशंका तावत्तस्य शिवस्यैव सर्वोत्कर्षविभावने तात्पर्यव्यवस्थापनेन महोपनिषदुपक्रमार्थनिर्णये निपुणतरमुन्मूलयिष्यते । इह यस्य सर्वान्तर्यामित्वं तल्लब्धस्वाभिधानभावैरग्न्यादिशब्दैरेकैकेषु वेदभागेषु व्यवहारः ।, स्वमूर्तिभेदैर्वियदादिभिः सर्वभूतव्यापित्वं च स परमात्मत्वेन निर्धारित इति परेषामपि सम्प्रतिपन्नोऽर्थः । एवं च सति शिव एव तथा निर्धारित इति सुखेन शक्यं निर्णेतुम् । स एव सर्वान्तर्यामीत्यधस्ताद्व्यवस्थापनात् । **'अग्निं पुरा तनयित्नोपरचित्तात्'** **'रुद्रो वा एष यदग्निः, तस्यैते तनुवौ घोरान्या शिवान्या'** इत्यादिवेदभागेषु तस्याग्निशब्देन व्यवहारदर्शनात् ।

'किमेभिरमरैरन्यैः पूजितैरध्वरे फलम् ।
राजा चेदध्वरस्यास्य न रुद्रः पूज्यते त्वया ।।
द्वे तनू तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः ।
घोरा चान्या शिवा चान्या ते चैव शतधा पुनः' ।।

इत्यादिभिः वायुसंहितामहाभारताद्युपबृंहणैः **'आवो राजानमध्वरस्य रुद्रं' 'रुद्रो वा एष यदग्निरि'** त्यादिश्रुतनीनां शिवपरत्वनिर्णयात् । 'वेदास्त्वामभिदधतीह रुद्रमग्निं त्वामेकं शरणमुपैमि रुद्रमीशमि'ति कौर्मे,

'वदन्त्यग्निं महादेवं तथा देवं महेश्वरम् ।
एकाक्षरं त्र्यम्बकं च विश्वरूपं (१.विरूपाक्षमिति पा०) शिवं तथा ।'

इत्यानुशासनिके च शिवस्य वेदभागेषु अग्निशब्देन व्यवहारप्रतिपादनात्, **'अभित्वा शूर नोनुम'** इति मन्त्रे अथर्वशिरसि ईशाननामनिर्वचनान्तरं पठिते शिवस्येन्द्रशब्देन व्यवहारात् **'प्रजापतिश्चरति गर्भे अन्तरि'**ति प्रजापतिशब्देन **'यो ब्रह्मा ब्रह्मण उज्जभार प्राणेश्वरः, ब्रह्मा शिवो मे अस्तु'** इति च तत्पर्यायेण व व्यवहारात्, 'आरुद्रासः' इति मारुत' सूक्ते **'मरुत्सु कतमो रुद्रः'** इत्यादिबृहदारण्यकश्रुतौ **'ये रुद्रास्ते खलु प्राणाः ये प्राणास्ते तदात्मका'** इति वायुसंहितायां प्राणेषु च रुद्रपदप्रयोगस्य रुद्राधिष्ठितत्वाभिप्रायत्वेन रुद्रस्य तदन्तर्यामिभावेन तन्नाम्ना व्यवहार्यत्वावसायाच्च। वियदादिभिर्मूर्तिभिस्सर्वभूतव्यापित्वस्य चाष्टमूर्तौ तत्रैवाञ्चस्याच्च । तस्मादुदाहृतमनुवचनानां शिवस्यैव परभावनिर्धारणे तात्पर्यं युक्तम्। तथा योगीश्वरोऽपि योगयाज्ञवल्क्ये धारणाध्याये पृथिव्यादिस्थानेषु ब्रह्मादिसदाशिवान्तधारणाविधानान्तरम्

'एतदुक्तं भवत्यत्र गार्गि ब्रह्मविदां वरे ।
ब्रह्मादिकार्यरूपाणि स्वेस्वे संहृत्य कारणे ।
युक्तचित्तस्तदात्मानं योजयेत् परमेश्वरे' ।

इति ब्रह्मादीनां पूर्वपूर्वस्य उत्तरोत्तरकार्यत्वप्रदर्शनेन सदाशिवस्य सर्वकारणतया परभावं विभावयामास । आश्वलायनोऽपि धर्मशास्त्रोपक्रमे **'आदाविदमभूत्सर्व'** मित्यादिना मूलकारणं तदधिष्ठातारं च शिवं प्रस्तुत्य मायाशक्तिरूपस्य तमसश्शिवसन्निधिलब्धं कार्योन्मुख्यरूपं संक्षोभं च प्रतिपाद्य **'सा च संक्षोभिता शक्तिश्शिवेन परबृंहिते'** त्याद्यारभ्य ततो गुणविभागमहदहङ्कार-चतुर्मुखब्रह्मसृष्ट्याद्युपवर्णनात्, सप्तमाध्याये ।

'सिसृक्षुरेक एवाग्रे समासीनश्शिवस्स्वयम् ।
दृष्ट्वा गुणमयीं मायां सूक्ष्मरूपामपाकरोत् ।
तया तदात्मकं विष्णुं सृष्ट्वा पालं दिवौकसाम् ।।'

इति विष्णोस्तत्सृष्टत्वकथनात्, तदनन्तरं यज्ञोपवीतोत्पत्तिप्रकारमुक्त्वा तद्भागविशेषाश्रितदेवताविभागसमये

'तावल्लोकास्त्रयो वेदाः त्रयो देवास्त्रयोऽग्नयः ।
शिवसृष्टास्त्रयो वर्णास्त्रिवृत्सूत्रं समाश्रयम् ।।
तद्ग्रन्थिमाश्रयत्तारस्त्रिमात्रो नादसंयुतः ।
तद्ग्रन्थ्यग्रं च सावित्री वेदमाता शिवज्ञया ।।'

इति त्रयाणां देवानां शिवाज्ञया उपवीतभागसमाश्रयणकथनात्, कल्पसूत्रे शिवं प्रस्तुत्य 'सर्वाणि ह वा एतस्य नामधेयानि सर्वास्सेनास्सर्वाण्युच्छ्रयणानी' त्यभिधानाच्च तस्य सर्वेश्वरत्वं प्रदर्शयामास। बोधायनश्च शिवपूजाविधौ ब्रह्मविष्ण्वोस्तदावरणे निवेशात् देवतान्तरपूदाविधिषु शिवस्यावरणदेवतास्वसन्निवेशाच्च तस्य सर्वोतच्कर्षं सूचयामास। कात्यायनोऽपि 'रुद्रो ह्येवैतत् सर्वमि'ति तस्य सर्वात्मत्वेन परभावं द्योतयामास । शास्त्रकारेषु पतञ्चलिस्तावत् 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः, तस्य शास्त्रं निमित्तं, तत्र निरतिशयं सार्वर्ज्यबीजं, स पूर्वेषामपि गुरुः कालेनानवच्छेदात्, तस्य वाचकः प्रणवः, तज्जपस्तदर्थभावनमि'ति शिवपरभावविषयाणि

'न शिवस्याणवो बन्धः कार्मो मायेय एव वा ।
प्राकृतो वाथवा बन्धो ह्यहङ्कारात्मकस्तथा ।
न रागो न च विद्वेषश्शम्भोरमिततेजसः ।
न चाप्यभिनिवेशोऽस्य कुशलाकुशलान्यपि ।
स पुंविशेषः कथितो भगवानन्तकान्तकः ।
लोके सातिशयत्वेन ज्ञानैश्वर्ये विलोकिते ।
शिवेनातिशयत्वेन स्थितिं प्राहुर्मनीषिणः ।।
प्रतिसर्गं प्रसूतानां ब्रह्मणां शास्त्रविस्तरम् ।
उपदेष्टा स एवादौ कालावच्छेदवर्तिनाम् ।
कालावच्छेदयुक्तानां गुरूणामप्यसौ गुरुः ।
सर्वेषामेव सर्वेशः कालावच्छदेवर्जितः ।

प्रणवो वाचकस्तस्य शिवस्य परमात्मनः ।
शिवरुद्रादिशब्दानां प्रणवस्तु परस्स्मृतः ।
शम्भोः प्रणववाच्यस्य भावना तज्जपादपि ।
यासिद्धिस्सा परा प्राप्या भक्त्येव न संशयः ।।'

इत्यादिवायुसंहितोत्तरभागसप्तमाध्यायपठितवचनैकार्थ्यानि सूत्राणि निभघ्नन् शिवस्यैव परभावं प्रतिपादयामास । अत एव तदैकार्थ्यादेव सूत्राणां तन्मूलत्वमवधार्य तन्त्रकौमुदीकारः **'तत्र निरतिशयं सार्वज्ञ्यबीजमि'**ति सूत्रे तस्य 'संज्ञादिविशेष-प्रतिपत्तिरागमतः पर्येष्यती'ति वैयासिकसूत्रभाष्यव्याख्यानावसरे संज्ञा शिवरुद्र-महेश्वरादिः, आदिशब्देन षडङ्गदशाव्यये संगृहीते इति सूत्राणां शिवविषयत्वं स्पष्टीचकार । तथा नैयायिकादयः स्वाभिमतं परमात्मानं भवशिवस्थाण्वीश्वरादिशब्दैः व्यवहरन्तः परमेश्वरस्यैव परभावं स्वाभिमतं प्रकाटयामासुः । तथा भरतमुनिमतानुसारिणश्च-

'कल्पान्तरे कदाचित्तु दग्ध्वा लोकान्महेश्वरः ।
मनसैवासृजाद्विष्णुं ब्रह्माणं च निजेच्छया' ।

इत्यादिरसोत्पत्तिप्रकरणादिषु व्यवहरन्तः शिवस्यैव परभावमुदाहरन्तीत्युदाहार्यात् । आगमेषु तु बहुषु शिवस्य सर्वोत्कर्षप्रतिपादनं स्पष्टमेव ।।३९।।

।। इति मनुस्मृत्यादीनां शिवपरत्वनिरूपणम् ।।

निबन्धुस्सूत्राणां निगमशिरसोऽर्थं प्रथयताम्
अपि स्मष्टो भावस्तव शिव परत्वे विमृशताम् ।
पुमांसं योऽङ्गुष्ठप्रमितमनपेक्ष्यापरनयं
तवेशानश्रुत्या वरद निरचैषीत् पर इति ।।४०।।

उक्तं तावदधस्तात्--ब्रह्मसूत्रकृता **'शब्दादेव प्रमित'** इत्याधिकरणे ईशान-शब्दरूपया अभिधानश्रुत्या न्यायान्तरनिरपेक्षया अङ्गुष्ठमात्रः पुरुषः परमात्मा निर्णीत इत्यमर्थः परेषाममपि सम्मत इति । तथा च यस्यायमीशानशब्दोऽभिधानं,तस्योमापतेः परभावः सूत्रकारस्य हृदयस्थितोऽवसीयते । देवतान्तरे योगेन लक्षणया वा प्रयोगोपपत्त्या तेष्वनुशासनाभावात् रूढिक्लृप्त्यभावेन तदभिधानश्रुतित्वायोगादिति

भावः ।।४०।।

।। इति ब्रह्मसूत्राणां शिवपरत्वनिरूपणम् ।।

एवं पुराणमहाभारतरामायणानेकस्मर्तृशास्त्रकारसम्मतिभिश्शिवस्य परभावस्समर्थितः। अथ परवाचित्वेन सम्मतस्य ब्रह्मपदस्य **'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधस्स्मृतः ।'** इति गीतासु तन्नामत्वेन व्यवहृतानां च पदानां शास्त्रेषु प्रयोगनिर्वचननामत्वानुशासनैः शिवनामत्वाविष्करणादपि तस्य परभावस्स्पष्ट इत्याह----

पदं यत् ब्रह्मेति प्रथिततरमोन्तत्सदिति च
प्रसिद्धं यद्गीतास्वचलतनयावल्लभ विभो ।
अमीषामर्थं त्वामधिगमयतश्शास्त्रनिकरात्
अपि स्पष्टं नाथ त्वमिह परमं दैवतमिति ।।४१।।

निरुक्तं तावत् ब्रह्मपदमथर्वशिरसि शिवनामावलिनिर्वचनप्रस्तावे - **'अथ कस्मादुच्यते परं ब्रह्मे'**त्यादिना, शिखायां च **'सर्वाणि बृहयतीति ब्रह्मे'**ति, लैङ्गादित्यपुराणयोश्चाथर्वशिरोविवरणे - **'तस्मात् बृहन्न यत्तस्मात् परं ब्रह्मेति गीयत'** इति । प्रयुक्तं चादिपर्वणि भगवता बादरायणेन शिवे -
'युधिष्ठिरो धर्ममयो महाद्रुमस्स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखा ।
माद्रीसुतौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ।।' इति ।
अत्र हि कृष्णसाहाय्यात् ब्राह्मणानुग्रहाच्च पाण्डवानां जय आसीदिति प्रसिद्धेस्तज्जयोपायभूतस्य कृष्णस्य तथाभूतानां ब्राह्मणानां च मध्ये तद्वदेव मूलत्वेन निरूप्यमाणो ब्रह्मशब्दार्थोऽपि तथाभूत एव ग्रहीतुं युक्तः तदैकरूप्यायेति महादेवतेजोऽभिगुप्त्यैव तेषां जय आसीदिति सौषुप्तिके स्फुटत्वात्, शान्तिपर्वणि शिवं प्रस्तुत्य **'निहतांस्तेन पूर्वं त्वं हतवानसि वै रिपून्।'** इति पार्थं प्रति कृष्णवचनात् आश्वमेधिके शिवं प्रस्तुत्य
'वयं सर्वे च तद्भक्तास्स चास्माकं प्रसीदति।
तत्प्रसादाद्वयं राज्यं प्राप्ताः कौरवनन्दने'त्यारभ्य

'कस्तां सेनां महाराज मनसापि प्रधर्षयेत् ।
द्रोणकर्णमुखैर्गुप्तां महेष्वासैः प्रहारिभिः ।
ऋते देवान्महेष्वासाद्बहुरूपान्महेश्वरात् ।
तस्यैव च प्रसादेन निहताश्शत्रवस्तवे'ति
युधिष्ठिरं प्रति भीमसेनवचनात्, पाद्मपुराणे--
'तत्रास्य मायिनो विष्णोरंशः कृष्णो हि तिष्ठति ।
दर्शयिष्यत्युपायांस्ते स यः पक्षे ममाज्ञया ।।'
इति पार्थं प्रति श्रीमहादेववाचनाच्च स एव ब्रह्मशब्दोपात्त इति परिशेषादौचित्याच्च निश्चीयते । **'यतो धर्मस्ततो जय'** इति धर्मस्य जयमूलत्वप्रसिद्धेः तत्प्रमितिद्वारा कथञ्चिज्जयोपायभूतस्य वेदस्य ब्रह्मशब्दार्थस्य सद्भावेऽपि चेतनैरवयवैरत्र सावयवरूपकसम्पादनदर्शनात्,
'दुर्योधनो मन्युमयो महाद्रुमः कर्णस्स्कन्धश्शकुनिस्तस्य शाखा ।
दुश्शासनः पुष्पफले समृद्धे मूलं राजा धृतराष्ट्रोऽम्बिकेय'
इति पूर्वश्लोकेऽपि तैरेव तत्सम्पादनदर्शनाच्च ब्रह्मशब्दस्य चेतनपरत्वावाश्यम्भावेन शब्दपरत्वायोगात् । **'ॐतत्सदि'**ति पदानि तु तैत्तिरीयोपनिषदि--
'शिवो मे अस्तु सदाशिवों, तत्पुरुषाय विद्महे, पुरुषो वै रुद्रस्सन्मह'
इति प्रयुक्तानि । तत्पुरुषायेत्यत्र लुप्तविभक्तिकं तदिदि भिन्नं पदम् ।
'शिवो महेश्वरो रुद्रश्शङ्करो ब्रह्म सत्पदम् ।
एवमादीनि नामानि विशिष्टानि परस्य तु ।'
इत्यादिना स्कान्दादिष्वेषां शिवनामतत्वानुशासनानि द्रष्टव्यानि ।।४१।।

।। इति ब्रह्मादिशब्दानां शिवपरत्वनिरूपणम् ।।

एवं परनामत्वेन प्रसिद्धानां शिवे प्रयोगादिभिस्तस्य परभावस्समर्थितः । अथ शिवनामत्वेन प्रसिद्धानां निरतिशयैश्वर्यसमर्पणक्षमावयवशक्तिबलात्तं समर्थयते--

त्वदन्यं क ब्रूमः परमशिव सर्वेश्वर इति
त्वमीशानादीनां ननु भवसि वाच्यश्श्रुतिगिराम् ।

समाख्यानं त्वेताश्श्रुतय इति मोहान्धकुहरे
स्फुरन्मीमांसादृक्प्रपतति न चेतः कृतधियाम् ।।४२।।

ईशानेशेश्वरेतिशब्दाः कथञ्चिद्योगमात्रेणान्यत्रापि प्रयुज्यमानाः योगरूढ्या शिवासाधारणाः, स्फुटयोगप्रख्यापनात् -
'यस्मादीशो महतामीश्वराणां भवानाद्यः प्रीतिदः प्रणदश्च ।
तस्माद्धि त्वामीश्वरं प्राहुरीशं सन्तो नित्यं सर्वशास्त्रार्थविज्ञाः।।
इत्यादिर्हरिवंशादिवचनदर्शनाच्च शिवे प्रयुज्यमानानामेतेषां रूढिवद्योगस्यापि स्वविषये समुन्मेषात् । तथा चान्यत्र प्रयुज्यमाना एते पत्यादिशब्दाश्च अन्ये तत्तद्देवतावाचिपदसमभिव्याहारमपेक्ष्य वाक्यमर्यादयैव तत्र तत्र देवताविशेषे ऐश्वर्यं बोधयन्ति । शिवे प्रयुज्यमानास्तु पदान्तरसमभिव्याहारमनपेक्ष्य स्वयमेव रूढ्या शिवमुपस्थाप्य श्रुतिविधया तत्रावयवार्थमैश्वर्यं प्रतिपादयन्तीति निखिलविनियोजक-प्रमाणमूर्धन्यानेकश्रुतिबलात् निरतिशयैश्वर्यविश्रान्तशिव एवेति सिध्यतीति भावः । यत्तु परैः **'समाख्या यौगिकी संज्ञे'**ति मीमांसकश्लोकैकदेश- श्रवणमात्रसन्तुष्टैः उक्तम् --- ईशानादिशब्दाः समाख्याः, अत एव **'पतिं विश्वस्यात्मेश्वरमि'**-त्यादिवाक्येभ्यो दुर्बलाश्चेति, तन्निरासमभिप्रेत्याह -- **समाख्या इति** । अयमाशयः - स्वस्वप्रमेयपरिच्छेदं प्रति सन्निकर्षविप्रकर्षविशेषकृतं श्रुतिलिङ्गादीनां बलाबलम्। शीघ्रतरेण प्रमाणेन क्वचिदर्थे परिच्छिन्ने पुनः परिच्छेदान्तराप्रवृत्तेः,
'प्रत्यक्षे चानुमाने च यथा लोके बलाबलम् ।
शीघ्रमन्थरगामित्वात् तथेह श्रुतिलिङ्गयोः ।'
इत्यादिना मीमांसकैरपि तथैव बलाबल प्रतिपादनाच्च । तथा च शिवे प्रयुज्यमाना ईशानादिशब्दाः तद्गतैश्वर्यप्रतिपादने पदान्तरसमभिव्याहारनिरपेक्षतया सन्निकृष्टाः, **'पतिं विश्वस्ये'**त्यादयस्तु देवताविशेषगतैश्वर्यप्रतिपादने पदान्तरसमभिव्याहार-सापेक्षतया विप्रकृष्टाः इति व्यवस्थिते बलाबले कथं परिभाषाणात्रेण वैपरीत्यमापतेत्।
'समाख्या यौगिकी संज्ञे'ति वदतामपि
'पाकं तु पचिरेवाह कर्तारं प्रत्ययोऽप्यकः ।
पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचित् ।'
इत्यादितदीयवचनदर्शनात् यत्र यौगिकपदे तदवयवाभ्यां शेषशेषिभावान्वयि-पदार्थयोरेवोपस्थितिः, न तु **'व्रीहीन् प्रोक्षति, अरुणया क्रीणाती'**ति

वाक्ययोर्द्वितीयातृतीयाभ्यामिव शेषत्वस्य शेषित्वस्य च तत्पौरोडाशिकहोतृचमसादिपदरूपे तत्र शेषशेषिभावे समाख्यारूपं षष्ठं प्रमाणमिति मतं, न तु यत्र यौगिकपदे योऽर्थः प्रकृत्यादिवाच्यः, तत्रापि तत्समाख्येति । आग्नेयादिपदेषु यौगिकेष्वपि अग्न्यादीनां देवतात्ववाचितद्धितसद्भावे तेषां देवताश्रुतित्वस्य तैरेवाभ्युपगमात्, इह चेश्वरादिपदेषु शिवैश्वर्यं प्रकृत्यंशस्य वाच्यमेवेति न तत्र तेषां तन्मतमर्यादयापि समाख्यात्वशङ्कावकाशः । अस्माकं तु विवरणाद्युक्तरीत्या समा चासावाख्या चेति व्युत्पत्यान्यत्र प्रतिपन्नस्यान्यत्र प्रतिपन्नसम्बन्धनिमित्तं संज्ञासाम्यं समाख्या । यथा **'अग्निर्यज्ञं नयतु प्रजानन्'** इत्यादिमन्त्राणामतिमुक्तिहोमानां च परस्परसम्बन्धनिमित्तम् आध्वर्यवसंज्ञासाम्यमिति नात्र कथमपि समाख्यात्वचोद्यावकाश इति । नन्वेवमीशानादिशब्दानां शिवगतैश्वर्ये श्रुतित्वेऽपि **'ईशानाय स्थालीपाकः प्राज्ञ ईश्वरस्तृतीयः पाद'** इत्यादिशास्त्रेषु विधेयान्तरपरेषु' देवताविशेषसमर्पणमात्रप्रयोजनपरतया प्रयोगेण शिवगतैश्वर्यप्रतिपादनतात्पर्येण प्रयोगादर्शनात् सम्भवद्वाक्यार्थविधितात्पर्येभ्यो **'भूतस्य जातः पतिरेक आसीदि'**त्यादिवाक्येभ्यो न प्राबल्यसिद्धिः । निस्तात्पर्यश्रुतेस्सतात्पर्यवाक्यस्यैव प्रबलत्वादिति चेन्न । विधेयान्तरपरवाक्यप्रवेशनं विना केवलानामेतेषां क्वचिदपि प्रयोगादर्शनात् तदसम्भवाच्च स्वातन्त्र्येण शिवगतैश्वर्यप्रतिपादनतात्पर्यासम्भवेऽपिं **'आग्नेयमष्टाकपालं निर्वपेदि'**त्यादिषु अग्न्यादीनां देवतात्वस्येव **'अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ईशानो भूतभव्यस्य' 'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुनतिष्ठती'** त्यादिश्रुतिस्मृतिषु प्रसिद्धहृद्देशानुवादेन तत्र वर्णितनिखिलविशेषणविशिष्टपरमशिवावस्थानविधिपरासु तद्विशेषणतया ईशिधात्वर्थस्य ऐश्वर्यस्यापि विधौ तात्पर्यस्य निरवग्रहत्वात् । न हि तात्पर्यसम्भवेऽपि विधेयान्तरविशेषणतया विधौ तात्पर्यं, न स्वातन्त्र्येण इत्येतावतैव स्वतन्त्रविधिरूपेभ्यो वाक्येभ्यो दौर्बल्यशङ्का समुन्मिषति । तथा सत्युत्पत्तिशिष्टोत्पन्नशिष्टयोरपि बलाबलवैपरीत्यापत्तेः । तस्मादुपपदादिसङ्कोचकरहिताभिरीशानादिश्रुतिभिश्शिवस्य निरतिशयैश्वर्यसिद्धिर्वज्रलेपायते। न चैवमिन्द्रपदश्रुत्या सहस्राक्षस्यापि परमैश्वर्यसिद्धिप्रसङ्गः। तस्य कार्यत्वकर्मवश्यत्वविनाशित्वादिप्रतिपादकानेकश्रुतिपुराणादिविरुद्धैकश्रुतिमात्रेण तत्सिध्यप्रसङ्गात् ; इह तथाविरोधिमानान्तरशङ्काया अप्यनवकाशात्।।४२।।

मन्त्रोपनिषदि तैत्तिरीयोपनिषदि च शिवे प्रयुक्तं **'तदन्यद्विश्वमीशानस्स तु**

विश्वाधिकस्स्मृत' इत्यादिपुराणवचनेषु च तत्र अभ्यस्तं देवतान्तरे क्वचिदप्यदृष्टप्रयोगं विनैव क्लिष्टकल्पनामतिस्फुटं तस्य सर्वोत्कर्षं परिच्छिन्दत् विश्वाधिकपदमपि प्रस्तुतेऽर्थे प्रमाणयति -

प्रयुक्तं त्वय्येव श्रुतिषु यदनेकत्र भगवन्
पुराणेष्वभ्यस्तं पुरमथन विश्वाधिकपदम् ।
परिच्छिन्दत्तत्ते स्पुटमखिललोकादधिकतां
विमूढस्वान्तानां व्यथयतितरां श्रोत्रपदवीम् ।।४३।।

।। इति ईशानादिपदानां शिवपरत्वनिरूपणम् ।।

एवमीशानादिपदावयवशक्तिपर्यालोचनेन परभावस्समर्थितः । अथ परिशेषादपि परमशिवमूर्तिरेव निरतिशयैश्वर्यभिव्यक्तिस्थानमिति व्यवस्थापयति -

यदि स्यादैश्वर्यं न भवति परिच्छेदविधुरं
क्वचिच्छ्रान्तिं नाथ व्रजतु भवतोऽन्यत्र भगवन्।
विभिन्नाः प्रत्यण्डं विधिहरिगिरीशा नियमिताः
त्वया कल्पे कल्पे दधति भवदाज्ञां नवनवाम् ।।४४।।

अत्र च वचनानि - वायुसंहितायां तावत्--
इतीदृशानामण्डानां कोट्यो ज्ञेयास्सहस्रशः ।
सर्वगत्वात् प्रधानस्य तिर्यगूर्ध्वमधस्स्थिताः ।
तत्रतत्र चतुर्वक्त्रा ब्रह्माणो हरयो हराः ।
सृष्टाः प्रधानेन सता लब्ध्वा शम्भोस्तु सन्निधिम् ।' इति ।

आदित्यपुराणे--
'सहस्रकोटयस्सन्ति ब्रह्माण्डास्तिर्यगूर्ध्वजाः ।
ब्रह्मणो हरयो रुद्रास्तत्रतत्र व्यवस्थिताः ।

आज्ञया देवदेवस्य महादेवस्य शूलिनः ।' इति ।

कौर्मे--

'ब्रह्मनारायणेशानां त्रयाणां प्रकृतौ लयः ।

एको हि भगवानीशः कालः कविरिति स्मृतः ।।'इति ।

पराशरस्मृतौ

'कल्पे कल्पे लयोत्पत्त्या ब्रह्मविष्णुमहेश्वराः ।

श्रुतिस्मृतिसमाचारनिर्णेतारश्च नित्यदा।।' इति ।

लयोत्पत्त्या लयसहितोत्पत्त्या उपलक्षिता भवन्तीत्यर्थः। वासिष्ठरामायणे-

'संसारावलयो भुक्ताः निगीर्णा रुद्रकोटयः ।

ग्रस्तानि विष्णुबृन्दानि क्व न शक्ता वयं मुने ।।' इति ।

लैङ्गे -- 'असङ्ख्याताश्च कालाख्याः

असङ्ख्याताः पितामहाः ।

हरयश्चाप्यसंख्याता एक एव महेश्वरः ।।' इति ।

स्कान्दे -

'असंख्या विलयं यान्ति ब्रह्माणः पण्डितोत्तमाः ।

असङ्ख्या विष्णवो रुद्रा असङ्ख्या वासवादयः ।। ' इति ।

वायुना तु ब्रह्मविष्णुरुद्राणां लयसाम्येऽप्युत्तरोत्तरमधिककालावस्थायित्वमुक्तं--

'ब्रह्मा विष्णुदिनं चैको विष्णू रुद्रदिने तथा ।।' इति । यत्तु वचनं शान्तिपर्वणि--

'नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् ।

ऋते तमेकं पुरुषं वासुदेवं सनातनम् ।'

इति, तत् विष्णोस्स्वरूपनित्यत्वमात्रपरं, विग्रहस्य मायिकस्य नित्यत्वायोगात् । तदितर सकलानित्यत्वप्रतिपादनं च भूतशब्दस्य वस्तुमात्रपरत्ववर्णनेनात्मैक्यात् जडवर्गमिथ्यात्वाच्च युक्तम् । अत एवेश्वरगीतासु 'अविज्ञाय विमुच्यत' इत्यन्तेन निर्गुणप्रतिपादनानन्तरं वचनं--

'नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् ।

ऋते मामेकमव्यक्तं व्योमरूपं महेश्वरमि'ति, प्रत्युत परेषामेव नित्यसूरिविभूत्याद्यभ्युपमगादिदं दुरुपपादम् । सगुणब्रह्मवादे तु 'अजात इत्येवे'त्यादिमन्त्रोपनिषन्मन्त्रस्वारस्यविरोधादुपचरितमिदं स्मृतिवचनं नेयमिति न कोऽपि विरोधः । एवं देशकालादिपरिच्छिन्नासु ब्रह्मविष्णुरुद्रमूर्तिषु

निरतिशयैश्वर्याभिव्यक्त्यभावात्तुरीयकोटावम्बिकामूर्तेस्सद्भावेऽपि शक्तिरूपेण शिवोपसर्जनत्वाच्च शिवमूर्तावेव पारिशेष्यात् निरतिशयैश्वर्याभिव्यक्तिः । अत एव निश्चित्योपदिष्टं वायुसंहितायां -

'ब्रह्मादयोऽपि लोकानां सर्गस्थित्यन्तहेतवः ।
निग्रहानुग्रहं प्राप्तश्शिवस्य वशवर्तिनः ।
शिवः पुनर्न कस्यापि निग्रहानुग्रहास्पदम् ।
अतोऽनतिशयैश्वर्यं तस्यैवेति सुनिश्चितम् ।' इति ।।४४।।

इति परमशिवस्य निरतिशयैश्वर्यनिरूपणम् ।

किंच -

विरुद्धार्थानि वाक्यानि वीक्ष्य विभ्रान्तचेतसाम् ।
युक्तो बहूनां संवादादेकस्मादेव निर्णयः ।।
अन्यथा वेदमार्गेऽपि न सिध्येत् ब्रह्म कारणम् ।
अब्रह्मकारणत्वेऽपि श्रुतिलेशस्य दर्शनात् ।।
अतः प्रमाणबाहुल्यादाधिक्यं गिरिजापतेः ।
युक्तं निर्धारयितुमित्ययमर्थः प्रदर्श्यते ।।

अलम्मानैरन्यैरखिलजगतीनामधिपते
तवाधिक्यं शक्यं वदितुमियतैव स्फुटमिति ।
त्वदुत्कर्षं भूयान् प्रथयति यदाम्नायनिचयः
तदर्थं व्याकुर्वन्यदपि च पुराणादिनिकरः ।।४५।।

वेदान्तभागेषु तावदथर्वशिखादयश्शिवोत्कर्षपरा भूयस्यश्श्रुतयः । तथा कर्मकाण्डेऽपि मन्त्रार्थवादाः । यथा चैतत्, तथात्रैव पूर्वापरश्लोकव्याख्यानेषु स्फुटम् । आहुश्चाभियुक्ताः -

'मन्त्रा भवन्ति विरला विबुधान्तरणां सद्भाव एव शिव दर्शितशक्तयस्ते ।
त्वन्नामरूपगुणवर्णनलब्धवर्णा मन्त्रा न शक्यमधिगन्तुमियत्तया ते ।।'

इति । तथा शिवोत्कर्षपराणि शिवपुराणादीनि ग्रन्थसङ्ख्यया विष्णुपुराणादिभ्यो

भूयांसीति तावत् स्फुटम् । पुराणसङ्ख्याया बाहुल्यमपि प्रभासखण्डे दर्शितं -

'चतुर्भिर्भगवान्विष्णुर्द्वाभ्यां ब्रह्मा तथा रविः ।
अष्टादशपुराणेषु शेषेषु भगवान् शिवः।'

इति । तथोपपुराणशिवागमादिबाहुल्यमपि स्फुटमेव विदुषाम् । **'तदर्थं व्याकुर्वन्नि'**त्यनेन **'वेदार्थो यः स्वयं ज्ञात'** इत्यादिव्यासोक्तेश्शिवोत्कर्षपरश्रुतीनाम् अनाशङ्कनीयार्थान्तरत्वेनानन्यथासिद्धत्वरूपं शिवोत्कर्षपरपुराणादीनां साङ्ख्यादि-स्मृतिभ्यः मन्वादिस्मृतीनामिव प्रत्यक्षश्रुत्यनुसारलक्षणं च प्राबल्यं सूचितम् ।।४५।।

एवं शिवोत्कर्षपरश्रुतिपुराणादीनां तत्र तत्र प्राबल्यध्वननपूर्वकं शिवस्य तैः परभावनिर्धारणमुपपादितम् । अथ परोक्तं तेषां दौर्बल्यं नारायणोत्कर्ष-परश्रुतिपुराणादीनां प्राबल्यं च निराक्रियते - श्रुतिवाक्येषु तावदित्थं बलाबलवैपरीत्यं कल्पयन्ति - यद्यपि नारायणस्येव देवतान्तराणामपि तैस्तैश्श्रुतिवाक्यैः परभावः प्रत्यायितः, तथाप्यन्यार्थपराणि तानि, नारायणस्य परभावस्त्वनन्यार्थैः श्रुतिवाक्यैः प्रतिपादित इति तदनुसारेणैव भूतार्थावधारणं युक्तम् ।

'अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजम्' **'स्तौम्यग्निं नाथितो जोहवीमि, अभि त्वा शूरनोनुम'** इत्यादीनां स्ववाक्येनैव **'अर्हन् बिभर्षि सायकानि धन्व, यो वै रुद्रस्स भगवान् यश्च ब्रह्मे'**त्यादीनां **'ते देवा ऊर्ध्वबाहवस्स्तुवन्ति । अर्हन् बिभर्षि सायकानि धन्वेत्याह स्तौत्येवैनमेतदि'**त्यादिवाक्यान्तरेण च स्तुतिपरत्वोक्तेः; रुद्राध्यायादीनां नमस्कारलिङ्गयोगेनेष्टानिष्टप्राप्तिनिवृत्तिप्रार्थनालिङ्गेन च स्तुतिपरत्वावसायात् ; शिवस्य जगत्कारणत्वप्रत्यायिकानामपि **'कारणं तु ध्येय'** इत्यादीनां जगत्सर्गप्रलयप्रकरणमध्यपातित्वाभावात् उपासनाविधिशेषत्वेनान्यपरत्वा-वसायात् नारायणपरभावप्रतिपादनपराणां पुरुषसूक्तादीनामनन्यपरत्वावधारणाच्च। पुरुषसूक्तं हि तावत् पुरुषस्य नारायणस्य सर्वकारणत्वसर्वेश्वरत्वादि-प्रतिपादकमनन्यपरम् । लिङ्गेन वाक्येन वा केनचित्तस्य स्तुतिपरत्वाप्रतीतेः, अनुवादद्योतकंहवैशब्दाद्यभावेनानुवादरूपत्वस्याप्यप्रतीतेः, प्रत्युत **'तदेतदृचाभ्यनूक्तं, तावानस्य महिमे'**ति छान्दोग्योपनिषदा स्वोपदिष्टार्थसाक्षित्वेन तत्सूक्तमन्त्रपाठादस्य नारायणमहिम्नां प्रतिपादकत्वस्यैव निर्धारणाच्च । एवं **'सर्वे वेदा यत्पदमामनन्ती'**तिमन्त्रेण सर्ववेदवेद्यत्वकथनं प्रतिज्ञाय **'सोऽध्वनः पारमाप्नोति**

तद्विष्णोः परमं पदमि'ति प्रतिपादयत् काठकं **'ब्रह्मविदाप्नोति परमि'**ति परब्रह्मवेदनान्मुक्तिं प्रतिज्ञाय **'सत्यं ज्ञानमनन्तं ब्रह्मे'**ति मुमुक्षुभिर्वेद्यं ब्रह्म अनन्तशब्दवाच्यं नारायणरूपमिति दर्शयत्तैत्तिरीयोपनिषद्वचनं सुबालोपनिषदादिषु जगत्सृष्टिप्रलयप्रकरणमध्यपाति नारायणस्य जगत्कारणत्वादिप्रतिपादनं चानन्यपरमवधार्यत इति। तन्निराकरोति -

अनन्यार्थैश्शब्दैश्श्रुतिषु परभावः प्रकटितः
श्रियो देव्याः पत्युः न तु तदितरेषां दिविषदाम् ।
अतस्तैरेवार्थावधृतरिति मन्त्रोपनिषदा-
द्यनध्यायो मूढान्मुखरयति मृत्युञ्जय मुधा ।।४६।।

अद्वैतवादे सगुणनिर्गुणश्रुत्योरुपासनार्थतया स्तुतिद्वारतया निष्प्रपञ्चब्रह्म-प्रातिपत्त्युपायतया वा सर्वथान्यशेषमेव सर्वेश्वरत्वसर्वकारणत्वादिश्रवणमिति नाद्वैतवादिनं प्रति ऐश्वर्यविषये अनन्यपरबोधककतिपयश्रुतिवचनसिद्धवत्करणेन बलाबलविभागस्सम्भवीतीति तावत्स्पष्टम् । सगुणब्रह्मवादमवलम्ब्य प्रत्यवतिष्ठ-मानास्तु मन्त्रोपनिषदाद्युदाहरणेन प्रतिबोधनीयाः । तथा हि - मन्त्रोपनिषत्तावत् - **'किं कारणं ब्रह्मे'**त्यारभ्यान्तं परामृश्यमाना सर्वकारणत्वसर्वनियन्तृत्वमोक्ष-प्रदत्वादिविशिष्टस्य पशुपाशपतेः परमशिवस्यैव तत्त्वनिर्णयाय प्रवृत्तेति स्फुटं प्रतीयते। यत्तु **'युञ्जानः प्रथमं मन'** इत्यारभ्य योगनिरूपणं, तत्तत्रैव परमकारणत्वादिना व्यवस्थापितस्य परमशिवस्य साक्षात्कारे मुक्त्युपाये साधनोपदेशार्थमवान्तरतात्पर्येण प्रवृत्तमिति न तत्रैवोपनिषदः कार्त्स्न्येन पर्यवसानं शङ्कितुं शक्यते । तदा हि अन्यत्रापि ब्रह्मनिरूपणप्राधान्येन प्रवृत्तेष्वपि प्रकरणेषु मध्ये निदिध्यासनादि-विध्युपलम्भात् तेषामपि ब्रह्मणि तात्पर्यावसानं सर्वानुमतं न सिध्येत् । यच्च **'या ते रुद्र शिवा तनूरि'**त्यादिमन्त्रे इष्टप्रार्थनादि, तदप्युपक्रमादिपरामर्शावगतपरब्रह्म-निरूपणप्राधान्यस्य कृत्स्नस्य प्रकरणस्य स्तुतिपरपरत्वं नावगमयेत्, आपादकाभावात्। तथात्वे सन्निध्यनुगुणशब्दार्थप्रत्यभिज्ञापादितमहापुरुषविषयैकप्रकरण-भावानन्तरानुवाकमन्त्र विशेषश्रुतनमस्कारेष्टप्रार्थनालिङ्गाभ्यां पुरुषसूक्तस्यापि कार्त्स्न्येन स्तुतिपरत्वापत्त्या पुरुषसूक्तमनन्यपरमिति पराभिमानस्यापि भङ्गापत्तेः । एवमथर्वशिरोऽपि देवानां परमशिवस्वरूपप्रश्ने तदुत्तरत्वेन तत्स्वरूपोपदेशरूपतया

प्रवृत्तत्वात् वस्तुयाथार्थ्यकथनपरमवसीयते । यत्तु **'यो वै रुद्र'** इत्यादि देवानां शिवोपदेशेन तत्सार्वात्म्यबोधानन्तरं स्तोत्रं, न तेन तत्पूर्वं याथात्म्योपदेशभागस्यापि स्तुतिपरत्वमुपपादयितुं शक्यम् । न च तस्यापि स्तुतिमात्रपरत्वम् । उपदेशावगततत्सार्वात्म्यावलम्बनेन प्रवृत्ततया तत्प्रपञ्चनरूपत्वात् । एवं शतरुद्रीयरुद्रसूक्तादिष्वपि लैङ्गिकं वाचनिकं वा यस्य मन्त्रस्य स्तुतिपरत्वमवसीयते, तत्रैव तद्ध्यवतिष्ठते । न तावता एकसूत्रान्तर्गतिमात्रेण मन्त्रान्तराणामपि स्तुतिपरत्वापत्तिः । यत्तु शिवमन्त्राणां प्रायिकं नमस्काररूपं स्तुतिलिङ्गमुक्तं, न तत्स्तुतिमात्रे लिङ्गं, किन्तु स्वविषयोत्कर्षेऽपि नान्तरीयके । यथा चैतत्, तथा स्थापितमधस्तात् । तथा चानितरसाधारणेन नमस्कारभूयस्त्वेन लिङ्गेन सर्वोत्कर्षशिवस्य सिध्यन् नमस्कारघटिततत्तन्मन्त्रशब्दार्थभूतसर्वाधिपत्यादिरूप एव सिध्यति । लिङ्गवशादवश्यकल्पनीये सर्वोत्कर्षे शब्दार्थभूतमुत्कर्षं परित्यज्य विधान्तरेणोत्कर्षकल्पनायोगादिति **'नमो हिरण्यबाहवे सेनान्य'** इत्यादिमन्त्रजातप्रतिपन्नस्य सर्वाधिपत्यादेर्न स्तुतिलिङ्गसद्भावेऽपि परित्यागो युज्यते। यच्चाथर्वशिखायां देवतान्तराणां शिवस्य च कार्यकारणभावेन तारतम्यप्रदर्शनमुपासनाविधिशेष इत्युक्तं, तदप्ययुक्तम् । सांबालश्रुतिमहोपनिषदादिषु नारायणस्य जगत्कारणत्वप्रतिपादकेष्वप्युपासनाविधेः परेषामपि सम्मतत्वेन तौल्यात्, अथर्वशिखायां तु **'कारणं तु ध्येय'** इति शिवस्य ध्येयस्य कारणमित्येवानुवाददर्शनेन तस्य तत्र सकलकारणत्वोपवर्णनस्य भूतार्थवादत्वावसायाच्च । न हि स्तुत्यर्थारोपितरूपेणैव विधिवाक्येऽप्यनुवाद इति युज्यते । यत्तु पुरुषसूक्तादिकमनन्यपरमित्युक्तं, तत्र पुरुषसूक्तस्य तावच्छिवपरतया व्यवस्थापितत्वादस्मदनुकूलमेवानन्यपरत्वम् । किंतु **'उपाकृता दक्षिणतोऽवस्थाय ब्रह्मा सहस्रशीर्षा पुरुष इति पुरुषेण नारायणेन परा चानुशंसती'**ति पुरुषमेधे तस्य कार्त्स्न्येनाप्रगीतमन्त्रसाध्यस्तुतिवाचिशंसनशब्देन स्तुतौ विनियोजनात् , विष्णुपुराणे **'तुष्टाव प्रणतो भूत्वा भूतधातारमच्युतम्।'** इत्युपक्रम्य **'सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् । सर्वव्यापि भुवस्स्पर्शादत्यतिष्ठद्दशांगुलम्'** इत्यादिना पुरुषसूक्तप्रक्रियया स्तुतिप्रकारोपवर्णनात्, छान्दोग्येऽपि 'तदेतदृचाभ्यनूक्त'मित्यत्रान्वित्युपसर्गेण पुरुषसूक्तमन्त्रस्य तदुक्तार्थानुवादत्वस्यैव द्योतनाच्च स्तुतिपरत्वमनुवादरूपत्वं चावर्जनीयमिति परेषां तदनन्यपरत्वनिर्धारणमेवासङ्गतम् । **'तद्विष्णोः परमं पदमि'**ति काठकवचनस्य त्वनन्यपरत्वमस्माभिरपीष्यत एव । किं तु तत्र पदशब्दस्य **'तत्ते पदं**

सङ्ग्रहेण ब्रवीमी'त्युपक्रमानुरोधेन सर्ववेदप्रतिपाद्यत्वादिविशिष्टे ब्रह्मणि वृत्तेः परेषामपि सम्मतत्वेन **'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय'** इति मन्त्र इव स्थानविशेषपरत्वायोगेन विष्णुशब्दस्य पञ्चम्यन्तत्वे षष्ठ्यन्तत्वे वा पदशब्दोदितस्य ब्रह्मणो विष्ण्वतिरेकस्यैव स्वरसतः प्रतीतेः विष्णोः पदमिति राहोश्शिरइति वदौपचारिकभेदव्यपदेश इति विष्णुशब्दस्यापि प्रतिपिपादयिषिते ब्रह्मणि वृत्त्यभ्युपगमेऽपि तस्याथर्वशिखयां **'व्यापनाद्व्यापी महादेव'** इत्यन्ते महादेवनामावलिनिर्वचनप्रकरणे **'सर्वे देवास्संविशन्तीति विष्णु'**रिति, लिङ्गपुराणे--

'भगवान् भगसद्भावान्निर्मलत्वाच्छिवस्स्मृतः ।
स्वामी स्वमस्य यत् सर्वं विष्णुस्सर्वप्रवेशनात् ।'

इति, वायुसंहितायां--

'शिवतत्त्वादिभूम्यन्तं शरीरादि घटादि च ।
व्याप्याधितिष्ठति शिवस्तस्मात् विष्णुरुदाहृतः ।'

इति, शिवनामत्वेन निर्वचनदर्शनात् नारायणैकान्त्यासिद्धेः । तदैकान्त्येऽपि प्राग्दर्शितैर्न्यायैर्मन्त्रोपनिषदि . जगत्कारणब्रह्मपरहरशब्दवत्तस्यानन्यथासिध्द्यभावेन तदनुरोधिवृत्त्यन्तरसहिष्णुत्वाच्च न तत्र परेषां प्रत्याशावकाशः । एतेन **'सत्यं ज्ञानमनन्तं ब्रह्मे'**ति श्रुत्युदाहरणमपि निरस्तम् । **'ब्रह्मविदामाप्नोति परमि'**त्युक्ते किं तत् ब्रह्मेति जिज्ञासायां तत्स्वरूपलक्षणपरेऽस्मिन्वाक्ये सत्यादिशब्दवदनन्तशब्दस्यापि प्रथमान्ततया नपुंसकलिङ्गत्वेन विष्णुवाचित्वासम्भवाच्च । **'अनन्तो नागराड्विष्णुरनन्तं खनिरन्तरयोरि'**ति पुल्लिङ्गस्यैव तद्वाचित्वानुशासनात् । न च **'यो वेद निहितं गुहायामि'**ति अनन्तरवाक्योक्तवेदनस्य कर्मसाकाङ्क्षत्वात् द्वितीयान्ता एव सत्यादिशब्दा इति वाच्यम् । तत्रैव गुहायां निहितमित्यस्य सन्निहितत्वात् ब्रह्मवचनस्य कर्मसमर्पणपरस्य सत्त्वेन तदनुरोधात् सत्यादिवाक्यस्य बुभुत्सितलक्षणपरत्वभङ्गायोगादिति दिक् । तस्मात् परोक्तरीत्या श्रुतीनां बलाबलविभागायोगादस्मदुपपादितैर्न्यायैश्शिवपरश्रुतीनां प्राबल्यमिति स्थितम् ।।४६।।

।। इति विष्णुपरश्रुत्यादीनां प्राबल्यनिरसः ।।

निरस्तः श्रुतीनां पराभिमतो बलाबलविभागः । अथ पुराणानां सात्त्विकादिविभागकल्पनामूलः स निराक्रियते-- एवं तावत् परे कल्पयन्ति --

कल्पेषु केषु चित् ब्रह्मा सत्त्वोद्रिक्तः प्रबुध्यते ।
रजसा केषु चिद्ग्रस्तस्तमोग्रस्तश्च केषु चित् ।।
ते च कल्पास्ततो हेतोस्तदेकैकदिनात्मकाः ।
सात्त्विकादि समाख्याभिराख्यायन्ते महर्षिभिः ।।
तत्क्रमेण च कल्पेषु सात्त्विकादिषु पद्मभूः ।
वैष्णवब्राह्मशैवानि पुराणानि विनिर्ममे ।।
तत एव पुराणानां सात्त्विकादिव्यवस्थितिः ।
बलाबलविभागश्च तेषां वक्तृगुणोचितः ।।' इति ।

इत्थंकल्पनायां च मात्स्यपुराणवचनं मूलं सङ्गिरन्ते । तत्र हि **'सङ्कीर्णास्सात्त्विकाश्चैवे'**त्यादिना कल्पानां सङ्कीर्णसात्त्विकराजस- तामसभेदेन चातुर्विध्यं प्रदर्श्य

'यस्मिन्कल्पे तु यत्प्रोक्तं पुराणं ब्रह्मणा पुरा ।
तस्य तस्य तु माहात्म्यं तत्स्वरूपेण वर्ण्यते ।'

इति तत्तत्पुराणानां तत्तत्कल्पे ब्रह्मविनिर्मितत्वं चोक्त्वा पठितम् --

अग्नेश्शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते ।
राजसेषु तु माहात्म्यमधिकं ब्रह्मणो विदुः ।।
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते ।।
सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ।
तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम् ।।' इति ।

अत्र कल्पानां राजसादिविभागः । तथा विभागश्च तत्तत्कल्पेषु ब्रह्मणस्तत्तद्गुणप्राचुर्यादेव । तत्तत्कल्पेषु तेन प्रणीतानां पुराणानां परस्परविरुद्धतत्तद्देवतोत्कर्षापकर्षप्रख्यापनपराणां कार्त्स्न्येन प्रामाण्यायोगे सति तेषु हेयोपादेयविशेषपरिज्ञानाय वक्तृगुणानुगुणबलाबलसूचनार्थत्वेन सप्रयोजनत्वात् प्रकारान्तरेण राजसादिविभागस्य निष्प्रयोजनत्वात्, अतस्तेषां प्रमाणाप्रमाण-व्यवस्थानुकूलवक्तृगुणदोषोद्धाटनपर्यवसायित्वाक्सायाच्च । तथाच कल्पानां राजसादिविभागेन पुराणानां तत्तत्कल्पेषु ब्रह्मप्रोक्तत्वोपवर्णनेन च सामान्यतः पुराणानां वक्तृगुणानुगुणबलाबलविभागे सूचिते किंदेवतापरं पुराणं किंगुणकेन ब्रह्मणा प्रोक्तमिति विशिष्य जिज्ञासायां **'अग्नेश्शिवस्य माहात्म्यमि'**त्यादिकेन च

तमोनिरुद्धतत्त्वावबोधकेन निर्मितत्वात् तामसानि शैवपुराणान्यप्रमाणत्वेन ख्यापितानि। नन्वेकेषामप्रामाण्यमापादयदिदमेव वचनं तैर्बाध्यं किं न स्यात्, भूयसां बलीयस्त्वात् ब्रह्मणस्तमोवश्यत्वे पुराणानां च केषांचित्तदवस्थायां तेन निर्मितत्वेन तामसत्वे इदमेव वचनं तामसं किं न स्यात्, उच्यते-- नैतद्वचनविरोधात्तेषां बाधः । किं तु परस्परविरोधादेव कृत्स्नपुराणानामर्थनिर्णायकत्वशक्तिविरहे सति किं तानि कार्त्स्न्येन त्याज्यानि, उत कानिचित्स्वीकार्याणीत्यपेक्षायां सत्त्वादिमूलत्वलक्षणवैषम्यपरमिदं वचनम् । अतो न भूयसां बलीयस्तयास्य वचनस्य बाधः । उदाहृतवचनस्य चापवादकाभावात्, । **'यो ह खलु वा वास्ये'**त्यादिमैत्रायणीयश्रुत्या तत्तद्गुणत्वेनाभिहितस्य तत्तद्देवताविशेषस्य प्रतिपादकानां प्रबन्धानां तत्तद्गुणमूलत्वस्य औचित्यरूपेण वस्तुसामर्थ्येन स्वतस्सिद्धस्य प्रामाण्यस्य स्थिरीकरणाच्च नाप्रामाण्यहेभूततमोमूलत्वशङ्कापीति । अत्रोदाहृतमात्स्यवचनजातस्य सर्वपुराणानामविरोधेन प्रामाण्योपपादनपरत्वव्यवस्थापनाय तद्विरोधादेव तावत् परमशिवसंहाररुद्रविवेकावधारणशून्यानां परेषामयमयुक्तश्शैवपुराणानामप्रामाण्याभिमान इति स्ववाग्वज्रेणैव वृत्रवत् परेषामभिहतिमभिप्रेत्याह--

यदन्योन्याधिक्यं विधिहरिहराणां विदधतां
पुराणानां मात्स्यं गतिमभिदधौ कल्पभिदया ।
तदप्रामाण्यं त्वन्महिमवचसां वक्ति वच इ
त्यसभ्यानस्थाने मुखरयति मोहः पशुपते ।।४७।।

अयं भावः-- उदाहृतवचनजातं ब्रह्मविष्णुरुद्राणां परस्परस्मादुत्कर्षं विभावयतां पुराणानां भिन्नभिन्नकल्पवृत्तान्तविषयत्वप्रदर्शनेनाविरोधेन सर्वपुराणप्रामाण्योपपादनपरं, न तु केषां चिदप्रामाण्यापादनपरम् । तथा हि यथा ग्रीष्महेमन्तादीनाम् उष्णागमहिमागमानामुष्णत्वादिव्यपदेशः तत्तत्कालेषूष्णतुहिनाद्युत्कर्षात्, यथा च पुरुषाणां सात्त्विकादिव्यपदेशः तत्तत्पुरुषेषु सत्त्वादिगुणोत्कर्षात्, एवं **'सङ्कीर्णास्साात्त्विका'** इत्यादिश्लोकेन कल्पानां सात्त्विकादिविभागस्तत्तत्कालेषु परमशिवाज्ञाबलात् सत्त्वाद्युत्कर्षादेव, न तु तत्तत्कल्पावस्थायिनो ब्रह्मणस्तत्तद्गुणोत्कर्षात्, तत्र तथा कण्ठोक्त्यभावात् । प्रयोजनानुरोधात् तथा विभागाभिप्रायः कल्प्यत इत्यप्ययुक्तम् । मात्स्य एव -

'पुराणसङ्ख्यामाचक्ष्व सूत विस्तरतः क्रमात् ।
दानधर्मविशेषं च यथावदनुपूर्वश'

इति प्रश्नोत्तरे सर्वपुराणानामदृष्टार्थदानविधिप्रपञ्चनं

'पुराणं मानवो धर्मस्साङ्गो वेदश्चिकित्सितम् ।
आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ।।'

इत्यादिपुराणमात्रप्रामाण्यस्मरणम् अविगीतमहाजनपरिगृहीतत्वं चानादृत्य केषांचित्पुराणानां भ्रान्तिमूलत्वकल्पनस्य परेषां वैदिकमार्गप्रद्वेषमात्रविजृम्भितस्य प्रयोजनवत्त्वस्यैवायोगात् परमते शैवपुराणानां प्रधानस्य (१. प्रामाणिकस्य इति पा०) भूयसश्चार्थस्य बाधेन सर्वथैवाप्रामाण्यस्यावर्जनीयत्वात् । अस्मदुक्तरीत्या सात्त्विकादिकल्पविभागस्य औत्सर्गिकसकलवैदिकसम्मतनिखिलपुराणप्रामाण्योपपादनेन तत्रैव **'तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम् ।'** इति सात्त्विककल्पवाक्यशेषात्, कौर्मे सात्त्विककल्पान् प्रस्तुत्य

'ध्यानं तपस्तथा ज्ञानं लब्ध्वा तेष्वेव योगिनः ।
आराध्य मां च गिरिशं यान्ति तत्परमं पदम् ।'

इति वचनाच्च, तपश्चरणादीनामुत्कृष्टापकृष्टकालप्रदर्शनेन च सप्रयोजनत्वाच्च । न च **'यस्मिन् कल्पे तु यत्प्रोक्तमि'**त्यनन्तरश्लोकः पुराणानां तत्तत्कल्पेषु ब्रह्मप्रणीतत्वविधिपरः । किं तु तत्तत्कल्पेषु ब्रह्मणा प्रणीतानि परस्परविरुद्धदेवतोत्कर्षप्रख्यापनपराणि पुराणान्यनूद्य तेषां तत्तत्कल्पविशेषप्रवृद्धदेवताविशेषमहिमवर्णनात्मकत्वविधिपरः । **'तद्वृत्तमेवकारश्च स्यादुपादेयलक्षणम्'** इत्यभियुक्तोक्तेः । यद्यपि तत्र श्लोके **'तस्य तस्य तु माहात्म्यमि'**ति तत्तत्कल्पमाहात्म्यवर्णनमात्रविधिरेव प्रतीयते, तथापि पुराणानां स्वरूपेण कल्पमाहात्म्यवर्णनार्थमप्रवृत्तेः तेषु देवताविशेषमाहात्म्यवर्णनस्यैवोपलम्भात्, **'अग्नेश्शिवस्य माहात्म्यमि'**ति अनन्तरसन्दर्भानुरोधाच्च वर्षादिवर्णनं तत्कालप्रवृद्धवृष्ट्यादिप्रचुरितकुसुमफलपल्लवादिपरिष्कृततरुलतादिवर्णन इव तत्तत्कल्पमाहात्म्यवर्णनपरत्वविधिस्तत्तत्कालोद्रिक्तगुणानुगुणदेवतामहात्म्यवर्णनात्मत्वविधावेव पर्यवस्यति । एवं चानन्तरश्लोके प्रतिपाद्यमानोऽर्थः परमत एव न सङ्गच्छेत इति तत्सङ्गत्यनुरोधादपि सात्त्विकादिविभागोऽस्मदुक्तरीत्यैवास्थेयः।

ननु, यथानन्तरश्लोकविधेयार्थस्वारस्यात् सात्त्विकादिविभागः पुराणानां

कार्त्स्न्येन प्रामाण्योपपादनप्रयोजनः प्रतीयते, तथा तदनुवाद्यार्थस्वारस्यात् तेषां प्रमाणाप्रमाणविवेकार्थस्स इत्यपि प्रतीयत इति चेत्, प्रतीयताम् । तथापि सति विरोधे विधेयार्थस्वारस्येनैवार्थनिर्णयो युक्तः, नानुवाद्यस्वारस्यानुरोधात् । विधेयस्य तात्पर्यगोचरत्वेन प्रबलत्वात् । अत एव जातकर्ममरणेष्टिवाक्ययोर्जनन-मरणानुरूपनिमित्तानुवादस्वारस्यात् पुरुषस्य देहतुल्यकालत्वप्रतीतावपि उदर्कोपयोगिजातकर्ममरणेष्टिरूपकर्मविधिसामर्थ्यसिद्धस्य पुरुषस्य देहान्तारनुयायित्व-स्यावश्यम्भावात् तस्य जननमरणानुवादो देहोपाधिना भाक्त इति सिद्धान्तितं भगवत्पादैः **'चरचरव्यपाश्रयस्तु स्याति'**त्यधिकरणे । वस्तुतस्तु तत्कल्पविशेषेषु पुराणानि ब्रह्मणा न प्रणीतानि, किन्तु सर्गाद्यकृतयुगे वेदप्रवर्तनसमये अविभक्तपाद्मादिप्रभेदोऽयं पुराणस्कन्धः शतकोटिप्रविस्तरः युगपदेव तेन प्रणीतः, तस्यैव पुनस्त्रेतायां ब्रह्मादिभिरष्टादशभिः ऋषिभिरष्टादशधा विभज्य ग्रन्थकोट्या संक्षेपः कृतः । तस्यैव पुनर्द्वापरान्ते चतुर्लक्ष्या वेदव्यासेन संक्षेपः कृतः । मात्स्य एव

'पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरं तु वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ।
पुराणमेकमेवासीत् शतकोटिप्रविस्तरम् ।'

इत्यारभ्य

'तदर्थोऽत्र चतुर्लक्षैस्संक्षेपेण निवेशितः ।'

इत्यन्तेन तथाप्रतिपादनात् , । धर्मसंहितायामपि

'ब्रह्ममेव कृते चाद्ये पुराणं धर्मसंहितम् ।
अष्टादशविधं तच्च कृतं कोटिप्रभेदतः ।।'

इत्यादिना तथाप्रतिपादनाच्च । तथा च तदनुरोधात् **'यस्मिन् कल्प'** इति वचनं कल्पभेदेषु पुराणविशेषाणां प्रवचनमात्रपरं, न प्रणयनपरम् । **'तेन प्रोक्तमि'**ति पाणिनिसूत्र इव प्रोक्तपदेन प्रवचनमात्रसमर्पणादिति नानुवादस्वारस्यादपि सात्त्विकादिविभागः पराभिमतप्रयोजन इति प्रतीयते । अन्ये तु सर्गाद्यकृतयुगेऽपि ब्रह्मणा पुराणस्कन्धो न प्रणीतः, किन्तु तदानीं वेदैस्सह परमेश्वरात् गृहीत्वा तेन प्रवर्तितः , **'यो वै वेदांश्च प्रहिणोति तस्मै'** इति चशब्देन पुराणस्कन्धस्य समुच्चयात्, **'तस्मै वेदान् पुराणानि दत्तवानग्रजन्मने'** इति तदुपबृंहणदर्शनात् ;

'अस्य महतो भूतस्य निश्श्वसितमेतत् यदृग्वेदो यजुर्वेदस्सामवेदोऽथर्वणवेद

इतिहासपुराणमि'त्यादिश्रुत्या

'अष्टादशानामेतासां विद्यानां भिन्नवर्त्मनाम् ।

आदिकर्ता कविस्साक्षात् शूलपाणिरिति श्रुतिरि'ति तदुपबृंहणेन -

'भूयस्स भगवान् ध्यात्वा चिरं शूलवरायुधः ।

असृजत्सर्वशास्त्राणि महादेवो महेश्वरः'।।

इत्यादिना

'इत्येताश्शङ्करप्रोक्ता विद्यास्शब्दार्थसंयुताः ।'

इत्यन्तेन राजधर्मवचनेन सर्वविद्यास्थानानामपि परमेश्वरकर्तृकत्वप्रतिपादनाच्चेति वदन्ति । तत्पक्षे तु न कथञ्चिदपि कृतचोद्यावकाशः। तस्मात्तत्तद्गुणोत्कर्षकालत्वेन कल्पानां सात्त्विकादिविभागपरः **सङ्कीर्णास्सात्त्विका** इत्यादिश्लोकः । **'यस्मिन् कल्पे त्वि**'त्यादिश्लोकस्तु पुराणानां तत्तद्गुणोत्कर्षप्रचुरितकल्पभेदप्रवृत्त-तत्तद्देवतामाहात्म्यवर्णनपरत्वेन

'यथर्तुष्वृतुलिङ्गानि नानारूपाणि पर्यये ।

दृश्यन्ते तानि तान्येव तथाभावा युगादिषु ।।'

इत्यादिपौराणिकश्लोकवदविरोधप्रदर्शनपर इत्येव युक्तम् । एवं प्रदर्शितमविरोधं सत्त्वाद्युत्कर्षसमयेषु तत्तदुपाधिगुणमूर्त्युत्कर्षस्य औचित्यरूपेण वस्तुसामर्थ्येन उपपादयितुं देवतान्तराणामपि केषां चित् कल्पभेदेषूचितोत्कर्षप्रयोजकमुपाधिविशेषं च दर्शयितुम् **'अग्नेश्शिवस्य माहात्म्यमि**'त्यादि, न तु परोक्तरीत्या किंगुणकेन ब्रह्मणा प्रोक्तं पुराणं किंदेवतापरमिति जिज्ञासायां तद्विशेषं कथयितुम् । **'सात्त्विकेष्वथ कल्पेष्वि**'त्यत्र कल्पग्रहणेन सात्त्विकादिशब्दानां कल्पपरत्वेन पुराणपरत्वाभावात् । कल्पविशेषेषु च **'माहात्म्यमधिकं हरेरि**'ति स्वतस्सम्भविन एव माहात्म्याधिक्यस्य प्रतिपादनान्निराकाङ्क्षवाक्ये 'निगद्यत' इत्यादिपूर्ववाक्यश्रुतक्रियानुषङ्गकल्पनायोगात् पूर्ववाक्येषु **'प्रकीर्त्यते विदुर्निगद्यत'** इति क्रियाश्रवणेन तामसकल्पे असन्नप्यग्नेरुत्कर्षः कीर्त्यते परमित्यादिक्रमेण पूर्ववाक्यानां कथञ्चिन्नेतुं शक्यत्वेऽपि **'सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेरि**'ति हरेरुत्कर्षस्य कल्पविशेषे व्यवस्थाप्रतिपादनप्रदर्शनेन पूर्ववाक्यानामपि देवताविशेषमहिम्नां कल्पविशेषव्यवस्था-प्रतिपादनपरत्वावसायात्,

'असङ्ख्यातास्स्मृताः कल्पाः ब्रह्मविष्णुशिवात्मकाः ।

कथिताश्च पुराणेषु मुनिभिः कालचिन्तकैः ।।
सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ।
तामसेषु महेशस्य राजसेषु प्रजापतेः ।।'
इति कौर्मे,
'क्वचित् ब्रह्मा क्वचिद्रुद्रः क्वचिद्विष्णुः प्रशस्यते ।
नानेन तेषामाधिक्यं न्यूनत्वं वा कथंचन ।
तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः।
तानि तानि प्रणीतानि विद्वांस्तत्र न मुह्यति ।'

इति वायुसंहितायां च स्फुटमेव कल्पभेदेन ब्रह्मादीनामुत्कर्षापकर्षप्रतिपादनाच्च । तस्मात्परोदाहृतवचनैरेव सर्वपुराणानां प्रामाण्यव्यवस्थापनात् तद्विरोधादेव न युक्तः परेषां केषांचित् पुराणानामप्रामाण्याभिमानः । किंच तेषां परोक्तार्थपरत्वेऽपि शैवपुराणादीनां तमोगुणाद्युपाधिकब्रह्मप्रणीतत्वमात्रं सिध्येत्, न त्वप्रामाण्यं केषां चित्।

'ज्ञानमप्रतिमं यस्य वैराग्यं च जगत्पतेः ।
ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम् ।'

इति ब्रह्मणोऽव्याहतज्ञानशक्तिकत्वस्य स्मरणात् ब्रह्मणः पुराणविशेष-प्रणयनोपाधिभूतस्यापि तमसः परब्रह्मणः संहर्तृत्वोपाधिभूतस्येव तत्त्वज्ञानप्रति-बन्धकत्वायोगात् प्रयोगमूलज्ञानमदूषयतश्च प्रयोगाप्रामाण्यानापादकत्वात्। यदि च ब्रह्माप्यस्मदादिवत् तमसा प्रतिबद्धतत्त्वज्ञान इति तत्कृतपुराणेषु कानि चिदप्रमाणानि स्युः, तदोदाहृतमात्स्यवचनेष्वपि तथात्वशङ्काया दुर्निवारत्वात् कथं तैः किञ्चिदर्थव्यवस्थासिद्धिः । यत्त्वपवादकवचनादर्शनात् तेषामौत्सर्गिक- प्रामाण्यानपाय इति, तदप्ययुक्तम् ।

'एकत्र तु पुराणानि सेतिहासानि कृत्स्नशः ।
एकत्र वेदः परमः एतदेवातिरिच्यते ।
धर्मनैपुण्यकामानां ज्ञाननैपुण्यकामिनाम् ।
इदं पुराणं मुक्त्वैकं नास्त्यन्यत्साधनं परम् ।'

इत्यादिकौर्मपठिततत्तत्पुराणोत्कर्षप्रतिपादकानेकापवादकश्रवणात् ।

यदपि वस्तुसामर्थ्यनौचित्यलक्षणेनाप्रामाण्यमेषां स्थिरीकृतमिति, तदपि तुच्छम्। भारतादिष्वसुरादिवृत्तान्तं वर्णयतोऽपि व्यासस्य सात्त्विकत्वेन

प्रतिपाद्यगुणानुरोधेन वक्तृगुण इत्यौचित्यस्यासिद्धेः । न च तामसत्वेनापकर्षयोग्यस्य उत्कर्षं वर्णयतः तामसत्वमुचितम् इत्येवमादिक्रमेण औचित्यं विवक्षितमि'ति वाच्यम् । संहाररुद्रस्यापि लोकसंहारार्थं तमःपरिग्रहस्यापकर्षहेतुत्वासम्भवात् । यथा चैतत्, तथा गुणमूर्तीनां साम्यव्यवस्थापनस्थले प्रतिपादयिष्यते। एतेन वैष्णवनारदीयगारुड-भागवतपाद्मवाराहपुराणानि सात्त्विकानि, ब्राह्मब्रह्माण्डब्रह्मकैवर्तमार्कण्डेय-भविष्यद्वामनपुराणानि राजसानि, लैङ्गशैवाग्नेयस्कान्दकौर्ममात्स्यानि तामसानि । अतस्तामसैः लैङ्गादिभिरुक्तं न ग्राह्यमिति केषां चिदर्वाचीनानां स्त्रदेशिकाभिप्रायविरुद्धसात्त्विकादिविभागोऽपि प्रत्याख्यातः । तस्य सत्त्वाद्युद्रिक्त-वक्तृकत्वादिविषयत्वासिद्धेः । सत्त्वादिगुणकदेवतापरत्वविषयत्वेऽस्माकं हान्यभावात्, सात्त्विकत्वेनाभिमते गारुडे शिवरहस्ये पाद्मे शिवराघवसंवादाद्यनेकप्रदेशेषु च लैङ्गादिभ्योऽप्यधिकशिवोत्कर्षव्यवस्थापनदर्शनेनानेन विभागेन परदुराशानिर्वहणा-योगाच्च । यत्तु पुलस्त्यवरदानलब्धदेवतापारमार्थ्यवेदनेन पराशरेणोपदिष्टत्वात् जगत्कारणवस्तुविषयसामान्यप्रश्ने

'विष्णोस्सकाशादुद्भूतं जगदेतच्चराचरम् ।।'

इत्याद्युत्तरक्रमेणावतीर्णत्वेन देवताविशेषमहिमविषयप्रश्नोत्तरसन्दर्भरूपपुराणान्तरवत् **'न बुद्धिभेदं जनयेदि**'ति न्यायेन प्रष्टुरभिमतार्थो बहूकृत इति नेतुमशक्यतयानन्यथासिद्धत्वाच्च विष्णुपुराणं सर्वपुराणेभ्यः प्रबलमिति परे कल्पयन्ति, तन्निराकरणमतिक्षोदीय इत्युपेक्षितम् । न हि पराशरादप्युत्कृष्टज्ञानशक्तिभिः ब्रह्मविष्णुरुद्रैः

'अनाद्यन्तं परं ब्रह्म न वेदा नर्षयो विदुः।
एकस्तद्वेद भगवानादित्यो ज्योतिषां पतिः ।।'

इत्यादिवचनप्रतिपन्नपरतत्त्वावबोधैरादित्यादिभिश्च पराशरेणापि च कृताश्शैवपुराणेषु शिवस्य तत्रतत्र परभावोपदेशा न दृश्यन्ते । न वा वायुसंहितादिषु परतत्त्वसामान्यप्रश्ने शिव एव परतत्वमिति निर्धारणरूपोत्तरक्रमेण अवतारणानि नोपलभ्यन्ते । इयांस्तु विशेषः--विष्णुपुराणे प्रष्टुरेकस्य प्रागेव शिष्यभूतस्य परिचितहृदयेन गुरुणा सामान्यप्रश्नेऽपि तदीयपूर्वसिद्धभक्तिवर्धनाय तदनुकूलविशेष-विषयमुत्तरमुक्तमिति शक्यं वक्तुम् । वायुसंहितायां तु परस्परं विवदमानाना-मनेकेषामृषीणां प्रश्ने प्रवृत्तमुत्तरं न तथा नेतुं शक्यमिति । तस्मात् पुराणानां नैवं बलाबलविभागो युक्त इति तत्र तत्रास्माभिरुद्भावितैर्न्यायैः शिवपुराणान्येव

बलवत्तराणीति स्थितम् । एतेन शिवागमानामप्रामाण्यप्रलापोऽपि मूर्खानां गलहस्तितः। प्रमाणमूर्धन्येषु शैवपुराणेषु बहुधा तेषां बहूकरणात् कण्ठोक्त्या केषुचित् प्रामाण्यव्यवस्थापनाच्च ।

स्यादेतत्-- महाभारते -

'साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै ।।'

इति वचनात् पाशुपतागमानां साङ्ख्ययोगादिवत् वैदिकप्रस्थानात् प्रस्थानान्तरत्वं प्रतिपन्नम् । तथाभूतानां च तेषां ब्रह्ममीमांसायां तर्कपादे सह साङ्ख्ययोगपाञ्चरात्रैः प्रामाण्यं निराकृतम् । कूर्मपुराणे---

'एवं सञ्चोदितो रुद्रो माधवेन मुरारिणा ।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ।
कापालं लागुडं शाक्तं भैरवं पूर्वपश्चिमम् ।
पाञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः ।।' इति ।
'बुद्धश्रावकनिर्गन्धाः पाञ्चरात्रविदो जनाः ।
कापालिकाः पाशुपताः पाषण्डा ये च तद्विधाः ।।
यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तामसाः ।
न तस्य तत् भवेच्छ्राद्धं प्रेत्येह च न तत्फलम् ।
वामाः पाशुपताचारास्तथा वै पाञ्चरात्रिकाः ।।
भविष्यन्ति कलौ तस्मिन् ब्राह्मणाः क्षत्रियास्तथा।' इति च तेषां सह शाक्तपाञ्चरात्रादिभिर्मोहशास्त्रत्वमाविष्कृतम् । अतः कथं तेषां प्रामाण्यं सङ्गच्छत इति, उच्यते-- द्विविधस्तावत् पाशुपतागमः श्रौतः, अश्रौतश्च । कौर्म एव

'निर्मितं हि मया पूर्वं श्रौतं पाशुपतं शुभम् ।
गुह्यात् गुह्यतमं सूक्ष्मं वेदसारं विमुक्तये ।।'

.त्यारभ्य

'एष पाशुपतो योगस्सेवनीयो मुमुक्षुभिः ।
भस्मच्छन्नैर्हि सततं निष्कामैरिति हि श्रुतिः ।'

इत्यन्तेन श्रौतपाशुपतस्य, तदनन्तरम्--

'अन्यानि चैव शास्त्राणि लोकेऽस्मिन् मोहनाय वै ।।

वेदवादविरुद्धानि मयैव कथितानि तु ।
वामं पाशुपतं सोमं लागुडं चैव भैरवम् ।।
न सेव्यमेतत् कथितं वेदबाह्यं तथेतरत् ।।'

इत्यश्रौतपाशुपतस्य च शिवेन विविच्य प्रदर्शनात् । वायुसंहितायां च

'शैवागमोऽपि द्विविधश्रौतोऽश्रौतश्च संस्मृतः ।।
श्रुतिसारमयः श्रौतस्स्वतन्त्र इतरो मतः ।
स्वतन्त्रो दशधा पूर्वम्'इत्यारभ्य -
'श्रुतिसारमयोऽन्यस्तु शतकोटिप्रविस्तरः ।
परं पाशुपतं यत्र व्रतं ज्ञानं च कथ्यते ।।'

इत्यन्तेन श्रौताश्रौतविभागस्य स्पष्टं प्रतिपादनात् । एवं च यानि पाशुपतागमप्रवेशनिन्दावचनानि, तानि वैदिककर्माधिकृतानामश्रौतागमप्रवेशविषयाणि ।

'न सेव्यमेतत् कथितं वेदबाह्यं तथेतरत् ।'

इति वचनैकार्थ्यात् । यच्च भारतवचनमुदाहृतं, तदव्यश्रौतपाशुपतविषयम् । श्रौतपाशुपतस्याथर्वशिरः कालाग्निरुद्रोपनिषदाद्युपदिष्टपाशुपतशाम्भवादिसंज्ञक-परमवैदिकव्रतप्रपञ्चनैदम्पर्येण प्रवृत्तस्य वैदिकमार्गात् भिन्नमतत्वाभावात् । यच्च **'पत्युरसामञ्जस्यादि'** त्यत्र पाशुपतप्रामाण्यनिराकरणं, तदप्यश्रौतपाशुपतविषयम् । ईश्वरस्य केवलनिमित्तत्ववादः खलु तत्र निराकृतः । स च तत्रैव प्रसिद्धः, न तु श्रौतपाशुपते। वायुसंहितायां श्रौतपाशुपतार्थसंग्रहे--

'शक्त्यादि च पृथिव्यन्तं शिवतत्त्वसमुद्भवम् ।
तेनैकेन तु तव्द्याप्तं मृदा कुम्भादिकं यथा ।'

इत्युपादानत्वस्यापि प्रतिपादनात् कटकमकुटादीनां सुवर्णोपादानकत्वेन सौवर्णत्वव्यपदेशवत् सर्वेषामपि भावानां भवोपादानकत्वेन भावत्वव्यपदेश इति शैवशास्त्राभियुक्तप्रसिद्धेश्च । तस्माद्वेदान्तरहस्यार्थनिष्कर्षरूपत्वात्

'पुराणं तर्कशास्त्रं च छन्दोऽलङ्कारलक्षणम् ।
वेदमीमांसिकां दत्वा शिवधर्मं च वै नृप ।' इति,
'सप्तद्वीपपृथिव्यास्तु राजराजो भवेत्सु सः ।'

इति वराहपुराणादिषु तद्दानप्रशंसनात्, योगयाज्ञवल्क्यादिषु--

'स एव मुक्त इत्युक्तस्तान्त्रिकेष्वपि शिक्षितैः ।'

इत्यादिना स्वोपदिष्टार्थसंवादित्वेन बहुशो ग्रहणाच्च प्रमाणमूर्धन्यानि श्रौतानि पाशुपततन्त्राणीति निरवद्यम् । न चाश्रौतपाशुपतादीनामपि सर्वथाऽप्रामाण्यम् ।

'साङ्ख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा ।
आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिः ।'

इति भारतवचनेन शिवकेशवादिप्रणीतानां स्वतन्त्रागमानामपि वेदवत् प्रामाण्यव्यवस्थापनात्, क्वचिद्वैदिकमार्गविरुद्धे वामाचारतप्तमुद्राङ्कनाद्यनुष्ठेयांशे

'स्वतन्त्रा ह्यागमास्सर्वे निर्मूलैः परिकीर्तिताः ।
अधिकारिविशेषेण प्रवृत्ता न हि संशयः ।'

इत्यादिमानवपुराणोक्तरीत्या अधिकारिविशेषविषयत्वस्य, तादृशतटस्थेश्वर-जीवोत्पत्त्यादिवस्त्वंशे

'ब्रह्मविष्णुमहादेवप्रमुखैः परिकीर्तिताः ।
आगमाश्चानया नेया दिशा नैवान्यथा बुधाः ।
अन्यथा ते तु नेयाश्चेद्विरुद्धास्स्युर्न संशयः ।।'

इत्यादिमानवपुराणोक्तरीत्या श्रुत्यविरुद्धार्थे कथंचित्तात्पर्यस्य, तावन्मात्रे उदाहृतोदाहरिष्यमाणकौर्मवचनोक्तरीत्या तामसजनव्यामोहनार्थविप्रलम्भमूलत्वस्य वा कल्पनया सर्वथा अप्रामाण्यवारणेन प्रामाण्यव्यवस्थापनसम्भवे महापुरुषप्रणीतानां तेषां सर्वथैवाप्रामाण्यकल्पनायोगाच्च । भागवते अक्रूरस्तोत्रे **'त्रय्या च विद्यया केचित्'** इत्युपक्रम्य -

'त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणम् ।
बह्वाचार्यविभेदेन भगवन् समुपासते ।।'

इत्यादिना तेषामधिकारिविभेदेन प्रामाण्यविभावनाच्च । स्वतन्त्रागमोदितेष्वाचारेषु केऽधिक्रियन्त इति चेत्,उच्यते --

शापाद्वा गौतमादीनां पापाद्वा महतो नराः ।
ये गता वेदबाह्यत्वं ये च सङ्कीर्णयोनिजाः ।
तेऽधिक्रियन्ते तन्त्रेषु स्त्रीशूद्राश्च यथायथम् ।
अनुग्रहार्थमेतेषामागमा निर्मिताः पुरा ।।

तथाहि -- तत्र तावन्महापुरुषशापापादितवैदिकमार्गबहिर्भावानां तन्त्राधिकारः कौर्मे

स तेषां मायया जातं गोवधं गोतमो मुनिः ।
केनापि हेतुना ज्ञात्वा शशापातीव कोपनः ।

भविष्यथ त्रयीबाह्या महापातकिभिस्समाः ।।'
इत्यादिना गौतमशप्तान् प्रस्तुत्य
'सर्वे सम्प्राप्य देवेशं शङ्करं विष्णुमव्ययम् ।
अस्तुवन् लोकिकैस्स्तोत्रैः उच्छिष्टा इव सेवकाः।'
इत्यादिना शिवकेशवसन्निधौ तेषां गतिप्रार्थनां प्रदर्श्य
तस्माद्वै वेदबाह्यानां रक्षनार्थं च पापिनाम् ।
विमोहनाय शास्त्राणि करिष्यावो वृषध्वज ।
एवं संचोदितो रुद्रो माधवेन मुरारिणा ।
चकार मोहशास्त्राणि केशवो पि शिवेरितः ।।
इत्यादिना तेषां कथञ्चित् गतिप्राप्तये ताभ्यां पाशुपतपाञ्चरात्रादयः प्रणीता इति वर्णनेन दर्शितः । अत्र प्रागुक्तरीत्या क्वचित्क्वचिदंशे विप्रलम्भमूलत्वमप्यस्तीति पापिनां विमोहनायेति मोहशास्त्रत्वोक्तिः । दुष्करप्रायश्चित्तपापापादित-वैदिकमार्गवहिर्भावानां तन्त्राधिकारस्साम्बपुराणे दर्शितः --
'श्रुतिभ्रष्टः श्रुतिप्रोक्तप्रायश्चित्ते भयं गतः ।
क्रमेण श्रुतिसिध्यर्थं मनुष्यस्तन्त्रमाश्रयेत् ।
धर्मशास्त्रे पुराणे च प्रोक्तं हि मरणान्तिकम् ।
प्रायश्चित्तं मनुष्याणां पापिष्ठानां सुदारुणम् ।
भयं दुर्बलचित्तानां मरणे जायते भृशम् ।।
तेषामैवाभिरक्षार्थं खल्वहं तन्त्रमुक्तवान् ।।' इति ।
सङ्कीर्णयोनिजानां तत्राधिकारोऽपि कौर्मे दर्शितः
'अथाशस्सात्त्वतो नाम विष्णुभक्तः प्रतापवान् ।
महात्मा दाननिरतः धनुर्वेदविदां वरः ।
स नारदस्य वचनाद्वासुदेवार्चने रतः ।
शास्त्रं प्रवर्तयामास कुण्डगोलादिभिश्श्रितम् ।
तस्य नाम्नातु विख्यातं सात्त्वतं नाम शोभनम्।
प्रवर्तते महाशास्त्रं कुण्डादीनां हितावहम् ।।' इति ।
शूद्राधिकारो भागवते दशमस्कन्धे दर्शितः --
'तेनोक्तं सात्त्वतं तन्त्रं यत् ज्ञात्वा मुक्तिभाग्भवेत् ।
यत्र स्त्रीशूद्रदासानां संस्कारो वैष्णवस्स्मृतः।'

एवं सूतसंहितादिषु च तन्त्राणामधिकारिविशेषप्रतिपादनं द्रष्टव्यम् । यत्तु वासिष्ठलैङ्गे --

'मत्तन्त्राश्रयणेनैवमत्पूजा च कृता त्वया ।
तया न प्रीतवानस्मि तव शाण्डिल्य मे प्रिय ।।
कुमार्गेणापि शाण्डिल्य कृता पूजा मम त्वया।
अतः कालेन महता वेदमार्गं गमिष्यसि ।।'

इति पाञ्चारात्रदीक्षाप्रविष्टं शाण्डिल्यं प्रति भगवतो निन्दावचनं, तत् चतुर्वेदेषु परं श्रेयोऽलब्ध्वा शाण्डिल्य इदं शास्त्रमधीतवानिति पाञ्चरात्र एव श्रवणात् सति वैदिकमार्गाधिकारे तं विहायान्यत्र प्रविष्ट इति अनौचित्याभिप्रायं, न तु तदप्रामाण्याभिप्रायम् ।

'को वा वर्णाश्रमाचारं श्रौतं त्यक्तुं त्वया विना ।
शक्तः पापबलात् त्यक्तः नास्ति ते निष्कृतिश्श्रुतौ ।।'

इति तत्रैव स्फुटीकरणादित्यलमतिप्रसङ्गेन । एतेनागमेषु पाञ्चरात्रस्य बलीयस्त्वं ब्रुवाणाः प्रत्युक्ताः । उक्तरीत्या वेदार्थसारसंग्रहात्मकानां क्वचिदपि दोषशङ्का-कलुषरहितानां शैवागमानामेव सर्वागमेभ्यो बलवत्त्वव्यवस्थितेः । एवं च बहुधोपवर्णितैर्न्यायैः शिवपुराणानामेव श्रुतिस्मृत्यागमानां सर्वतः प्राबल्यस्य वज्रलेपायितत्वेन तैस्तस्यैव सर्वकारणत्वसर्वान्तर्यामित्वादिव्यस्थितौ तदनुरोधेन देवतान्तरोत्कर्षपराश्श्रुत्यादयो नेयाः, न त्वत्र वैपरित्यचोद्यावकाश इति सिद्धम्।।४७।।

।। इति शिवपुराणशैवागमयोरप्रामाण्यनिरासः ।।

स्यादेतत्, भवतु प्रबलश्रुत्याद्यनुरोधेन **'सर्वं तदिन्द्र ते वश'** इत्याद्यर्थवादमात्रस्य, स्तावकत्वेनान्यथानयनम् । सुबालोपनिषदादिषु श्रुतिषु गीता-विष्णुपुराणादिषु च सृष्टिप्रलयादिप्रकरणेष्वेव नारायणस्य यत् सकलभुवनसर्ग-प्रलयस्वातन्त्र्यसर्वान्तर्यामित्वादिरूपपरमैश्वर्यप्रतिपादनं, तस्य कथमन्यथानयनं कर्तव्यमिति तत्प्रकारं व्युत्पादयति ---

तवैश्वर्यं चक्रिण्यपि तदवतारेष्वपि परं
तदंशत्वेनैक्यात् परमुपदिशन्ति श्रुतिगिरः ।
अमूषामेतावन्मुनिभिरुदितं मर्म भगवन्
अबुध्वैतन्मौढ्यात् भ्रमतमसि मज्जन्ति विवशाः ।।४८।।

अयं भावः --

ब्रह्मा विष्णुर्गिरीशश्च श्रीशम्भोरखिलेश्वरात् ।
न भिद्यन्ते तदंशत्वादवतारा हरेरिव ।
एवं सत्यवतारस्य कृष्णादेः कीर्तने यथा ।
तदीयत्वेन कीर्त्यन्ते महाविष्णोर्गुणा अपि ।
एवं शिवस्य कीर्त्यन्ते तदंशेष्वेकताधिया ।
सर्वकर्तृत्वसर्वान्तर्यामित्वप्रमुखा गुणाः ।।
'सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ।'
इत्यादयो हि गीतादिपठिताः कृष्णसूक्तयः ।
तस्मिंस्तेनैव रूपेण न युज्यन्ते कथंचन ।।
तस्मात्तस्य जगन्मूलमूलमूर्त्येकताधिया (मूर्त्यैक्यपरया धिया इति पा०) ।
इमास्सूक्तय इत्येव स्वीकर्तव्यं परैरपि ।
तथा च प्रबलैर्मानैर्जगन्मूले विनिश्चिंते ।
शाम्भवे रूप एवैषां भावविश्रान्तिरिष्यताम् ।।
एवं च सति यत् कौर्मे पुराणे किटिनं प्रति
'ज्ञानं तदैश्वरं दिव्यं यथावद्विदितं त्वया ।।
स्वयमेव हृषीकेशः प्रीत्योवाच सनातनम् ।
गच्छगच्छ स्वकं स्थानं न शोकं कर्तुमर्हसि ।।
भजस्व परया भक्त्या शरण्यं शरणं शिवम् ।' इति भगवान् बादरायणो भगवद्गीतायाम् ऐश्वरं ज्ञानमभ्यधात् । यच्च स एव --

'नारायणोपि भगावान् देवकीतनयो हरिः ।
अर्जुनाय स्वयं साक्षाद्दत्तवानिदमुत्तमम् ।'

इति ईश्वरगीतान्ते भगवद्गीतां तदर्थग्रथनात्मिकामाचष्ट, यच्च भगवद्गीतासु भगावान् निजमूलरूपप्रदर्शनं प्रार्थयमानं पार्थं प्रति शैवं विश्वात्मकं रूपं प्रादर्शयत्, यदपि

'कामैस्तेस्तैर्हृदज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।
अन्तवत्तु फलं तेषां तत् भवत्यल्पमेधसाम्।
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।'

इत्यादिवचनान्वितं गीताशास्त्रमान्तं श्रुत्वापि

'स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ।'

इति शास्त्रान्ते गुरुं प्रत्युक्त्वापि

पार्थश्शिवभक्तिरतो नित्यं यावज्जीवमवर्तत,

यदपि भारतयुद्धमध्ये पार्थश्शङ्करायोपकल्पितं नित्यपूजोपहारं वासुदेवे अर्पयित्वा कैलासगिरावधिशिवमपश्यत्, तदेतत् सर्वं सङ्गच्छतेतराम् । भगवद्गीतोपवर्णित-जगत्कारणत्वादिमहिमजातस्य शिवपर्यवसायित्वे तस्यैश्वरज्ञानत्वस्य ईश्वरगीतार्थ-ग्रथनरूपत्वस्य च यद्रूपाभिप्रायेण जगत्कारणत्वादि वर्णितं, तद्रूपप्रदर्शनप्रार्थने कृष्णस्य शैवरूपप्रदर्शनस्य च शिवपर्यवसितमेव जगत्कारणत्वादिकं वास्तवाभेदृष्ट्या कृष्णेन **'अहं सर्वस्य प्रभव'** इत्यादिना स्वकीयत्वेन निर्दिष्टमिति तदभिप्रायनिश्चयेन शिवस्य सर्वोत्कर्षावधारणात् अर्जुनस्य यावज्जीवं तस्मिन् दृढभक्तियोगस्य चाभेदनिश्चयसत्त्वेन शिवबुध्यैव वासुदेवे शिवपूजाद्रव्यार्पणात् तस्य च निजभावानुरोधेन शङ्कराभ्याशे दर्शनेन च सामञ्जस्यस्यातिपस्ष्टत्वात् । तदेवं गीतोपवर्णितस्य परभावस्य शिवपर्यवसायित्वनिश्चये अनेनैव न्यायेन सुबालोपनिषन्नारायणानुवाकादिश्रुतिषु च वर्णितस्यापि परभावस्य शिवपर्यवसायित्वं द्रष्टव्यम् । निर्णीतं च वैष्णवश्रुतिपुराणादिष्वपि जगत्कारणत्वादिपरभावप्रतिपादनस्य शिवे पर्यवसानं भगवता पराशरेण -

'उत्कर्षो यः पुराणेषु वैष्णवेषु तु दृश्यते ।
असौ तत्वात्मना विष्णोर्न स्वरूपेण सत्तमाः ।।

सर्वकारणमीशानः साम्बस्सत्यादिलक्षणः ।
न विष्णुर्न विरिञ्चश्च न रुद्रो नापरः पुमान् ।।' इति,

'श्रुतयश्च पुराणानि भारतादीनि सत्तम ।

शिवमेव सदा साम्बं हृदि कृत्वा ब्रुवन्ति हि ।।'

इति च । एवं सूतसंहितादिष्वपि उक्तेष्वर्थेषु वचनानि द्रष्टव्यानि । सुबालोपनिषदि नारायणस्य महासर्गादिकारित्वोपवर्णनस्य शिवपर्यवसायित्वं तु परोक्तरीत्या तत्प्रापितं सर्गाद्यसमयमनूद्य शिवस्य तत्कालवर्तित्वविधायिना **'यदा तम'** इति श्वेताश्वतरमन्त्रेणापि स्पुटीकृतम् । प्रपञ्चितोऽयमर्थः प्रागेव । तदेवमृषिभिरप्यनुमोदितं सुखेनाविरोधनयनमार्गमपश्यतामेवान्यथाकल्पनाविजृम्भणानीति निष्कर्षः । मूलश्लोके श्रुतिगिर इति पुराणादीनामप्युपलक्षणम् ।।४८।।

ननु, न सर्वत्रैवं नारायणस्य जगत्कारणत्वाद्युपवर्णनस्य शिवे पर्यवसानं शक्यते वक्तुम् । महोपनिषदि - **'एको ह वै नारायण आसीन्न ब्रह्मा नेशान'** इत्यादिना ब्रह्मेशानादिसर्वेतरव्यवच्छेदेन एकस्यैव नाराणस्य सर्गादौ सद्भावं, ततो भूतेन्द्रियादिप्रपञ्चोत्पत्तिं च प्रतिपाद्य **'अथ पुनरेव नारायणस्सोऽन्यत्कामः मनसा ध्यायतः तस्य ध्यानान्तस्थस्य ललाटात्स्वेदोऽपतत् ता इमा आपस्तासु तेजो हिरण्मयमण्डमभवत्** । **'तत्र चतुर्मुखोऽजायत'** इत्यादिना, **'अथ पुनरेव नारायणस्सोऽन्यत्कामः मनसा ध्यायतस्तस्य ध्यानान्तस्थस्य ललाटात् त्र्यक्षः शूलपाणिः पुरुषोऽजायत'** इत्यादीना ब्रह्मशिवयोरपि तत्सृष्टत्वोपवर्णनस्य शिवे पर्यवसानासम्भवात् । न चात्र शिवसृष्ट्युक्तेः संहाररुद्रविषयत्वेनाविरोधान्नारायणस्य स्रष्टृत्वोपवर्णनस्य परमशिवे पर्यवसानं सम्भवतीति वाच्यम् । उपबृंहणविरोधात् । तथा हि

'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः ।।
ततः स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ।।
योऽसावतीन्द्रियग्राह्यस्सूक्ष्मोऽव्यक्तस्सनातनः ।
सर्वभूतमयोऽचिन्त्यस्स एव स्वयमुद्बभौ ।
सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत् ।
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ।।

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं प्रोक्तं तेन नारायणः स्मृतः ।।'

इत्यादिमानववचनमेतच्छ्रुतिमूलकम् । अत्रोदाहृतोपनिषत्प्रक्रिययैव करिष्यमाणनाम-निर्वचनसूचितं नारायणं स्वयम्भ्वादिशब्दितं प्रस्तुत्य तस्य महदादिपरिणतवीर्यत्वोक्त्या प्रथमं भूतेन्द्रियसर्गं सङ्क्षेपेण प्रदर्श्यानन्तरं सृष्टिप्रकाराद्यभिध्यानं स्वशरीरात् सलिलसृष्टिं तन्मध्येऽण्डसृष्टिं तत्र ब्रह्मसृष्टिं चोक्त्वा तन्मुखेभ्यश्चतुर्भ्यस्तत्तद्वस्तु-विशेषोत्पत्तिप्रतिपादनदर्शनेन मूलमूलिभावस्य स्पष्टवात् । नन्वत्र नारायणनामनिर्वचनं सन्निहितत्वात् जलमध्ये अण्डोत्पन्नत्वेन क्लृप्तावयवशक्तिकत्वाच्च ब्रह्मण्येवान्वेति, न तु स्रष्टरि स्वयम्भुवीति नोदाहृतोपनिषन्मूलत्वं युज्यते । न च सन्निधानात् प्रकरणस्य बलीयस्त्वात् प्रकरणिनि स्रष्टर्येव तदन्वयः. तत्रापि महाजलौघसृष्ट्युक्तिसामर्थ्यसिद्ध-तन्मध्यनिवाससद्भावात् अवयवार्थक्लृप्तेरिति वाच्यम् । तस्यात्र प्रकरणित्वासद्धेः, प्राधान्येन तत्प्रतिपादयिषायां लिङ्गाद्यदर्शनात् **'भूतग्रामस्य सर्वस्य ह्युत्पत्तिप्रलयं तथा ।'** इति महर्षीणां प्रपञ्चोत्पत्तिप्रलयप्रश्ने हि तन्निरूपणाय **'आसीदिदमि'**त्यादि प्रवृत्तं, न तु यतो भूतग्रामस्योत्पत्तिः , यस्मिंश्च प्रलयः, तं स्रष्टारं वदेति प्रश्ने तन्निरूपणाय प्रवृत्तम् । तस्मान्निष्परिपन्थिना सन्निधानेन नारायणनामनिरुक्तेः ब्रह्मण्येवान्वयो युक्तः । तस्यापि पुराणेषु तन्नामप्रसिद्धेः, उच्यते-- अपां नारसंज्ञाविधायकेन वाक्येन व्यवधानात् न ब्रह्मणस्सन्निधानमस्ति । किं च **'आपो वै नरसूनव'** इत्यत्र नरशब्दितस्यापां स्रष्टुस्ततोऽपि सन्निधानात् तत्रैव तन्निर्वचनान्वयो युक्तः, न ब्रह्मणि ।

'यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् ।
तद्विसृष्टस्य पुरुषो लोके ब्रह्मेति कीर्त्यते ।।'

इति तदनन्तरश्लोके तत्संज्ञाविधायके संज्ञिविशेषणवैयर्थ्यापत्तेश्च आद्यसंज्ञाविधानस्य सृष्ट्रविषयत्वे आनन्तर्यात् द्वितीयसंज्ञापि तद्विषयेति शङ्कावारणाय संज्ञिविशेणमितिवत् संज्ञाद्वयस्याप्येकविषत्वे तत्प्रयोजनासंभवात् महाप्रलयकाले तु **'एतदासीत्तमोमयम् । प्रसुप्तमिव (१.प्रसुप्तमिव चार्त्यर्थमिति पा०)**
चातर्क्यमप्रज्ञातमलक्षणम् ।
ततस्स्वयम्भूरव्यक्तः प्रभवः पुण्यकर्मणाम् ।
व्यञ्जयन्नेतदखिलं प्रादुरासीत्तमोनुदः ।
आतीन्द्रियः परोऽव्यक्तादन्तर्यामी सनातनः ।

नारायण इति ख्यातस्स एव स्वयमुद्बभौ ।
स्वशरीरादभिध्यायन् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत् ।
तदेवाण्डं समभवद्धेमरूपमयं जगत् ।

तत्र ब्रह्मा समभवति'त्यादिमात्स्यवचने समानार्थे स्त्रष्टर्येव नारायणपदप्रयोगस्य निस्सन्दिग्धत्वाच्च, बह्वर्थैकरूप्यदर्शनेन मानववचनानां महोपनिषन्मूलत्वनिश्चयेन तदनुरोधेनापि नारायणपदनिर्वचनस्य तत्रत्यनारायणपदप्रयोगविषयत्वावश्यम्भावाच्च । तथा च **'ततस्स्वयम्भूर्भगवानि'**त्यादिना प्रस्तुते देवे **'अप एव ससर्जादौ तासु वीर्यमपासृजदि'** त्येतद्वचनसामर्थ्यसिद्धजलनिवासप्रवृत्तिनिमित्तनारायणपदनिर्वचनं नारायणपदवाच्यत्वेन प्रसिद्ध एव स्त्रष्टृत्वप्रतिपादनस्य पर्यवसानं गमयति । अन्यत्र पर्यवसाने प्रवृत्तिनिमित्तानुरोधेन नारायणपदस्यापि तत्रैव पर्यवसानावश्यम्भावेन प्रसिद्धिविरोधापत्तेः । एवंचोपबृंहणानुरोधादुक्तोपनिषदि स्त्रष्टृत्व- प्रतिपादनस्यापि नारायण एव पर्यवसानमभ्युमगन्तव्यम् ।

'अहं च भवतो वक्त्रात् कल्पान्ते घोररूपधृत् ।
शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रकः ।।'

इति कौर्मे नारायणं प्रति शिववचनदर्शनात्तदनुसारेण **'तस्य ललाटात्त्र्यक्षश्शूलापाणि'**रित्यत्र तस्येत्यस्य नारायण एव पर्यवसानावश्यकत्वाच्च । नन्वस्त्वेवं, तथापि अवान्तरसर्गविशेषे कस्मिंश्चिच्चतुर्मुखस्येव नारायणस्याप्यधिकारसम्भवादुक्तोपनिषदस्तद्विषयत्वेन चरितार्थत्वात् न परमशिवस्य जगन्मूलकारणत्वविरोध इति चेन्न । अस्यां नारायणात् भूतेन्द्रियादिसृष्टेरपि प्रतिपादनदर्शनेन महाकल्पादिसर्गविषयत्वात्, **'एको ह वै नारायण आसीत्'** इति सर्वेतरव्यच्छेदेन सर्गाद्यसमयेऽवस्थानप्रतिपादनस्य नारायणादन्यस्य कस्यचित् कल्पनायामसामञ्जस्याच्च । ननु, **'सर्वाण्याख्यानानि पारिप्लवे शंसती'**ति सर्वाख्यानशंसनविधेर्वाक्यशेषश्रुतेषु **'मनुर्वैवस्वतो राजे'** त्याद्याख्यानविशेषेष्विव एक इत्यस्य **'न ब्रह्मा नेशान'** इत्यादिवाक्यशेषोपात्तब्रह्मेशानादिमात्रव्यवच्छेदे पर्यवसानसम्भावत् न किञ्चिदसांगत्यमिति चेन्न । प्रथमश्रुतस्य वाक्यशेषानुरोधेन सङ्कोचायोगात् । **'एष वाव प्रथमो यज्ञो यज्ञानामि'**त्यत्र ज्योतिष्टोमस्यान्य-सर्वयज्ञप्राथम्यस्यान्यसर्वयज्ञानां ज्योतिष्टोमपाश्चात्त्यत्वस्य वा विधेयस्य **'यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यते स तंदीपयती'** त्यादिवाक्यशेषे एकस्तोमक्रतुमात्र-

सङ्कीर्तनानुरोधेन सङ्कोचस्य क्रमलक्षणे निराकरणात् **'पारिप्लवे सर्वाण्याख्यानानी'** त्यादिविध्यनन्तरं **'पारिप्लवमाचक्षीते'**ति पुनर्विधानमानर्थक्य-परिहाराय वाक्यशेषश्रुतविशेषनियमार्थमित्यवच्छेदकपुनर्विधिश्रुत्यनुरोधात् सङ्कोचः,न तु वाक्यशेषविशेषसङ्कीर्तनमात्रानुरोधात् । इह तु सर्वेतरव्यवच्छेदेन सिद्धस्यापि ब्रह्मादिव्यवच्छेदस्य पुनस्सङ्कीर्तनं स्तावकत्वेनोपपद्यत इति न तस्य सङ्कोचापादनसामर्थ्यम् । तस्मा**'देको हत्वा'** इत्यादेर्महासर्गाद्यसमये सर्वेतरव्यवच्छेदेनावस्थानप्रतिपादनपरस्य नारायणादन्यत्रापर्यवसायित्वात् न सार्वत्रिकस्त्वदीयोऽयमविरोधनयनप्रकार इत्याशङ्क्य तन्नयनप्रकारं व्युत्पादयति---

समुत्पन्नस्त्वत्तः प्रथममसहायस्तत इमं
जगत्संहर्तारं पुरुषमरविन्दासनमपि ।
पुरास्राक्षीर्लक्ष्मीपतिरिति महत्योपनिषदा
यदुक्तं तत्तादृक् त्वयि न भजते पर्यवसितिम् ।।४९।।

सत्यमिह नारायणस्रष्टृत्वप्रतिपादनं तत्स्वरूपाभिप्रायेणैव प्रवृत्तं परमशिवमूर्तौ न पर्यवस्यतीति, किं त्वस्तिधातोरुत्पत्त्यवस्थान्तर्गतसत्ताख्यद्वितीयभावविकारवाचित्वेन मीमांसकैर्व्यवस्थापनात्, **'लोहितो रोहितादीसीत्सिन्धुस्तस्य सुतोऽभवत् ।।'** इत्यादिप्रयोगदर्शनाच्च **'एको ह वै नारायण आसीत्'** इत्यादिवाक्यं ब्रह्मेशानाद्युत्पत्तेः पूर्वं सर्गाद्यसमये नारायणस्यैकाकिनः परमशिवात् प्रादुर्भावपरम् इति व्यवस्थापितस्य तस्य सकलजगन्मूलकन्दत्वस्य न कश्चिद्विरोधः । ब्रह्मादीनां नारायणसृष्टत्वेन प्रतिपादयिष्यमाणतया पारिशेष्यात् परमशिवस्येतदुत्पत्तौ हेतुकर्तृत्वेनान्वयलाभात् आसीदित्यस्य उत्पत्त्यर्थकत्वे एक इत्यवधारणस्य उत्पत्तिमदितरमात्रव्यवच्छेदकारितया अनादिमुक्तपरमशिवसद्भावप्रतिक्षेपासामर्थ्यात् कथञ्चित्सामर्थ्यसम्भवेऽपि **'एष वा व प्रथमो यज्ञ'** इति ज्योतिष्टोमस्य सर्वयज्ञप्राथम्यश्रुतेः **'दर्शपूर्णमासाभ्यमिष्ट्वा सोमेन यजेति'**ति श्रुत्यन्तरदर्शनात् सङ्कोचवत् त्रिमूर्त्युत्तीर्णसर्वमूलभूतपरमशिवमूर्ति-सद्भावप्रतिपादनपरानेकश्रुतिविरोधपरिहाराय सङ्कोचोपपत्तेश्च, परमतेऽपि नित्यसूरि-समर्थनसंरक्षणाय तस्यानादिमुक्तेतरमात्रव्यवच्छेदपरत्वस्य वक्तव्यत्वाच्च। यद्यप्यस्तिधातोस्तत्र तत्र कालसंसर्गादिपरोऽपि लोके वेदे च प्रयोगे दृश्यते, तथापि प्रबलानेकश्रुत्यन्तरानुरोधादिहाप्युपसंहारे नारायणानुवाकप्रक्रियायप्रत्यभिज्ञानप्रापितब्रह्म-

नारायणादिविभूतिविशिष्टपरमशिवोपासनातात्पर्यानुरोधाच्चात्र परमशिवात् प्रादुर्भावपर एव तत्प्रयोगः । अत एव उपबृंहणे आसीदित्यस्य स्थाने **'प्रादुरासीत्तमोनुद'** इति तमोऽधिष्ठातुः परमशिवात् प्रादुर्भाव उक्तः । न च तमोनुदित्येतत् इगुपधलक्षणकप्रत्ययान्तत्वेन प्रादुर्भावितृविशेषणमेवेति शक्यं वक्तुम् । **'आसीदिदं तमोभूतमि'**ति श्लोकेन सर्गादौ तमोरूपेण जगदवस्थानं प्रतिपाद्य **'ततस्स्वयम्भूर्भगवानि'**त्यादिना तदनन्तरं प्रादुर्भूतत्वेनोच्यमानस्य रूपस्य पूर्वसिद्धतमोऽधिष्ठातृत्वायोगात्, तस्य प्रादुर्भावितृविशेषणत्वे **'योऽसावि'**त्याद्यनन्तरश्लोकस्यासाङ्गत्यापत्तेश्च । स ह्यतीन्द्रियग्राह्यत्वादिधर्मविशिष्टात् परमेश्वरात् प्रस्तुतस्य स्वयम्भुवो भेदव्यवच्छेदपरः **'षड्विंशतिरित्येव ब्रूयादि'**तिवदेवकारोपहतविधिशक्तिकतया तस्य स्वयम्भवितृत्वाद्यविधायकतया तत्र स्वयमुद्बभावित्यंशस्य स्वयंभूरिति पूर्वश्लोकपरामृष्टस्वयंभवितृत्वधर्मेण धर्म्यनुवादपरत्वात् । न च निखिलप्रपञ्चप्रकृतिभृतमायाख्यतमोऽधिष्ठातृपरस्य तमोनुद इत्यस्य स्वयम्भूविशेषणत्वे तस्य परमेश्वरात् भेदप्रसक्तिरस्ति, न वा तदभावव्युत्पादनस्येह सङ्गतिरस्ति काचित् । अस्मत्पक्षे तु तमोऽधिष्ठातुरीश्वरात् स्वयम्भुवः प्रादुर्भावोक्त्या ततो भेदप्रसक्तिः । जीवस्य स्वयम्भूत्वानुपपत्तेः । तस्यापीश्वरभावे अनेकेश्वरवाद इति शङ्कावारणाय तदभावश्च वक्तव्य इति तमोऽधिष्ठाता परमेश्वर एव उपाधिविशेषकृतेन नारायणमूर्त्यात्मना रूपान्तरेण सर्गादावभिव्यक्त इत्येतदभिप्रायोऽनन्तरश्लोकस्सङ्गच्छतेतराम् । तस्मा 'त्तमोऽनुद' इति पदं क्विबन्तत्वेन पञ्चम्यन्तं प्रादुर्भावयितृपरमेव । प्रादुर्भावयिता च **'प्रशासितारमि'** त्यादिशास्त्रोपसंहारश्रुतपरब्रह्मनिर्णयानुरोधात् परमशिव एव पर्यवस्यतीति उपसंहारस्याप्येवमैकार्थ्यं लभ्यते । न च स्वयम्भुवः प्रादुर्भावोक्तौ न प्रादुर्भावयित्रुक्तिः युज्यते, विरोधादिति वाच्यम् । कर्मपारवश्यं विना स्वेच्छाधीनाविर्भावत्वं हि स्वयम्भूत्वम् । तच्च प्रादुर्भावयितृसद्भावेऽपि न विरुध्यते। अन्यथा आदित्यादिभ्यः प्रादुर्भूतस्य विष्णोरस्वयंभूत्वापत्तेः । एवं चैकार्थ्यान्मात्स्य-वचनेऽपि तमोनुद इति पञ्चम्यन्तं शिवपरमेव । तदेवं न्यायोपबृंहणाभ्यां महोपनिषदो महादेवात् प्रथममुत्पन्नस्य नारायणस्य भूतेन्द्रियप्रमुखसकलप्रपञ्चसर्गकारित्व-प्रतिपादनपरत्वात् न कश्चिद्विरोधः । एवं नारायणोपनिषदादिषु तस्य स्रष्टृत्वप्रतिपादनस्यापीयमेव गतिर्द्रष्टव्या ।।४९।।

।। इति नारायणकारणत्वपरश्रुत्युपपत्तिः ।।

नन्वेवमपि कथं सर्वाविरोधोपपादनं, **'यो ब्रह्मणमि'**ति मन्त्रे **'यो देवानामि'**ति मन्त्रे च सकलदेवोत्पत्तेः पूर्वं ब्रह्मणः परमशिवादुत्पन्नत्वप्रतिपादनात् **'यजुर्भ्यो विष्णुमि'**ति श्रुतावष्टमूर्तिब्राह्मणे च तेनैव पुनर्विष्णुरुद्रयोस्सृष्टत्वभिधानात् **'अण्डं हिरणमयं मध्येसमुद्रं रुद्रस्य वीर्यात् प्रथमं बभूव । तत्र ब्रह्मा विष्णुर्जातो जातवेदा'** इत्यादिश्रुतौ

'रुद्रसंज्ञस्य देवस्य रूपे मूर्तिः प्रजायते।
तेन क्षिप्तं रसे वीर्यं परमूर्त्यभिमानिना ।।
तदण्डमभवद्वीर्यं सहस्रकिरणप्रभम् ।
विष्णुस्तत्प्राविशत् साक्षान्मम शक्तेस्तु वैभवात् ।।
पुनर्नारायणाख्यां मे नियोगात् प्राप्तवानसौ ।।'

इत्यादिवासिष्ठलैङ्गदृष्टतदुपबृंहणैश्च ब्रह्मनारायणयोः रुद्रसृष्टत्वोक्तेश्च महोपनिषदादिप्रक्रियया ब्रह्मरुद्रयोस्तदितरप्रपञ्चस्य नारायणसृष्टत्वस्य निर्धारणायोगादित्याशङ्क्याह--

क्वचित्कल्पे वेधाः क्वचिदपि हरिः क्वापि च हरः
समुत्पन्नस्त्वत्तः प्रथममितरौ नाथ सृजति ।
अनेनाप्याधिक्यं कथमपि च वैकल्यमथवा
न कस्यापीत्याहुर्निगमगणनिष्कर्षनिपुणाः ।।५०।।

अत्र भगवान् वायुः--

'तपसा तोषयित्वा तं पितरं परमेश्वरम् ।
ब्रह्मनारायणौ पूर्वं रुद्रः कल्पान्तरेऽसृजत् ।

कल्पान्तरे पुनर्ब्रह्मा रुद्रविष्णू जगन्मयः ।
विष्णुश्च भगवान् तद्वत् ब्रह्माण्डमसृजत् पुनः ।।
नारायणं पुनर्ब्रह्मा ब्रह्माणं च पुनर्भवः ।।
एवं क्लपेषु कल्पेषु ब्रह्मविष्णुमहेश्वराः ।
परस्परस्माज्जायन्ते परस्परजयैषिणः ।
तत्तत्कल्पान्तवृत्तान्तमधिकृत्य महर्षिभिः ।

प्रभावः कथ्यते तेषां परस्परसमुद्भावात् ।' इति ।

तेषां न्यूनाधिकभाववादे प्रत्यवायोऽपि तेनैव दर्शितः ।

'अयं परस्त्वयं नेति संरम्भाभिनिवेशिनः ।

यातुधाना भवन्त्येव पिशाचाश्च न संशयः ।।' इति।

एवं च यथा **'यज्जुह्वां गृह्णाति प्रयाजेभ्यस्तत् यदुपभृति प्रयाजानूयाजेभ्यस्तत्'** इति जौहवस्य औपभृतस्य चान्यस्याविशेषेण प्रयाजार्थत्वश्रवणम् **'अतिहायेडोबर्हिः प्रतिसमानयते जुह्वामौपभृतमि'**ति जुह्वामौपभृताज्यसमानयनकालविधिबलात् तत्पूर्वोत्तरप्रयाजविशेषविषयतया च व्यवतिष्ठते, एवं तत्र तत्र श्रुतिप्रदेशे विधातुर्विष्णोः रुद्रस्य च स्रष्ट्त्वश्रवणमुदाहृतोपबृंहणबलात् कल्पभेदविशेषविषयतया व्यवतिष्ठत इति न कश्चिद्विरोधः । एतेन कतिपयश्रुतिपुराणादिपठितानि विष्णोर्ब्रह्मरुद्रकारणत्वादिवचनान्यवलम्ब्य परेषां तेषु विष्णोरुत्कर्षसमर्थनं निरस्तम् । ब्रह्मरुद्रयोरपि स्वस्वेतरगुणमूर्तिकारणत्ववचनानां सद्भावात् । यत्तु तेषां तस्य सत्त्वोपाधिकत्वेन उत्कर्षसमर्थनं, तदुप्ययुक्तम् । **'सत्त्वोद्रिक्तस्ततो ब्रह्मा शून्यं लोकमवैक्षत'** इत्यनेकपुराणेषु

'यस्य मायागतं सत्त्वं शरीरं स्यात्तमोगुणः ।

संहाराय त्रिमूर्तीनां स रुद्रस्स्यान्न चापर'

इति सूतगीतासु, **'सत्त्वं देवा हरादय'** इति वासिष्ठरामायणे,

'तमूचुर्भ्रातरो रुद्रस्सेवितस्सात्त्विकैर्चनैः ।

मोचयेत्सत्त्वसंयुक्तः पूजयेशमतो हरम् ।।'

इति कौर्मे च ब्रह्मरुद्रयोरपि सत्त्वयोगप्रतिपादनात्। एतेन रुद्रस्य तामसत्वेन निकर्षप्रलापोऽपि मूर्खाणां गलहस्तितः । निरन्तरं दुःखमयसंसारचिरतर-परिवृत्तिश्रान्तानां जीवानां कञ्चित्कालं विक्षेपविगमसमुल्लसदात्मानन्दानुभवेन विश्रान्तिं सम्पादयितुकामस्य तस्य संहाराय तमोगुणग्रहणस्य दुश्चिकित्सव्रणपीडितानां व्रणं शिशमयिषोशशस्त्रग्रहणस्येव -

'निदानज्ञस्य भिषजो रुग्णे हिंसां प्रयुञ्जतः ।।

न किञ्चिदपि नैर्घृण्यं घृणैवात्र प्रयोजिका ।।'

इति शिवपुराणोक्तन्यायेन निरतिशयकरुणाम्बुधित्वलिङ्गत्वात् ब्रह्मकोटौ गुणवश्यत्वासम्भवात् निद्रालस्यादेः तमःकार्यस्य तत्राप्रसिद्धेश्च तत्र तमोयोगमात्रेण तत्पारवश्यस्य शङ्कितुमशक्यत्वाच्च। यत्तु वाराहगारुडादिषु पुराणेष्वेव गुणमूर्तिषु

विष्णोः ब्रह्मशिवकारणत्वसात्त्विकादिविशेषप्रदर्शनेन उत्कर्षसमर्थनं, न तत्रातीव भारः कार्यः । अन्यथा कालिकाखण्डादिष्वनिलादप्रमुखमहर्षिभिस्तेषु रुद्रस्योत्कर्षनिर्धारणात् उक्तरीत्या

'यत्तामसकलालेशगृहीतस्त्वं पयोनिधौ ।
निद्रापरवशश्शेते कथं तत्सात्त्विको भवान् ।'

इत्यादिब्रह्माण्डपुराणादिवचनाच्च रुद्रस्यापि उत्कर्षनिर्धारणापत्तेः । तस्मात्सर्वं प्रशंसामात्रपरमित्यलमलक्ष्यलक्षीकरणेन । तस्मात् त्रयोऽपि फलतस्तुल्या एवेति सारम् ।।५०।।

।। इति त्रिमूर्तीनां फलतस्साम्यनिरूपणम् ।।

अथ त्रयाणां तौल्यसमर्थनप्रसङ्गात् रुद्रोत्कर्षपक्षमपि सोपपादनमुपन्यस्यति -

हरं केचित् प्राहुर्द्रुहिणमधुजिद्भ्यामपि परं
कचित्ताभ्यामस्योद्भवकथनमप्यंशविषयम् ।
त्वदौपम्यं नामाकृतिचरितवेषप्रभृतिभिः
त्वदीयप्रत्यासत्त्यतिशयकृतं चास्य भगवन् ।।५१।।

केचित् महर्षयः -

'परात् परतरो ब्रह्मा तत्परात् परतो हरिः ।
तत्परात् परतोऽधीश' (१. परतश्शम्भुः इति पा०)

इत्यादिश्रुतिहृदयाभिज्ञाः पद्मविष्टराद्विष्टरश्रवसश्च स्मरहरमधिकमाहुः । तथा हि भगवान् पराशरस्तावत् -

'देवताभ्यस्समस्ताभ्यः स्रष्टा ब्रह्मा परस्स्मृतः ।
ब्रह्मणश्च महाविष्णुर्वरिष्ठस्सर्वपालकः ।
विष्णोरपि परस्साक्षाद्रुद्रस्संहारकारकः ।' इति । सूतदगीतासु सूतोऽप्याह---
'परमात्मविभागत्वं ब्रह्मादीनां द्विजर्षभाः ।
समानमपि रुद्रस्तु वारिष्ठो नात्र संशयः ।।' इति ।

एवं

'ब्रह्मणो हृदयं विष्णुर्विष्णोरपि शिवस्स्मृतः ।
शिवस्य हृदयं सन्ध्या तेनोपास्या द्विजादिभिः' (२. द्विजातिभिरिति पा०) इति,
'ब्रह्मा तु पूरको ज्ञेयः कुम्भको विष्णुरुच्यते ।
रेचकस्तु तथा ज्ञेयः क्षराक्षरपरश्शिवः ।' इत्यादिषु काश्यपस्मरण-गीतासारादिवचनेष्वपि तस्योत्कर्षाविष्करणानि द्रष्टव्यानि । यत्तु क्वचित्क्वचित् ब्रह्मणः श्रीपतेर्वा तस्याविर्भाववर्णनं, तदपि तदंशविषयं वदन्तीत्याह -- क्वचिदिति ।

तदाह सूतसंहितायां--

'तताप परमं घोरं ततो विप्राश्चतुर्मुखः ।
सृष्ट्यर्थं ब्रह्मणस्तस्य भ्रुवोर्घ्राणस्य मध्यतः ।
अविमुक्ताभिधाद्देशात् स्वकीयात्तु विशेषतः ।
त्रिमूर्तीनां महेशस्य द्विजा वेदान्तवित्तमाः ।
अंशभूतो महादेवस्सर्वदेवनमस्कृतः ।
अर्धनारीश्वरो भूत्वा प्रादुरासीत् कृपानिधिः ।।' इति ।

अमुमेवार्थं संग्रहेणाह राजधर्मे भगवान् पराशरः--

'सृष्ट्यर्थं ब्रह्मणः पुत्रो ललाटादुत्थितः प्रभुः ।' इति,

लैङ्गे च शिलादं प्रति शक्रः --

'तस्य हृत्कमलस्थस्य नियोगादंशजो विभोः ।
ललाटं तस्य निर्भिद्य प्रादुरासीत् प्रभोर्मुखात् ।।'

अंशः परमशिवस्य संहाररुद्रः, ततो जातस्तदेकदेशविभागरूप इति यावत् । एवं च यद्वायुसंहितायां--

'निर्दिष्टः परमेशेन महेशो नीललोहितः ।
पुत्रो भूत्वानुगृह्णाति ब्रह्माणं ब्रह्मणोऽनुजः ।'

इति परमशिवनियोगाद्रुद्रस्य ब्रह्मणः पुत्रभावेनाविर्भाववर्णनं, यच्चादित्यपुराणादिषु 'त्वामेव पुत्रमिच्छामी'ति प्रार्थयमानाय तस्मै दत्तवरपरिपालनाय ततस्तदाविर्भाववर्णनं, तत्सर्वं तदंशविशेषाविर्भावाभिप्रायमेव द्रष्टव्यम् । तेष्वेव महाकल्पादौ परमशिवात् उत्पन्नत्वेन महासंहारपर्यन्तावस्थायित्वेन च वर्णितस्य तस्यावान्तरकल्पेषु पाद्मवाराहादिषु पुनःपुनः उत्पत्त्यसंभवेन तेषु प्रत्यवान्तरकल्पं तदाविर्भाववर्णनस्य तदंशविशेषविषयत्वस्यावश्यवक्तव्यत्वात् । एवं 'तस्य ललाटात् त्र्यक्षः शूलपाणिः

पुरुषोऽजायत बिभ्रत्सत्यं ब्रह्मचर्यं तप' इति श्रुतिप्रतिपादितस्यापि रौद्राविर्भावस्य द्रोणपर्वणि--

'ततः पार्श्वे वृषाङ्कस्य ब्रह्मचारी व्यवर्तत ।

पिङ्गाक्षस्तपसा श्रेष्ठः बलावान्नीललोहितः ।,'

इति कैलासे श्रीकण्ठपार्श्वेऽवस्थानोक्त्या, कौर्मे नारायणं प्रति--

'अहं च भवतो वक्त्रात् कल्पान्ते घोररूपधृत् ।

शूलपाणिर्भविष्यामि क्रोधजस्तव पुत्रकः ।'

इति शिवोक्त्या चैच्छिकांशावतारत्वाविष्करणात् तन्मूलः पौराणिकव्यवहारोऽपि अंशवतारभिप्राय एव। एवंच यत् क्वचित्क्वचिद्रुद्रस्य पितामहात् नारायणाद्वा निकर्षवर्णनं, तदपि तत्तदाविर्भूतस्यांशविशेषस्य स्थाण्वादिशब्दितस्य रामकृष्णाद्यवताराणां दशरथवसुदेवादिभ्य इव लोकदृष्ट्या निकर्षाभिनयपरम् । विष्णुपितामहयोस्तु स्वमूलरूपेणापि रुद्रात् निकर्षः । कौर्मे कृष्णतपश्चर्यायां शिवदर्शनप्रस्तावे--

'ततोऽन्वपश्यद्गिरिशस्य वामे स्वात्मानमव्यक्तमनन्तरूपम् ।

स्तुवन्तमीशं बहुभिर्वचोभिश्शङ्खासिचक्रार्पितहस्तमाद्यम् ।'

इत्यादिवचनदर्शनात् । कृता चेत्थं व्यवस्था सूतसंहितायां--

'ब्रह्मा विष्णुश्च रुद्रस्य स्वासाधारणरूपतः ।

स्वविभूत्यात्मना चापि कुर्यातामेव सेवनम् ।

रुद्रस्स्वेनैव रूपेण विष्णोश्च ब्रह्मणस्तथा ।।

न कुर्यात्सेवनं विप्राविर्भूतेर्वा तयोरपि ।

केवलं कृपया रुद्रो लोकानां हितकाम्यया ।।

स्वविभूत्यात्मना विष्णोर्ब्रह्मणश्च परस्य वा ।

करोति सेवां हे विप्राः कदाचित्सत्यमीरितम् ।' इति ।

'त्वदौपम्यमि'त्येकादशश्लोकव्याख्याने प्रपञ्चितोऽयमर्थः । तदेवं त्रयाणां मध्ये रुद्रोऽधिक इत्यपरः पक्षः । अयमेव निखिलशैवाङ्गीकृतः पन्थाः । अत एव परमशिवसंहाररुद्रयोर्व्यवस्थितानामपि गुणचरितानां प्रत्यासत्तिविशेषदृष्ट्यैव परस्परस्मिन् व्यपदेशः सर्वत्र दृश्यते ; येन तयोर्विवेकाग्रहात् भ्रमतमसि मज्जन्ति बालिशाः । अत्र च पक्षे अयं परस्त्वयं नेत्यादिवचनं

'यो ब्रह्मविष्णुरुद्राणां भेदमुत्तमभावतः ।
साधयेदुदरव्याधियुक्तो भवति मानवः ।।'

इत्यादिकर्मविपाकस्मृतिवचनाद्यैकार्थ्यात् परापरभावमूलकभेदव्यवस्थापन- व्यसने प्रत्यवायोद्घाटनपरं, न तु वासुदेवसङ्कर्षणादीनामिव सत्येवाभेदे अभिव्यक्तिविशेष-कृततारतम्यप्रतिपादनेऽपीति न कश्चिद्विरोधः ।।५१।।

।। इति त्रिमूर्तिषु शिवस्य उत्कर्षनिरूपणम् ।।

आस्तां प्रसङ्गागतविशेषावान्तरविचारः । सर्वथापि भगवान् उमासहायः परमशिव एव सर्वोत्तरस्सिद्ध इति स एव सर्वैर्निषेव्य इति सर्वोत्तरत्वव्यवस्थापनं तत्साध्यमर्थमुपदर्शयन्नेवोपसंहरति---

त्रयाणां देवानां भवतु सममैश्वर्यमथवा
भवत्वेषां मध्ये भवभयहरः स्थाणुराधिकः ।
प्रसिद्धस्त्वं तावत् परमशिव सर्वोत्तर इति
त्वमेवैकस्सेव्यो भवसि निखिलस्यापि जगतः ।।५२।।

स्यादेतत्,

अस्त्वेवमुक्तया रीत्या सर्वदेवोत्तमश्शिवः ।
तथापि सर्वसेव्यत्वं नास्य सिध्यति तावता ।।
विधानात् फलदानाद्वा कश्चित्सेव्येत केन चित् ।
यथा कलत्रेण पतिर्यथा भृत्येन भूपतिः ।*। ('यस्य सेवा न विहिता न च विश्राणने रतिः' इति क्वचिदधिकः पाठः)
तदभावे तु सेव्यत्वेनोत्कर्षस्स्यात् प्रयोजकः ।।
न ह्युत्कृष्ट इति स्त्रीणां भवेत्सेव्यः परः पुमान् ।
न वा लुब्धोऽर्थिनां राजा सत्यन्यस्मिन् बहुप्रदे ।
इति मन्दधियां शङ्कां मूर्खजल्पैर्दृढीकृताम् ।
छेत्तुं व्यवस्थापयति सर्वसेव्यत्वमीशितुः-- ---

त्वमेकस्सर्वेषां पुरमथन सेव्यो जनिमताम्
अजानन्तस्त्वेतत् बत विफलयन्त्यायुरधमाः ।
मनुष्या देवानामिव तव सदेवासुरनराः
श्रुता ह्येते जीवाः पशुवदुपभोग्याः पशुपते ।।५३।।

अयमर्थः--- (अयं भावः-- ब्रह्माद्यास्संसारवर्तिनस्सर्वे जीवाश्शिवस्य पशव इति भारतशैवलैङ्गागमेषु तावत् स्फुटम् । तच्च प्रतिपाद्यमानं पशुत्वं न मुख्यं सम्भवति । लोके गवाश्वादिष्विव तेषु पशुत्वव्यवहारासम्भवात् । किं तु बृहदारण्यकश्रूयमाणमर्त्यगतदेवपशुत्वमिव मुख्यपशुगतपशुमत्कार्यकारितालक्षण-गुणयोगाद्गौणम् । ब्रह्मादिकर्तव्यं च शिवकार्ये देवपशुक्रियमाणदेवयजनमिव शिवयजनमित्युक्तम् । अन्यथा पशुत्वोक्तिवैयर्थ्यात् शिवकर्म शिवाराधनमेवेति । अयमर्थः कौर्मादिषु स्पष्टः । तच्च शिवाराधनं नित्यम् । अकरणे प्रत्यवायावगतेः । इत्ययं पाठः अर्धचन्द्ररेखाङ्कितश्लोकस्थाने तत्पर्यायतया क्वचित्पुस्तके दृश्यते ।)

शिवस्य पशवो जीवास्सर्वे संसारवर्तिनः ।।
भारतादिषु गण्यन्त इति तावदतिस्फुटम्।
तेषां गवादिरूपाप्त्या न देहादिविधानतः ।
तत्पशुत्वव्यवहृतिः प्रमाणान्तरवैशसात् ।
किंतु देवपशुत्वोक्तिर्यथा वाजिश्रुतौ नृणाम् ।
गौणी तत्कर्मकारित्वात्तथाभवितुमर्हति ।
ततश्च देवजनं तत्पशूनां यथा नृणाम् ।
नित्यं तथैव सर्वेषां जीवानां शम्भुपूजनम् ।
अन्यथा तत्पशुत्वोक्तिस्तेषां निर्विषया भवेत्.।
श्रुतिस्मृतिपुराणेषु पठ्यमानाखिलेष्वपि।
किञ्च लोके यथा पाशैर्गजाश्वमहिषादयः ।।
आबध्य स्ववशीकृत्य वाहनादिषु कर्मसु।
विनियोगेन भुज्यन्ते पुरुषेण निजेच्छया ।
एवं जायादिभिः पाशकल्पैस्संसारवर्तिभिः ।
नियम्य स्वेषु कार्येषु भुज्यन्ते विनियोगतः
शिवेनेति गवाश्वादेरुपपाद्यगुणान्वयात् ।।

पुराणे शैवलैङ्गादावितथमेव निरूपितम् ।
पशुत्वं सर्वजीवानां तत्कर्म्यादौपचारिकम्)।
ब्रह्मद्यास्स्थावरान्ताश्च देवदेवस्य शूलिनः ।
पशवः परिकीर्त्यन्ते संसारवशवर्तिनः ।
तेषां पतित्वाद्देवेशः शिवः पशुपतिस्स्मृतः ।
मलमायादिभिः पाशैः स बध्नाति पशून् पतिः ।।
स एव मोचकस्तेषां भक्त्या सम्यगुपासितः ।
चतुर्विंशतितत्त्वानि मायाकर्मगुणा अमी ।।
विषया इति कथ्यन्ते पाशाजीवनिबन्धनाः ।
ब्रह्मादिस्तम्बपर्यन्तान् पशून् बध्वा महेश्वरः ।
पाशैरेतैः पतिर्देवः कार्यं कारयति स्वकम् । (इत्याद्यागमेषु 'एतावन्तो वै पशवः द्विपादश्चतुष्पादश्च तस्माद्रुद्रः पशूनामधिपतिरि'ति श्रुतिसम्मतस्य जीवानां पशुत्वस्य जीवपशुपतित्वस्य च प्रतिपादनपूर्वकं पतिभूतशिवानुपासने भृत्यभूतजीवानां बहुदुःखनिदानबृन्दप्रतिपादनात्, भारते-- 'नैशं नैत्यकमात्मन' इति शिवाराधननित्यतायाः कण्ठत उक्तेश्च । ततश्च यस्याकरणे दुःखभाग्भवेत्, तदप्युपेक्षमाणः स्वानर्थं सम्पाद्य अधमो जनः स्वीयमायुर्व्यर्थीकरोति । आश्चर्यं खल्वेतदिति । इत्ययं पाठः अर्धचन्द्ररेखाङ्कित- श्लोकस्थाने तत्पर्यायतया क्वचित्पुस्तके दृश्यते ।।)
(इत्यादिवचनव्रातैरागमेषु च भूरिशः ।
एवञ्च सति देवानां बृहदारण्यकश्रुतौ ।
पशुतुल्यास्समुदिता मर्त्यास्तत्कर्मकारिणः ।
इति तेषां देवतानामिज्या नित्या यथातथा ।)
सर्वेषामेव जीवानामस्मिन् संसारमण्डले ।
नित्या भगवतस्सेवा चन्द्रखण्डशिखामणेः । (सा च तेषां तन्नियोगात् स्वस्वकृत्योपपादनम् । इति पा०)
सा च तेषां नियोगात् स्यात् स्वस्वकृत्योपपादनम् ।
यत्र कर्मणि यो भृत्यः प्रभुणा विनियुज्यते ।।
तस्यैव करणं ह्यस्य तत्सेवेत्यभिधीयते ।
अत एव चतुर्वक्त्रप्रभृतीनां शिवाज्ञया ।

सर्वेषां स्वस्वकार्येषु प्रवृत्तिरूपपादिता ।
शैवादिषु पुराणेषु तत्पशुत्वोक्त्यनन्तरम् ।।
कौर्मादौ कर्मयोगस्य वर्णितस्य प्रपञ्चतः ।
तदाराधनरूपत्वं विस्पष्टं प्रतिपादितम् ।।
रुद्रं सत्कर्मभिर्मर्त्याः पूजयन्तीह दैवतम् ।
इत्यादि भारतेऽप्युक्तं पर्वस्वारण्यकादिषु।।
वर्णाश्रमाचारवता पुरुषेण परः पुमान् ।
इत्यादेर्न विरोधो नश्शिवाभेदाद्रमापतेः ।।
भेदवादे तयोस्तस्य स्वार्थत्यागस्तु निश्चितः ।
शिवं प्रति न युज्येत पशुत्वं ह्यन्यथात्मनाम् ।।
इत्थं सेवा महेशस्य सर्वेषां स्वस्वकर्मभिः ।
नियतेति स्थितं किञ्च सर्वेषामेव देहिनाम् ।
शिवलिङ्गार्चकत्वं च भारतादिषु वर्णितम् ।
यस्य ब्रह्मा च विष्णुश्च त्वं च शक्रस्सहामरैः ।
अर्चयध्वे महालिङ्गं तस्मात् श्रेष्ठतरो हि कः ।।
ऋषयश्चापि देवाश्च गन्धर्वाप्सरसस्तथा ।
लिङ्गं यस्यार्चयन्ति स्म तदाराध्यतमस्स्मृतः ।।
इत्येवमादिवचनं ह्यानुशासनिके स्मृतम् ।
लिङ्गानि पाण्डुपुत्राणां महाप्रस्थानवर्त्मनि ।।
त्रिसन्ध्यं पूज्यमानानि देवविद्याधरादिभिः ।
पदेपदे वर्णितानि जैमिनीये च भारते ।।
वैष्णवे च तथा ब्राह्मे लोकपालाष्टके तथा ।।
पैतृकेषु च लोकेषु दिवि देवालयेषु च ।
विद्याधरे च गान्धर्वे यक्षरक्षःपिशाचके ।।
गणे गरुडनागेषु तथा वै किन्नरेषु च ।
पातालेषु तथा स्वर्गे दानवेषु च सुन्दरि ।।
आराधितो महादेवि लिङ्गमूर्तिर्महेश्वरः।
ब्रह्माविष्णुस्तथा शक्रः लोकपालाश्च देवताः।
लिङ्गार्चनरता एते मानुषेषु च का कथा ।

एतादृशैर्वचोबृन्दैर्ब्रह्माद्याशिवपूजनम् ।।
कुर्वन्तीति पुराणेषु बहुधोद्घोषणं कृतं ।
हरिवंशे च विबुधैस्सहस्राक्षादिभिर्दिवि ।।
शिवस्योत्सवनिर्माणम् भक्त्या कृतमिति श्रुतम् ।।
यद्वामनपुराणे तु वचनं परिपठ्यते ।
यद्यर्तचयन्ति त्रिदशा मम लिङ्गं सुरोत्तमाः ।
तदेतत् प्रतिगृह्णीयान्नान्यथा तु कथञ्चन ।
ततः प्रोवाच भगवन्नेवमस्त्विति केशवः।
ब्रह्मा स्वयं च जग्राह लिङ्गं कनकपिङ्गलम् ।।
इत्यस्यापि विभोर्विश्वपूज्यत्वे न विसम्मतिः ।
त्रिदशग्रहणं ह्यत्र सर्वेषामुपलक्षणम् ।।
ततश्चकार भगवांश्चातुर्वर्ण्यं हरार्चने ।
शास्त्राणि चैषां मुख्यानि नानोक्तिविविधानि च।।
इत्यनन्तरसन्दर्भे द्विजातीनामपि ग्रहात् ।
यद्यर्चयन्तीत्युक्तिस्तु पाशुपत्यार्थनानयात् ।।
नेतष्येति स्थितं तावत् सर्वसेव्यत्वमीशितुः ।
सर्वसाधारणो धर्मश्शिवभक्तिरिरिति स्थितम् ।
विशेषतोऽपि मर्त्यानां धर्मोऽयं स्थाप्यतेऽधुना---

मनुष्यत्वं प्राप्य त्वयि विदधते दुष्कृतिवशात्
न भक्तिं ये तेषां कथमपि च पश्यामि न गतिम् ।
यतस्तद्धर्मोक्त्युत्करमुपदिशद्गिर्मुनिवरैः
विशिष्यैषा तेषामपि गिरीश धर्मेषु गणिता ।।५४।।

वामनपुराणे-
'किं तु श्रेयः परे लोके किमु चेह द्विजोत्तमाः ।'
इति पृष्टवन्तं सुकेशिनं प्रति
'इत्थं सुकेशिवचनं निशम्य परमर्षयः।
प्रोचुर्विमृश्य श्रेयोऽर्थमिह लोके परत्र च ।' इत्युपक्रम्य
'श्रेयो धर्मः परे लोक इह च क्षणदाचर ।'

इत्यादिना महर्षीणामुत्तरं प्रतिपाद्य पुनरपि

'किंलक्षणो भवेद्धर्मः यदाचारेण सत्क्रिया ।

यमाश्रित्य न सीदन्ति देवाद्याश्च तदुच्यताम् ।'

इति धर्मस्वरूपविषयं सुकेशिप्रश्नमुक्त्वापि अनन्तरं धर्माधिकृतं प्राणिजातं देवदानवसिद्धगन्धर्वविद्याधरकिंपुरुषपितृऋषिमानुषगुह्यकराक्षसपिशाचभेदेन द्वादशधा विभज्य देवादिक्रमेण मनुष्यधर्मविधानमध्ये

'जितेन्द्रियत्वं शौचं च माङ्गल्यं भक्तिरेव च ।।

शङ्करे भास्करे देव्यां धर्मोऽयं मानवस्स्मृतः ।'

इति शिवभक्तिर्विशिष्य मनुष्यधर्मत्वेनापि महर्षिभिर्विहितेति प्रतिपादितम् । तथा च स्वधर्मातिक्रमेण सम्यगनुष्ठितानामपि धर्मान्तराणां वैफल्यस्य श्रुतिस्मृतिषु प्रसिद्धेः शिवभजनविमुखानां मनुष्याणां न केनापि धर्मेण सद्गतिस्सम्भवतीति तात्पर्यार्थः।।५४।।

मनुष्येष्वपि सर्वेषु विशेषेण द्विजन्मनाम् ।

शरणं शम्भुपादाब्जमित्येतत्सम्प्रदर्श्यते--

द्विजानां गायत्री खलु परमुपास्या नियमिता
प्रसिद्धं तस्याश्च त्वमसि परमं दैवतमिति ।
अकुर्वाणस्यातस्तव चरणसेवां द्विजपशोः
अवस्त्रोऽलङ्कारस्सकलमपि सत्कर्मचरितम् ।।५५।।

अयमाशयः--

त्रैवर्णिकानां सर्वेषां गायत्री परमा गतिः ।

कर्मान्तरेष्वशक्तोऽपि तयैव लभते गतिम् ।

तां विनान्यानि कर्माणि निष्फलानि कृतान्यपि ।।

अस्मिन्नर्थे न कस्यापि वैदिकस्य विसंमतिः ।

सन्ध्याहीनोऽशुचिर्नित्यमनर्हस्सर्वकर्मसु ।

यदन्यत् कुरुते कर्म न तस्य फलभाग्भवेत्।

परिहाप्यापि वेदांस्त्रीन् कर्माणि विहितानि च ।।

गायत्रीमात्रमाश्रित्य द्विजो भवति निर्भयः ।

गायत्रीहीनवेदास्तु साङ्गा अपि च निष्फलाः ।। (इत्यादिस्मृतिवचनैः

द्विजशब्दवाच्यानां त्रैवर्णिकानां गायत्र्युपासनम् आवश्यकमिति स्थितम् । गायत्रीप्रतिपाद्या च देवता श्रीसदाशिव एव । मैत्रायणीये गायत्र्यर्थनिरूपणे **'यदेष रुद्रो भर्गाख्यः ब्रह्मवादिन इत्यदः ।'** इत्यादेर्दर्शनात्, **'हरस्स्मरहरो भर्ग'** इति कोशकारवचनाच्च भर्गशब्दस्य तस्मिन्नसाधारण्येन रूढत्वावगमात्। न चैवं सति 'गो भर्गं' इति व्यवहितान्वयदोषप्रसङ्ग इति वाच्यम्। योग्यताऽऽसत्त्योर्विरोधे योग्यताया आवश्यकत्वेन व्यवहितेनापि योग्येनैवान्वयस्य युक्तत्वात् । स्वाधीनप्रयोगेष्वपि लौकिकवाक्येषु तथा दर्शनात् **'भूयस्सृष्ट्वा पतयस्तथेशः सर्वाधिपत्यं कुरुत महात्मा'** इत्यत्र पतय इति शब्द इव द्वितीयार्थे, प्रथमासम्भवेन भर्गः धीमहीति अव्यहितान्वयस्यापि उपपन्नत्वात् । इत्ययं पाठः अर्धचन्द्ररेखाङ्गित- श्लोकस्थाने क्वचित्पुस्तके दृश्यते ।।)

(इत्यादिस्मृतिवाक्यानामैकमत्यस्य दर्शनात् ।
अमुष्याः प्रतिपाद्या च देवता श्रीसदाशिवः ।।
असाधारणतत्रत्यभर्गशब्देन विनिश्चितः।
यदेष रुद्रो भर्गाख्यो ब्रह्मवादिन इत्यदः ।।
वाक्यं मैत्रायणीयानां गायत्र्यर्थनिरूपणे ।)
या च भगेमयत्वोक्तिश्श्रुतौ तलवकारिणाम् ।।
तत्पदस्य द्वितीयस्य ताभ्यामस्ताऽस्य सान्तता ।
आदित्यान्तर्गतं यच्च भर्गाख्यं वै मुमुक्षुभिः ।।
भर्गाख्यं किमपीत्यादिव्यवहाराच्च तद्विदाम् ।
प्रथमात्र द्वितीयार्थे छन्दसि व्यत्ययस्मृतेः ।।
भूयस्सृष्ट्वा तु पतय इत्यत्र प्रथमा यथा ।
यद्वा सुपां सुलुक्सूत्रादमस्स्वादेश- कल्पनात् ।।
स्यात् द्वितीयान्त एवायं प्रथमान्तो न कल्प्यते ।
अथवा प्रथमान्तत्वात् स्वस्थानानन्वयी भवन् ।।
तृतीयपादमागत्य विशेष्यस्यार्पकस्त्वयम् ।
नन्वेवंसति तच्छब्दे न घटेत नपुसंकम् ।।
तवापि यत्पदे पुंस्त्वं न युज्यते कथञ्चन ।
युक्ता सवितृवृत्तित्वे तस्य पुल्लिङ्गतेति चेत् ।
तदेव तावत्तस्येह न युक्तमिति मन्महे ।।

सविता हि किमादित्यः किं वा ब्रह्मादिकारणम् ।
न ब्रह्म न हि तस्यापि वरेण्यं तेज इष्यते ।।
सवितुर्भर्ग इत्येवमन्वयोऽभ्युपगम्यताम् ।
ब्रह्मणो ज्योतिरित्येवमर्थो भेदोपचारवान् ।।
मैवं वरेण्यमित्येतत्पदं सन्निधिवर्ति च ।।
क्लृप्तस्वान्वयमन्यत्र प्रतिसम्बन्ध्यपेक्षि च ।
अतस्सवितृशब्दोऽयं न तदुल्लङ्घ्य केनचित् ।।
शक्येत संयोजयितुमपि पङ्कजयोनिना ।
श्वेताश्वतरशाखायामनयोस्तावदन्वयः ।।
तदक्षरं तत्सवितुर्वरेण्यमिति निश्चितः ।
अपि मैत्रायणीयानां शाखानामन्वयोऽनयोः ।।
विस्पष्टमेतत्सवितुर्वरेण्यमिति विश्रुतः ।
तथा मन्त्रे तां सवितुर्वरेण्यमिति याजुषे ।।
प्रसिद्धः प्रतिबुद्धानामनयोरन्वयस्स्फुटम् ।
शब्दार्थप्रत्यभिज्ञानात् गायत्र्यर्थानुबन्धिषु ।।
एतेषु श्रुतिवाक्येषु भर्गशब्दो न पठ्यते ।
तदेतेष्वनयोरेव निश्चितेऽन्योन्यमन्वये ।।
ऐकार्थ्यादनयोरेव युक्तोऽत्रापि समन्वयः ।
एवं सवितृशब्दस्य न ब्रह्मार्थ इति स्थिते ।।
सहस्रकिरणो देवः प्रसिद्धोऽर्थोऽवसीयते ।
आदित्यमण्डलासीनं रुक्माभं परुषं परम्।।
ध्यायन् जपेत्तदित्येतां निष्कामो मुच्यते द्विजः ।
आदित्यमण्डलान्तस्थं परं ब्रह्माधिदैवतम् ।।
छन्दो निचृत्स्यात् गायत्री मया सृष्टा सनातनी ।
इत्यादिस्मर्तृवचनैस्सौरमण्डलमध्यगम् ।।
गायत्र्या दैवतं ब्रह्मेत्येतत्तावद्विनिश्चितम् ।
न तत्सवितृशब्दस्य जगत्प्रसवितृत्वतः ।।
ब्रह्मण्येव प्रवृत्तत्वे कथं चिदपि गृह्यते ।
तस्यादित्यपरत्वे तु येन सूर्य इति श्रुतेः ।।

तस्य तेजःप्रदत्वेन वरेण्यं मण्डलस्थितम् ।
तदन्तर्यामिभावेन च्छन्दोगादिश्रुतिश्रुतम् ।।
तच्छब्दाभिहितं ब्रह्म देवतेति प्रसिध्यति ।
एष देवो महादेवः केवलः परमश्शिवः ।।
तदेवाक्षरमद्वैतं तदादित्यान्तरं परम् ।
इति कौर्मे तत्सवितुर्वरेण्यमिति तद्गतः ।।
भावो हि वासरमणेरन्तर्यामिणि योजितः ।
एवं च यद्भरद्वाजस्सावित्र्या देवतां रविम् ।।
उवाच तच्च युज्येत स्यान्निर्मूलं तदन्यथा ।
विश्वामित्रऋषिश्छन्दो गायत्री देवता रविः ।।
इति स ह्यस्मरद्विष्णोराचार्यो भगवान् ऋषिः ।
सवितुर्भर्ग इत्येवमन्वयाङ्गीकृतावपि ।।
सूर्ये सवितृशब्दस्य वृत्तिर्वाच्योदितैर्नयैः ।
एवं सवितृशब्दार्थस्सहस्रांशुरिति स्थिते ।।
तत्रासंकुचितास्मद्धीप्रेरकत्वमनन्वयि ।
तद्वरेण्यं परं ब्रह्म तन्मण्डलगतं शिवम् ।।
भर्ग इत्युदितं ज्योतिः श्रूयते तत्पदोदितम् ।
एवं तवापि यच्छब्दे पुंस्त्वं नैवेह यज्यते ।।
तस्मात् क्वचित् भवत्वेषा तुल्या लिङ्गान्यथाकृतिः ।
वस्तुतस्तु तवैवायं भवेद्दोषोऽन्वयक्रमे ।।
तच्छब्दलिङ्गाघटनं नैवास्त्यस्माकमन्वये ।
यच्छब्दप्रतिनिर्देशो नायं तच्छब्द इष्यते ।।
श्रुतस्योत्तरवाक्यस्य पूर्वं तदनपेक्षणात् ।
अलङ्कारेषु बहुषु तथैव प्रतिपादनात् ।।
तथैव लोके वेदे च वाक्यानामपि दर्शनात् ।
किं तु ध्यानक्रियाकर्मभूतस्य परमात्मनः ।।
नामैतत्तच्च गीतासु सुप्रसिद्धं नपुंसकम् ।
स्ववाक्ये प्रतिनिर्देशवाक्ये वान्वयबोधकम् ।।
[१]र्गशब्दमपेक्ष्यात्र पुल्लिङ्गमपि युज्यते ।

एवं श्रुत्यन्तरस्मर्तृवाक्यजातानुरोधतः ।।
क्वापि लिङ्गान्यथाभावदोष- वैकल्यतोऽपि च ।
अजन्तत्वेन निर्णीतात् भर्गशब्दान्महेशितुः ।।
वाचकात् प्रतिपाद्योऽसौ गायत्र्या इति मीयते ।
आदित्याश्रयणीयत्त्वादपि लिङ्गादिति स्फुटम् ।।
गायत्रीप्रतिपाद्योऽर्थश्शिव इत्यवसीयते ।
तत्तस्यान्तर्यामिणि स्याद्यद्वा तस्याधिदैवते ।।
द्वेधाप्यसाधारण्येन पर्यवस्येन्महेश्वरे ।
भास्करस्येश्वरो देव इत्यादिस्मृतिदर्शनात् ।।
सिद्धं तदधिदेवत्वं तदन्तर्यामितोदिता ।
तदेवं श्रुतिलिङ्गाभ्यां श्रुत्यन्तरबलादपि ।।
गायत्र्याः प्रतिपाद्योऽर्थः परश्शम्भुरिति स्थिते ।
देवस्य द्योतमानस्य निधित्वात् श्रुतिसम्पदाम् ।।
रवेस्तेजःप्रदं ब्रह्म ध्यायामस्तत्पदोदितम् ।
यद्भर्गसंज्ञमस्माकं धियः कर्मानुसारतः ।।
प्रेरयत्यन्तरात्मत्वादिति मन्त्रान्वयक्रमः ।
स्याच्चेत्सवितृशब्दस्य भर्गशब्देन योजना ।।
तस्याप्युत्तरवाक्ये स्यात् तद्वदेव निवेशनम् ।
देवस्य सवितुर्मध्ये यो भर्गो नो धियः क्रमात् ।
प्रचोदयात्तद्वरेण्यं धीमहीत्यन्वयक्रमः ।
इत्यसौ याज्ञवल्क्येन सर्वशास्त्रार्थवेदिना ।।
स्वनिर्मिते योगशास्त्रे दर्शितो मुनिनान्वयः ।
भर्गशब्दात् परस्यामस्वादेशस्य तु कल्पने ।।
स्वस्थान एव स भवेद्विभक्तिव्यत्ययस्य वा ।
नन्वेवं सति केषांचिदृषीणामिह धीमताम् ।।
भर्ग इत्यस्य सान्तत्वव्यवहारस्य का गतिः ।
न हि सान्तोऽयमित्येतदुक्तमस्ति स्मृतौ क्वचित् ।।
प्रयोगो भर्ग इत्येष नेतुं शक्यः स्वमूलवत् ।
दृश्यन्ते स्मृतिवाक्येषु ह्यागमार्थानुवादिषु ।।

यथाश्रुतानुवादोऽपि व्याख्येयस्य सतोऽन्यथा ।
न तत्र सूर्यो भातीति मन्त्रोऽयं हि यथाश्रुतः ।।
अनूदितः पुराणेषु व्याख्यातव्योऽन्यथापि सन् ।
यस्मिन्न भासते विद्युन्न सूर्यो न च चन्द्रमाः ।।
यस्य भास विभातीदमित्येषा शाश्वती श्रुतिः ।
ये विभक्तिव्यत्ययेन यच्छब्देनान्वयेन वा ।।
व्यवहारास्तस्य दृष्टास्तेऽर्थगत्यवलम्बिनः ।।
स्मृतीनां वेदतात्पर्यव्याख्यान- पदवीजुषाम् ।।
अर्थगत्यवलम्बो हि श्रेयान् शब्दावलम्बनात् ।
अत एव न तत्रेति मन्त्रो भगवता स्वयम् ।।
न तत् भासयते सूर्यो न शशाङ्को न पावकः ।
इत्यर्थमबलम्ब्यैवानूक्तो न तु यथाश्रुतम् ।।
चक्षोःसूर्य इति श्रौतः पुराणे वैष्णवे मनुः ।
अक्ष्णस्सूर्योऽनिलः प्राणादित्यनूक्तोऽर्थवीक्षया ।
इत्येवं स्मृतिकाराणां व्यवहारास्समञ्जसाः ।
सर्वे तवैवाकारान्तव्यवहारो विरुध्यते ।।
न हि भर्गाख्यमित्यादिव्यवहारः कथंचन ।
भर्ग इत्यस्य सान्तत्वपक्षे ह्येति समर्थनम् ।।
अस्तु वा सान्त एवायं तथाप्यर्थोऽस्य शङ्करः ।
तद्वाचकपदस्यैव विकारश्छान्दसो ह्ययम् ।
किञ्चिद्वर्णविकारेऽपि बहुसारूप्यदर्शने ।
व्यवस्थितं पूर्वतन्त्रे पदैक्यं लोकवेदयोः ।।*।।
(इत्यर्थो याज्ञवल्क्येन दर्शितो मुनिवान्वयः । इत्यधिकः पाठः)
चक्षोस्सूर्यो ब्रह्ममेतदित्यादौ विश्रुतात् पदात् ।
लिङ्गवर्णविकारेऽपि भिन्नत्वं नाभ्युपेयते ।।
यदि सान्तस्य शब्दस्य रूढिस्स्याद्वस्तुनि क्वचित् ।
तदाह्यजन्तसारूप्यं भवेदैक्याप्रयोजकम् ।।
सरशब्दादिव सरश्शब्दो भिन्नो भवेदयम् ।
सास्य क्लृप्ता क्वचिदपि नेष्यते लोकवेदयोः ।।

नन्वस्य रूढ्यभावेऽपि योगेनान्यत्र वर्तनम् ।।
सम्भवत्येव वृद्धैश्च बहुधा सम्प्रदर्शितम् ।
भक्तस्नेहात् भाग्यदानात् भर्जनात् भञ्जनात् भृतेः ।।
भाभ्राजिधात्वोर्व्युत्पत्त्या दीप्तिरूपत्वतोऽपि च ।
मैवं न वर्णविकृतिमनाश्रित्यैव वैदिकीम् ।।
उपपादयितुं शक्या योगास्सर्वेऽपि दर्शिताः ।
तदाश्रयो विकारोऽयं रूढस्यैवेति युज्यते ।।
रूढेर्योगात् बलीयस्त्वं यतस्सर्वैरुरी- कृतम् ।
नन्वेषु यत्र योगस्स्यादञ्जसा रूपमस्तु तत् ।।
विकारकल्पनाद्रूढौ स एव खलु यज्यते ।
सत्यं तथापि मन्त्रस्य व्याख्याने ब्राह्मणे त्वयम् ।।
अजन्तोऽनूदित इति प्रागस्माभिरुदाहृतम् ।
अतः कल्प्यावश्यमेव च्छान्दसी विकृतिः क्वचित् ।।
सान्तेऽजन्तेऽथवा मन्त्रब्राह्मणैकार्थ्यसिद्धये ।
कल्प्यते सान्त एवैषा नाजन्ते रूढ्यभावतः ।।
रुद्रशब्देन विवृतेराञ्जस्यादीशवाचिना ।
एवं च स्मृतिकाराणां व्यवहारोऽपि युज्यते ।।
अर्थानुसारतोऽजन्तस्सान्त- श्शब्दानुसारतः ।
पक्षान्तरे त्वकारान्तव्यवहारो न युज्यते ।।
न ह्यसौ शब्दमर्थं वा व्याख्येयस्य निरीक्षते ।
तस्मात् सकारान्तत्वेऽपि शिवस्यैवैष वाचकः ।।
छान्दसेन विकारेण तच्छक्तेरपरिक्षयात् ।
यो देवस्सवितास्माकं धियो धर्मादिगोचराः ।।
प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे ।
देवस्य सवितुस्तस्य धियो यो नः प्रचोदयात् ।।
भर्गो वरेण्यं तद्ब्रह्म धीमहीत्यर्थ उच्यते ।
इत्येवमादिकस्मर्तृवचस्स्वारस्यलाभतः ।।
विधान्तरेण गायत्र्या मन्वते येऽन्वयक्रमम् ।
तन्मतेऽपि शिवादन्यत्रास्यास्सिध्यति दैवतम् ।।

भर्गश्रुतेश्च सवितृर्वरेण्यत्वस्य चान्वयात् ।
केश्चित्सवितृशब्दस्य ब्रह्म चेदर्थ इष्यते ।।
सर्वान्तर्यामितालिङ्गात्तथाप्यस्मन्मतं दृढम् ।
स्थापितं चैतदादित्यपुराणे रविणा स्फुटम् ।।
गायत्र्याशिवमन्त्रत्वमित्थं न्यायोपबृंहितम् ।।
ततो दर्भासने स्थित्वा गायत्रीं प्रजपेत् द्विजः ।।
गायत्र्याः परमं तत्त्वं देवदेवो महेश्वरः ।
इति ज्ञात्वा जपेद्विद्वान् गायत्र्याः फलमश्नुते ।।
योह्यन्यथा हि मनुते गायत्रीं शिवरूपिणीम् ।
स पच्यते महाघोरे नरके कल्पसङ्ख्यया ।।
तथा कौर्मे पुराणेऽपि विष्णुना कूर्मरूपिणा ।
स्वयं प्रदर्शिता शम्भोर्गायत्रीप्रतिपाद्यता ।
एवं हि श्रूयते तत्र राजवंशानुकीर्तने ।
राजावसुमना नाम्ना रविमण्डलमध्यगम् ।।
समुपासिष्ट गायत्र्या पुरुषं रुक्मविग्रहम् ।।
अनुग्रहार्थमस्याथ भगवान् परमश्शिवः ।।
आविर्भूय रवेर्बिम्बादस्मै रूपमदर्शयत् ।।
शिवशक्तिमयं दिव्यं चन्द्रार्धकृतशेखरम् ।।
त्रिलोचनं नीलकण्ठं ब्रह्मेन्द्रोपेन्द्रवन्दितम् ।
अनुगृह्य च तत्कालं देहान्तेऽदान्निजं पदम् ।।
तुष्टश्चिरतरं तस्य गायत्र्याराधनादिति ।।
अत्र केचन मन्यन्ते विष्णुसंज्ञमिति श्रुतिः ।।
काचित् वरेण्यं सवितुर्भर्गो विष्णवभिधं जगौ ।।
ततश्च विष्णुरेवार्थो गायत्र्या इति तल्लघु ।।
तस्य रुद्रत्वबोधिन्यामापि सत्यां कुतो ह्ययम् ।
निर्णयस्यान्न्यायदृष्टौ शिव एवेति निर्णयः ।।
शिवेऽपि विष्णुसंज्ञायाश्शिखायामनुशासनात् ।।
शिवतत्त्वादिभूम्यन्तं शरीरादि घटादि च ।।
व्याप्याधितिष्ठति शिवस्तस्माद्विष्णुरुदाहृतः ।

भगवान् भगसद्भावात् निर्मलत्वात् शिवस्स्मृतः ।।
स्वामी स्वमस्य यत्सर्वं विष्णुस्सर्वप्रवेशनात् ।
इति तत्र निरुक्तेश्च तस्य वायूक्तलैङ्गयोः ।
तन्नामाष्टकमध्ये च गणनादागमादिषु ।
श्रुत्यन्तरेषु गायत्रीप्रतिपाद्ये प्रयुक्तयोः ।।
मुख्यत्वासम्भवात् विष्णौ शिवरुद्राभिधानयोः ।
विद्यमाने विवरणे मन्त्रलिङ्गाविरोधिनि ।।
तद्विरुद्धार्थनिष्ठस्य दौर्बल्याच्चेति सिध्यति ।।
नन्वाश्वमेधिके कृष्णवचनं पाण्डवं प्रति ।।
तन्मण्डलस्थं मां ध्यायेत्तेजोमूर्ति चतुर्भुजम् ।।
उदित्यं च जपेन्मन्त्रं चित्रं तच्चक्षुरित्यपि ।।
गायत्री च यथाशक्ति जप्त्वा सूक्तं च मामकम् ।।
इति गायत्र्युपास्यत्वं दर्शयत्यसुरद्विषः ।।
मैवं सन्ध्यासु भगवद्भक्तैर्भास्करमण्डले ।।
उपास्या भगवन्मूर्तिरित्येतावत्परं वचः ।।
न तु गायत्र्युपास्यत्वपर्यन्तस्थापनक्षमम् ।
न हि श्रुतिविरुद्धेऽर्थे तात्पर्यं तस्य युज्यते ।।
ततः प्राचीनवचने वैण्णवो हि षडक्षरः ।
ततः षक्षरादीनि षट्कृत्वः परिवर्तयेत् ।
इति जप्य उपन्यस्तः तदर्थो रविमण्डले ।
ध्येयो विधीयतेऽनेन श्लोकेनेति न वैशसम् ।।
सर्वेषामेव देवानां सन्ध्यासु रवि- मण्डले ।।
भक्तैरुपासनं कार्यं तत्तत्तन्त्रेषु विश्रुतम् ।
किंच तत्र स संवादः कृष्णपाण्डुतनूजयोः ।।
वैष्णवागमधर्माणां विधानाय प्रवर्तितः ।।
भगवान् वैष्णवा धर्माः किंफलाः किंपरायणाः ।।
कथं त्वमर्चनीयोऽसि मूर्तयः कीदृशस्तु ते ।
कथं वैखानसा ब्रूयुः कथं वा पाञ्चरात्रिकाः ।
एवमेतत्पुरावृत्तं वैष्णवं धर्म शासनम् ।

इति तत्रादिमध्यान्तवचनैरवसीयते ।
श्रुता मे मानवा धर्मा इति तेभ्यो विभिद्य यः ।।
युष्मदीयान् वरान् धर्मान् पुण्यान् कथय मेऽच्युत ।।
इति प्रश्न उपक्रान्तगतस्तेनाप्यतिस्फुटम् ।
वेदोक्तेनैव स्वल्वाहुर्थर्मान् सन्तो मनूदितान् ।
श्रौतान्वर्णाश्रमाचारानुपदिश्य प्रपञ्चितः ।
इत्येष मानवो धर्मो युष्माकं कथितो मया ।
इत्युक्तिश्चोपसंहारे व्यासगीतासु दृश्यते ।
प्रसिद्धा च मनूक्तीनां वैदिकाचारनिष्ठता ।
तथापि मानवाद्धर्मजातादन्यत्वनिश्चये ।
विष्ण्वागमस्थिता धर्मास्तन्त्रोक्ता इति गम्यते ।
ततस्तद्वैष्णवं धर्मशास्त्रमित्यपि गीयते ।।
एवञ्चागमनिष्ठेन गायत्र्या विष्णुचिन्तना ।
कर्तव्येति न तत्कार्यं वैदिके वर्त्मनि स्थितैः ।
क्वचित्तन्त्रानुरोधेन धर्मान पौराणिका अपि ।
वदन्ति तादृशोऽशंस्तु ग्राह्यस्तन्त्रावलम्बिना ।
यत्तु तन्त्रानुसारेण कथितं तत्परित्यजेत् ।
धर्मशास्त्रे पुराणे च यत्नतो वैदिको जनः ।
इति स्मृर्तृभिरेवात्र व्यवस्थायाः प्रदर्शनात् ।
तस्मादागमनिष्ठानामाचारविकृतावपि ।।
वेदनिष्ठैस्सदा कार्यं गायत्र्या शिवचिन्तनम् ।
ध्यानप्रधानमेवैतत्सन्ध्याकर्म यतः श्रुतम् ।
यस्तु श्रीपार्वतीनाथपदाम्भोजपराङ्मुखः ।
वैदिकं मार्गमास्थाय तत्कर्माण्यनुतिष्ठति ।
न तस्य तानि कस्यैचित् कल्पन्ते फलसिद्धये ।
परिधानविहीनानि मण्डनानि नृणामिव ।
यतस्तानि वितन्यन्ते विना गायत्र्युपासनम् ।
शिवोपास्तिविहीनैस्तैरिति तात्पर्यसङ्ग्रहः ।।५५।।

।। इति गायत्र्याशिशवपरत्वनिरूपणम् ।।

द्विजातिष्वपि ब्राह्मणानां शिवभजनमेवावश्यकमित्याह--

यदग्नौ विप्राणामुपदिशति देवं यदपि ते
तदन्तर्यामित्वं तरुणशशिभूष प्रथयति ।
श्रुतिस्मृत्याम्नातं वचननिकुरुम्बं द्विविधम-
प्यदस्सम्भूय त्वां वदति कुलदैवं गिरिश नः ।।५६।।

यजुस्संहितायां तावत्-- **'आग्नेयो वै ब्राह्मणो देवतया'** इति ब्राह्मणानामग्निर्देवतेति श्रावितं, बृहदारण्यके च **'तदग्निनैव देवेषु ब्रह्माभवत् ब्राह्मणेन मनुष्येष्वि'**ति आराध्येषु देवेष्वग्नेः, आराधकेषु मनुष्येषु ब्राह्मणस्य च ब्रह्मरूपैकजातिसंबन्धोपन्यासेनायमर्थस्सूचितः । अत एव च्छन्दोगोपनिषदि स्फुटीकृतः-- **'त्वं देवेषु ब्राह्मणोऽस्यहं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युप त्वा धावामी'**ति । **'गुरुरग्निर्द्विजातीनामि'** त्यादिस्मृतयश्चास्मिन्नर्थे दृश्यन्ते । तस्मादग्निः ब्राह्मणैरवश्यमाराधनीय इति निर्विवादमेतत् । तदन्तर्यामित्वं च शिवस्य श्रुतिस्मृत्युदाहरणेन व्यवस्थापितमधस्तात्। तथाचाग्निर्ब्राह्मणानां देवतेति प्रतिपादकवचनानाम् अग्नेः प्रतिमन्वन्तरं भेदेन कल्पान्तराराधितस्य कल्पान्तरे फलदातृत्वायोगात् तदन्तर्यामिणो देवतात्वप्रतिपादने पर्यवस्यतां कस्तदन्तर्यामीति विशेषाकाङ्क्षायाम् आकाङ्क्षितविशेषसमर्पकैः शिवस्य तदन्तर्यामित्वप्रतिपादकैः वचनजातैः संभूय शिवस्य ब्रह्मकुलदेवतात्व- प्रतिपादने तात्पर्यविश्रमात् विशेषात् ब्राह्मणैरग्न्यन्तर्यामी शिवस्समाराधनीय इति भावः । तदाराधनं चाग्निसाध्यनित्यकर्माण्येव । अत एव स्मृतिः ---

'तस्मादग्निमुखे यत्तु दत्तं स्याद्येन केनचित् ।
तत्सर्वं रुद्रमुद्दिश्य दत्तं स्यान्नात्र संशयः ।।' इति ।

एवञ्च **'आग्नेयो वै ब्राह्मण'** इति श्रुतिमूलायाम् **'अग्नौ तिष्ठति विप्राणां दिवि देवो मनीषिणाम् ।'** इत्यादिस्मृतौ **'अहमग्निशिरोनिष्ठ'** इत्यादिवचनान्तर-प्रतिपन्नाग्न्यवस्थानशिवाभिप्रायेण अग्नौ तिष्ठतीति भेदनिर्देशोऽपि सङ्गच्छते । अन्यथा ह्यग्नेरेव देवतात्वे भेदनिर्देशो विरुध्येत । यश्चाग्निब्राह्मणयोरेकजाति-योगोपन्यासः, सोऽपि तदन्तर्याम्यभिप्रायेणेति च्छान्दोग्ये स्फुटम् । तत्र **'त्वं देवेष्वि'**त्यतः प्राक् **'विरूपाक्षोऽसि दन्ताञ्जिरि'**ति तदन्तर्यामिणशिवस्य प्रस्तावात्। न चाग्नावेव 'विरूपाक्षशब्दः कथंचिद्योज्यतामिति वाच्यम् ।

प्रसिध्यतिलङ्घनापत्तेः। प्रपदस्याग्न्तर्यामिरुद्रपरत्वेऽपि **'आवो राजानमि'**ति मन्त्रस्येवाग्निपरत्वप्रसिध्यविरोधाच्च। अत एव भाष्यकारेण तस्य रुद्रात्मकोऽग्निर्देवतेत्युक्तम् । कूर्मपुराणे यद्यपि

'प्रपद्ये त्वां विरूपाक्षं भूर्भूवस्स्वस्स्वरूपिणम् ।
हिरण्मये गृहे सुप्तं महान्तममितौजसम् ।।'

इति प्रपदार्थो वह्न्यष्टके दर्शितः ; तथापि तत्र वह्न्यष्टकमपि तदन्तर्यामिशिवाभेदेन तत्स्तुतिपरं प्रवृत्तमिति न दोषः । अत एव तत्र

'प्रपद्ये शरणं रुद्रं महाग्रासं त्रिलोचनम् ।
योगिनं कृत्तिवसनमीशानं कालरूपिणम् ।।'

इत्यादि व्यवहारः । एवं च **'ब्राह्मणो भगवान् रुद्र'** इत्यादि यत्पराशरादिवचनं, भागवते

'न नो गर्भमिमं ब्रह्मन् भूतानामृषमोऽवधीत् ।
रुद्रः पतिर्हि भूतानां यस्याकरवमंहसः।।
नमो रुद्राय महते देवायोग्राय मीढुषे ।
शिवाय न्यस्तदण्डाय भूतदण्डाय मन्यवे ।।'

इति रुद्रकोपेन स्वगर्भस्याहानिं प्रार्थयन्तीं दितिं प्रति एतद्गर्भोत्पन्नौ द्वावपि पुत्रौ नारायणो हनिष्यतीति काश्यपेनोक्ते

'वधं भगवता साक्षात्सुनासोदरबाहुना ।।
आशासे पुत्रयोर्मह्यं मा क्रुध्यात् ब्राह्मणात् प्रभोः ।
न ब्रह्मदण्डदग्धस्य न भूतभयदस्य च ।
'नारक्याश्चानुगृह्णन्ति यां यां योनिमसौ गतः ।'

इति विष्णुना स्वपुत्रयोर्वधमङ्गीकृत्यापि रुद्रकोपग्निना तयोर्भस्मीभावाभावं प्रार्थयन्त्याः पुनरपि तस्याः यद्रुद्रस्य ब्राह्मणत्वोपवर्णनं, तत्सर्व**'मग्निनैव देवेषु, त्वं देवेषु'** इत्यादिप्रत्यक्षश्रुतिमूलकमुपपद्यते । तस्मादग्नेर्ब्राह्मणदेवतात्वप्रतिपादकश्रुतीनां शिवस्य तद्देवतात्वप्रतिपादने तात्पर्यं वज्रलेपायते ।।५३।।

किञ्च कूर्मपुराणे--

'नृपाणां दैवतं विष्णुस्तथैव च पुरन्दरः ।
विप्राणामग्निरादित्यो ब्रह्मा चैव पिनाकधृत् ।।'

इति श्रवणात्, तत्रैव युगधर्मप्रकरणे

'ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान् रविः ।।

द्वापरे दैवतं विष्णुः कलौ देवो महेश्वरः ।।'

इति श्रवणात्

'तस्मात्सर्वप्रयत्नेन प्राप्य माहेश्वरं युगम् ।

विशेषात् ब्राह्मणो रुद्रमीशानं शरणं व्रजेत् ।।'

इति कलियुगोत्पन्नस्य ब्राह्मणस्य विशेषेण शिवभजनस्यावश्यकत्वप्रतिपादनात् पराशरवासिष्ठलैङ्गादिष्वपि उक्तार्थस्य व्यवस्थापनाच्च अधुना ब्राह्मणैर्नित्यं शिवाराधनमवश्यं कर्तव्यम्, तत्त्यागेन देवतान्तराश्रवणं कर्मान्तरानुष्ठानं च निष्फलं विररीतफलं वा आपद्यते ।

'यो वै स्वां देवतामतियजते प्रस्वायै देवतायै च्यवते न परां प्राप्नोति पापीयान् भवती'ति श्रुतेः,

'नार्चयन्तीह ये रुद्रं शिवं त्रिदशवन्दितम् ।

तेषां दानं तपो यज्ञो वृथा जीवितमेव च ।।

इतः पूर्वं कृतं कर्म भवद्भिरखिलं वृथा ।

लिङ्गार्चनं विना तेन मोहिता देवमायया ।'

इत्यादिदिव्यासपितामहादिवचनात् । तदेतत्सर्वमभिपेरत्याह -

गतिस्त्वं प्राप्तानां पुरहर जनिं ब्राह्मणकुले

विशेषादेतस्मिन् युग इति पुराणेषु विदितम् ।

अतस्त्यक्त्वैव त्वां जडमतिरुपास्ते यमपरं

स विप्रः पापीयान् भव तमपि देवं न लभते ।।५७।।

एवं संसारित्वोपाधिना शिवनियमितयावत्स्वस्वकृत्यानुष्ठानलक्षणं, मनुष्यत्वोपाधिना तद्भक्तिलक्षणं, द्विजत्वोपाधिना सवितृमण्डले तध्यानलक्षणं, ब्राह्मणत्वोपाधिना अग्निसाध्यकर्मानुष्ठानलक्षणं, कलियुगोत्पन्नत्वादिना तदर्चनादिलक्षणं च तदाराधनमस्मदादीनां नित्यमिति व्यवस्थापितम् ।।५७।।

अथ यो यदर्थयते, तस्यापि तदर्थं शिवाराधनमेव कर्तव्यमिति सामान्यतो

व्यवस्थापयति---

सहिष्णुस्त्वं तावत्परमशिव भावैकसुलभः
प्रसादस्ते हस्ते कृत इव झटित्येव भजताम् ।
ददासि त्वं स्वामिन् प्रणतजनवाञ्छासमधिकं
त्वदीयं विश्वं तद्गतिरिह बुभूषोरपि भवान् ।।५८।।

फलार्थं सेवमानेन तावत्सहिष्णुरेव सेवनीयः । आश्रितानां भ्रान्त्यज्ञानप्रमादादिप्रभवानामागसामवर्जनीयत्वेन प्रभोरसहिष्णुत्वे चिरकृताया अपि सेवाया वैफल्यप्रसङ्गात् । वदन्ति च नीतिविदः --
'त्यागशीलः प्रभुस्सेव्यत्यागशीलात् प्रियंवदः ।
प्रियंवदाद्विशेषज्ञो विशेषज्ञात् क्षमापरः ।' इति ।
सहिष्णुत्वं च शिवस्य प्रसिद्धं -- **'नमस्सहमानाय, अषाढाय सहनाय मीढुष'** इत्यादिषु। सहिष्णोरपि बहुक्लेशाधीनप्रसादस्याश्रयणं दुष्करम् । शिवस्तु भावैकसुलभः । **'भावग्राह्यमनीडाख्यं भावाभावकरं शिवमि'**ति मन्त्रोपनिषदि श्रवणात्,
'कृतकृत्यस्य तृप्तस्य मम किं क्रियते नरैः ।
बहिर्वाभ्यन्तरे वापि मया भावो हि गृह्यते ।'
इति शिववचनाच्च । भक्तिमात्रावर्जनीयोऽपि चिराश्रयणप्रसाद्यः क्षुद्रेऽपि कर्मण्यन्तरायबहुलेन जनेनाश्रयितुमशक्यः । शिवस्तु शीघ्रप्रसादः । तथात्वस्य शिवपुराणे बहुशः प्रतिपादनात्, भागवतेऽपि दशमस्कन्धे ब्रह्मादिभ्यस्तस्याशुतोषत्वव्यवस्थापनाच्च । शीघ्रप्रसादोऽप्यल्पफलप्रदः न बहुफलार्थिभिस्सेव्यः । शिवस्तु वाञ्छाधिकफलप्रदः । यस्स्वभक्तेभ्यो नारायणयक्षराजादिभ्यस्स्वस्मादप्यधिकत्वप्रत्ययकरं शौर्येश्वर्यादिकं प्रायच्छत् । बहुप्रदानरसिकोऽप्यपेक्षितफलस्याप्रभवन्न सेव्यः। शिवस्तु सर्वस्य पुरुषार्थजातस्येष्टे, यतो विश्वमेतत्तन्नियन्तृकम् । स एव हि समग्रैश्वर्यविश्रान्तिभूमिः । अन्येषां तु तत्प्रसादलब्धं परिच्छिन्नमैश्वर्यमिति असकृदावेदितम् । तथा च सर्वेषां फलार्थिनाम् **'एकाहाद्वा तेषां समत्वादि'**ति न्यायेन तस्मादेव तत एवाकाङ्क्षणं युक्तम् । तस्मात् फलार्थिसेवाप्रयोजकसकलकल्याणगुणसम्पूर्णत्वात् सर्वेश्वरत्वेन सर्वार्थितवितरणशक्तित्वाच्च फलार्थिरपि

शिव एवाराधनीय इति भावः ।।५८।।

एवं सामान्यतस्सकलार्थिभजनीयत्वं शिवस्य व्यवस्थापितम् । अधुना विशिष्यापि तत्तत्फलोत्कर्षार्थिभिस्तस्य भजनीयत्वं श्लोकद्वयेन व्यवस्थापयति---

महेश त्वत्पादाम्बुरुहयुगलासक्तमनसां
महाभोगोत्कर्षः प्रथित इह तावत् सुकृतिनाम् ।
परत्रास्तामन्यद्भवदनुचराणामपि पदं
हरिब्रह्मादीनामुपरि कथयन्त्यागमचिदः ।।५९।।

लोके पुरुषैरर्थ्यमानं हि फलं द्विविधं-- प्राकृतम्, अप्राकृतं च । आद्यमपि द्विविधम् -- ऐहिकं, पारत्रिकं चेति । तत्रैहिकं तावत् शिवाराधनेन सर्वोत्कृष्टं प्राप्यत इति -
'भवनानि मनोज्ञानि विभ्रमाभरणास्स्त्रियः ।
धनं चादृष्टपर्यन्तं शिवपूजाविधेः फलम् ।' इत्यादिषु प्रसिद्धम् । प्रपञ्चितं चातितरां शिवधर्मे । भागवतेऽपि--
'देवासुरमनुष्येषु ये भजन्त्यनिशं शिवम् ।
प्रायस्ते धनिनो भोज न तु लक्ष्म्याः पतिं हरिम् ।

एतद्वेदितुमिच्छामि सन्देहोऽत्र महान् हि नः ।
विरुद्धशीलयोः प्रभ्वोः विरुद्धा भजतां गतिः ।'
इति सेव्यमानप्रभुशीलविरुद्धौ शिवविष्णुभक्तानां भोगोत्कर्षापकर्षौ कथमिति राज्ञः प्रश्नेन शुक्रस्य तेषां तदुत्कर्षापकर्षमभ्युपगम्यैव कथञ्चित्तदुपपादकोपन्यासात् विरोधसमाधानेन च दृढीकृतम् । पारत्रिकमपि **'ये मामेकान्तभावेन देवं त्र्यम्बकमेव वा ।।'** इत्यादिना **'यान्त्येव मम लोकं वा रुद्रलोकमथापि वा।'** इत्यन्तेन वैष्णवधर्मशास्त्रीयभगवद्वचनेन दर्शितं रुद्रलोके प्राप्यं सर्वोत्कृष्टमिति वक्तव्यम् ; यः खलु
'यमाहुस्सर्वभूतानां प्रकृतेः प्रकृतिं ध्रुवाम् ।।
अनादिनिधनं देवं प्रभुं नारायणं परम् ।

ब्रह्मणस्सदनात्तस्य परं स्थानं प्रकाशते ।
ब्रह्मलोकमतिक्रम्य विष्णुलोके महीयते ।'

इत्यादिभिः पौराणिकवचनबोधायनसूत्रादिभिः ब्रह्मलोकादुपरितनत्वेन प्रतिपादितात् मोक्षधर्मोपदर्शितप्रमोदनवैकुण्ठसम्मोदनानिरुद्धादिस्थानचतुष्टयविराजमानाद्विष्णुलोकादपि उपरितनः ।। तथा हि काशीखण्डे प्रतिपादितम् --

'उपरिष्टात् क्षितेरष्टौ कोटयस्सत्यमीरितम् ।।
सत्यादुपरि वैकुण्ठो योजनानां प्रमाणतः ।।
भूलोकात्परिसङ्ख्यातः कोटिषोडशसम्मितः ।।
यत्रास्ते श्रीपतिस्साक्षात्सर्वेषामभयप्रदः ।।
ततस्तु षोडशगुणः कैलासोऽस्ति शिवालयः ।
पार्वत्या सहितश्शम्भुर्गजास्यस्कन्दनन्दिभिः ।।
यत्र तिष्ठति सर्वेशः सकलस्य परस्स्मृतः ।
तदेव तस्य लोकोऽयं स्वलीलामूर्तिधारिणः ।।
स विश्वेश इति ख्यातस्तस्याज्ञाकृदिदं जगत् ।।' इति ।

वायवीयेऽपि ब्रह्मविष्णुलोकाभ्यामुपरितनत्वेन अधिकैश्वर्यत्वेन च शिवलोकः प्रतिपादितः । स एव च शिवभक्तैः प्राप्यः । शिवधर्मोत्तरेऽपि विकलाङ्गादिरूपशिवपूजाप्राप्यान् विष्णुलोकान्तान् सर्वान् लोकानुपवर्ण्यानन्तरं दर्शितं--

'ज्ञेयं विष्णुपदादूर्ध्वं दिव्यं शिवपदं महत् ।।
भोगसंस्थानमतुलं कर्मयोगरतात्मनाम् ।।
अप्रमेयगुणैर्दिव्यैर्विमानैस्सूर्यसन्निभैः ।।
असङ्ख्यैस्तत् पुरं व्याप्तं सर्वप्राण्युपकारकैः ।।
सहस्रभूमिविस्तीर्णैस्सूर्यकोटिसमप्रभैः ।
रुद्रलोकमिति प्रोक्तमशेषगुणसंयुतम् ।
सर्वेषां शिवभक्तानां तत्पुरं परिकीर्तितम् ।
रुद्रक्षेत्रमृतानां च जङ्गमस्थावरात्मनाम् ।।'

इति वचनात् । तत्रैव प्रदेशान्तरेऽपि
'श्रीमच्छिवपुरं दिव्यमैश्वरं सार्वकामिकम् ।

शिवेन शिवभक्तानां कल्पितं वैष्णवात् परम् ।।' इति वचनाच्च । अयं तु शिवलोकः कर्मभक्तियोगरतानाम् । 'ये त्वहंग्रहोपासनारूपशिवध्यानासक्ताः तत्क्रतुन्यायेन शिवसायुज्यं प्राप्य **'भोगमात्रासाम्यलिङ्गाच्चे'**ति सूत्रोक्तरीत्या शिवसमभोगभाजो भवन्ति, तेषां परमशिवनित्याविर्भावस्थानभूतः ततोऽप्युपरितनः परमशिवलोकश्शिवधर्मोत्तर एव -

'इत्येतदपरं प्रोक्तं श्रीमच्छिवपुरं महत् ।
देहिनां कर्मनिष्ठानां पुनरावर्तनं स्मृतम् ।'

इति कर्मयोगादिप्राप्यपूर्वोक्तशिवलोकवर्णनं समाप्य

'ऊर्ध्वं शिवपुरात् ज्ञेयं स्थानत्रयमनुत्तमम् ।
नित्यं परमशुद्धं च स्कन्दोमाशङ्करात्मकम् ।।'

इत्युपक्रम्य

'शुद्धस्फटिकसङ्काशं जटामकुटभूषितम् ।
त्र्यक्षं चतुर्भुजं शान्तमक्षामालाधरं हरम् ।
वरदाभयहस्तं च त्रिशूलासक्तपाणिकम् ।
ध्यायमानश्शिवं नित्यं शिवसायुज्यमाप्नुयात् ।।
ये संप्राप्ताः परं स्थानं ध्यानयोगरता नराः ।
तेषां न पुनरावृत्तिर्घोरे संसारसागरे ।।
सर्वज्ञाः सर्वगाश्शुद्धाः परिपूर्णा महेश्वराः ।।
शिवतुल्यबलोपेताः परं शिवपुरं गताः ।।'

इति प्रतिपादनात् । आस्तामयं शिवसायुज्यं प्राप्तानां भोगोत्कर्षः । ये तु **'गीतिज्ञो यदि योगेन '** इत्यादियाज्ञवल्क्याद्युक्तरीत्या शिवप्रसादहेतुगानविद्याद्यभ्यासेन तत्फलं शिवानुचरत्वं प्राप्ताः, तेषां पदमपि ब्रह्मादिभ्यश्श्रेष्ठं वदन्ति । स्मरन्ति हि पौराणिकाः --

'भिन्दन्ति शैलानुदधीन् पिबन्ति व्यत्यासयन्ति क्षितिमन्तरिक्षम् ।
तृणीकृतब्रह्मपुरन्दराणां किं दुष्करं शङ्करकिङ्कराणाम् ।' इति ।
'ते हि साक्षाद्दिविषदो ह्यन्तरिक्षसदस्तथा ।।
पृथिवीषद इत्येते विज्ञेयास्त्रिविधा गणाः ।।'

इत्यादिपुराणोपबृंहिता देवव्रतरुद्रोपनिषदादयश्च तेषामपरिमितं महिमानं ख्यापयन्ति । 'द्वितीयं जप्त्वा गाणापत्यमवाप्नोति' इति । अथर्वशिरश्च महाफलप्रायपाठे रुद्रानुचरत्वं

कीर्तयत् देवतान्तरानुचरभावात् तस्यातितरामुत्कर्षं स्फुटयति । न हि **'वैष्णवं वामनमालभेत, विष्णुरेव भूत्वेमान् लोकानभिजयति, एतासामेव देवतानां सायुज्यं गच्छति'** इत्यादिदेवतान्तराणां सायुज्यस्येव तदनुचरभावस्य महाफलत्वेन श्रवणमस्ति । तस्मादैहिकं पारत्रिकं चाभ्युदयरूपं प्राकृतं फलं शिवाराधनेन सर्वोत्कृष्टं प्राप्यत इति स्थितम् ।।५९।।

निश्रेयसरूपे अप्राकृतफले अभ्युदयवदुत्कर्षापकर्षाभावेन तत्र शिवाराधनस्यान्तरङ्गोपायत्वलक्षणं देवतान्तराराधनाद्विशेषं स्थापयति ---

सुखं तद्भूमाख्यं निरतिशयमप्राकृतमपि
प्रसादायत्तं ते दृढभवमहारोगभिषजः ।
उपायोऽत्र ज्ञानं खलु शिव विशुद्धात्मविषयं
प्रसादे सत्येव प्रभृतिलक ते तच्च भवति ।।६०।।

'अशुभक्षयकर्तारं फलमुक्तिप्रदायकम् ।
यदि योन्यां प्रमुञ्चामि तं प्रपद्ये महेश्वरम् ।' इति गर्भोपनिषदि,
'योब्रह्माणं विदधाति पूर्वं यो वै वेदाश्च प्रहिणोति तस्मै ।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्य' इति ,
'अजात इत्येव कश्चित् भीरुः प्रपद्यते रुद्र यत्ते दक्षिणं मुखं तेन मां पाहि नित्यमि'ति च मन्त्रोपनिषदि, **'सद्योजातं प्रपद्यामी'**ति महोपनिषदि च शिवप्रपदनस्य मोक्षोपायत्त्वं श्रुतम् । **'अथ हैनं ब्रह्मचारिण ऊचुः किंजप्येनामृतत्वं ब्रूहीति; सहोवाच याज्ञवल्क्यः शतरुद्रीयेणेति एतानि ह वा अमृतस्य नामधेयानि एतैर्ह वा अमृतो भवती'**ति जाबालोपनिषदि शिवनामकीर्नननस्य तदुपायत्त्वं श्रुतम् ।
'यावच्छशाङ्कशकलामलबद्धमौलिर्न प्रीयते पशुपतिर्भगवान् महेशः ।
तावज्जरामरणजन्मशताभिघातैर्देहानि दुःखपिहितानि समुद्वहन्ति ।।
दिवसकरशशाङ्कवह्निनेत्रं त्रिभुवनसारमपारमाद्यमीशम् ।
अजरममरमप्रसाद्य रुद्रं जगति पुमानिह को लभेत शान्तिम् ।।'
इत्यादिम.ाभारते,
'यस्यानवद्यं चरितं मनीषिणो गृणन्त्यविद्यापटलं बिभित्सवः ।

यत्पादपद्मं महतां मनोभिर्निषेव्यते ब्रह्मरसासवार्थिभिः ।।
त्वमेकस्सर्वजगतामीश्वरो बन्धमोक्षयोः ।
तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ।।'

इति भागवते,
'नामानि ये महेशस्य गृणन्त्यज्ञानतोऽपि वा ।।
तेषामपि शिवो मुक्तिं ददाति किमतः परम् ।
व्याधीनां भेषजं यद्वत् प्रतिक्षेपस्स्वभावतः ।
तद्वत् संसारदोषाणां प्रतिक्षेपश्शिवस्स्मृतः ।।'
इति शिवपुराणादिषु च श्रुतम् । एतैः प्रमाणैश्शिवाराधनस्यान्तरङ्ग-मोक्षोपायत्वमवसीयते । ननु,
'आरोग्यं भास्करादिच्छेत् श्रियमिच्छेद्धुताशनात् ।
ईश्वरात् ज्ञानमन्विच्छेत् मोक्षमिच्छेत् जनार्दनात् ।'
इति स्मृत्या विष्ण्वाराधनं साक्षान्मोक्षोपायः , शिवाराधनं तु मोचकज्ञानसम्पादनद्वारेति निर्णयादुदाहृतवचनानि परम्परया तस्य तदुपयोगपराणीति न तस्यान्तरङ्गोपायत्वसिद्धिरिति चेत्, सत्यं गृह्णीम एतत् -- ज्ञानद्वारा शिवाराधनं मोक्षसाधनमिति । अत्र हि जन्तोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्ट इति जाबालोपनिषद्यविमुक्तोपासकानां शिवात्संसारतारकप्रणवरूपमहावाक्यार्थज्ञानरूप-लाभप्रतिपादनात् ; 'स नो देवश्शुभया स्मृत्या संयुनक्त्वि'तिमहोपनिषदि शिवं प्रस्तुत्य श्रवणाच्च । अत्र हि स्मृतिशब्देन मोचकस्साक्षात्कार एव विवक्षितः । 'स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्ष' इति छान्दोग्ये तत्र स्मृतिशब्दप्रयोगात्, विस्मृतकण्ठगतचामीकरप्रबोधकवाक्यजन्यज्ञानवत् स्वतः प्राप्तार्थविषयत्वेन तत्र स्मृतिशब्दस्य लक्षणोपपत्तेश्च । अत एवैतन्नमतिबोधकवाक्ये स्मारकत्वव्यवहारो लौकिकानाम् । 'ईश्वरात् ज्ञानमन्विच्छेत्' इत्युदाहृतस्मृतावपि प्रतिपादनाच्च । ज्ञानं हि मोचकपरमात्मसाक्षात्कार एव । 'मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।' इति अमरकोशे दर्शनात्,
'आत्मार्थमुच्यते ज्ञानं योगाभ्यासस्तपःक्रियाः ।
विद्याकल्पपरिज्ञानं विज्ञानं ब्रुवते बुधाः ।।'
इति बृहस्पतिस्मरणाच्च । विष्ण्वाराधनस्य साक्षान्मोक्षसाधनत्वं तु कुतः ? न

खल्वभ्युदयवत् कर्मसाध्यो मोक्षः । अविद्यास्तमयलक्षणस्य तस्य श्रुतिस्मृतिन्यायैर्ज्ञानैकसाध्यत्वनिश्चयात् । तस्मात् **'मोक्षमिच्छेत् जनार्दनादि'**तिस्मृतिरपि शिवाराधनस्य मोचकप्रतिपादकत्ववचनजातवत् परम्परयोपयोगपरा वर्णनीया । तथा च उदाहृतस्मृतौ वचनान्तरेषु च केषु चित् मोक्षसाधनतया अव्यवहितपर्वणि प्रतीयमानस्यापि विष्णवाराधनस्य उक्तन्यायेन तत्र निवेशासम्भवात् स्वस्थानच्चलितस्य ज्ञानपार्ष्ठिकान्वयं प्राप्तस्य साद्यस्कसवनीयन्यायेन स्थानितया शिवाराधनस्य प्राबल्येन तद्विरोधात्तत्रापि साक्षदन्वयमलभमानस्य ततोऽप्यधस्तनपर्वणि निवेशे

'ओङ्कारस्य प्रसादेन विष्णोश्चैव प्रसादतः ।
रुद्राराधनवाञ्छा स्यात्तदाराधनतत्परः ।
ज्ञानमानन्दमद्वैतं परं ब्रह्माधिगच्छति ।।'

इति सूतसंहितोपवृंहितेन

'ओङ्काररथमारुह्यविष्णुं कृत्वाथ सारथिम् ।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ।'

इति नादोपनिषन्मन्त्रेण,

'त्वामनाश्रित्य विश्वात्मन्न योमी मामुपेष्यती'ति

विष्णुं प्रति वरदातुश्शिवस्य कौर्मपठितवचनेन अन्यैश्च पराशरपुराणादिश्रुतैर्वहुभिर्वचनैस्सिद्धा शिवारिराधयिषासंपादनद्वारिका,

'यस्याहमनुगृह्णामि हरिष्ये तद्धनं शनैः ।
ततो धनं त्यजन्त्यस्मद्भजनात् दुःखदुःखितम् ।।'

इत्यादिभागवतोक्तक्रमेण मोचकज्ञानार्थप्रवृत्त्युपयोगिवैराग्यसम्पादनद्वारिका वा प्रणाडी फलमिति **'मोक्षमिच्छेत् जनार्दनादि'**ति स्मरणस्य तदन्ते **'सर्वमिच्छेत् गणाधिपादि'**ति विनायकाराधनस्य आरोग्यादिश्लोकत्रयपरिगणितयावत्फलस्मरणवत्परम्परया उपयोगेऽप्यविरोधादिति सर्वथा देवतान्तराराधनच्छिवाराधनस्य मुक्तावन्तरङ्गोपायत्वं वज्रलेपायते । एतदेवाभिप्रेत्य सौरपुराणे पठ्यते --

'क्रमेण लभ्यतेऽन्येषां मुक्तिराराधनाद्द्विजाः ।।
आराधनान्महेशस्य तस्मिन् जन्मनि मुच्यते ।।' इति ।

अत्र तस्मिन् जन्मनीति प्रकृष्टभक्तिपूर्वकज्ञानार्थशिवाराधकपुरुषधौरेयविषयम् । अन्यविषये

'अल्पभावोऽपि यो मर्त्यस्सोऽपि जन्मत्रयात् परम् ।

न योनियन्त्रपीडायै भविष्यति न संशयः ।।'
इति शैवोपदेशात् । नन्वस्त्वेवं निर्गुणब्रह्मवादे व्यवस्था , सगुणब्रह्मवादे मोक्षमिच्छेदित्यत्र स्वस्थानाच्चलनं न कर्तव्यमिति चेन्न । तत्रापि मुक्तेः परमपुरुषार्थत्वसिद्धये विश्वाधिकसायुज्यरूपत्वस्य च वक्तव्यतया
'दिनकृत्कोटिसङ्काशं स्थानमाद्यमुपापतेः ।'
इत्यादिपौराणिकवचननिचयोपवर्णित पूर्वश्लोकव्याख्यानप्रपञ्चितपरमशिवपुरप्राप्तिरूपत्वसिद्धौ **'देवान् देवयजो यान्ति मद्भक्ता यान्ति मामपी'**ति । गीतोक्तन्यायेन तस्य साक्षात् परमशिवप्रसादैकलभ्यतया वचनान्तरैकार्थ्येन तस्य स्वस्थानाच्चलनस्यावश्यकल्प्यत्वात् ।

ननु, कठवल्लीषु **'यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं सङ्ग्रहेण ब्रवीमि'**ति मुमुक्षुप्राप्यपदनिरूपणं प्रस्तुत्य **'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमि'**त्युपसंहारात् मुमुक्षुप्राप्यं वैष्णवं पदमितियवसीयत इति चेन्न । एषां मन्त्राणां **'येयं प्रेत'** इत्यादिजीवस्वरूपप्रश्नोत्तरमध्यपातितया जीवात्मभूतब्रह्मविषयत्वेनानुमानिकाधिकरणे भगवत्पादैर्निपुणतरं व्यवस्थापितत्वेन **'तद्विष्णोः परमं पदमि'**त्यस्य वैकुण्ठादिरूपवैष्णवस्थानपरत्वायोगात् । सगुणब्रह्मवादे तु उक्तन्यायेन **'सोऽध्वनः पारमाप्नोती'**ति षडध्वातीतत्वलिङ्गेन च परमशिवस्थानपरत्वस्य वक्तव्यत्वात् । निरुक्तं हि शिवेऽपि विष्णुरिति नामाथर्वशिखायां -- **'सर्वे देवास्संविशन्तीति विष्णुरि'**ति । तत्र **'व्यापनाद्व्यापी महादेव'** इति महादेवपदेन संज्ञिन उद्देशात् शिवसंज्ञानिर्वचनमिति स्पष्टम् । केचित्तु विष्णोरित्यस्य नारायणपरत्वं स्वीकृत्यैव पञ्चम्यन्तत्वं वदन्ति । नन्वापस्तम्बसूत्रे द्विजातीनामपवर्ग इति अपवर्गफलकत्वं ब्रह्ममेधस्योपक्रम्य **'वेष्टितुं पुरुषोत्तममि'** त्युक्तम् । पुरुषोत्तमशब्दश्च विष्णावसाधारणः । **'हरिर्यथैकः पुरुषोत्तम'** इति प्रसिद्धेः । तथा च ततो विष्णुप्राप्तिरेवापवर्ग इत्यवसीयत इति चेन्न । तस्य रूढ्यां असाधारण्येऽपि योगेन साधारण्यात् । **'अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्तत'** इत्यन्यत्रापि प्रयोगात्, **'उत्तमः पुरुषस्त्वन्य'** इति गीतासु ईश्वरे तदीययौगिकार्थस्य भगवता दर्शितत्वाच्च । ननु च रूढिर्योगात् प्रबलेति चेन्न ।
'स एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष' इति छान्दोग्ये अपवर्गप्राप्यरूपे उत्तमः पुरुष

इति यौगिकार्थपरशब्दस्य प्रयोगेण सूत्रस्थपुरुषोत्तमपदप्रयोगस्यापि कल्पनालाघवाय तन्मूलत्वस्य वाच्यतया मूलानुसारेण इह योगस्यैव प्राबल्यात् । पूर्वोक्तन्यायैः इह रूढ्यसम्भवाच्च ।

यदत्र रामानुजादयः प्राहुः --- तत्तद्विद्याप्रकरणश्रुतोपास्यपरपरब्रह्मपरमात्म-शिवाक्षरशम्भ्वादिशब्दैस्सकलपरविद्योपास्यं वस्त्वनूद्य नारायणानुवाकवाक्यैः तस्य नारायणत्वविधानात् तत्तत्परविद्योपास्यं परब्रह्मादिशब्दोदितं वस्तु नारायण इति निश्चीयते । परविद्याश्च मुक्त्यर्थाः । तथा च मुक्त्यर्थसकलपरविद्योपास्यो नारायण एव मुक्तिप्रद इति युक्तमिति । अत्र ब्रूमः --- एवंसति **'यदा तम'** इतिमन्त्रे यदेति सौबलवाक्यसिद्धकालविशेषप्राप्ततमोऽनुवाद इति मन्यमानानां तेषां कथं सुबालोपनिषदः शिवपरत्वं न सिध्येत् । तत्र तद्वृत्तयोगेन तत्कालवर्तिन-स्तमोऽधिष्ठातुस्सुबालोपनिषत्प्रतिपाद्यस्य शिवत्वविधानस्य इतोऽपि स्पष्टत्वात् ।

धीराः पश्यत पाण्डित्यं प्रतिपाद्यानुवाद्ययोः (१. पुरोवादानुवादयोः इति पा०) ।
बलाद्व्यवस्थितं मूर्खा जल्पन्ति स्वमताग्रहात् ।

अपि चैवं **'सर्वो वै रुद्र'** इत्यादिमन्त्राणां त्वदुक्तरीत्या सर्वपुरुषसन्महःप्रभृतिशब्दैः शाण्डिल्यविद्यापुरुषसूक्तसद्विद्याव्याहृतिविद्यादिसकलपरविद्योपास्यवस्त्वनुवादेन तस्य वाक्यैरुद्रत्वविधायकत्वस्याभ्युपगन्तव्यतया कथं नारायणस्सर्वविद्योपास्य इति निर्णयः। बलाबलविचारे तु **'सर्वो वै रुद्रः'** इत्यादिमन्त्रैः रुद्रस्सर्वपरविद्योयपास्यस्सिध्यतीति निर्णय एव युक्तः । **'सर्वो वै रुद्रः' 'पुरुषो वै रुद्र'** इत्यादिवाक्यानां स्पष्टभेदानां सर्वपुरुषाद्यनुवादेन रुद्रत्वविधायकत्वस्य स्पष्टत्वात् । **'सहस्रशीर्ष देवमि'** त्यादिमन्त्राणां **'तद्विश्वमुपजीवती'**ति नारायणस्य विश्वोपजीव्यत्ववर्णनेन तत्प्रशंसापरतया प्रतीयमानानां तत्र तत्र वाक्यभेदस्य द्वितीयानां प्रथमार्थत्वस्य च कल्प्यतया सहस्रशीर्षाद्यनुवादेन नारायणत्वविधिपरत्वकल्पनस्य क्लिष्टत्वात् । तस्मात्सप्तविंशश्लोकोक्तरीत्या शैवदहरविद्याप्रकरणे तत्प्राशस्त्यख्यापनाय तदनुष्ठातृनारायणप्रशंसापरा इमे मन्त्राः । **'प्रकरणे चासम्भवन्नपकर्षो न कल्प्येते'**ति न्यायादिति नैभिर्नारायणस्य सकलपरविद्योपास्यत्वसिद्धिः । तस्मादुक्तरीत्या देवतान्तर-भजनाच्छिवभजनस्योत्कर्षो वज्रलेपायते । अत एवानुशासनिके श्रीकृष्णवचनं--

'नास्ति शर्वसमो देवो नास्ति शर्वसमा गतिरि'ति ।

ननु, गीतासु **'ईश्वरस्सर्वभूतानामि'**ति शिवं प्रस्तुत्य·

'तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ।
इति ते ज्ञानमाख्यातं गुह्यात् गुह्यतरं मया ।
विमृश्य तदशेषेण यथेच्छसि तथाकुरु ।।'
इत्यन्तेन मुक्तिफलकं तद्भजनं विधायानन्तरं 'सर्वगुह्यतमं भूयश्शृणु मे परमं वचः।'
इत्यारभ्य 'मन्मना भव मद्भक्तः' इत्यादिना विष्णुभजनं ततोऽप्युत्कुष्टं विधीयत इति प्रतीयते । उच्यते -- श्रुतार्थश्रवणावृत्तिपरभूयश्शब्दस्वारस्यात् 'मन्मना भवे'ति श्लोकेन बहुशः पूर्वं प्रतिपादितार्थस्य वर्णनात् 'मामेकं शरणं व्रज'इत्यस्य 'तमेव शरणं गच्छे'त्यवधारणविरोधेन ईश्वरातिरिक्तभजनविधिपरत्वायोगात्, ईश्वरे कृष्णस्यास्मच्छब्दोपपत्तेः गीतायाश्शिवपरत्वोपपादनस्थले प्रदर्शितत्वाच्च । 'गुह्यतममि'त्यादि बुद्धिसौकर्याय संगृह्य प्रागुपवर्णितसकलार्थसारोपसंहारपरमिति नात्र कृतचोद्यावकाशः ।

यत्तु वैष्णवतन्त्रानुसारिणां व्याख्यानं 'यथेच्छसि तथा कुर्वि'त्यन्तेन भगवान् कर्मज्ञानभक्तियोगानपवर्गफलकानुपदिश्य तच्छृण्वतोऽर्जुनस्य विषादं पश्यन् पूर्वं प्रपञ्चितानुष्ठेयसाकल्यसङ्कलनासामर्थ्येन तेषां दुष्करत्वबुध्या वा विषाद इति विवेक्तुं प्रथमं पूर्वप्रपञ्चितानर्थान् सङ्कलय्य दर्शयित्वा पुनरपि तस्य तदवस्थं विषादं पश्यन् परमकारुणिकस्सर्वेभ्यो लघुतरं 'मुमुक्षुर्वै शरणमहं प्रपद्य' इति श्रुतिसिद्धं शरणागत्याख्यं पाञ्चरात्राभिहितं प्रपदनं कर्मज्ञानभक्तियोगनैरपेक्ष्योणापवर्गसाधनं 'सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजे' त्यादिना उपदिश्य 'मा शुच' इति तस्य विषादमपनीतवानित्यादि, तत्राप्युदाहृतमूलश्रुतेश्शिवपरत्वस्याद्यमङ्गलश्लोके व्यवस्थापनात्, शैवशास्त्रेष्वपि बहुशश्शरणागतिविधिसद्भावेन वैष्णवतन्त्रैरर्थनियमनायोगाच्च 'सर्वधर्मानि' त्यादेश्शिवप्रपत्तिविधिपरत्त्वमेवं सिध्यतीति दिक् ।
नन्वस्त्वत्रैवं, मोक्षधर्मगतस्य
'ब्रह्माणं नीलकण्ठं च याश्चान्यास्सर्वदेवताः ।
प्रतिबुद्धा न सेवन्ते यस्मात्परिमितं फलम् ।'
इति वचनस्य का गितिरिति चेत्, स्मर तावदिदमुक्तं-- मुक्तिः परमपुरषार्थः । तत्र एको बोध एवोपायः । देवताभजनानि तु बुभुत्सुकृतानि तत्तद्देवतावाप्तिपर्यन्त-

फलप्रदानि, मुमुक्षुकृतानि सूतसंहितादिदर्शितया प्रणाड्या मुक्त्यनुकूलानीति । तथा च प्रतिबुद्धा उत्पन्नब्रह्मसाक्षात्काराः सामान्यतो विशेषतश्च गृहीतान् सर्वान् देवान् न सेवन्ते, यस्मात् सेवाफलमात्रं परिमितं वैषयिकभोगरूपत्वात् परिच्छिन्नमपरिच्छिन्न-ब्रह्मानन्दामृतजलधिवेलोपगतान् उत्पन्नसाक्षात्कारान् प्रतीति तदर्थः। ज्ञाने सिद्धे तदर्थमपि न सेवन्त इति तद्भावः, न तु विष्ण्वतिरिक्तान् देवान् प्रतिबुद्धा न सेवन्त इति । 'याश्चान्या' इत्यन्यश्रुतेर्विशिष्य गृहीतेतरसर्वदेवताग्राहिण्याः सङ्कुचितवृत्त्या-पादकप्रबलप्रमाणादर्शनात् । **'अतो वेदनपर्यन्तं भक्तिर्ध्यानं जपार्चनमि'**त्यादिपराशरादिवचनैर्देवतार्चनमात्रस्य ब्रह्मज्ञानपर्यन्तत्वस्य स्पष्टं प्रतिपादितत्वाच्च । किञ्चास्य श्लोकस्य विष्णुभजनाधिक्य- प्रतिपादकत्वेऽप्युदाहृतानेकप्रमाणविरोधे तत्प्रशंसामात्रपरत्वात् न कश्चिद्दोषः . सन्ति ह्येतादृशानि परस्सहस्राणि शिवभजनोत्कर्षपराणि । किं बहुना । शिवभजनोत्कर्षज्ञापनायैव नारायणोऽपि शिवार्चनं करोतीति भारतादिषु सिद्धम् । एतेनान्यान्यप्येवंजातीयकानि **'न बुद्धिभेदं जनयेदि'**ति न्यायेन श्रोतृबुध्द्यनुसारादिना प्रवृत्तानि वचनान्तराणि व्याख्यातानि । तस्मान्न देवतान्तराराधनस्य शिवाराधनादुत्कर्षकल्पना युक्तिमती । ननु, मा भूदुत्कर्षः ततः, विष्णुभजनस्य साम्यं तु स्यात्, स्मृतिपुराणेतिहासकल्पसूत्रादिषु तयोरर्चनादिविकल्पप्रतिपादनादिति चेत्, तर्हि **'अथ गृहस्थो ह्यहरहरिष्टान् देवानिष्टाभीष्टार्थांश्चिनोति । ते च देवाः गणपतिर्वा स्कन्दो वा सूर्यो वा सरस्वती वा गौरी वा गौरीपतिर्वा श्रीर्वा श्रीपतिर्वा ते च यथारुचि वेज्यन्त'** इत्यादिबह्वृचगृह्यादिदर्शनाद्देवताभजनानां क्वचिदपि विशेष एव न सिध्येत् । यदि च विशेषवचनानुरोधात् तस्याविवक्षितविशेषफलसामान्याभिप्रायेण विकल्पपरत्वं, तर्हि प्रकृतेऽपि तथास्तु ।

नन्वस्त्वेवं शिवविष्णवादिकर्मभक्तियोगानां फलतो विशेषः, तद्विषयाहङ्ग्रहो-पासनारूपस्य ध्यानयोगस्य तद्विशेषोऽयुक्तः । **'विकल्पोऽविशिष्टफलत्वादि'**ति मुक्त्यर्थानां सगुणोपासनानां विकल्पं सूत्रयता सूत्रकारेण कण्ठतः फलाविशेषोपदर्शनादिति चेत्, उच्यते-- **'शिव एको ध्येयश्शिवंकरस्सर्वमन्यत् परित्यज्येति'** सर्वेतरदेवतावैमुख्येन शिवध्यानकर्तव्यतां मुखत एव उपदर्शयन्त्या श्रुत्यैव शिवध्यानस्य सर्वोत्कर्षप्रत्यायनात् न देवतान्तरध्यानानां तत्साम्यवचने प्रामाणिकानां रसना प्रवर्तते । **'सर्वमन्यत् परित्यज्ये'**ति कर्मयोगादिकं परित्यज्य

ध्याने स्थातव्यमिति उपदिगशन्तीयं श्रुतिः **'तपस्विभ्योऽधिको योगी'** त्यादिस्मृतिवत् कर्मयोगादिभ्यो ध्यानयोगस्य उत्कर्षप्रतिपादने पर्यवसिततात्पर्या न देवताविशेषग्रहणे भारं करोतीति शङ्कापि चमसाधिकरणन्यायविदां न हृदयमधिरोहति । न चात्र विषयोपसर्जनध्यानात् अन्यत्कर्मयोगादिकं 'सर्वमन्यदि'त्यनेनोच्यते । तस्य प्राधान्येन निर्दिष्टशिवेतरसकलदैवतजातपरत्वौचित्यात् । नाप्यत्र ब्रह्मकोट्यन्तर्गतमूर्तिविशेषव्यतिरिक्तेषु अग्न्यादिषु सर्वमन्यदित्यस्य संकुचितवृत्तिकल्पनं युक्तम् । सर्वेषामन्येषां परित्याज्यवत्वोपपत्तिप्रदर्शके **'ब्रह्मविष्णुरुद्रेन्द्रास्ते संप्रसूयन्त'** इति पूर्ववाक्ये ब्रह्मादीनां विशिष्य ग्रहणेन तेषु सर्वमन्यदित्यस्य वृत्तेरावश्यकत्वात् । यत्तु सूत्रमुदाहृतं, तदपि सगुणपरविद्यानां नोद्देश्यफलाविशेषप्रतिपादनपरम् । मुक्तेर्निर्गुणविद्याफलत्वात् अन्यत्र च सम्भवदुत्कर्षापकर्षफले तत्तदुपास्यगुणोपचयापचयकालदैर्ध्यतदभावप्रयुक्तस्य तारतम्यस्याश्यकत्वात् । किं तु भाष्योक्तरीत्या प्रयाणकालीनोपास्यसाक्षात्कारविशेषपरमिति न विरोधः । तस्मादभ्युदयेषु सर्वोत्कृष्टफलप्रापकत्वात् निश्रेयसे सर्वतोऽन्तरङ्गत्वाच्च फलार्थिनामिति शिवाराधनमेवाभ्यर्हितमिति सिद्धम् ।।६०।।

एवं शिवस्य प्रत्यवायपरिहाराभ्युदयनिश्रेयसार्थिसकलकर्माधिकृतप्राणिबृन्दसेव्यत्वं व्यवस्थाप्य तत्सेवाविमुखान् कुमतावलम्बिनो दुर्भगांस्तान्त्रिकानुपालभते --

अवश्यं कर्तव्ये शिव तव समाराधनविधौ
अनायासाद्वाञ्छासमधिकफलस्पर्शनचणे ।
विहाय त्वां विश्वाधिक मृगयते देवमितरं
विमूढस्सेवायै शिव शिव न लङ्घ्यो हतविधिः ।।६१।।

एवं किल तेषां दुर्भगानां प्रतिपत्तिः --- यद्यप्यन्यदेवताविषया अपि भक्त्यर्चननमस्कारादिविधयस्सन्ति, तथाप्यन्यत्र सावकाशास्ते न नारायणप्रपन्नानधिकुर्वन्ति । **'नान्यं देवं नमस्कुर्याद्विष्णुपादाब्जसंश्रय'** **'अनन्यदेवताभक्ता ये मद्भक्तजनप्रिया'** इत्यादिभागवतवैष्णवधर्मशास्त्रादिविशेषवचनविरोधात् । मोक्षधर्मादिषु भगवद्भक्तानामनन्ययजनस्य प्रतिपादनाच्च । तथा च भगवन्तं प्रपन्नैश्शिवनमस्कारादिकं न कर्तव्यमिति । तत्रेदमभिसंहितम् -- एवं हि

भगवत्प्रपत्तिविधायकत्वेन तदभिमतायां **'सर्वधर्मान् परित्यज्ये'**ति **'तस्मात् त्वमुद्धवोत्सृजे'** त्यादिस्मृतौ सर्वधर्मपरित्यागस्य तदङ्गत्वेन विधानप्रतीतेः विहितानुष्ठाननिषिद्धपरिहारादिलक्षणास्सर्वे धर्मास्तैः परित्यक्तव्या इति सुरगुरुमतधुरीणवदुत्पथवृत्तित्वमेव तेषां प्रसज्येत । इयांस्तु विशेषो लभ्यतेयल्लोकायतिकानां निषिद्धाननुष्ठाने तत्प्रयुक्तसुखालाभमात्रम्, तेषां तु स्वावलम्बितायाः प्रपत्तेरङ्गवैकल्यमपीति । अथ मतं पुरुषेण अवर्जनीयतया क्रियमाणेषु कर्मसु केषांचिद्धर्मत्वावश्यम्भावात् सर्वधर्मपरित्यागस्य सागरतरण-वदशकयोपदेशतया उदाहृतस्मृतेस्सर्वधर्मपरित्यागस्य शरणव्रज्याङ्गत्वेन प्रतीयमानार्थे न तात्पर्यं, किं तु शोकनिवृत्त्यनुवादोऽत्रेयशोकोत्पत्तिनिदानमुक्त्युपायशून्यत्वाक्षिप्त-पूर्वोपदिष्टकर्मज्ञानभक्तियोगरूपोपायान्तरानुष्ठानाशक्तौ । अशक्तिश्च त्यागशब्देन लक्षणयानूद्यते । तथा च **सर्वधर्मान् परित्यज्य मा शुच** इति व्यवहितयोजनायाम् उपायान्तराशक्तः परमपुरुषार्थप्राप्तौ विलम्बाक्षमतया तीव्रशोकः प्रपदनाधिकारी लभ्यत इति । एवं हि यदि **'नान्यं देवं नमस्कुर्यादि'**त्यादित्वदुताहृतस्मृतिः देवतान्तरनमस्कारत्यागस्य भगवत्प्रपत्त्यङ्गत्वविधिपरा,तदा वेदाधिकृतानां स्वस्वशाखान्तर्गतदेवव्रतशतरुद्रीयपञ्चब्रह्ममन्त्राध्ययनादि कालीनवाचिकशिव-नमस्काराणामवर्जनीयत्वात् तत्त्यागाङ्गकायां प्रपत्तौ वेदबाह्योऽधिकारीति लभ्यते । तद्विधायकांगमानामपि तदधिकारिकत्वस्य प्राग्व्यवस्थापनादिति न वैदिकानां शिवनमस्कारत्यागप्रसक्तिः । न च कायिक एव नमस्कारः, न नमःशब्दोच्चारण-मात्रमिति वाच्यम् । लोके वाचिकनमस्कारप्रसिद्धेर्निरालम्बनतापत्तेः, **'नमस्ते हरसे शोचिष इत्याह' 'नमस्कृत्य हि वसीयांसमुपचरन्ती'** ति वैदिकलिङ्गविरोधप्रसङ्काच्च बुद्धिपूर्वकदेवतान्तरनमस्कारवर्जनं वैदिकनामपि शक्यमिति चेत्, तथाभूतसर्वधर्मपरित्यागोऽपि शक्य इति तुल्यम् । अथोच्येत--- नित्यविधिविहितानां वर्णाश्रमाधिधर्माणां त्यागायोगात् सर्वधर्मान् परित्यज्येति प्रपदनाधिकारिविशेषणाशक्त्यनुवादकं, काम्यकर्मफलमुक्त्युपायान्तराद्यन्तत-मत्यागविधायकं वेति कल्प्यत इति, न तर्हि शिवार्चननमस्कारादीनामपि त्यागो युज्यते। उपपादितं हि शिवाराधनस्य नित्यत्वमधस्तात् ।

'पुरुषार्थप्रबोधे हि पूजायाः पार्वतीपतेः ।
नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत् ।।'
इत्युक्त्यातिक्रमे दोषश्रुतेरत्यागचोदनात् ।

फलाश्रुतेर्वीप्सया च नित्यत्वमुपपादितम् ।
स्फुटं तत्रैव तत्सर्वमिति नेह विलिख्यते ।।

वैष्णवातिरिक्तविषयत्वेन तत्सर्वं सावकाशमिति चेत्, तर्हि वर्णाश्रमादिधर्मविधानमपि तथा सावकाशमिति न **'सर्वधर्मानि'**त्यादेरपि अर्थान्तरं कल्पनीयं स्यात्. अथापि स्यात्-- भगवच्छास्त्रेषु वैष्णवानधिकृत्यैव नित्यकर्मणामत्यागविधानात् न तेषां तत्त्यागो युक्त इति , तर्हि स्कान्दे भृगुशापाध्याये कौर्मादिषु च तानेवाधिकृत्य शिवार्चननमस्कारशिवभक्तिपूजादीनामत्यागस्य बहुशो विधानात् तत्त्यागिनां पाषण्डत्वप्रतिपादनाच्च शिवार्चनत्यागोऽपि न युक्तः । कथं च सर्वथा शिवाराधनत्यागे पाकयज्ञादिसंस्थानिर्वाहः । साकमेधीयत्र्यम्बकहविरीशानवल्यादीनामपि त्यक्तव्यत्वापत्तेः। तत्तद्देवतोद्देशेन विहितानां कर्मणां सर्वान्तर्यामी नारायण एव भोक्तेति न तेषां त्याज्यतेति चेत्, तर्हि तव किमपराद्धमकरणे प्रत्यगात्मपर्यवसायिना शिवार्चनादिना । वस्तुतस्तु तत्तद्देवतोद्देशेन विहितानि कर्माणि तत्तद्देवताभोक्तृकाण्येव। अन्यथा तत्तद्देवतानां यज्ञभागप्रार्थनाद्यर्थवादानामत्यन्तपारार्थ्यापत्तेः । परब्रह्मणस्सर्वकर्मभोक्तृत्ववचनानि तस्य सार्वात्म्यादुपपद्यन्ते । अत एव सृष्टिप्रकरणे वाजसनेयश्रुतिः --- **'तद्यदिदमाहुरमुं यजामुं यजेति एकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा'** इति देवतान्तरोद्देशेन क्रियमाणानामपि कर्मणां तन्नियोगनिर्वर्तनरूपत्वात्तदाराधनरूपत्वं च सङ्गच्छते राजनियोगात् कुमारामात्यादिपरिचरणस्येव राजसेवारूपत्वम् । अत एव 'फलमत उपपत्तेरि'ति सूत्रसिद्धं तस्य सर्वकर्मफलप्रदत्वं न विरुध्यते । एवं च यद्बालिशानां वैष्णवधर्मत्वेनाभिमतं नान्ययजनं, तत् यदि तत्तत्कर्मान्वयितया श्रुतानामन्यदेवानामयजनमेव, तदा तेषां वर्णाश्रमधर्माणां त्यक्तव्यतापत्तिर्वज्रलेपायते । यदि च तदविरोधेन स्वतन्त्रान्यदेवतानियोगानुष्ठानरूपं, तदा सकलकर्ममर्यादाप्रवर्तकश्शेषी परमात्मा यदि नारायणादन्यः, तदा तेषां वैदिककर्मानुष्ठानेनोक्तरूपमनन्ययजनं सिध्यतीति तत्त्याग आवश्यकः । यदि तु स एव, तदान्येषामप्यनन्ययजनमविशिष्टम् । अभिसन्धिविशेषाद्विशेषोऽस्तीति चेत्, तत्तद्विरुद्धाभिसन्धिमतामभिसन्धेरेव भ्रमत्वेन कर्मणां भगवन्नियोगरूपत्वानपायात् । न हि दोषप्रयुक्तात् पुरुषाभिसन्धिमात्रात् वस्त्वन्यथाभावः । विरुद्धाभिसन्धिपूर्वककर्मत्याग एवानन्ययजनमिति चेत्, न । विशेष्यात्यागात् । विशेषणमात्रत्यागस्त्विति चेन्न । सज्ज्ञानभ्रमाणां वैष्णवदीक्षाप्रवेशेऽपि तत्त्यागस्याशक्यत्वात् तन्निवृत्तये विशेषदर्शनाद्यणे प्रपद्नस्य

ज्ञानयोगसापेक्षत्वापातात् अशक्ताधिकारत्वहानेः । तस्माद्देवतान्तरत्यागो वैष्णवानां धर्म इति प्रलापो निरर्थकः । अपि च सर्वकर्मणां मर्यादाप्रवर्तकस्तदाराध्यस्तत्फलदाता च शिव एवेति दर्शितमधस्तात् । व्यवस्थापितं च निपुणतरं श्रुतिसूक्तिमालायाम् । तथा च देवतान्तरत्यागे सर्वकर्मणामवश्यं त्यक्तव्यत्वापत्तिर्वज्रलेपायते इत्यलमलक्ष्यलक्ष्यीकरणेनेति ।।

एवं मूर्खाणां शिवभजनवैमुख्यस्य पापपरिपाकरूपत्वं प्रदर्श्य तद्वैमुख्यस्य पापसाध्यत्वे दृष्टद्वारोपन्यासेन तदेव दृढीकृत्य स्वस्य शिवभजनैकान्त्यसम्पादनेन सकलभयसंतारकस्य निरतिशयपुरुषार्थरत्नाकरस्य बांधस्य स्थैर्यं प्रार्थयते --

भ्रमाल्लोभान्मोहान्मतदुरभिमानादपि मुधा
नयन्त्यायुर्नाशं शिव तव पदाम्भोदविमुखाः ।
वयं तावत्सर्वे सहसुतकलत्रादिभिरिमे
भवामस्ते दासा इति मतिरियं मेऽस्तु सुदृढा ।।६२।।

भ्रमः शास्त्रसिद्ध्ददेवतापरापरभावादिविपर्ययज्ञानं, मोहः तदज्ञानं, लोभः कुमतांभिमानिधनिकसंप्रीणनेनोदरभरणदुराशा, मतदुरभिमानः प्राक्स्वीकृतकुमत-दुराग्रहः । अपिशब्देन प्राचीनदुर्वासनानुवृत्तिव्याजशिवद्वेषादिकं समुच्चीयते । शिवदास्यस्यानादिसिद्धत्वेनाप्रार्थनीयत्वात्तन्मतिस्थैर्यमेव प्रार्थितम् ।।

अथैवमारचितं स्तोत्रमुपहारमालारूपेण भगवत्पादाम्बुजयोस्समर्पणेन भगवन्तं प्रसादयन्नेतत्स्तोत्रप्रचारमुपायनमुखेन प्रार्थयते --

इति विरचिता पद्यैष्षष्ट्या पदाम्बुरुहद्वये
तव शिकरिणीमाला लीलाकिरात समर्पिता ।
अनुदिनमिमामित्थं धन्यस्सकृत्पठति प्रभोः
तव स लभतां साकं कुल्यैः कटाक्षकृपामृतम् ।।६३।।

अथैवं स्तोत्ररचनायां मन्दमतेर्भ्रान्त्यादिकृतस्य तत्त्वार्थे स्खालित्यस्यावर्जनीयत्वादपचारः प्राप्त इति भीतस्तदपनयनार्थमाह---

क्वाहं मूढः क्व तव महिमा निर्जरैरप्यमेयः
स्तोत्रव्याजादयमपि महान् केवलं मेऽपचारः ।
किन्तु स्वामिन् सदसदपि वा भक्तिपूर्वं कृतं यत्
भक्तिग्राह्यस्तदखिलमपि क्षाम्यसीति श्रमोऽयम् ।।६४।।

वेदाहमेतमिति यन्महिमावबोधं
नारायणस्य भगवानवदत् स्ववाचा ।
स्वस्यातिगौरवकरं तमशेषमूलं
कोऽन्यः परं शिवमिहार्हति नाम बोद्धुम् ।।

सदाशिवपदाम्भोजसक्तधीरप्पदीक्षितः ।
समग्रहीत्समस्तं तत् सारमित्थं त्रयीगिराम् ।।
विभक्तार्थं विश्वेश्वरमहिमपारायणमिदं
गभीरैर्मीमांसाद्वयनयनिबन्धैस्सुघटितम् ।
धिया किंचित् पूर्वापरनयविचारावहितया
विचिन्वन्तस्सन्तस्सुचिरमनुगृह्णन्तु विबुधाः ।।

विद्वद्गुरोर्विहितविश्वजिदध्वरस्य
श्रीसर्वतोमुखमहाव्रतयाजिसूनोः ।
श्रीरङ्गराजमखिनः श्रितचन्द्रमौलिः
अस्त्यप्पदीक्षित इति प्रथितस्तनूजः ।।

इति सर्वतन्त्रस्वतन्त्रश्रीमदप्पयदीक्षितकृतौ शिखरिणीमालाव्याख्याने शिवतत्त्वविवेके श्रीसदाशिवस्य विश्वसेव्यत्वव्यवस्थापनपरिच्छेदः ।

।। सम्पूर्णोऽयं ग्रन्थः ।।

।।ॐ।।

शिवाभ्यां नमः

श्रीमदप्पय्यदीक्षितेन्द्र विरचितम्

आदित्यस्तोत्ररत्नम्

स्वोपज्ञया रत्नप्रकाशिकया वृत्त्या संवलितम्

आदित्यस्तोत्ररत्नस्य वृत्ती रत्नप्रकाशिका ।
अस्माभिरेव क्रियते नातिसंकोचविस्तरा ।।

तत्र तावद् रथमहिमस्तवनार्थः प्रथमः श्लोकः -

विस्तारायाममानं दशभिरुपगतो योजनानां सहस्रै
श्चक्रे पञ्चारनाभित्रितयवति लसन्नेमिषट्के निविष्टः ।
सप्तच्छन्दस्तुरङ्गाहितवहनधुरो हायनांशत्रिवर्गव्यक्त्या
क्लृप्ताखिलाङ्गः स्फुरतु मम पुरः स्यन्दनश्चण्डभानोः ।।१।।

विस्तारेति । भगवतः सूर्यस्य रथः दशसहस्रयोजनविस्तारः, तावदायामश्च सूर्यरथं प्रकृत्य---
"दशयोजनसाहस्रो विस्तारायामतो रथः" इति वायूक्तेः ।
"दशयोजनसाहस्रो विस्तारायामतः स्मृतः ।
द्विगुणोऽस्य रथोपस्थादीषादण्डः प्रमाणतः ।।"
इति ब्रह्मकैवर्तदर्शनाच्च । यत्तु लिङ्गपुराणे--
"सौरस्तु ब्रह्मणा सृष्टो रथो हेमपरिष्कृतः ।"
इति प्रकृत्योक्तम् -
"नवयोजनसाहस्रो विस्तारायामतो रथः"
इति, तन्मण्डलाधिष्ठितरथमध्यावकाशाभिप्रायम् । द्वादशादित्यादिपरिवारव्याप्तः परितः सहस्रयोजनो रथाङ्ग इति तत्साहित्येन दशसहस्रयोजनत्ववचनमिति द्विविधवचनोपपत्तिः । तदेतत् उत्तरश्लोकव्याख्याने स्फुटीभविष्यति । अस्य रथस्य चक्रम् एकं पञ्चारं त्रिनाभि षण्णेमि च

"सप्त युञ्जन्ति रथमेकचक्रम् पञ्चारं चक्रं परिवर्तते पृथु त्रिनाभि चक्रमजरम्"
इत्यादिश्रुतेः।

संस्थितेनैकचक्रेण पञ्चारेण त्रिनाभिना ।
हिरण्मयेन भगवान् षट्प्रकतारैकनेमिना ।।
रथेन भास्वता सूर्यः स्यन्दनेन प्रसर्पति ।"

इति ब्रह्मकैवर्तवचनाच्च । नाभिः चक्रस्य मध्यावयवो यस्य मध्यरन्ध्रे अक्षदण्डः प्रोतस्तिष्ठति । नेमिः चक्रस्य प्रान्तवलयः । अराः नाभिर्नेमिमध्यावयवाः :

"स्त्री नेमिर्ना पथिश्चक्रप्रान्ते तुम्बा तु नाडिका ।
अरास्तयोः स्थिता मध्ये ....।।

इति नैघण्टुकोक्तेः । अक्षदण्डसंयोजनार्थं मध्यदण्डं परितः त्रिमेखला मध्यावयव इति त्रिनाभीदं चक्रम् ; प्रान्तवलयो नेमिः , उपर्युपरिनिषक्तषण्मेखलः, अस्य च रथस्य वहनकृत्यं सप्तसु छन्दोरूपेषु अश्वेषु आहितम् ;

"सप्त त्वा हरितो रथे वहन्ति देव सूर्य" इत्यादिश्रुतेः ।

"हयाश्च सप्तच्छन्दासि तेषां नामानि मे शृणु ।
गायत्री च बृहत्युष्णिग् जगती त्रिष्टुभेव च ।।
अनुष्टुप् पङ्क्तिरित्युक्ताश्छन्दांसि हरयो रवेः ।"

इति विष्णुपुराणवचनाच्च । "एको अश्वो वहति सप्तनामा" इत्यस्यास्तु अभियुक्तोक्तेरित्थमर्थः उक्तः - अश्वः सूर्यः, "अशू व्याप्तौ" इति धात्वर्थानुगमात् । सप्तनामा सप्तभिः सुषुम्नादिरश्मिभिः सप्तप्रकारः वहति प्रापयति कालं नयतीति, यद्वेवमर्थो द्रष्टव्यः - एकः सूर्यः सप्तनामाश्वः गायत्र्यादिसप्तच्छन्दोनामकाश्वः ।

"त्वमेव सप्तधा भूत्वा छन्दोरूपेण भास्कर ।
यस्माद् भ्रामयसे लोकानतः पाहि सनातन ।।"

इति । किं चायं रथः हायनांशानां संवत्सरावयवानां त्रिवर्गस्य धर्मार्थकामरूपस्य च व्यक्त्या तत्तदवयवरूपेण अभिव्यक्त्या क्लृप्ताखिलावयवः संवत्सरावयवैः अस्य रथस्य अवयवक्लृप्तिरुक्ता लिङ्गपुराणे -

"सौरस्तु ब्रह्मणा सृष्टो रथो हेमपरिष्कृतः ।
संवत्सरस्यावयवैः कल्पितश्च द्विजर्षभाः ।।" इति ।

ब्रह्मकैवर्तपुराणे तु प्रपञ्चनोक्ता। त्रिवर्गेणावयवक्लृप्तिरपि तत्र वोक्ता -

"अथैतानि तु सूर्यस्य प्रत्यङ्गानि रथस्य हि ।
संवत्सरस्यावयवैः कल्पितानि यथाक्रमम् ।।
अहस्त्रिनाभिः सूर्यस्य ह्येकचक्रस्य वै स्मृतम् ।
अराः पञ्चर्तवस्तस्य नेम्यः षड्तवः स्मृताः ।।
रथनीडः स्मृतो ह्यब्दो ह्ययने कूबरावुभौ ।
मुहूर्ता वन्धनास्तस्य शम्यास्तस्य कलाः स्मृताः ।।
तस्य काष्ठा स्मृता घोणा ह्यक्षदण्डः क्षणास्तु वै ।
निमेषाश्चानुकर्षोऽस्य ईषा चास्य लवाः स्मृताः ।
रात्रिर्वरूथो धर्मोऽस्य ध्वज ऊर्ध्वं समुच्छ्रितः ।।
युगाक्षकोटी ते तस्य चार्थकामावुभौ स्मृतौ ।।"

इति । पूर्वाह्नमध्याह्नसायाह्नरूपसवनत्रयमुक्तम् । अहः त्रिमेखलाः; नाभिः पञ्चर्तवः हेमन्तशिशरयोरेकीकरणेन ।

मत्स्यपुराणे तु--

"अहस्त्रिनाभिः सूर्यस्य एकचक्रस्य वै स्मृतम् ।
अराः संवत्सराः पञ्च नेम्यः षड्तवः स्मृताः ।।"

इति पञ्चविधाः संवत्सराः अराः इत्युक्तम् । वत्सरपाञ्चविध्यमुक्तं विष्णुपुराणे--

"संवत्सरस्तु प्रथमो द्वितीयः परिवत्सरः ।
इद्वत्सरस्तृतीयस्तु चतुर्थश्चानुवत्सरः ।
पञ्चमो वत्सरश्चात्र कालोऽयं युगसंज्ञकः ।।" इति ।

कदाचित् अधिमासानन्तरं शुक्लप्रतिपदि युगारम्भ इव सूर्यसक्रान्तिः भवति। ततः प्रभृति त्रिशंत्तमो मासः अधिमासः भवति । तदनन्तरं च पुनः त्रिशत्तमः अधिमासो भवति । एवं षष्टिमासैः पञ्चसु संवत्सरेषु व्यतीतेषु पुनरपि शुक्लप्रतिपदि युगारम्भ एव सूर्यसंक्रान्तिः भवति । एवं शुक्लप्रतिपत्सूर्यसंक्रान्त्योः यौगपद्येन चान्द्रसौरमानयोः सह प्रवृत्तिमारभ्य षष्ट्या मासैः लब्धाः पञ्च हायनाः क्रमेण संवत्सरादिभिः पञ्चभिः नामभिः अधीयन्ते । एषां समाज एकं युगमुच्यते इत्यर्थः । एवमुत्तरसंवत्सरारपक्षयोः उपासनादेः विकल्पः ।

अथ नीडः रथस्योपरि रथिनः अवस्थानप्रदेशः । कूबरः वोढृतुरगादिस्क(न्ध)गतस्य युगस्य धारकौ युगसंधराख्यौ काष्ठविशेषौ । बन्धना दारुचर्मसंयोजनप्रदेशदृढीकरणार्था लोहपट्टादयः । शम्या युगकीलकाः । घोणा रथस्य पुरोभागे नासिकावन्निर्मितोऽवयवः । अनुकर्षः रथस्य अधोभागस्थितं दारु । वरूथः रथिनो गुप्त्यर्थं तस्य पुरोभागे निहितो दारुव्याघ्रचर्मादिनिर्मितो रथावयवविशेषः। ध्वजः रथस्याग्रे निहितः प्रसिद्धः । युगस्य अक्षदण्डस्य च कोटी युगाक्षकोटी । अक्षिपक्ष्मादिपरिस्पन्दकालो निमेषः। निमेषार्धभागो लवः निमेषचतुर्थांशः क्षणः, अष्टादश निमेषाः काष्ठा, त्रिंशत्काष्ठाः कला, त्रिंशत्कला नाडिका, नाडिकाद्वयं मुहूर्तः, एवंभूतो भगवतः सूर्यस्य रथः ध्यायतः मम पुरतः स्फुरत्वित्यर्थः ।

इयमत्र पौराणिकी प्रक्रिया -- पञ्चाशत्कोटियोजनविस्तीर्णस्य भूगोलकस्य लक्षयोजनविस्तृते मध्ये भूसरोरुहकर्णिकाकारेण मूले चतुरशीति सहस्रयोजन-प्रमाणेनोच्छ्रायेण स्वर्णाद्रिणाधिष्ठितः परितो लक्षयोजनविस्तृतः। लवणाब्धिनावेष्टितः जम्बूद्वीपः । प्लक्षद्वीपः, तं परितः तावत्प्रमाणः इक्षुसमुद्रः। एवमुत्तरोत्तरं वलयाकाराः शाल्मलकुशक्रौञ्चशाकपुष्कराख्याः स्वसमानप्रमाणैः सुरासर्पिर्दधिक्षीरोदकार्णवैः वेष्टिताः पञ्चद्वीपाः ।

तत्र क्षीरसमुद्रशुद्धोदकार्णवयोः मध्यगतस्य पुष्कराख्यस्य सप्तद्वीपस्य मध्ये चक्रवालाचलवद् वलयाकारः पञ्चाशत्सहस्रयोजनोच्छ्रायः मानसोत्तराख्यः पर्वतः। तस्योपरि पञ्चाशत्सहस्राणि योजनान्यतीत्य सूर्यरथचक्रं तिष्ठति । तन्नाभिरन्ध्रप्रोताग्रोऽक्षदण्डः। स्वर्णाद्रेरुपरि योजनानां षोडशसहस्राण्यतीत्य स्थितेन वायुस्कन्धेन धृतमूलः, सप्तलक्षोत्तरार्धकोटियोजनप्रमाणः तिर्यङ्निबद्धः तिष्ठति । तस्मिन् महाक्षदण्डे रथः प्रतिष्ठितः । स चोत्तरायणे मेरुपर्यन्तं दक्षिणायने मानसोत्तरपर्यन्तं चाक्षदण्डस्योपरि ध्रुवगृहीतवायुरश्मिकृष्यमाणः कुविन्दनाडिवत् संचरति।

तस्य रथस्योपरिभागात् तद्द्विगुणप्रमाणः ईषादण्डः । तस्य अग्रे तिर्यङ्निबद्धस्य युगस्य एकस्मिन् भागे मानसोत्तरसहिते नियुक्तैः सप्तभिः अश्वैः कृष्यमाणः सचक्रः, साक्षदण्डः रथः सुवर्णाद्रिं प्रदक्षिणीकुर्वन् भ्रमति - यथा

तैलयन्त्रमूललग्नस्य दीर्घस्य दारुफलकस्य अग्रभागे नियुक्तैः बलीवर्दैः कृष्यमाणः दारूफलकस्य उपरि आरूढः पुरुषः सदारूफलकः तैलयन्त्रं प्रदक्षिणीकुर्वन् भ्रमति । एवं च यद्यपि अक्षदण्डे रथः प्रतिष्ठितः, तथापि चक्रे रन्ध्रप्रोताग्रतया अक्षदँण्डः चक्रे प्रतिष्ठित इति तद्द्वारा रथस्यापि तस्मिंन् प्रतिष्ठित्वम् अस्ति इत्यभिप्रेत्य चक्रे निविष्ट इति रथविशेषणं कृतमिति द्रष्टव्यम् ।।१।।

इत्यादित्यस्तोत्ररत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ रथमहिमवर्णनं नाम प्रथमः श्लोकः ।

अथ मण्डलमहिमवर्णनार्थो द्वितीयः श्लोकः---

आदित्यैरप्सरोभिर्मुनिभिरहिवरैर्ग्रामणीयातुधानैः
गन्धर्वैर्वालखिल्यैः परिवृतदशमांशस्य कृत्स्नं रथस्य ।
मध्यं व्याप्याधितिष्ठन् मणिरिव नभसो मण्डलश्चण्डरश्मेः
ब्रह्मज्योतिर्विवर्तः श्रुतिनिकरघनीभावरूपः समिन्धे ।।२।।

आदित्यैरिति । आदित्यादयः वालखिल्यन्ताः रथे स्थित्वा भगवन्तं प्रधानादित्यम् उपासीनाः परिवारदेवताः । तेषु गन्धर्वान्ताः सप्तगणाः प्रत्येकं द्वादश द्वादश क्रमेण चैत्रादिद्वादशमासाधिकारिणः । "भूतानामशुभं कर्म व्यपोहन्ति हि कीर्तिताः" इति कौर्मलिङ्गादिपुराणादिषु द्वादशादित्यादीनां संकीर्तनस्य महाफलत्वेनोक्तत्वात् ; तेषां नामानि संकीर्त्यन्ते ---

आदित्या -
धात्रर्यममित्राम्बुप वासवा विवस्वांश्च ।
पर्जन्यः पूषांशुर्गभस्तिमान् त्वष्टृविष्णू च ।। इति

"पुलस्त्यपुलहावत्रिर्वसिष्ठश्चाङ्गिरा भृगुः ।
भरद्वाजो गौतमश्च काश्यपश्च ततः क्रतुः ।।
जमदग्निः कौशिकश्च मुनयो द्वादश स्मृताः ।" इति
इति । एषा षट्पदी गाथा न त्वनुष्टुप् ; पदषट्कयोगात्।

प्रथमे द्वादशमात्रा
द्वितीयेऽष्टादशभिः संयुता ।
यथा प्रथमं तथा तृतीयं
दशपञ्चविभूषिता गाथा ।। इति तस्या लक्षणम् ।

वासुकिः कङ्करीकरश्च तक्षको नागसंज्ञकः ।
एलापुत्रः शङ्खपालश्चैरावतधनंजयौ ।।
नवमोग्रमहापद्मस्ततः कार्कोटकाह्वयः
कम्बलाश्वतरौ चेति द्वादशैते भुजंगमाः ।
तुम्बुरुर्नारदो हाहाहूहूर्विश्वावसुस्ततः ।।
उग्रसेनो वसुरुचिः सर्वावसुरिहाष्टमः ।
चित्रसेनस्तथोर्णायुर्धृतराष्ट्रस्ततः परम् ।।
सूर्यवर्चास्तत इमे गन्धर्वा द्वादशोदिताः ।
(सूर्यवर्चा द्वादशैते गन्धर्वा गायनावराः - अत्रायं पाठभेदः)

वसिष्ठश्चाङ्गिराश्चैव भृगुर्बुद्धिमतां वरः ।
भरद्वाजो गौतमश्च काश्यपश्च क्रतुस्तथा ।।
जमदग्निः कौशिकश्च, वासुकिः कङ्करीकरः ।
तक्षकश्चैव नागश्च एलापुत्रस्तथा द्विजाः ।।
शङ्खपालस्तथा चान्य ऐरावत इति श्रुतः ।
धनंजयो महापद्मस्तथा कार्कोटकाह्वयः ।।
कम्वलोऽश्वतरश्चैव तुम्बुरुर्नारदस्तथा ।
हाहाहूहूर्द्विजश्रेष्ठा विश्वावसुरनुत्तमः ।।
उग्रसेनो वररुचिः सर्वावसुरनुत्तमः ।।
चित्रसेनो महातेजा ऊर्णायुस्चैव सुव्रतः।।
कृतस्थला पुञ्जिकस्थलाभिख्या चाप्सरास्तथा ।
मेनका सहजन्या च प्रम्लोचन्ती शुचिस्मिता ।।
अनुपूर्वा घृताची च विश्वाची चोर्वशी शुभा ।
पूर्वचित्तिरिति ख्याता देवी साक्षात् तिलोत्तमा ।।

रम्भा चाम्भोजवदना रथकृद्ग्रामणीः शुभाः ।
रथौजाः रथचित्रश्च सुबाहुर्वै रथस्वनः ।।
स्रोतस्चारुणनामा च सुषेणः सेनजित् शुभः ।
ताक्ष्यर्यश्चारिष्टनेमिश्च रथजित् सत्यजित् तथा ।।
ग्रामण्यो यक्षजातीया द्वादश द्वादशात्मना ।
रक्षोहेतिः प्रहेतिस्च पौरुषेयो वधस्तथा ।।
सर्पो व्याघ्रः पुनश्चापो वातो विद्युद् दिवाकरः ।
ब्रह्मोपेतश्च विप्रेन्द्रो यज्ञोपेतस्तथैव च ।।
इति । रक्षोहेतिः इत्येकनाम । इत्येवं क्रमेण नामान्युक्तानि । लिङ्गपुराणे--
धातार्यमा च मित्रश्च वरुणश्चेन्द्र एव च ।
विवस्वांश्चैव पर्जन्यः पूषा चांशुर्गभस्तिमान् ।।
त्वष्टा विष्णुः पुलस्त्यश्च पुलहश्चात्रिरेवच । इत्यादि ।

अत्र धात्रादिविष्णवन्ता आदित्याः, पुलस्त्यादिकौशिकान्ताः मुनयः, वासुक्याद्यश्वतरान्ताः सर्पाः, तुम्बुरुप्रभृतिसूर्यवर्चोऽन्ताः गन्धर्वाः, कृतस्थलादि-रम्भान्ताः अप्सरसः, रथकृदादिसत्यजिदन्ताः ग्रामण्यः, रक्षोहेत्यादि यज्ञोपेतान्ता राक्षसा, इति विभागः तत्रैव तदनन्तरं दर्शितः । एषु सप्तसु गणेषु प्रतिगणं क्रमेण द्वयोः द्वयोः वसन्तादिषु अधिकारश्च तत्रैव तदनन्तरं प्रपञ्चितः-----

"धातार्यमा पुलस्त्यश्च पुलहश्च प्रजापतिः ।
उरगो वासुकिश्चैव कङ्करीकश्च तावुभौ ।।
तुम्बुरुर्नारदश्चैव गन्धर्वौ गायतां वरौ ।
कृतस्थलाप्सराश्चैव यावैका पुञ्जिकस्थला ।।
ग्रामणी रथकृद्यश्च रथौजाश्चैव तावुभौ ।
रक्षोहेतिः प्रहेतिश्च यातुधानौ मतावुभौ ।।
मधुमाधवयोरेष गणो वसति भास्करे ।
वसन्ते ग्रीष्मकर्तौ तु मित्रश्च वरुणस्तथा ।।
ऋषिरत्रिर्वसिष्ठश्च तक्षको नाग एव च ।
मेनका सहजन्या च हाहाःहूहूस्तथैव च ।

रथश्वनौ च ग्रामण्यौ रथचित्रश्च तावुभौ ।
पौरुषेयो वधश्चैव यातुधानावुदाहृतौ ।।
एते वसन्ति वै सूर्ये मासयोः शुचिशुक्रयोः ।
ततः सूर्ये पुनस्त्वन्या निवसन्तीह देवताः ।।
इन्द्रश्चैव विवस्वांश्च त्वङ्गिरा भृगुरेव च ।
एलापुत्रस्तथा सर्पः शङ्खपालश्च तावुभौ ।।
विश्वावसूग्रसेनौ च स्रोतश्चैवारुणस्तथा ।
प्रम्लोचन्ती च विख्याता निम्लोचन्ती च ते उभे ।।
यातुधानस्तथा सर्पो व्याघ्रश्चैव तु तावुभौ ।
नभो नभस्ययोरेष गणो वसति भास्करे ।।
शरद्यन्ये पुनश्चैव विज्ञेयाश्चाहिदेवताः ।
पर्जन्यश्चैव पूषा च भरद्वाजश्च गौतमः ।।
विश्वावसुश्च गन्धर्वस्तथा वसुरुचिश्च यः ।
विश्वाची च घृताची च शुभे ते शुभलक्षणे ।।
नाग ऐरावतश्चैव विश्रुतश्च धनंजयः ।
सेनजिच्च सुषेणश्च सेनानीर्ग्रामणीश्च तौ ।।
आपो वायुश्च द्वावेतौ यातुधानावुदाहृतौ ।
इषे चैवोर्जमासे च वसन्त्येते दिवाकरे ।
हैमन्तिकौ तु द्वौ मासौ वसन्त्येते दिवाकरे ।।
अंशुर्गभस्तिमांश्चैव काश्यपश्च क्रतुश्च ह ।।
भुजङ्गश्च महापद्मः सर्पाः कार्कोटकास्तथा ।
चित्रसेनश्च गन्धर्वस्तथौर्णायुश्च तावुभौ ।।
तार्क्ष्याश्चारिष्टनेमिश्च सेनानीर्ग्रामणीश्च तौ ।
विद्युत्सूर्यश्च तावुग्रौ यातुधानावुदाहृतौ ।।
सहे चैव सहस्ये च वसन्त्येते दिवाकरे ।
ततः शिशिरयोश्चापि मासयोर्निवसन्ति वै ।।
त्वष्टा विष्णुर्जामदग्निर्विश्वामित्रस्तथैव च ।
काद्रवेयौ तथा नागौ कम्बलाश्वतरावुभौ ।।
गन्धर्वो धृतराष्ट्रश्च सूर्यवर्चास्तथैव च ।

तिलोत्तमाप्सराश्चैवग्रामण्यो लोकविश्रुतौ ।।
ब्रह्मोपेतस्तथा रक्षो यज्ञोपेतश्च यः स्मृतः ।
एते देवा वसन्त्येते द्वौ मासौ तु क्रमेण तु ।।

इति पूर्वग्रामणीषु आद्यः रथकृदित्यनुक्रान्तः । स एवात्र मधुमाधवाधिकारिपरिगणनेन रथकृत् स इत्यनूदितः । "तस्य रथकृत् स च रथौजाश्च सेनानिग्रामण्यौ" इति तैत्तिरीयकश्रुत्यनुसारात् । ब्रह्मकैवर्तेऽपि एत एव श्लोकाः किंचिद् भेदेन पठिताः । विष्णुपुराणे तु-- सप्तसु गणेषु प्रतिगणमेकैकस्य चैत्राद्येकैकमासाधिकारो विस्पष्टं दर्शितः---

"धाता कृतस्थला चैव पुलस्त्यो वासुकिस्तथा ।
रथकृद् ग्रामणीर्हेतिस्तुम्बुरुश्चैव सप्तमः ।।
एते वसन्ति वै चैत्रे मधुमासे सदैव हि ।
मैत्रेय स्यन्दने भानोः सप्त मासाधिकारिणः ।।
अर्यमा पुलहश्चैव रथौजाः पुञ्जिकस्थला ।।
प्रहेतिः कङ्करीरश्च नारदश्च रथे रवेः ।।
माधवे निवसन्त्येते शुक्रसंज्ञे निबोधत ।
मित्रोऽत्रिस्तक्षको रक्षः पौरुषेयोऽथ मेनका ।।
हाहा रथस्वनश्चैव मैत्रेयैते वसन्ति वै ।
वरुणो वसिष्ठनागौ सहजन्या हूहू रथः ।।
रथचित्रस्तथा शुक्रे वसन्त्याषाढसंज्ञके ।
इन्द्रो विश्वावसुः स्रोत एलापुत्रस्तथाङ्गिराः ।
प्रमोम्लोचा च नभस्येते सर्पिश्चार्के वसन्ति वै ।।
विवस्वानुग्रसेनश्च भृगुरापूरणस्तथा ।
अनुम्लोचा शङ्खपालो व्याघ्रो भाद्रपदे तथा ।।
पूषा वसुरुचिर्वातो गौतमोऽथ धनंजयः ।
सुषेणोऽन्यो घृताची च वसन्त्याश्वयुजे रवौ ।।
विश्वावसुर्भरद्वाजः पर्जन्यैरावतौ तथा ।
विश्वाची सेनजिच्चापः कार्तिके च वसन्ति वै ।।
अंशकाश्यपताक्ष्र्यास्तु महापद्मस्तथोर्वशी ।

चित्रसेनस्तथा विद्युन्मार्गशीर्षेऽधिकारिणः ।।
क्रतुर्भगस्तथोर्णायुः स्फूर्जः कर्कोटकस्तथा ।
अरिष्टनैमिश्चैवान्या पूर्वचित्तिर्वराप्सराः ।।
पौषमासे वसन्त्येते सप्त भास्करमण्डले ।
लोकप्रकाशनार्थाय विप्रवर्याधिकारिणः ।।
त्वष्टाथ जमदग्निश्च कम्बलोऽथ तिलोत्तमा ।
ब्रह्मोपेतोऽथ ऋतजिद् धार्तराष्ट्रोऽथ सप्तमः ।।
माघमासे वसन्त्येते सप्त मैत्रेय भास्करे ।
श्रूयतां चापरे सूर्ये फाल्गुने निवसन्ति ये ।।
विष्णुरश्वतरो रम्भा सूर्यवर्चाश्च सत्यजित् ।
विश्वामित्रस्तथा रक्षो यज्ञोपेतो महामुने ।।
मासेष्वेतेषु मैत्रेय वसन्त्ये तु सप्तकाः ।
सवितुर्मण्डले ब्रह्मन् विष्णुशक्त्युपबृंहिताः ।।
स्तुवन्ति मुनयः सूर्यं गन्धर्वैर्णीयते पुरः ।
नृत्यन्त्यप्सरसो यान्ति सूर्यस्यानु निशाचराः ।।
वहन्ति पन्नगा यक्षैः क्रियतेऽभीषुसंग्रहः ।
वालखिल्यास्वथैवैनं परिवार्य समासते ।।
सोऽयं सप्तगणः सूर्यमण्डले मुनिसत्तम ।
हिमोष्णवारिवृष्टीनां हेतुः स्वसमयं गतः ।।" इति ।

अत्र सप्तसु गणेषु पुराणभेदेन केषांचिद् भिन्नभिन्ननामपाठः पर्यायान्तरत्वात् अपर्यायत्वे कल्पभेदेन देवताभेदश्चोपपादनीयः। भिन्नभिन्नकल्पवृत्तान्तस्य प्रतिपादकानि हि पुराणानि । यथा विष्णुपुराणं श्वेतवराहकल्पवृत्तान्तस्य, कूर्मपुराणं लक्ष्मीकल्पवृत्तान्तस्येत्यादि । वालखिल्याः पार्वतीविवाहसमये स्खलितात् ब्रह्मणो वीर्याद् अग्नौ तेन हुतादुत्पन्ना दशलक्षसंख्या महर्षयः । यथोक्तम् आदित्यपुराणे--

"भवनाच्च ततो जाता वालखिल्या मरीचिपाः ।
सहस्त्राणां सहस्त्राणि मुनयो ह्यूर्ध्वरेतसः ।।
मानतोऽङ्गुष्ठमात्रास्ते प्राप्ता ह्यथ विभावसुम् ।
बभूवुस्ते महात्मानः पतङ्गसहचारिणः ।।

सूर्यस्य रश्मिपाः सर्वे कान्त्या ज्वलनसंनिभाः ।।" इति ।

ननु-- आदित्यादयः वालखिल्यान्ताः भगवतः सूर्यस्य रथे तिष्ठन्तीति एतदस्तु ; लैङ्गकूर्मादिषुताननुक्रम्य ---

एते सहैव सूर्येण भ्रमन्ति दिवसानुगाः ।
विमाने संस्थिता नित्यं कामगे वातरंहसि ।

इत्युक्तत्वात्:

"स रथेऽधिष्ठितौ देवैरादित्यैर्मुनिभिस्तथा ।
गन्धर्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ।।"

इत्यादिवचनाच्च तैः दशमांशो रथस्याधिष्ठित इति कुतोऽवसितम् ? उच्यते -

मण्डलं तावत् नवसहस्रयोजनपरिमाणम् -

मण्डलं भास्करस्यास्य योजनानां निबोधत ।
नवयोजनसाहस्रो विष्कम्भः स उत स्मृतः ।।
त्रिगुणस्तस्य विस्तारो मण्डलस्य प्रमाणतः ।"

इति लैङ्गकौर्मादिवचनाच्च वर्तुलाकारसूर्यमण्डलस्य प्राक्प्रत्यक्तया दक्षिणोत्तरतया वा तिर्यक्प्रमाणं विष्कम्भः मण्डलं परितः प्रमाणं तु विस्तारः । विष्कम्भात् त्रिगुणो भवति एवं च मण्डलेन नवसहस्रयोजनप्रमाणेन रथस्य मध्यभागे व्याप्ते सति परितः परिशेषात् दशमांश एव परिवारदेवतानाम् अवकाशो भवतीत्यभिप्रेत्य परिवृतदशमांशस्येत्युक्तम् ।

यत्तु ब्रह्मकैवर्ते -

"प्रमाणं मण्डलस्याथ योजनानां निबोधत ।
योजनानां सहस्राणि व्याप्तं दश समासतः ।।
शते द्वे पुनरप्यन्ये योजनानां प्रकीर्त्यते ।
एकविंशतिभिश्चैव योजनैरधिके हि ते ।।
एतत् प्रमाणमाख्यातं योजनैर्मण्डलस्य तु ।
विष्कम्भो मण्डलस्यैष तिर्यक् तत्तु विधीयते ।।"

इति मण्डलस्यैकविंशत्युत्तरशतद्वयाधिकदशसहस्रयोजनप्रमाणत्वमुक्तम् । तदल्प-

परिमाणयोजनापेक्षं द्रष्टव्यम् । प्रसिद्धो हि देशदिभेदेन योजनानाम् अल्पाधिकभावः । एवं महापरिमाणस्यापि मण्डलस्य दूरतया तनीयस्त्वेन दर्शनमित्यभिप्रायेणोक्तम् । मणिरिव नभस इति; **"येन सूर्यस्तपति तेजसेद्धः"** इति; **"एषा त्रय्येव विद्या तपति"** इति श्रुतिद्वयार्थमभिप्रेत्योक्तम्, **'ब्रह्मज्योतिर्विवर्तः श्रुतिनिकरघनीभावरूपः'** इति विशेषणद्वयमुक्तम् ।

इत्यादित्यस्तोत्ररत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ मण्डलमहिमनिरूपणं नाम द्वितीयः श्लोकः ।

अथ किरणसहस्रमहिमस्तवनार्थः तृतीयः श्लोकः-

निर्गच्छन्तोऽर्कबिम्बान्निखिलजनिमतां हार्दनाडीप्रविष्टाः
नाड्यो वस्वादिबृन्दारकगणमधुनस्तस्य नानादिगुत्थाः ।
वर्षन्तस्तोयमुष्णं तुहिनमपि जलान्यापिबन्तः समन्तात्
पित्रादीनां स्वधौषध्यमृतरसकृतो भान्ति कान्तिप्ररोहाः ।।३।।

निर्गच्छन्त इति । सूर्यकिरणाः सर्वप्राणिनां हृदयनाडीः ब्रह्मरन्ध्रद्वारेण प्रविष्टा भवन्ति । तथा हि छन्दोगोपनिषदि- **"अथ या एता हृदयस्य नाड्यः"** इति हृदयनाडीरुपक्रम्य--

"तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं
चैवमेता आदित्यस्य रश्मयः उभौ लोकौ गच्छन्तीमं चामुं च"

इत्यादित्यरश्मीरधिप्रकृत्य श्रूयते--

"अमुष्मात् आदित्यात् प्रत्यायन्ते ता आसु नाडीषु सृप्ता" इति; **ताभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मात् आदित्ये सुप्ताः"** इति

तथा तस्यामेव वस्वादिदेवतागणानाम् आदित्यमण्डलं मधु विष्वञ्चः किरणाः । प्राच्यात् ऊर्ध्वान्तनानादिगुत्थाः तस्य नाड्य" इत्यपि श्रूयते ।

तत्र तावत्--

"असौ वा आदित्यो देवमधु तस्य द्यौरेव

तिरश्चीनवंशः अन्तरिक्षमपूपः"
इति यथा तिरश्चीने वंशकाण्डे लग्नस्य मधुपटलस्य मध्ये मधु तिष्ठति; एवं दिवि अधोलग्नतया अवस्थितस्य अन्तरिक्षस्य मध्ये तिष्ठति आदित्यमण्डलमिति मधुसाम्यात् मधुकल्पना उपासनार्था । भ्रमरैः नानापुष्पेभ्यः समानीतः मेलनं मधुपटलं प्राप्तः रससमाहारो हि मधु भवति ।

एवं ऋग्वेदादिभ्यः चतुर्भ्यः वेदेभ्यः प्रणवाच्च कर्मविनियुक्तऋङ्मन्त्रादिभिः उपासनाविशेषैश्च समानीतरससमाहारपूर्णम् आदित्यमण्डलमित्यपि तत्रैवोक्तम् - **ऋचाएवमधुकृतः सामवेद एव पुष्पं ता अमृताः आपः** इत्यादिभिः ।

"गुह्या एवादेशाः मधुकृतः ब्रह्मैव पुष्पं ता अमृता आपः"
इत्यन्तैः पञ्चभिः महावाक्यैः । तेषाम् ऋग्वेदपुष्पादिरसरूपाणाम्, आदित्यमण्डलाश्रितानां पञ्चविधानाम् अमृतानां वसुरुद्रादित्यमरुत्साध्यनामक-पञ्चविधदेवतागणभोग्यत्वमपि तदनन्तरमुक्तम्;

"तद्यत् प्रथमममृतं तद्वसव उपजीवन्ति" इत्यादिभिः ;
"अथ यत् पञ्चमममृतं तत् साध्या उपजीवन्ति"
इत्यन्तैः पञ्चभिः खण्डैः । एवमादित्यमण्डलस्य देवमधुनः तद्रश्मय एव नाड्यः इति मधुत्वकल्पनानन्तरमेवोक्तं, **"तस्य ये प्राच्यो रश्मयस्ता एवास्य प्राच्यो मधुनाड्यः"** इत्यादिभिः **"अथ येऽस्योर्ध्वा रश्मयस्ता एवा स्योर्ध्वा मधुनाड्यः"** इत्यन्तैः पञ्चभिः महावाक्यैः ।

अपि च - एते सूर्यकिरणाः घर्मजलहिमवर्षिणो भवन्ति । तत्र सहस्रकिरणानां मध्ये चैत्रादिषु चतुर्षु मासेषु त्रीणि शतानि किरणाः घर्मवर्षिणः ; ते शुक्रनामका घर्मनाड्य उच्यन्ते । ततः श्रावणादिषु चतुर्षु मासेषु ते चत्वारि शतानि जलवर्षिणः ; ते अमृतनामका जलनाड्य उच्यन्ते । ततः मार्गशीर्षादिषु चतुर्षु मासेषु त्रीणि शतानि हिमवर्षिणः ; ते चन्द्रानामका हिमनाड्यः । तदुक्तं कूर्मपुराणे---
"तस्य रश्मिसहस्रं तु शीतवर्षोष्णनिस्रवम् ।
तासां चतुःशतं नाड्यो वर्षन्ते चित्रमूर्तयः ।।

चन्द्रगाश्चैव याम्याश्च काञ्चनाः शातनास्तथा ।
अमृतनामकाः सर्वे रश्मयो वृष्टिसर्जनाः ।।
हिमोद्वाहास्तु ता नाड्यो रश्मयस्त्रिशतं पुनः ।
रेष्यो मेष्यश्च वास्यश्च ह्रादिन्यः सर्जनास्तथा ।।
चन्द्रास्ता नामतः सर्वा नीताश्चास्य गभस्तयः ।
शुक्लाश्चकुंकुमाश्चैव गावो विश्वभृतस्तया ।।
शुक्रास्ता नामतः सर्वास्त्रिविधा घर्मसर्जनाः।। " इति ।

एते च सहस्रं किरणा मिलित्वा घर्मकाले सरित्समुद्रतटाकादिजलानि आसमन्तात् पिबन्ति । तदप्युक्तं कौर्मे--
"आदत्ते स तु नाडीनां सहस्रेण समंततः ।।
नादेयांश्चैव सामुद्रान् कूप्यांश्चैव सहस्रकम् ।।
स्थावरं जङ्गमं चैव यच्च कुल्यादिकं पयः ।"
इति । ते च किरणाः पितृमनुष्यदेवानां क्रमेण स्वधौषध्यमृतस्वरूपान्नकृतो भवन्ति । **पित्रादीन् त्रीन् ताभिः प्रोक्ताभिः नाडीभिः तर्पयत्यसौ इत्यर्थः । तदपि कौर्मे** एवमुक्तम्---

संतर्पयति ताभिश्च मनुष्यपितृदेवताः ।
मनुष्यानौषधेनेह स्वधया च पितॄनपि ।
अमृतेन सुरान् सर्वान् त्रिभिस्त्रीन् तर्पयत्यसौ ।।"

इति । ताभिः पूर्वोक्ताभिः तोयादिनाडीभिः । उत्तरश्लोकव्याख्यानेनाधिकांशः स्फुटीभविष्यति ।

इत्यादित्यस्तोत्ररत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ किरणसहस्रमहिम- निरूपणं नाम तृतीयः श्लोकः

अथ प्रधानभूतसप्तरश्मिमहिमस्तवनार्थः चतुर्थः श्लोकः--

श्रेष्ठास्तेषां सहस्रे त्रिदिववसुधयोः पञ्च दिग्व्याप्तिभाजां
शुभ्रांशुं तारकौघं शशितनयमुखान् पञ्च चोद्भासयन्तः ।
आरोगोभ्राजमुख्यास्त्रिभुवनदहने सप्त सूर्या भवन्तः
सर्वान् व्याधीन् सुषुम्नप्रभृतय इह मे सूर्यवादाः क्षिपन्तु ।।४।।

श्रेष्ठा इति । पूर्वश्लोकोक्तकिरणाः मेरुं प्रदक्षिणीकुर्वन् सूर्यो यदा यस्यां दिशि तिष्ठन्ति तां दिशं पुरतः पृष्ठतः दिग्द्वयं चेति पञ्चदिशः व्याप्नुवन्ति । तदुक्तं विष्णुपुराणे---

"शक्रादीनां पुरे तिष्ठन् स्पृशत्येष पुरत्रयम् ।
विकीर्णौ द्वौ विकीर्णस्थस्त्रीन् कोणान् द्वे पुरे तथा ।।"

इति मानसोत्तरपर्वतस्य उपरि प्रागादिषु महादिक्षु तत्तद्दिगीश्वराणां चत्वारि पुराणि ; तत्र महादिक्षु शक्रादिपुरे तिष्ठन् सूर्यः तत्पुरं पुरतः पृष्ठतश्च स्थितौ द्वौ कोणौ,, तदन्तरालवर्तिनी द्वे पुरे चेति पञ्चदिशः स्पृशतीत्यर्थः । तदेतत् विवृत्त्योक्तं लिङ्गपुराणे---

मानसोपरि माहेन्द्री प्राच्यां मेरोः स्थिता पुरी ।
दक्षिणे भानुपुत्रस्य वारुण्यां वरुणस्य च ।।
सौम्ये सोमस्य विपुला तासु दिग्देवता स्थिताः ।
अमरावती संयमिनी सुखा चैव विभा क्रमात् ।।

लोकपालोपरिष्टात्तु सर्वतो दक्षिणायने ।
काष्ठां गतस्य सूर्यस्य गतिर्या तां निबोधता ।।
दक्षिणप्रक्रमे भानुः क्षिप्तेषुरिव धावति ।
ज्योतिषां चक्रमादाय सततं परिगच्छति ।।
पुरान्तिके यदा भानुः शक्रस्य भवति प्रभुः ।
सर्वैः साम्यमिनैराराददुदयं दृश्यते द्विजाः ।।

स एव भगवान् सूर्यस्तत्रैव प्रतिदृश्यते ।
अस्तमेति पुनः सूर्यो विभायां विश्वदृग् विभुः ।।

इति । अनेन यदा शक्रपुरे सूर्यः तदा तत्र मध्याह्नः, वैवस्वते उदयः, निशाकरपुरे अस्तमयः; ईशानकोणे तृतीययामः, आग्नेयकोणे प्रथमयामः इति शब्दतः , अर्थतश्च दर्शितः ।

एवंभूतानां सहस्रस्य किरणानां मध्ये सुषुम्नादयः, "सुषुम्नः सूर्यरश्मिश्चन्द्रमा गन्धर्वः"; "अयं पुरो हरिकेशः सूर्यरश्मिः"; "अयं दक्षिणा विश्वकर्मा"; "अयं पश्चाद् विश्व व्यचाः", "अयमुत्तराद् संयद्वसुः अयमुपवरि अर्वाग्वसुः," इत्यादिश्रुतिप्रसिद्धाः सुषुम्नहरिकेशादयः सप्त किरणाः श्रेष्ठाः । तदुक्तं लिङ्गपुराणे -

"रवे रश्मिसहस्त्रं यत् प्राङ्मया समुदाहृतम् ।
तेषां श्रेष्ठाः पुनः सप्त रश्मयो ग्रहयोनयः ।।"
सुषुम्नो हरिकेशश्च विश्वकर्मा तथैव च ।
विश्वव्यचाः पुनश्चान्यः संयद्वसुरतः परम् ।।
अर्वाग्वसुरिति ख्यातः स्वराडन्यः प्रकीर्तितः ।"

इति । तेषां विभागेन चन्द्रादिप्रकाशकत्वमपि उक्तम् तत्रैव तदनन्तरम् -

"सुषुम्नः सूर्यरश्मिस्तु क्षीणं शशिनमेधयेत् ।
तिर्यगूर्ध्वप्रचारोऽसौ सुषुम्नः परिकीर्तितः ।।
हरिकेशः पुनश्चान्यः ऋक्षयोनिः प्रकीर्त्यते ।
दक्षिणे विश्वकर्मा तु रश्मिर्वर्धयते बुधम् ।।
विश्वव्यचास्तु यः पश्चाच्छुक्रयोनिः स्मृतो बुधैः ।
संयद्वसुश्च यो रश्मिः स योनिर्लोहितस्य तु ।।
षष्ठश्चार्वाग्वसू रश्मिर्योनिः स तु बृहस्पतेः
शनैश्चरं पुनश्चापि रश्मिराप्यायति स्वराट् ।।" इति ।

ब्रह्मकैवर्तेऽपि - सुषुम्नेन चन्द्रविवर्धनम्, तन्निष्पन्नेन अमृतेन स्वधया च देवपितृतृप्तिः सकलरश्मिकृतवृष्ट्याद्युत्पन्नव्रीहियवादिभिः मनुष्याणामित्युक्तम् ;

सोमं सुषुम्नेन विवर्धयित्वा शुक्ले तु पूर्णे दिवसक्रमेण ।
तं कृष्णपक्षे विबुधाः पिबन्ति पीतं तु सोमं द्विकलावशिष्टम् ।।"

कृष्णक्षये रश्मिभिस्तं क्षरन्तं स्वधामृतं तत्पितरः पिबन्ति ।
सूर्येन भोगास्तु समुद्धृताभिरद्भिः पुनश्चैव समुत्थिताभिः ।
वृष्ट्याभिवृद्धाभिरथौषधीभिः मर्त्याः क्षुधं त्वन्नपानैर्जयन्ति " इति

अद्भिरित्युपलक्षणम् । हिमघर्माभ्यामित्यपि द्रष्टव्यम् । ओषधिविशेषेषु तयोरपि अपेक्षणात् । सुषुम्नाभिवर्धितः चन्द्रः कलाया अपि चोपलक्षणम् । दर्शान्ते जलौषधि वनस्पतिषु चन्द्रकलाप्रवेशेषु तत्समृद्धेरपि अन्यत्र प्रतिपादनात् । अपि च एते सुषुम्नादयः कल्पान्ते त्रिभुवनदहनार्थम् -

"आरोगो भ्राजः पटरः पतङ्गः स्वर्नरो ज्योतिषीमान् विभासः "

इति प्रसिद्धाः सप्तसूर्या भवन्ति । तदुक्तं विष्णुपुराणे -

ततः स भगवान् विष्णुर्भानोः सप्तसु रश्मिषु ।
स्थितः पिबत्यशेषाणि जलानि मुनिसत्तम ।।
ततस्तस्यानुभावेन तोयाहारोपबृंहिताः ।
ता एव रश्मयस्तत्र जायन्ते सप्त भास्कराः ।।
दह्यमानं तु तैर्दीप्तैस्त्रैलोक्यं द्विज भास्करैः ।
सान्द्रनद्यर्णवाभोगं निःस्नेहममभिजायते ।।"

इति सप्त सूर्याः संख्यासाम्यात् आरोगादयः एव विवक्षिता भवन्ति ।।४।।

इत्यादित्य स्तोत्ररत्नव्याख्यायां वृत्तौ रत्नप्रकाशिकायां सप्तरश्मिमहिमनिरूपणं नाम चतुर्थः श्लोकः ।

अथ तत्प्रसूतानां द्वादशादित्याश्रितानां चतुःसहस्रोनलक्षसंख्यानां रश्मीनां स्तवनार्थः पञ्चमः श्लोकः---

आदित्यानाश्रिताः षण्णवतिगुणसहस्रान्विता रश्मयोऽन्ये
मासे मासे विभक्तास्त्रिभुवनभवनं पावयन्तः स्फुरन्ति ।
येषां भुव्यप्रचारे जगदवनकृतां सप्तरश्म्युत्थितानां
संसर्पे चाधिमासे व्रतयजनमुखाः सत्क्रिया न क्रियन्ते ।।५।।

आदित्येति । रश्मीनां प्रतिमासं तदधिकारिषु आदित्येषु विभागः कौर्मलैङ्गयोः दर्शितः----

"पञ्चरश्मिसहस्राणि वरुणस्यार्ककर्मणि ।
षड्भिः सहस्रैः पूषा तु देवेशः सप्तभिस्तथा ।।
धाताष्टभिः सहस्रैस्तु नवभिश्च शतक्रतुः ।"
सविता दशभिर्भाति स्यादेकादशभिर्भगः ।
सप्तभिस्तपते मित्रस्त्वष्टा चैवाष्टभिस्तपेत् ।।
अर्यमा दशभिश्चापि पर्जन्यो नवभिस्तपेत् ।
षड्भी रश्मिसहस्रैस्तु विष्णुस्तपति मेदिनीम् ।।" इति ।

त्रिभुवनभवनं पावयन्त इत्येतदुपपाद्यते-- येषामित्यादिना । संक्रान्तिरहितः चान्द्रमासः, "अस्ति त्रयोदशो मास इत्याहुः" इति श्रुतिप्रसिद्धः, स तु संक्रान्तिमद्भ्यः द्वादशभ्यः संवत्सरपूरकेभ्यः चैत्रादिमासेभ्यः अधिकत्वात् अधिको मास इत्युच्यते । स तु ज्योतिःप्रसिद्धया मध्यगणनया भवन् अधिमासः तत्प्रसिद्धया स्फुटगणनया भवन् संसर्पः । तदुक्तं ब्रह्मसिद्धान्ते ---

"मध्यमरविसंक्रमयोर्मध्ये मध्यार्कचन्द्रयोगौ चेत् ।
अधिमासः संसर्पः स्फुटयोरंहस्पतिर्नो चेत् " इति ।

अस्यायमर्थः -- संक्रान्तिद्वयमध्ये अर्कचन्द्रयोगोऽस्ति, नो चेत्; संक्रान्तिद्वययुक्तः चान्द्रमासः कार्तिकादिमासेषु भवन् अंहस्पतिः उच्यत इति , अधिकमासेषु

मासाधिकारी आदित्यो नास्ति, त्रयोदशस्य आदित्यस्य अभावात् । अतः अधिकमासे द्वादशादित्यगतरश्मयः क्षितिं न पावयन्तीति । तदा व्रतयजनादयः न क्रियन्ते । अधिकमासेषु कार्याणि व्रतानाम् आरम्भसमापनानि सावकाशनित्यकर्मणाम् अनुष्ठानानि च स्मृतिषु प्रसिद्धानि ।। एषां रश्मीनां सप्तरश्मिप्रभवत्वं कौर्मे व्यञ्जितम्--

"अथ ये रश्मयः सर्वे दीप्ता लोकप्रदीपकाः ।
तेषां श्रेष्ठाः पुनः सप्त रश्मयो रश्मियोनयः ।।"

इति । **जगदवनकृतामिति** । अस्य व्यवहितोत्तरश्लोके वक्ष्यमाणतपन-हिमजलोत्सर्जनादिकं क्रोडीकृतम् ।।५।।

इत्यादित्यस्तोत्र रत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ द्वादशादित्याश्रितरश्मिस्तवननिरूपणं नाम पञ्चमः श्लोकः ।

अथ मुख्यादित्यस्तवनार्थाः षष्ठसप्तमाष्टमनवमश्लोकाः । तत्र वेदस्य सेव्यत्वादिना स्तवनार्थः षष्ठः श्लोकः ---

आदित्यं मण्डलान्तःस्फुरदरुणवपुस्तेजसा व्याप्तविश्वं
प्रातर्मध्याह्नसायंसमयविभजनादृग्यजुःसामसेव्यम् ।
प्राप्यं च प्रापकं च प्रथितमतिपथिज्ञानिनामुत्तरस्मिन्
साक्षाद् ब्रह्मेत्युपास्यं सकलभयहराभ्युद्गमं संश्रयामि ।।६।।

आदित्यामिति ।। **"ऋग्भिः पूर्वाह्णे दिवि देव ईयते; यजुर्वेदे तिष्ठति मध्य अह्नः सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः"** इति मन्त्रार्थः, प्रातः इत्यादिविशेषणेन संगृहीतः । अपि च भगवान् त्रिविज्ञानिनाम् उत्तरस्मिन् अतिथिपूजिते शोभने देवयानाख्ये प्राप्यश्च प्रापकश्च भवति ।

देवयानस्य इत्थमुत्तरत्वम् --- दिवि संचरतः रवेः त्रयो मार्गाः ; प्रत्येकं तिसृभिस्तिसृभिः वीथीभिः युक्ताः । तत्र दक्षिणां दिशमारभ्य, अजवीथी ; मृगवीथी;

वैश्वानरवीथीति त्रिवीथिको वैश्वानराख्यो दक्षिणो मार्गः । ततः जारद्गववीथी गोवीथी; आर्षभीवीथीति त्रिवीथिकः जारद्गवाख्यो मध्यमो मार्गः । नागवीथी ; ऐरावतवीथी गोवीथीति त्रिवीथिकः ऐरावतमार्ग उत्तरः। ।

तत्र मार्गत्रयमुक्तं वायुपुराणे---

"सर्वग्रहाणां त्रीण्येव स्थानानि द्विजसत्तमाः ।
स्थानं चान्यद् गावां मध्यं तथैरावतमुत्तरम् ।।
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ।"

इति तत्तद्वीथीत्रयमुक्तम् । मार्गत्रयं तु वचनान्तरे स्पष्टम् ।

"वीथ्यो नवैव नक्षत्रैरश्विन्याद्यैस्त्रिभिस्त्रिभिः ।
त्रिवीथिकास्त्रयो मार्गा दक्षिणोत्तरमध्यमाः ।।
अश्विन्याद्यैस्त्रिभिस्तावन्नक्षत्रैर्नागवीथिका ।
रोहिण्याद्यैर्गवीथिः स्यात् ततस्त्वैरावती परा ।।
मार्ग ऐरावताख्योऽयं **मखाद्यापुनरार्षभी ।**
हस्तादिकातु गोवीथी ततो जारद्गवी परा ।
मार्गो जारद्गवाख्योयं वीथी वैश्वानरी ततः ।
श्रोणाद्यैर्मृगवीथी स्यादजवीथी ततः परम् ।।
मार्गो वैश्वानराख्योऽयं स्थानान्येषां पथां दिवि ।" इति ।

एतेषु त्रिषु मार्गेषु वैश्वानराख्यदक्षिणमार्गो दक्षिणतः पितृयाणाख्यो धूमादिमार्गः ऐरावताख्यादुत्तरमार्गादुत्तरो देवयानाख्योर्चिरादिमार्गः इति । तदुक्तं विष्णुपुराणे

"उत्तरं यदगस्त्यस्याप्यजवीथ्याश्च दक्षिणम् ।
पितृयाणः स वै पन्था वैश्वनरपथाद् बहिः ।।
नागवीथ्युत्तरं यच्च सप्तर्षीणां च दक्षिणम् ।
उत्तरः सवितुः पन्था देवयानस्तु संस्मृतः ।।"

इति । अत्र सवितुरिति पञ्चमी । सवितृमार्गापेक्षया उत्तर इत्यर्थः ।

अथ पुराणे श्लोकानुदाहरति--

"अष्टाशीतिसहस्राणि ये प्रजामीषिर ऋषयः ।
दक्षिणेनार्यम्णः पन्थानं ते श्मशानानि भेजिरे ।।
अष्टाशीतिसहस्राणि ये प्रजां नेषिर ऋषयः ।
उत्तरेणार्यम्णः पन्थानं तेऽमृतत्वं हि भेजिरे ।।"(१)

इति आपस्तम्ब (धर्म) सूत्रे देवयानपितृयानयोः सवितृपथात् बहिष्ट्वश्रवणात् अस्मिन् उत्तरस्मिन् मार्गे सवितुः प्रापकत्वं हृदयनाडीप्रविष्टस्वरश्मिभिः उत्क्रमतां ज्ञानिनां कूपप्रहितजलकलशानां रज्जुभिरिव झडिति समाकृष्य स्वसमीपनीतानां तेषां मण्डलमध्ये मार्गदानेन ऊर्ध्वदेशप्रापणाच्च ।

तत्र ज्ञानिनां रश्म्यालम्बनमुत्क्रमणम्;

"यत्रैतदस्मात् शरीरात् उत्क्रामति;
अथ एतैरेव रश्मिरूर्ध्व आक्रमते"(२) इति श्रूयते ।

तेषां झडिति आदित्यप्राप्तिश्च; "स(३) यावत् क्षिप्येन्मनस्तावदादित्यं गच्छेत् ।।

(१. अथेदानीं पक्षप्रतिपक्षरूपेण तेषामेव प्राधान्यमप्राधान्यं च निरूप्यते-- अष्टाशीतीति। अष्टाशीतिसहस्राणि ये गृहस्था ऋषयः प्रजाम् ईषिरे प्रजातिम् अभ्यनन्दन्, ते अर्यम्णः, यो दक्षिणेन पन्थाः दक्षिणायनमार्गः, तं संप्राप्य छान्दोग्योक्तेन धूमादिमार्गेण गत्वा पुनरपि संभूय श्मशानानि भेजिरे; मरणं प्रतिपेदिरे; "जायस्व म्रियस्व इत्याजीवं जीविभावम् आपेदिरे इति गृहस्थानां निन्दा । ये तु प्रजातिं नाभ्यनन्दन् ते उत्तरायणमार्गेण प्राप्य अर्चिरादिमार्गेण गत्वा अमृतत्वम् विभक्तिव्यत्ययः अमृतत्वाय कल्पन्ते समर्था संपद्यन्ते ।" इति ऊर्ध्वरेतसां प्रशंसा ।, गृहस्थादन्ये त्रयोऽपि ऊर्ध्वरेतसः । तेषाम् एषा प्रशंसा इति । इत्युज्ज्वलायां हरदत्तः).

(२. अथेति । अथ यत्र एतदिति क्रियाविशेषणम् । अस्मात् शरीरात् उत्क्रामति अथ तैरेव यथोक्तरश्मिभिः ऊर्ध्वम् आक्रमते । यदिं अविद्वान् तदा स्वकर्मजनितं लोकं प्रति गच्छति । यदि अयं विद्वान् तदा स्वयथोक्तसाधनसंपन्नः सन् ओमिति एकाक्षरेण आत्मानम् अनुध्यायन् यथापूर्वं वा ह एव उत् ऊर्ध्वं वा नीयते गच्छतीत्यर्थः स विद्वान् उत्क्रमिष्यन् यावत् क्षिप्येत् यावता कालेन मनसः क्षेपः स्यात्, तावता कालेन आदित्यं गच्छति इति ।

(३. स इति । सः विद्वान् आदित्यम् आगच्छति, सोऽयं ब्रह्मलोकद्वारनिरोधिकोऽपि आदित्यः तस्मा (तस्मै) एवं विदुषे द्वारं प्रयच्छति । स तत्र विजिहीते, यथा लम्बरस्य वादित्रविशेषस्य खं छिद्रं तेन स ऊर्ध्वं आक्रमते इति ।)

इति श्रूयते । तेषां सवितृदत्तेन मण्डलमध्यावकाशेन ऊर्ध्वदेशप्राप्तिश्च;
"स आदित्यमागच्छति तस्मै स तत्र विजिहीते,
यथा रथचक्रस्य स्वं तेन स ऊर्ध्वं आक्रमते" ४
इति श्रूयते । एवं प्रापकत्वं प्राप्यत्वं च । अर्चिरादिमार्गप्राप्यकार्यब्रह्मलोकाध्यक्ष-हिरण्यगर्भरूपतया, हिरण्यगर्भरूपत्वम् आदित्यस्य नवमश्लोके प्रदर्शिष्यते ।

अपि च - आदित्यः साक्षात् परं ब्रह्म इत्येवम्, "असावादित्यो ब्रह्म" इत्यनुदिनं संध्यासु उपास्यः "आदित्यः ब्रह्मेत्यादेश" इति विधानात् । फलार्थं तथोपास्यश्च । अपि च अयमादित्यः सकलभयहराभ्युद्गमः । रात्रौ हि सर्वेषां प्रायः चोरजारवृश्चिकविषमादिभ्यो भयमुदवहति । तैत्तिरीय श्रुतिस्तु भवति -
"चित्रावसो स्वस्ति ते पारमशीयेत्याह रात्रिर्वै चित्रावसुः व्युष्ट्यै वा एतस्यै पुरा ब्रह्मणा अभैषुर्व्युष्टिमेवावरुन्धे" इत्युद्गममात्रे वक्तव्ये अभ्युपसर्गः सर्वेषाम् आभिमुख्येन सूर्यो भवतीति तथा लोकानुभवः तस्मात् सर्व एव मन्यते मां प्रत्युदगदिति श्रुतिं चानुसृत्योक्तेः ।
ननु - सवितृमार्गात् उत्तरश्चेत् देवयानः पन्थाः, तदा कथं तेन गच्छतां विदुषां सवितृमण्डलप्राप्तिः ? कथं च तन्मध्यरन्ध्रेण तेषामुपरिप्रदेशक्रमणम् ? उच्यते - अस्ति ज्योतिश्चक्रलोकयात्रानिर्वहणाय स्थितस्य सवितुः तत्सहचराणाम् इन्द्रवरुणादीनां च भोगभूमिरूपेषु तत्तल्लोकेष्वपि अवस्थानम्, लोका एव अर्चिरादिपर्वाणि ; संवत्सरात् देवलोकं स इन्द्रलोकं, वरुणलोकमित्यादिलोकशब्द-समभिव्याहारात् । अतः तत्तल्लोकस्थितमण्डलप्राप्त्यादिकमुपपद्यते; **"अर्चिरहः पूर्वपक्ष उत्तरायणं वायुः संवत्सरो देवा आदित्यश्चन्द्रमा विद्युद्वरुण इन्द्रः प्रजापतिः"** इति , एतेषां लोकाः त्रयोदश देवयानमार्गपर्वाणि श्रुतिप्रसिद्धानि ।।६।।

इत्यादित्यस्तोत्ररत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ वेदसेव्यत्वनिरूपणं नाम षष्ठः श्लोकः ।।

अथादित्यस्य स्वाधिष्ठितस्य द्वादशादित्यनिषेव्यत्वरूपमहिमवर्णनार्थः सप्तमः श्लोकः -

यच्छक्त्याधिष्ठितानां तपनहिमजलोत्सर्जनादिर्जगत्या-
मादित्यानामशेषः प्रभवति नियतः स्वस्वमासाधिकारः ।
यत्प्राधान्यं व्यनक्ति स्वयमपि भगवान् द्वादशस्तेषु भूत्वा
तं त्रैलोक्यस्य मूलं प्रणमत परमं दैवतं सप्तसप्तिम् ।।७।।

यदिति घर्महिमजलवर्षणादिषु किरणविशेषादिकार्येषु द्वादशादित्याः प्रतिमासं व्यवस्थिताधिकारिणः तेऽपि सवितुः शक्त्याधिष्ठिता एव स्वस्वाधिकारनिर्वर्तनेन तं निषेवन्ते । तथा हि कूर्मपुराणे -
"सर्वात्मकोऽयं लोकेशो महादेवः प्रजापतिः ।
सूर्य एव त्रिलोकस्य मूलं परमदैवतम् ।।"
इति प्रकृत्य पठ्यते-
"द्वादशान्ये तथादित्या देवास्ते ह्यधिकारिणः ।
निर्वहन्ति पदं तस्य तदंशाविष्टमूर्तयः ।।" इति ।

वराहपुराणे च ।
"सर्वस्य जगतस्त्वादिरादित्यस्तेन कीर्तितः ।
एतस्य द्वादशादित्या संभूतास्तेजसा पृथक् ।
प्रधान एक एवायं सर्वदा रविरुच्यते ।।" इति ।

ननु हिमोष्णवारिवृष्ट्यादिषु प्रतिमासव्यवस्थितौ अवान्तराधिकारित्वं सप्तानामपि गणानामस्ति । सोऽयं सप्तगणः सूर्यमण्डले हिमतापादेः कारणम्, तन्मया श्रुतमित्युक्तमर्थमनूपद्य
यदि सप्तगणोवारिहिममुष्णं च वर्षति ।
तत् किमत्र रवेर्येन वृष्टिः सूर्यादितीरितम् ।।

इति मैत्रयेण पृष्टे-

"मैत्रेय श्रूयतामेतद् यद् भवान् परिपृच्छति ।
यथा सप्तगणेऽप्येकः प्रधान्येनाधिको रविः ।।"

इति पराशरस्य उत्तरदर्शनाच्च; सत्यम् - अवान्तराधिकारिषु आदित्या(दी)नाम् पञ्चरश्मिसहस्रादिमतां प्राधान्यमस्तीति तेषां विशिष्य तपनाद्यधिकारोक्तिः ।

अपि च - आदित्यः सर्वासु देवतासु प्रधानभूतः तदेतद् भगवान् नारायणोऽपि स्वयमादित्येषु द्वादशो भूत्वा व्यनक्ति । स हि आदित्याम् आविर्भूत उपेन्द्ररूपः भगवानेव,
तस्य विष्णुरिति विशिष्य नाम्नः पुराणेषु प्रसिद्धेः -

"वारुणो माघमासे तु सूर्यः पूषा तु फाल्गुने ।
चैत्रे मासि च वेदाङ्गो धाता वैशाखतापनः ।।
ज्येष्ठे मासि च देवेन्द्र आषाढे सविता रविः ।
विवस्वान् श्रावणे मासि प्रोष्ठपद्यां यमः स्मृतः ।।
पर्जन्येऽश्वयुजो त्वष्टा कार्तिके मासि भास्करः ।
मार्गशीर्षे भवेन्मित्रः पुष्ये विष्णुः सनातनः ।।"

इति माघमासादिषु व्यवस्थितानाम् आदित्यानां अनुक्रमणार्थे कौर्मलिङ्गयोः वचनान्तरे विष्णौ 'सनातनः' इति विशेषणाच्च, तस्यैव महिमानं प्रायेण वैष्णवाः वैदिकमन्त्राश्च स्तुवन्ति - **"इदं विष्णुर्विचक्रमे" "यतो विष्णुर्विचक्रमे" "विचक्रमाणस्त्रेधोरुगायः" "विचक्रमे त्रिर्देवः पृथिवीमेष एताम्"** इत्यादयः; अतः भगवानादित्यः स्थावरजङ्गमात्मकत्रिलोकस्य परमदैवतम् । तथा च श्रुतिः -

"सूर्य आत्मा जगतस्तस्थुषश्च" "यदद्य कञ्च वृत्रहन् उदगा अभि सूर्य" "सर्वे तदिन्द्र ते वश" इत्यादि च । हे वृत्रहन् पापापहारिन् इन्द्र परमेश्वर यद् यद् स्थावरजङ्गमात्मकं जगत् अभि उदगा उदितः तदाभिमुख्येन उदितोऽसि, तत् सर्वं तव वश इति मन्त्रार्थः। **"सूर्य एव त्रिलोकस्य मूलं परमदैवतम्"** इति स्मृतेश्चोदाहृता ।।

इत्यादित्यस्तोत्ररत्नव्याख्यायां प्रकाशिकायां वृत्तौ आदित्यनिषेव्यत्वनिरूपणं नाम सप्तमः श्लोकः ।

अथाप्सरःप्रभृतिभिः अन्यैः गणैः आराधनीयत्वरूपमहिमानं प्रदर्शयितुमष्टमः श्लोकः -

स्वःस्त्रीगन्धर्वयक्षा मुनिवरभुजगा यातुधानाश्च नित्यं
नृत्तैर्गीतैरभीशुग्रहनुतिवहनैरग्रतः सेवया च ।
यस्य प्रीतिं वितन्वन्त्यमितपरिकरा द्वादश द्वादशैते
हृद्याभिर्वालखिल्याः सरणिभणितिभिस्तं भजे लोकबन्धुम् ।।८।।

स्वः स्त्रीतिः- नृत्तादीनाम् अप्सरः प्रभृतिभिः यथाक्रममन्वयः । अभीशुग्रहः; प्रग्रहाख्यानां रश्मीनां रथे संयोजनम् । नुतिः ; स्वकृतश्लोकादिभिः वैदिकमन्त्रैश्च स्तवनम् ; "ग्रथितैः स्ववचोभिश्च स्तुवन्ति मुनयो रविम्", इति ब्रह्मकैवर्ते "स्तुवन्ति देवा विवैधैश्च्छन्दोभिस्ते यथाक्रमात्" इति, कूर्मपुराणे । तथा -

"स्तुवन्ति देवा विविधैश्छन्दोभिस्ते यथाक्रमम् ।
रथकृञ्जरयौजाश्च रथचित्रः सुबाहुकः ।
रथस्वनोऽथ वलणः सुषेणः सेनचित्तथा ।।
तार्क्ष्यश्चारिष्टनेभिश्च रथजित्सत्यजित्तया ।
ग्रामण्यो देवदेवस्य कुर्वतेऽभीषुसंग्रहम् ।।
अथ हेतिः प्रहेतिश्च पौरुषेयोवधस्तथा ।
सर्पोव्याघ्रस्तथापश्च वातो विद्युद्दिवाकरः ।।
ब्रह्मोपेतश्च विप्रेन्द्राः यज्ञोपेतस्तथैव च ।
राक्षसप्रवरा एते प्रयान्ति पुरतः क्रमात् ।।"

इति ब्रह्मकैवर्ते । विष्णुपुराणे तु पश्चात् सेवोक्ता;
"नृत्यन्त्यप्सरसो यान्ति सूर्यस्यानु निशाचराः ।
वालखिल्यास्तथैवैनं परिवार्य समासते ।।
वहन्ति पन्नगा यक्षाः क्रियतेऽभीशुसंग्रहम् ।" इति ।

भटानाम् उभयथापि सेवा लोके प्रसिद्धा । एवम् अप्सरः प्रभृतयः नृत्तादिभिः आदित्यस्य प्रीतिम् आवहन्ते सेवन्ते । वालखिल्यास्तु-- सरणिभणितिभिः प्रीतिम् आवहन्ते सेवन्ते ;

"सर्पा वहन्ति वै सूर्यं यातुधानानुयान्ति च ।

वालखिल्या नयन्त्यस्तं परिवार्योदयाद्रविम् ।।"

इति लिङ्गपुराणोक्तेः । प्रभूणां हि आलोकशब्दोदीरणेन मार्गदर्शकाः पुरोगामिनो दृश्यन्ते । तथाभूता वालखिल्या इति भावः । तथा च श्रीकालिदासः--

"आदिष्टवर्त्मा मुनिभिः स गन्ता तपनांवरः ।

विरराज रथप्रष्ठैर्वालखिलखिल्यैरिवायुमान् ।। इति

(१. गच्छंस्तपतां वरः इति मुद्रितपाठः ।) रथप्रष्ठैरिति । रथाग्रगामिभिः ; "प्रष्ठोऽग्रगामिनि" इति निपातः । मुनिभिः पूर्वोक्तैः आदिष्टवर्त्मा; निर्दिष्टमार्गः गच्छन्, तपतांवरः देदीप्यमानानां मध्ये वरः श्रेष्टः स शत्रुघ्नः वालखिल्यैः मुनिभिः अंशुमान् सूर्य इव विरराजातेऽपि रथप्रष्ठ इत्यनुसंधेयम् । यच्चोक्तं भागवते--

"वालखिल्याः सहस्राणि षष्टिर्ब्रह्मर्षयोऽमलाः ।

पुरतोऽभिमुखं यान्ति स्तुवन्ति स्तुतिभिर्विभुम् ।।"

इति वल्लभः ।) इति ।।८।।

इत्यादिस्तोत्ररत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ अप्सरोगणनामाराधनीयत्वनिरूपणं नामाष्टमः श्लोकः ।

ब्रह्माण्डे यस्य जन्मोदितमुषसि परब्रह्ममुख्यात्मजस्य
ध्येयं रूपं शिरोदोश्चरणपदजुषा व्याहृतीनां त्रयेण ।
तत्सत्यं ब्रह्म पश्याम्यहरहमभिधं नित्यमादित्यरूपं
भूतानां भूनभस्वःप्रभृतिषु वसतां प्राणसूक्ष्मांशमेकम् ।।९।।

ब्रह्माण्ड इतिः उषसि, प्रलयरूपशर्वपर्यन्ते ब्रह्माण्डे जन्म उदितम् आदित्यस्य।

छन्दोग्योपनिषदि--

"असदेवेदमग्र आसीत् तत्सदासीत् तत्समभवत् तदाण्डं निरवर्तत तत्संवत्सरस्य

मात्रामशेत तन्निरभिद्यत ते अण्डकपाले रजतं च सुवर्णं चाभवताम् (१)
तद्यद् रजतं सेयं पृथिवी, यत् सुवर्णँ सा द्यौर्यज्जरायुः ते पर्वता यदुल्बँ स मेघो नीहारो या धमनयस्ता नद्यो यद्वास्तेयमुदकँ स समुद्रः (२)
अथ यत् तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूत्तिष्ठन् सर्वाणि च भूतानि सर्वे च कामाः तस्मात् तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे च कामाः (३) इति ।

अस्यार्थः-- इदं जगत् अग्रे उत्पत्तेः प्राक् असत् अनभिव्यक्तनामरूपं कारणात्मकम् एकमेव आसीत् ; तत् सदासीत्, तत्कारणात्मकं जगत् सत् कार्याभिमुखम् ईषत् लब्धवृत्तिकम् आसीत् । यथा बीजम् अङ्कुराभिमुखम् उच्छूनतावृत्तिरूपम् उद्‌भवति, तथा सिसृक्षारूपवृत्तिमद् भवतीति यावत् । तत् समभवत्;बीजाङ्कुरेणेव पृथिव्यादिमहाभूतसूक्ष्मरूपेण संभूतमित्यर्थः। तदाण्डं निरवर्तताभूसूक्ष्मरूपेण परिणतं कारणं भूतसूक्ष्माणां पञ्चीकरणप्रक्रियया ब्रह्माण्डं निर्वृत्तं । पञ्चीकरणेन स्थूलतां प्राप्तैः भूतैः ब्रह्माण्डमारब्धमित्यर्थः । आण्डमिति दैर्ध्यं छान्दसम् । तत् संवत्सरस्य मात्राम् अशेत; तदण्डं संवत्सरस्य मात्रां परिमाणम् अशेत । तत् संवत्सरस्य पर्यन्तं तथैव अभिन्नस्वरूपमित्यर्थः । तन्निरभिद्यत; तत् अण्डं संवत्सराद् अनन्तरं निरभिद्यत, पक्षिणाम् अण्डमिव निरभिद्यत निर्भिण्णम् आसीदित्यर्थः । ते अण्डकपाले रजतं च सुवर्णं च अभवताम् ; स्पष्टम्(१)

तद्यत् रजतम् सेयं पृथिवी यत् सुवर्णं सा द्यौः द्युपृथिवीशब्दाभ्यां द्युलोकपृथिवीलोके उपलक्षिते, ऊर्ध्वाधोऽण्डकपाले उक्ते । यत् जरायुः ते पर्वताः , जरायुः गर्भपरिवेष्टिनी स्थूलसिराः ते पर्वता बभूवुः । यद् उल्बम् स मेघः नीहारः; उल्बं सूक्ष्मगर्भपरिवेष्टनम्। मेघसहितः नीहारः । या धमनयः, ता नद्यः । या गर्भस्य धमनयः, ता नद्यः बभूवुः । यद् वास्तेयम् उदकम् स समुद्रः; वस्तिः मूत्रस्थानम्, तत्रभवम् उदकम् समुद्रः(२)

अथ यद् तंद् अजायत सः असौ आदित्यः; तस्मिन् अण्डे यद् रूपम् अजायत ; तद् असौ प्रसिद्ध आदित्यः; तं जायमानं घोषा उलूलवः अनूत्तिष्ठन्; सर्वाणि च भूतानि सर्वे च कामाः; तम् आदित्यं जायमानम् अनु उलूलवः

उत्सवकाले गौडदेशादिप्रसिद्धा यामलघोषाः । अडागमाभावः छान्दसः । तस्मात् तस्य उदयं प्रति प्रत्यायनं प्रति घोषाः उलूलवः अनु उत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे च कामाः ; तस्मात् यस्मात् तस्मिन् आदित्यजन्मनि एते उत्थिताः तस्मात् अद्यत्वेऽपि तस्य आदित्यस्य उदयं प्रति उदयकाले **न केवलं एकस्मिन् उदयकाले किन्तु प्रत्यायनं प्रत्यागमनं प्रतिदिनं उदयकाले** उलूलवः घोषाः सर्वाणि च भूतानि, तेषां कामाश्च उत्तिष्ठन्ति ;
प्रथममं उषसि पक्षिरवः, ततः, सुप्तानां मनुष्याणाम् उत्थानम्, ततः तेषां प्रथमं भोग्यवस्तुसंपादनमिति विधिक्रमः लोकेऽपि प्रसिद्धः (३)

एवं छान्दोग्ये ब्रह्माण्डजन्मोक्त्या हिरण्यगर्भरूपत्वम् आदित्यस्य व्यञ्जितम् । हिरण्यगर्भस्य ब्रह्माण्डे जन्म प्रसिद्धम् ; **"ता इमा आपस्तासु तेजो हिरण्मयमण्डमभवत् तत्र ब्रह्मा चतुर्मुखोऽजायत"** इत्यादिश्रुतिषु अविभागेन सर्वपुराणेषु च ।

तथा बृहदारण्यके -
"आप एवमग्र आसुः" इति पूर्वकल्पान्तरानुष्ठिताग्निहोत्राद्याहुतिद्रव्याणां पयोदध्याज्यादिद्रवद्रव्यबहुलत्वेन अप्शब्दवाच्यानाम् अदृष्टात्मनां सूक्ष्मरूपेण प्रलयावस्थानमुक्त्वा, ताभिः अदृष्टरूपाभिः पुनः सर्गादौ सत्यस्य सृष्टिमभिधाय, ततः; **"सत्यं ब्रह्म"** इति सत्यस्य हिरण्यगर्भाख्यकार्यब्रह्मत्वरूपमुपवर्ण्य; **"ब्रह्म प्रजापतिं प्रजापतिर्देवान्"** इति तस्य स्वसृष्टिविराड्रूपप्रजापतिद्वारा सकलदेवस्रष्टृत्वं संकीर्त्य; **"ते देवाः सत्यमेवोपासते"** इति तस्य सकलदेवोपास्यत्वमुक्त्वा; **"तद्यत् सत्यमसौ स आदित्यो या एष एतस्मिन् मण्डले पूरुषः यश्चायं दक्षिणेऽक्षन् पुरुषः"** इति तस्य मण्डलदक्षिणाक्षिसंनिहितप्रसिद्धादित्यरूपत्वमुक्त्वा, उभयत्र विद्यमानस्यापि तस्य व्याहृतिशरीरत्वमुक्तम् । **"तस्य भूरिति शिरः एकं शिर एकमेतदक्षरं ; भुव इति बाहू द्वौ बाहू एते अक्षरे सुवरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे"** इति; अत्र प्रतिष्ठा शब्दः पादवचनः । ततश्च मण्डलस्थस्य अहरिति नामाक्षि, **"तस्याहमिति नाम च"** इति तं तं प्रकृत्य वर्णितम् । **"तस्योपनिषदहमिति; तस्योपनिषदहरिति च"** उपनिषद्रहस्यनाम । एवमादित्यस्य अहरहमभिधव्याहृतिशरीरसत्याख्यकार्य ब्रह्मरूपत्वोक्त्या बृहदारण्यके

हिरण्यगर्भात्मकत्वं स्पष्टीकृतम् । तथा छान्दोग्य एव - "अयमादित्यो भूम्यन्तरिक्षस्वर्गादिषु वसतां सर्वेषां भूतानां ये प्राणास्तेषामेकसृष्टि-रूपः । सूक्ष्मांशः" इत्युक्तः । तत्र हि पुरुषविज्ञानाम्; **"अक्षितमसि अच्युतमसि प्राणसंशितमसि"** इति मन्त्रत्रयमाम्नातम् । तत्र प्राणानां संशितं तनूकृतं सूक्ष्मरूपमसीति तृतीयमन्त्रार्थः । "शो तनूकरणे" इति धातुः । एवं सर्वप्राणसूक्ष्मांशरूपतया अनेन मन्त्रेण उक्त आदित्य इति ।

एतदनन्तरं तत्रैते ऋचौ भवतः इति पूर्वमन्त्रोक्तार्थविषयम् ऋग्द्वयमुदाहृतमिति प्रतिज्ञा;

"आदित्प्रत्नस्य रेतसो ज्योतिः पश्यन्ति वासरम् ।
परो यदिध्यते दिवा उद्वयं तमसस्परि।।" "ज्योतिः पश्यन्त उत्तरः "; "स्वः पश्यन्त उत्तरम्"; देवं देवत्रा सूर्यम्"; "अगन्म ज्योतिरुत्तमम्"

इत्यादित्यविषय ऋग्द्वयोदाहरणेन स्पष्टीकृतम् ।

इदमादित्यस्य सर्वप्राणसूक्ष्मांशसमष्टिरूपत्वमभिप्रेत्यैव ।

"योऽसौ तपन्नुदेति";"स सर्वेषां भूतानां प्राणानादायोदिति";"असौ योऽस्तमेति";"स सर्वेषां भूतानां प्राणानादायास्तमेति"

इति तैत्तिरीयश्रुतेः ;

"आदित्यो ह वै बाह्यः प्राण उदयति" इति ; **"सहस्ररश्मिः शतधा वर्तमानः प्राणः प्रजानामुदयत्येव सूर्यः "** इति ; **"एतद्वै प्राणानामायतनम्"** इति ; प्रश्नोपनिषदश्च प्रवृत्तिः । एवं च हिरण्यगर्भस्य सर्वप्राणिसमष्टिरूपतया श्रुत्यन्तरेषु प्रसिद्धेः तथात्वप्रतिपादनेनापि छान्दोग्यादिषु हिरण्यगर्भरूपत्वमादित्यस्याभिव्यञ्जितम्। एवं व्याहृतिशरीरादिविशिष्टं सत्यं सत्याख्यं ब्रह्म पश्यामीति प्रार्थनया-

"हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यरूपाय दृष्टये ।।
पूषन्नेकर्षे यम प्राजापत्य व्यूह रश्मीन् समूह ।
तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि ।।"

इतीशावास्यमन्त्रार्थः क्रोडीकृतः । तत्र हिरण्मयपात्रसादृश्यात् मण्डलं तत् सत्यविषयः

धर्मोऽस्यास्येति सत्यधर्मा, तस्मै षष्ठ्यर्थे चतुर्थी। सत्योपासकस्य मम तद्दृष्टये छादकम् अपावृणु । एक एव ऋषति गच्छति इति एकर्षिः । सूर्यस्य हि एकाकिन एव संचारो लोकानुभवसिद्धः। तदनुवादी च श्रुतिः "सूर्य एकाकी चरति" इति । यच्छति आलोकप्रदानेन सर्वानपि प्राणिनः स्वस्वकृत्येषु नियच्छतीति यः प्रजापतिः परमेश्वरः, **"प्रजापतिश्चरति गर्भे अन्तः ; अजायमानो बहुधा विजायते"** इति श्रुतेः । तस्यापत्यं प्राजापत्यः ; व्यूह रश्मीन्; त्वदीयकल्याणतमरूपदर्शनप्रवृत्तम् अदृष्टविघाताय व्यूह रश्मीन् विगमय तेजः तावकं समूह उपसंहर ।

अत्र यद्यपि ईशावास्यमन्त्राभ्यां समयविशेषदर्शनप्रार्थना तथाप्यत्र नित्यं पश्यानीत्यत्रैव प्रदर्शनप्रार्थना । एवमादित्यस्य ब्रह्माण्डजन्मव्याहृतिशरीरसत्याख्य ब्रह्मरूपत्वसकलप्राणसूक्ष्मांशसमष्टिरूपत्वश्रुतिप्रसिद्धं हिरण्यगर्भरूपत्वं पौराणिकवचनान्यपि स्पष्टीकुर्वन्ति ।

तथा हि : कूर्मपुराणे तावद् इन्द्रद्युम्नाख्यस्य ब्राह्मणस्य बहुकालतपश्चर्यया योगसिद्धस्य निर्देशात् मानसोत्तरपर्वते ब्रह्माणं द्रष्टुं गतस्य तत्र ब्रह्मदर्शनानन्तरं पठ्यते -

"सोऽपि योगिनमन्वीक्ष्य प्रणमन्तुमुपस्थितम् ।
प्रत्युद्गम्य स्वयं देवो विश्वात्मा परिषस्वजे ।।
परिष्वक्तस्य देवेन द्विजेन्द्रस्याथ देहतः ।
निर्गत्य महती ज्योत्स्ना विवेशादित्यमण्डलम् ।
ऋग्यजुःसामसंज्ञं तत् पवित्रं मङ्गलं परम् ।।
हिरण्यगर्भो भगवान् यत्रास्ते हव्यकव्यभुक् ।
द्वारं तद्योगिनामाद्यं वेदान्तेषु प्रतिष्ठितम् ।।

इति । तथा वसुमनसो नरपतेः पुलहादिभिः;
"यमाहुरेकं पुरुषं पुराणं परमेश्वरम् ।
तमाराध्य सहस्रांशुं तपसो योगमाप्नुयात् ।।"
इत्यादिवचनैः प्रोत्साहितस्य तथैवादित्योपासनरूपशतवर्षतपश्चर्यामुक्त्वा, पठ्यते-
"पूर्णे वर्षशते तस्य भगवानुग्रदीधितिः ।
प्रादुरासीन्महायोगी भानोर्मण्डलमध्यतः ।

स दृष्ट्वा देवपुरुषं मण्डलस्थं सनातनम् ।
स्वयंभुवमनाद्यन्तं ब्रह्माणं विस्मयं गतः ।।" इति ।

तत्रैव ईश्वरगीतासु शिववाक्येषु स्वस्य सकलकारणत्वरूपमहिमवर्णनार्थेषु पठ्यते -

"योगी सर्वजगत्साक्षी कालचक्रप्रवर्तकः ।
हिरण्यगर्भो मार्ताण्डः सोऽपि मद्देहसंभवः ।।"
इति । तथा तत्रैव आदित्यमहिमवर्णनप्रस्तावे पठ्यते--

"आदित्यमूलमखिलं त्रैलोक्यं नात्र संशयः ।
भवत्यस्माज्जगत्सर्वं सदेवासुरमानुषम्" ।। इति।
अनेन वचनेन सकलसृष्टृत्वोक्त्या हिरण्यगर्भत्वम् आदित्यस्य आविष्कृतम् । वराहपुराणे च--
"योऽसावात्मज्ञानशक्तिरेष एव सनातनः ।
स द्वितीयं यदैवैच्छत् तथा भानुस्थितोज्ज्वलम् ।।"
इति सर्गादौ एकाकितया स्थितस्य ईश्वरस्य द्वितीयत्वेन भानोराविर्भावोक्त्या;
"यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै ।"
"यो हवै तन्महद्यक्षं प्रथमजं वेद"
इत्यादिषु श्रुतिषु प्रथमजत्वेन प्रसिद्धहिरण्यगर्भरूपत्वं भानोराविष्कृतम् । एवं पुराणान्तरेष्वप्युदाहार्यम् ।।९।।

इत्यादित्यस्तवरत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ आदित्यस्य ध्येयत्वनिरूपणं नाम नवमः श्लोकः ।

अथादित्यन्तर्यामितया मण्डले संनिहितस्य परमेश्वरस्य महिमस्तवनार्था दशमैकादशद्वादश श्लोकाः । तत्र, **"य एषोऽन्तरादित्ये"** इत्यादि-तदीयरूपम(हि)मवर्णनार्थो दशमः श्लोकः ---

आदित्ये लोकचक्षुष्यवहितमनसां योगिनां दृश्यमन्तः
स्वच्छस्वर्णाभमूर्तिं विदलितनयनोदारदृश्याक्षियुग्मम् ।
ऋक्सामोद्गानगेष्णं निरतिशयलसल्लोककामेशभावं
सर्वावद्योतितत्वादुदितसमुदितं ब्रह्म शंभुं प्रपद्ये ।।१०।।

आदित्य इति । छान्दोग्ये--
"य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुः हिरण्यकेश आप्रणखात् सर्वं एव सुवर्णः " तथा, **"यथाकप्यासं पुण्डरीकमेवाक्षिणी"** इत्यादित्यमण्डलस्थस्य आदित्यान्तर्यामिणः परमेश्वरस्य रूपमुक्तम् । तत्र 'दृश्यते' इति योगिदृश्यत्वमुक्तम् । प्रणखः नखाग्रम् । सुवर्णः सुवर्णवत् उज्ज्वलः । कप्यासम्; कम्, उदकं रश्मिभिः पिबतीति कपिः तस्य आसम् ; "असु क्षेपणे" इति धातोः कर्मणि घञ् रविविकासिनमित्यर्थः । "कप्यासं मर्कटपृष्ठवत् लोहितमित्यर्थः" इति श्रीभगवत्पादीयव्याख्यानान्तरं कपिशब्दरूढ्यनुग्रहाय;एवं रूपोपदेशानन्तरम् ; **"तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः"** इति तस्य सर्वपापोत्तीर्णत्वरूपप्रवृत्तिनिमित्तम् उदिति नाम वर्णितम् । ततः; **"तस्य ऋक् च साम च गेष्णौ"** इति तद्विषये उद्गातृकर्तृक उच्चैर्गाने ऋक्सामयोः क्रमिकपर्वत्वमभिहितम्। गानक्रियारूपेण सामनि ऋचाम् अभिव्यक्तिः, सामाभिव्यक्ताभिः ताभिः परमेश्वरगुणवर्णनमिति हि क्रमः ।
ततश्च ; **"ये चामुष्मात् पराञ्चो लोकास्तेषां चेष्टे देवकामानां च"** इति लोकशब्दोक्तानाम् ऊर्ध्वलोकवर्तिनां देवानां कामशब्दोक्तानां तद्भोग्यसकलार्थानां च असौ ईशिता परमेश्वर इति । तस्मात् सकलदेवनियन्तृत्वं तदभिमतसकलार्थदातृत्वं च वर्णितम् ।

एवम् अधिदैवतम् आदित्यान्तर्यामिणः प्रतिपादनानन्तरम् **"अथाध्यात्मं अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते"** इत्यादिना अध्यात्माक्षिस्थस्य प्रतिपादनं कृतम्।

तत्र च 'तत्रैतस्य तदेवं यदमुष्य रूपं' "अथ यावदमुष्यगेष्णौ तौ गेष्णौ यन्नाम तन्नाम" इति आधिदैविकरूपादिकमेवाध्यात्मिकस्यापीत्यतिदिष्टम् । "ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां च" इति अधरलोकवृत्तिमनुष्यलोक-तत्कामेशितृत्वमस्योक्तमिति ।

ततः विशेषः सर्वोऽप्ययमर्थः श्लोके संगृहीतः-- अत्र अक्षियुग्मस्य दृश्यत्वोक्तिः शंभोः तृतीयलोचनस्य मुकुलितत्वेन दृश्यत्वाभिप्राया । आदित्ये लोकचक्षुषि इति व्याधिकरणे सप्तम्या लोककामेशितृत्वस्य निरतिशयत्वोक्तिः अधिदैवतमध्यात्मं च, "स एष ये चामुष्मात् स एष ये चैतस्मात्" इति विभज्योक्तस्य द्विविधस्यापि तस्य वस्तुतः चक्षुरादित्ययोः अभिन्ने अन्तर्यामिणि मेलनाभिप्रायात् ।।१०।।

इत्यादित्यस्तोत्ररत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ आदित्यान्तर्यामिमहिमवर्णनं नाम दशमः श्लोकः ।

अथास्यादित्यान्तर्यामिण उपासनाप्रकारं कृच्छ्राङ्गतदुपासनाप्रकारं च महाफलं प्रदर्श्य तेन तस्य महिमाविष्करणार्थः एकादशः श्लोकः---

ओमित्युद्गीथभक्तेरवयवपदवीं प्राप्तवत्यक्षरेऽस्मिन्
यस्योपास्तिः समस्तं दुरितमपनयत्यर्कबिम्बे स्थितस्य ।।
यत्पूजैकप्रधानान्यघमखिलमपि घ्नन्ति कृच्छ्रव्रतानि
ध्यातः सर्वोपतापान् हरतु परशिवः सोऽयमाद्यो भिषङ्नः ।।११।।

ओमिति । उद्गातृभिः क्रतुकाले स्तोत्रेषु क्रियमाणेषु स्तोत्रीयाणां साम्नां प्रस्तावोद्गीथप्रतिहारोपद्रवनिधनाख्याः पञ्च भक्तयः भागाः सन्ति । तत्र उद्गीथाख्यायाः द्वितीयभक्तेः अवयवभूतः तदादौ ओंकारः । तद्विषयोपासना क्रत्वर्थस्तोत्रकालेषु यजमानगामिफलार्थम् उद्गात्रा कर्तव्या उपक्रान्ता । छान्दोग्ये-- **"ओमित्येतदक्षरमुद्गीथमुपासीत"** इति; ततः--- **"तस्योपव्याख्यानम्"** इति तत्प्रपञ्चनं प्रतिज्ञाय तत्प्रपञ्चनमध्य एव; **"य एषोऽन्तरादित्ये"**

इत्यादिकमुप्रक्रान्तमिति । तत्र उद्गीथावयव ओंकार एव तादात्म्येन परमेश्वरस्य उपास्तिः विहिता । सा च समस्तदुरितापनयनफला; "य एष सर्वेभ्यः पाप्मभ्य उदितः" इत्येतदनन्तरम्;" उदेति ह वै सर्वेभ्यः पाप्मभ्यः य एवं वेद" इथि श्रवणात् । तथा कृच्छ्रव्रतान्यपि आदित्यमण्डले स्थितस्य परमेश्वरस्य पूजासहितानि सकलपापहराणि ।

तथा हि - गौतमस्मृतौ कृच्छ्रादिप्रधानमुपक्रम्य तदन्तर्गतोदकतर्पणविधाने तदर्था उभयतो नमस्काराद् द्वादश मन्त्राः समाम्नाताः--

नमो हमाय मोहमाय मंहमाय धून्वते तापसाय पुनर्वसवे नमो नमः (१)
मौञ्ज्यायोर्म्याय वसुविन्दाय सौम्याय शिवाय नमो नमः (२)
पाराय संपाराय महापाराय पारदाय पारयिष्णवे नमो नमः (३)
रुद्राय पशुपतये महादेवाय त्र्यम्बकाय एकचराधिपतये हरये शर्वायेशानाय उग्राय वज्रिणे घृणिने कपर्दिने नमो नमः (४)
सूर्याय आदित्याय नमो नमः (५)
नीलग्रीवाय शितिकण्ठाय नमो नमः (६)
कृष्णाय पिङ्गलाय नमो नमः (७)
ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशाय ऊर्ध्वरेतसे नमो नमः (८)
सत्याय पावकाय पावकवर्णाय कामाय कामरूपणे नमो नमः (९)
तीक्ष्णाय दक्षरूपिणे नमो नमः (१०)
सोभ्याय सुपूरुषाय महापुरुषाय मध्यमपुरुषाय उत्तमपुरुषायं ब्रह्मचारिंणे नमो नमः (११)

चन्द्रललाटाय कृत्तिवाससे पिनाकहस्ताय नमो नमः" इति । अनन्तरं तु-- "एतदेव आदित्योपस्थानम्; एता एवाज्याहुतयः" इति होमोपस्थानयोरपि एते मन्त्रा विनियुक्ताः । एवं तर्पणोपस्थानहोमरूपशिवपूजासहितानि कृच्छ्रव्रतानि गौतस्मृतौ उक्तानि । एवंभूतानि कृच्छ्रव्रतानि उक्ततर्पणादिरहितेभ्यः स्मृत्यन्तरोक्त-प्रकारेभ्यः कृच्छ्रव्रतेभ्यः गुरुतरत्वाद् एनः सु गुरुषु गुरूणि लघुषु लघूनीति गौतमन्यायात् अभ्यस्तानि सकलपापहराणि । गौतमस्मृतावेव-- "प्रथमं चरित्वा शुचिः पूतः कर्मण्यो भवति; द्वितीयं चरित्वा यत्किंचिदन्यत् महापातकेभ्यः पापं कुरुते तस्मात् प्रमुच्यते; तृतीयं चरित्वा सर्वस्माद् एनसो मुच्यते" इत्युक्तत्वात् ।

कृच्छ्रव्रतानीति बहुवचनम् ; कृच्छ्राऽतिकृच्छकृच्छ्रातिकृच्छ्रेति प्रकारान्तराणां गौतमोक्तानां कृच्छ्राणां ग्रहणार्थम् । उपतापा व्याधयः व्याध्यपनयोपयोगित्वेन ; **"प्रथमो देव्यो भिषक्" "भिषक्तमं त्वां भिषजां शृणोमि"** इत्यादिमन्त्रोक्तानुसंधानार्थम् आद्यो भिषक् इति विशेषणम् ।।११।।

इत्यादित्यस्तोत्ररत्नव्याख्यायां रत्नप्रकाशिकाख्यां वृत्तौ आदित्योपासनमहिमाविष्करणं नामैकादशः श्लोकः ।।

अथ, "आदित्यो वा एष एतन्मण्डलम्" इत्यादिप्रकरणोक्तम्; **"असौ यस्ताम्रो अरुणः"** इत्यादिमन्त्रोक्तं चास्य महिमानमाविष्कर्तुमस्य शिवस्य गायत्र्युपास्यत्वं च दर्शयितुं द्वादशश्लोकः---

आदित्यो मण्डलार्चिः पुरुषविभिदयाद्यन्तमध्यागमात्म
न्या गोपालाङ्गनाभ्यो नयनपथजुषां ज्योतिषा दीप्यमानम् ।
गायत्रीमन्त्रसेव्यं निखिलजनधियां प्रेरकं विश्वरूपं
नीलग्रीवं त्रिणेत्रं शिवमनिशमुमावल्लभं संश्रयामि ।।१२।।

आदित्य इति । तैत्तिरीयाणामुपनिषदि--
"आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तदृचा मण्डलं स ऋचां लोकोऽथ य एष एतन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ स एष एतन्मण्डलेऽर्चिषि पुरुषस्तानि यजूꣳषि स यजुषा मण्डलꣳस यजुषां लोकः सैषा त्रय्येव विद्या तपति"

इति मण्डलार्चिःपुरुषाणाम् ऋग्वेदसामवेदयजुर्वेदात्मकत्वमुक्तम् ; तत्, आद्यन्तमध्यागमात्मन् इत्यनेनानूदितम् । आद्यागमः आद्यवेदः ऋग्वेदः ; मध्यवेदः यजुर्वेदः ; अन्त्यवेदः सामवेदः ; अत एव आद्यवेदस्य आद्याक्षरम् ; "अग्निमीले" इति अकारः, मध्यवेदस्य मध्याक्षरम्, "योनिः समुद्रोबन्धुः" इत्युकारः ;अन्तिमवेदस्य अन्तिमाक्षरम् ; समानं परम्' इति मकारः । एवं त्रिभिरेतैः अक्षरैः त्रयीसारप्रणवस्य निष्पत्तिरिति अभियुक्ताः ।

किं च --

"असौ योऽवसर्पति नीलग्रीवो विलोहितः ।
उतैनं गोपा अधृशन्नाधृशन्नुदहार्यः ।
उतैनं विश्वा भूतानि स दृष्टो मृडयाति नः ।।"

इति मन्त्रोक्तसर्वभूतदृश्यत्वं विसृत्वरविग्रहतेजोद्वारेण । न तु स्वविग्रहेणैवेति तदर्थो द्वितीयपादेनानूदितः (**मन्त्रोक्त सर्वभूत दृश्यत्वं विशृत्वर विग्रहतजो द्वारेण ततुस्व विग्रहेणैवेति तदर्थो द्विदीय पादेनानूदितः**।) मन्त्रे 'उदहार्यः' इति प्रातर्जलमाहरन्त्यः स्त्रियः उक्ताः । गायत्रीमन्त्रसेव्यमिति ; गायत्र्यर्थतया तदुपास्यत्वमुक्तम् । गायत्र्यर्थं च भर्गशब्दयोगात् भर्गशब्दप्रथमान्तस्य तृतीयपादे यच्छब्दविशेष्य समर्पकतया अन्वयः;

"यस्य येनार्थसंबन्धो दूरस्थेनापि तेन सः ।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ।।"

इति वार्तिककारवचनात् । **"अर्थतो ह्यसमर्थानामानन्तर्येण संबन्धः"** इति विश्वजिदधिकरणे जैमिनिना सूत्रितत्वाच्च ।

न हि भर्गः इति प्रथमान्तशब्दः वरेण्यम् इत्यस्य द्वितीयान्तस्य विशेष्यता कथंचित् कल्पनीयेति वाच्यम् । तत्पदस्य विशेष्यस्य सद्भावात् ; **"ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः"** इति तस्य ब्रह्मवाचकत्वश्रवणात् । न च तस्य यत्पदप्रतिनिर्देशार्थतया ब्रह्मवाचकत्वं न युक्तमिति शङ्क्यम् । उत्तरवाक्यगतयत्पदस्य तन्निर्देशपदान्तरवति पूर्ववाक्ये तत्पदानपेक्षत्वंस्य व्युत्पत्तिसिद्धत्वात् । लोकवेदयोः तथैव प्रयोगदर्शनात् । तस्मात् भर्ग इत्यस्य पूर्ववाक्यें तावन्न संबन्धः । उत्तरवाक्ये च तत्संबन्धोऽवश्यमपेक्षितः, यत्पदस्य विशेष्यसाकाङ्क्षत्वांत् ।

न च पूर्ववाक्यगतब्रह्मवाचकं तत्पदं तद्विशेष्यं स्यादिति वाच्यम् । पुंलिङ्गस्य यत्पदस्य प्रथमं पुंलिङ्गविशेष्यान्वयं विना तत्पदसामानाधिकरण्यायोगात् इति । अतः भर्गशब्दस्य उत्तरवाक्य एवान्वयः । तथा च योगयाज्ञवल्क्यस्मृतिः---

"देवस्य सवितुर्मध्ये यो भर्गो नो धियः क्रमात् ।
प्रचोदयात् तं वरेण्यं धीमहीत्यन्वयक्रमात् ।।"

इति । यदि च भर्गपदशब्दस्य पूर्ववाक्य एव संबन्धः, तदपि अस्य अकारान्ततया शिववाचकत्वयेव; **"व्यत्ययो बहुलम्"** इति च्छान्दसेन विभक्तिव्यत्ययेन; **"द्वितीयार्थे**

प्रथमा" इति प्रथमान्तता कल्पनीया । एवं **"सुपां सुलुक्"** इत्यादिसूत्रेण, "द्वितीयायाश्छान्दसस्वादेशः" इति द्वितीयान्तता चोपपादनीया ।

न च-- भर्गशब्दोऽयं सकारान्त इति कल्पनीयम् ; तथा सति द्वितीयान्तत्वम् ऋजुमार्गेणोपपद्यत इति वाच्यम् । प्रातिपदिकस्य आकारान्तत्वेन रूढ्यपरित्यागे संभवति सकारान्तत्वं परिकल्प्य तस्य यौगिकार्थान्तरान्वेषणक्लेशायोगात् । **"एष रुद्रो भर्गाख्यो ब्रह्मवादिनः"** इति मैत्रायणीयश्रुतौ ; **"भर्गमयो द्वितीयः द्वितीयः पादः"** इति तल्वकारश्रुतौ ; **"आदित्यान्तर्गतं यच्च भर्गाख्यं वै मुमुक्षुभिः"** इति योगयाज्ञवल्क्यस्मृतौ; **"तद्भर्गाख्यं किमपि परमं धाम सोऽहं प्रपद्ये"** इति साम्बस्तुतौ गायत्रीगतस्य भर्ग इत्यस्यानुवाददर्शनाच्च । सकारान्तत्वकल्पनेऽपि अकारान्त- रूढ्यसारेण शिवस्यैव तदर्थतया प्राप्तेः ; **"त्मना महस्रपोषिणम्"; "चक्षोः सूर्यो अजायत"** ; **"सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्"** इत्यादिवाक्येषु त्मनां चक्षोः ब्रह्मम् इत्यादिपदानां छान्दसेन वर्णलोपविकारेणात्मादीनां प्रसिद्धार्थानामेव ग्रहणम् । तस्मात् भर्गः इत्येतदनुसारेण गायत्रीमन्त्रः शिवपरः इति शिवस्य तदुपास्यत्वसिद्धिः ।

किं च - सकलजगत्प्रेरकः सर्वान्तर्यामी शिव एवेति ततोऽपि तस्य तत्सिद्धिः। सर्वान्तर्यामी शिव एव - **"यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरम्, यः पृथिवीमन्तरो यमयति"** इत्यादिषु पृथिव्यादिषु पर्यायेषु सर्वेष्वपि; **"एष ते आत्मान्तर्याम्यमृतः"** इत्यमृतशब्दश्रवणात् । अमृतशब्दस्य जाबालोपनिषदि - **"किं जप्येनामृतत्वं ब्रूहि"** इति ब्रह्मचारिणां प्रश्नोत्तरे; **"शतरूद्रीयेणेति एता नि ह वा अमृतस्य नामधेयानि"** इति ; याज्ञवल्क्ये - शिवेनाम्नाममृतत्वोक्त्या शिवनामत्वावधारणात् । अपि च - अन्तर्यामिणः शिवस्य पृथिव्यादिसर्वशरीरकत्वमवगमयति । **"विश्वं रूपं यतस्तस्य विश्वरूपः शिवः स्मृतः"** इति महाभारते च शिवे विश्वरूपनामनिर्वचनमपि तदवगमयति । तस्मात् शिव एव गायत्रीमन्त्रोपास्यः ।

यत्तु कूर्मपुराणे-- वसुमनसे राज्ञे गायत्र्या भगवन्तम् आदित्यं बहुकालमुपासितवते वरं दातुमुपास्यस्य प्रथमं हिरण्यगर्भरूपेण, ततः शिवरूपेण

चाविर्भाववचनम् ; तद् गायत्र्या सवितुः अन्तर्यामी शिव उपासित इति । सवितुरपि विशेषणतया उपास्यकोटिप्रवेशात् सवितुश्च हिरण्यगर्भरूपत्वात् उपपन्नम् । चतुर्थपादे; "नीलग्रीवम्" इत्यनेन ; **"असौ योऽवसर्पति निलग्रीवो विलोहितः"** इति मन्त्रभागार्थोऽनुसंहितः । उमावल्लभम् इत्यनेन ; **"आदित्यो वा एष एतन्मण्डलं तपति"** इत्यादिप्रकरणावसाने श्रुतस्य, **"नमो हिरण्यपतयेऽम्बिकापतय उमापतये नमो नमः"** इति मन्त्रभागस्यार्थोऽनुसंहितः।

"एष रुद्रो महादेवः कपर्दी च त्रिलोचनः ।
आदित्यो भगवान् सूर्यो नीलग्रीवस्त्रिलोचनः ।।
अधीयते सहस्रांशुः सामगाध्वर्युहोतृभिः ।।"
इत्यादिपुराणवचनार्थः त्रिणेत्रमित्यनेन अनुसंहितः इत्यादिसर्वमनवद्यम् ।।

अथास्मिन् द्वादशश्लोकीरूपस्तोत्रे रथमहिमस्तवनाद्यर्थश्लोकविभागप्रदर्शनार्थः त्रयोदशः श्लोकः--

अभ्राकल्पः शताङ्गस्थिरफणितिमयं मण्डलं रश्मिभेदाः
साहस्रास्तेषु सप्तश्रुतिभिरभिहिताः किंचिदूनाचलाक्षाः ।
एकैकेषां चतस्रस्तदनु दिनमंणेरादिदेवस्य तिस्रः
क्लृप्ताः तत्तत्प्रभावप्रकटनमहिताः स्रग्धरा द्वादशैताः ।।१३।।

अभ्रेति :- साहस्राः सहस्रसंख्यावन्तः किंचिदूनाः लक्षा चतुःसहस्रोनलक्षसंख्याः, "वा लक्षा नियुतं च तत्" इत्यमरसिंहोक्तेः लक्षेतिपाक्षिकी त्रिलिङ्गता । रथादिवर्णन-प्रवृत्तस्तोत्रवृत्तगुणालंकारादिवैचित्र्याभावेऽपि रथादिप्रभावप्रदर्शनेन तदुपासकोपादेयता तत्तत्प्रभावप्रकटनमहितेत्यादिनाविष्कृता । स्रग्धरेति वृत्तनाम ।।१३।।

इत्यादित्यस्तोत्ररत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ श्लोकविभागप्रदर्शनं नाम त्रयोदशः श्लोकः ।।

अथ श्रोतॄणामुत्साहजननाय स्तोत्रपाठस्य फलप्रदर्शनार्थश्चतुर्दशः श्लोकः ---

दुःस्वप्नं दुर्निमित्तं दुरितमखिलमप्यमयानप्यसाध्यान्
दोषान् दुःस्थानसंस्थग्रहणविजनितान् दुष्टभूतान् ग्रहादीन् ।
निर्धूनोति स्थिरां च श्रियमिह लभते मुक्तिमभ्येति चाग्रे
संकीर्त्य स्तोत्ररत्नं सकृदपि मनुजः प्रत्यहं पत्युरह्नाम् ।।१४।।

दुःस्वप्नमिति । श्लोकार्थः सुगमः ।।१४।।

इत्यादित्यस्तोत्ररत्नव्याख्यायां रत्नप्रकाशिकायां वृत्तौ फलश्रुतिनिरूपणं नाम चतुर्दशः श्लोकः ।।

।। इति श्रीमदप्पय्यदीक्षितेन्द्राणां कृतिषु श्रीमदादित्यस्तोत्ररत्नं संपूर्णम् ।।

।। इति श्रीमद्भारद्वाजकुलधिकौस्तुभश्रीमदद्वैतविद्याचार्यविश्वजिद्याजि श्रीरङ्गराजाध्वरिवरसूनोरप्पय्यदीक्षितेन्द्रस्य कृतिष्वादित्यस्तोत्ररत्नस्य रत्नप्रकाशिकाख्या वृत्तिः संपूर्णा ।।

****

शिवाय गुरवे नमः

श्लोकानुक्रमणिका

शिखरिणीमाला

१. श्रीकान्तद्रुहिणोपमन्यु	७९
२. परशिवपरोत्कर्ष	८१
३. प्रभावं ते नालं	८२
४. त्वमेवात्मन् विश्वाधिक	८२
५. वराकैरेतैः किं	८४
६. विलोक्य ह्येकैकं	८४
७. यमग्रे दृष्ट्वापि	८५
८. त्वयि श्रद्धा नाथ	८५
९. तव श्रीपादाब्जे	८६
१०. विधूतान्तर्ध्वान्ता	८६
११. अपारं विज्ञातुं	८८
१२. अनन्तं	९०
१३. गुणातीतोऽपि त्वं	९१
१४. अपास्य	१०५
१५. श्रुतं पूर्णैश्वर्यं	१०९
१६. उपक्रान्तिं	११४
१७. जडानीशौ	१२२
१८. प्रवृत्तेष्वन्यार्थं	१२८
१९. अमुष्मिन्नाम्नातः	१३२
२०. पुरोवादश्रुत्यन्तर	१३३
२१. इयं मानोत्कृष्टा	१३४
२२. क्वचित् पुंसूक्तस्य	१३७
२३. मनूनां रौद्राणां	१३८
२४. उरीकर्तुं युक्ता	१३९
२५. वदन् सर्वात्मत्वं	१४७
२६. अमुष्मिन्नन्तर्धिस्तव	१४९
२७. इहात्मीये रूपे	१५१
२८. त्वमेवान्तर्यामीत्य	१५२
२९. महाभूतान्यर्कं	१५५
३०. शिवं नीलग्रीवं	१६०
३१. तया संक्षिप्योक्तां	१६२
३२. श्रुतीनां मूर्धानशशुभद	१७३
३३. विधत्ते माण्डूक्य	१७६
३४. अनन्यप्राप्यं	१७७
३५. नमस्यानामेकं	१७८
३६. असङ्ख्याभिश्शाखा	१८२
३७. प्रभावं ते भीम	१८६
३८. प्रवन्धो वाल्मीकेरपि	१९२
३९. प्रसिद्धाःस्मर्तार	१९३
४०. निबन्धुस्सूत्राणां	१९७
४१. पदं यत् ब्रह्मेलि	१९८
४२. त्वदन्यं क ब्रूमः	१९९
४३. प्रयुक्तं त्वय्येव	२०२
४४. यदि स्यादैश्वर्यं	२०२
४५. अलम्मानैरन्यैरखिल	२०४
४६. अनन्यार्थैशब्दैश्श्रुतिषु	२०६
४७. यदन्योन्याधिक्यं	२१०
४८. तवैश्वर्यं	२२१
४९. समुत्पन्नस्त्वत्तः	२२६
५०. क्वचित्कल्पे वेधाः	२२८
५१. हरं केचित्	२३०
५२. त्र्याणां देवानां	२३३
५३. त्वमेकस्सर्वेषां	२३४
५४. मनुष्यत्वं प्राप्य	२३५
५५. द्विजानां गायत्री	२३८
५६. यदग्नौ विप्राणा	२४८
५७. गतिस्त्वं प्राप्तानां	२५०
५८. सहिष्णुस्त्वं	२५१
५९. महेश त्वत्पादाम्बुरुह	२५२
६०. सुखं तद्भूमाख्यं	२५५
६१. अवश्यं कर्तव्ये	२६२
६२. भ्रमाल्लोभान्मोहान्मत	२६५
६३. इति विरचिता	२६५
६४. क्वाहं मूढः	२६६

श्लोकानुक्रमणिका

आदित्यस्तोत्ररत्नम्

१. विस्तारायाममानं	२६७
२. आदित्यैरप्सरोभिर्मुनि	२७१
३. निर्गच्छन्तोऽर्कबिम्बा	२७८
४. श्रेष्ठास्तेषां सहस्रे	२८१
५. आदित्यानाश्रिताः	२८४
६. आदित्यं मण्डलान्तः	२८५
७. यच्छक्त्याधिष्ठितानां	२८९
८. स्वःस्त्रीगन्धर्वयक्षा	२९१
९. ब्रह्माण्डे यस्य	२९२
१०. आदित्ये लोकचक्षुष्य	२९८
११. ओमित्युद्गीथभक्ते	२९९
१२. आदित्यो मण्डलार्चिः	३०१
१३. अभ्राकल्पः	३०४
१४. दुःस्वप्नं दुर्निमित्तं	३०५

RASHTRIYA SANSKRIT SANSTHAN DEEMED UNIVERSITY (UNDER MINISTRY OF H.R.D. GOVT. OF INDIA) ★
ACCESSION NO. 24806
DATE 16/6/08

CENTRAL SANSKRIT UNIVERSITY

(Under Ministry at Education, Govt. of India)

GURUVAYOOR CAMPUS LIBRARY

Due Date Slip

Title : Sivadvaita nirnayaha

Author : Appayadeekshithendra

Acc. No. 24806

This book should be returned to the library on or before the date last stamped. Otherwise over-due charges of ₹1/- per book per day will be collected.

Due date of Return	Due date of Return	Due date of Return

CSUGCKL
R65 1
24806
Acc.No: 24806